* श्रीगणेशायनमः *

स्कन्दपुराणस्थकाशीखण्डम्

——:०:——

उत्तरार्द्धम्

एकपञ्चाशत्तमोऽध्यायः

अरुणवृद्धकेशवविमलगङ्गादित्यानाम्वर्णनम्

अगस्तिरुवाच

पार्वतीहृदयानन्द सर्वज्ञाङ्गभवप्रभो ।। किञ्चित्प्रष्टुमनाःस्वामिंस्तद्भवान्वक्तुमर्हति

दक्षप्रजापतेः पुत्री कश्यपस्य परिग्रहः । गरुत्मतः प्रसूः साध्वीकुतोदास्यमवापसा

स्कन्द उवाच

हञ्जिका त्वं यथाप्राप्ताविनता सा तपस्विनी । तदप्यहंसमाख्यामिनिशामयमहामते

कद्रूरजीजनत्पुत्राञ्छतं कश्यपतः पुरा । उलूकमरुणन्तार्क्ष्यमसूत विनता त्रयम् ॥

कौशिको राज्यमाप्याऽपि श्रेष्ठत्वात्पक्षिणाम्मुने ।।

निर्गुणत्वाच्च तैः सर्वैः स राज्यादवरोपितः ॥ ५ ॥

क्रूराक्षोऽयंदिवान्धोऽयंसदावक्रनखस्त्वसौ । अतीवोद्वेगजनकंसर्वेषामस्यभाषणम्

इत्थं तस्यगुणग्रामान्विकथ्यबहुशःखगाः । नाद्यापिवृण्वतेराज्येकमपिस्वैरचारिणः

कौशिकेऽथ तथा वृत्तेपुत्त्रवीक्षणलालसा । अण्डम्प्रस्फोटयामासमध्यमंविनतातदा

पूर्णेवर्षसहस्रे तु प्रस्फोटं च घटसम्भव । तदभेदितयोत्सुक्यादण्डमष्टमके शते

तावत्सर्वाणि गात्राणि तस्याऽतिमहसःशिशोः ।
ऊर्वोरुपरिसिद्धानि तदण्डान्तर्निवासिनः ॥ १० ॥

अण्डान्निर्गतमात्रेण क्रोधारुणमुखश्रिया । अर्धनिष्पन्नदेहेन शिशुनाशा पिताप्रसूः

जनयित्रि! त्वया दृष्ट्वा काद्रवेयान् स्वलीलया ।
खेलतो मातुरुत्सङ्गे यदण्डं व्याधि तद् द्विधा ॥ १२ ॥

तदनिष्पन्नसर्वाङ्गः शपामि त्वां विहङ्गमे । तेषामेवैधिदासीत्वं सपत्न्यङ्गभुवामिह वेपमानाऽथ तच्छापादिदम्प्रोवाचपक्षिणी । अनूरो! ब्रूहि मे शापावसानम्मातुरङ्गज

अनूरुरुवाच

अण्डन्तृतीयं मा भिन्धि ह्यनिष्पन्नम्ममैव हि ।
अस्मिन्नण्डेभविष्यो यः स ते दास्यं हरिष्यति ॥ १५ ॥
इत्युक्त्वा सोऽरुणोऽगच्छदुड्डीयाऽऽनन्दकाननम् ।
यत्र विश्वेश्वरो दद्यादपि पङ्गोः शुभां गतिम् ॥ १६ ॥

एतत्तेपृच्छतः ख्यातंविनतादास्यकारणम । मुने!प्रसङ्गतोवच्मिअरुणादित्यसम्भवम् अनूरुत्वादनूरुर्योऽरुणःक्रोधारुणोयतः । वाराणस्यान्तपस्तप्त्वातेनाराधिदिवाकरः सोऽपिप्रसन्नोदत्त्वाथवरांस्तस्माअनूरवे । आदित्यस्तस्यनाम्नाभूदरुणादित्यइत्यपि

अर्क उवाच

तिष्ठानूरो!ममरथे सदैव विनतात्मज !। जगताञ्चहितार्थाय ध्वान्तं विध्वंसयन्पुरः

अत्र त्वत्स्थापिताम्मूर्ति ये भजिष्यन्ति मानवाः ।
वाराणस्याम्महादेवोत्तरे तेषां कुतो भयम् ॥ २१ ॥

येऽर्चयिष्यन्ति सततमरुणादित्यसञ्ज्ञकम् । मामत्रतेषां नोदुखंनदारिद्र्यं नपातकम् व्याधिभिर्नाभिभूयन्तेनोपसर्गैश्च कैश्चन । शोकाग्निनानदह्यन्तेह्यरुणादित्यसेवनात् अथस्यन्दनमारोप्य नीतवानरुणं रविः । अद्याऽपि स रथे सौरे प्रातरेव समुद्यति यः कुर्यात्प्रातरुत्थाय नमस्कारं दिने दिने । अरुणायससूर्यायतस्य दुःखभयं कुतः

अरुणादित्यमाहात्म्यं यःश्रोष्यतिनरोत्तमः । नतस्यदुष्कृतंकिञ्चिद्भविष्यति कदाचन

स्कन्द उवाच

वृद्धादित्यस्यमाहात्म्यंश्रृणुतेकथयाम्यहम् । यस्यश्रवणमात्रेणनरोनोदुष्कृतम्भजेत् पुरात्रवृद्धहारीतो वाराणस्याम्महातपाः । महातपःसमृद्ध्यर्थंसमाराधितवान्रविम्

मूर्ति संस्थाप्य शुभदां भास्वतः शुभलक्षणाम् ।
दक्षिणेन विशालाक्ष्या दृढभक्तिसमन्वितः ॥ २६ ॥

तुष्टस्तस्मैवरम्प्रादाद्ब्रध्नोवृद्धतपस्विने । अलं विलम्ब्ययाचस्वकस्तेदेयो वरो मया सोऽथप्रसन्नाद् द्युमणेरवृणीतवरम्मुनिः । यदिप्रसन्नोभगवान् युवत्वन्देहि मे पुनः तपःकरणसामर्थ्यंस्थविरस्यन मे यतः । पुनस्तारुण्यमाप्तोऽहं चरिष्याम्युत्तमन्तपः तपएवपरो धर्मस्तपएवपरं वसु । तपएवपरः कामो निर्वाणं तप एवहि ऋतेन तपसः काऽपिलभ्याऐश्वर्यसम्पदः । पदं ध्रुवादिभिः प्रापिकेवलं तपसोबलात् ततस्तपश्चरिष्यामि लोकद्वयमहत्त्वदम् । प्राप्यत्वद्वरदानेन यौवनं सर्वसम्मतम् धिग्जरां प्राणिनामत्रययासर्वोविरज्यति । जरातुरेन्द्रियग्रामेस्त्रियोपिनयतःस्ववसात् वरंमरणमेवास्तु माजरास्त्वतिशोच्यकृत् । क्षणंदुःखञ्च मरणञ्जरादुखं क्षणेक्षणे काङ्क्षन्तिदीर्घतपसे चिरमायुर्जितेन्द्रिया। धनंदानाय पुत्राय कलत्रम्मुक्तये धियम् वृद्धस्यवार्धकम्ब्रध्नस्तत्क्षणादपहृत्य वै । ददौ च चारुताहेतुन्तारुण्यम्पुण्यसाधनम् एवंसवृद्धहारीतो वाराणस्यां महामुनिः । सम्प्राप्य यौवनम्ब्रध्नात्तपउग्रं चचारह वृद्धेनाराधितोयस्माद्धारीतेनतपस्विना । आदित्योवार्धकहरो वृद्धादित्यस्ततःस्मृतः वृद्धादित्यं समाराध्य वाराणस्यांघटोद्भव !। जरादुर्गतिरोगघ्नम्बहवः सिद्धिमागताः

वृद्धादित्यं नमस्कृत्य वाराणस्यां रवौ नरः ।
लभेदभीप्सितांसिद्धिं न क्वचिद्दुर्गतिंलभेत् ॥ ४३ ॥

स्कन्द उवाच

अतःपरं श्रृणुमुने!केशवादित्यमुत्तमम् । यथा तु केशवम्प्राप्य सविता ज्ञानमाप्तवान् व्योम्निसञ्चरमाणेन सप्ताश्वेनादिकेशवः । एकदाऽदर्शि भावेन पूजयँल्लिङ्गमैश्वरम्

कौतुकादिवउत्तीर्यहरेरविरुपाविशत् । निःशब्दोनिश्चलःस्वस्थोमहाश्चर्यसमन्वितः
प्रतीक्षमाणोऽवसरंकिञ्चित्प्रष्टुमनाहरिम् । हरिं विसर्जितार्चञ्च प्रणनामकृताञ्जलिः
स्वागतन्तेहरिःप्राहबहुमानपुरःसरम् । स्वाभ्याशआसयामास भास्वन्तंनतकन्धरम्
अथावसरमालोक्य लोकचक्षुरधोक्षजम् । नत्वा विज्ञापयामास कृतानुज्ञोऽसुरारिणा

रविरुवाच

अन्तरात्मासिजगतांविश्वम्भरजगत्पते! । तवापिपूज्यःकोप्यस्तिजगत्पूज्यात्रमाधव
त्वत्तश्चाविर्भवेदेतत्त्वयिसर्वम्प्रलीयते । त्वमेव पाता सर्वस्य जगतोजगतांनिधे
इत्याश्चर्यंसमालोक्यप्राप्तोस्म्यत्रतवान्तिकम् । किमिदम्पूज्यतेनाथभवताभवतापहृत्
इतिश्रुत्वा हृषीकेशःसहस्रांशोरुदीरितम् । उच्चैर्मा शंसऽसप्ताश्वं वारयन्करसञ्ज्ञया

श्रीविष्णुरुवाच

देवदेवो महादेवो नीलकण्ठ उमापतिः । एकएवहि पूज्योऽत्र सर्वकारणकारणम्

अत्र त्रिलोचनादन्यं समर्चयति योऽल्पधीः ।
सलोचनोऽपि विज्ञेयो लोचनाभ्यां विवर्जितः ॥ ५५ ॥
एको मृत्युञ्जयः पूज्यो जन्ममृत्युजराहरः ।
मृत्युञ्जयं किलाभ्यर्च्य श्वेतो मृत्युञ्जयोऽभवत् ॥ ५६ ॥

कालकालंसमाराध्यभृङ्गीकालंजिगायवै । शैलादिमपितत्याजमृत्युर्मृत्युञ्जयार्चकम्
विजिग्येत्रिपुरंयस्तु हेलयैकेषुमोक्षणात् । तंसमभ्यर्च्यभूतेशंकोनपूज्यतमोभवेत्
त्रिजगज्जयिनोहेतोस्त्र्यक्षस्याराधनम्परम् । कोनाराधयतिब्रध्नसारस्यस्मरविद्विषः
यस्याक्षिपक्ष्मसङ्कोचाज्जगत्सङ्कोचमेत्यदः ।विकस्वरंविकासाच्चकस्यपूज्यतमोनसः
शम्भोर्लिङ्गंसमभ्यर्च्यपुरुषार्थचतुष्टयम् । प्राप्नोत्यत्रपुमान्सद्योनात्रकार्याविचारणा
समर्च्यशाम्भवंलिङ्गमपिजन्मशतार्जितम् । पापपुञ्जंजहात्येव पुमानत्रक्षणाद्ध्रुवम्
किंकिनसम्भवेदत्रशिवलिङ्गसमर्चनात् । पुत्राःकलत्रक्षेत्राणिस्वर्गोमोक्षोप्यसंशयम्
त्रैलोक्यैश्वर्यसम्पत्तिर्मयाप्राप्तासहस्रगो !। शिवलिङ्गार्चनादेकात्सत्यंसत्यंपुनः पुनः
अयमेवपरोयोगस्त्विदमेव परन्तपः । इदमेव परंज्ञानंस्थाणुलिङ्गंयदर्च्यते ॥ ६५ ॥

यैर्लिङ्गंसकृदप्यत्र पूजितम्पार्वतीपतेः । कुतोदुःखभयन्तेषां संसारे दुःखभाजने
सर्वम्परित्यज्यरवे यो लिङ्गंशरणंगतः । न तम्पापानिबाधन्ते महान्त्यपि दिवाकर
लिङ्गार्चनेभवेद्बुद्धिस्तेषामेवाऽत्रभास्कर । येषाम्पुनर्भवच्छेदञ्चिकीर्षति महेश्वरः

न लिङ्गाराधनात्पुण्यंत्रिषुलोकेषु चाऽपरम् ।
सर्वतीर्थाभिषेकः स्याल्लिङ्गस्नानाम्बुसेवनात् ॥ ६९ ॥
तस्माल्लिङ्गन्त्वमप्यर्क! समर्चय महेशितुः ।
सम्प्राप्तंपरमांलक्ष्मीम्महातेजोभिजृम्भणीम् ॥ ७० ॥

इति श्रुत्वाहरेर्वाक्यन्तदारभ्यसहस्रगुः । विधायस्फाटिकंलिङ्गंमुनेद्याऽपिसमर्चयेत्
गुरुत्वेनतदाकल्प्य विवस्वानादिकेशवम् । तत्रोपतिष्ठतेद्याऽपिउत्तरेणादिकेशवात्

अतः सकेशवादित्यः काश्याम्भक्ततमोनुदः ।
समर्चितः सदादेयान्मनसोवाञ्छितम्फलम् ॥ ७३ ॥
केशवादित्यमाराध्य वाराणस्यां नरोत्तमः ।
परमं ज्ञानमाप्नोति येन निर्वाणभाग्भवेत् ॥ ७४ ॥

तत्रपादोदकेतीर्थे कृतसर्वोदकक्रियः । विलोक्यकेशवादित्यं मुच्यते जन्मपातकः
अगस्ते! रथसप्तम्यां रविवारोयदाप्यते । तदापादोदकेतीर्थे आदिकेशवसन्निधौ

स्नात्वोषसि नरो मौनी केशवादित्यपूजनात् ।
सप्तजन्मार्जितात्पापान्मुक्तो भवति तत्क्षणात् ॥ ७७ ॥

यद्यज्जन्मकृतम्पापंमयासप्तसुजन्मसु । तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी
एतज्जन्मकृतं पापं यच्चजन्मान्तरार्जितम् । मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः
इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके । सप्तव्याधिसमायुक्तं हरमाकरिसप्तमि!

एतन्मन्त्रत्रयं जप्त्वा स्नात्वा पादोदके नरः ।
केशवादित्यमालोक्य क्षणान्निष्कलुषो भवेत् ॥ ८१ ॥
केशवादित्यमाहात्म्यं शृण्वञ्छ्रद्धासमन्वितः ।
नरो न लिप्यते पापैः शिवभक्तिं च विन्दति ॥ ८२ ॥

स्कन्द उवाच

अतः परंश्रृणुमुने विमलादित्यमुत्तमम् । हरिकेशवनेरम्ये वाराणस्यां व्यवस्थितम्
उच्चदेशेऽभवत्पूर्वं विमलोनामबाहुजः । सप्राक्तनात्कर्मयोगाद्विमलेपथ्यपि स्थितः
कुष्ठरोगमवाप्योच्चैस्त्यक्त्वादारानगृहंवसु ।वाराणसींसमासाद्यब्रध्नमाराधयत्सुधीः
करवीरैर्जपाभिश्च गन्धकैः किंशुकैः शुभैः । रक्तोत्पलैरशोकैश्च ससमानर्चभास्करम्
विचित्ररचनैर्माल्यैः पाटलाचम्पकोद्भवैः । कुङ्कुमागुरुकर्पूरमिश्रितैः शोणचन्दनैः
देवमोहनधूपैश्च बह्वामोदतताम्बरैः । कर्पूरवर्तिदीपैश्च नैवेद्यैर्घृतपायसैः ॥ ८८ ॥
अर्घदानैश्च विधिवत्सौरैः स्तोत्रजपैरपि । एवंसमाराधयतस्तस्यार्कोवरदोऽभवत्
उवाच च वरंब्रूहि विमलामलचेष्टित !। कुष्ठश्च ते प्रयात्वेष प्रार्थयाऽन्यंवरं पुनः
आकर्ण्यविमलश्चेत्थमालापं रश्मिमालिनः । प्रणतोदण्डवद्भूमौ संप्रहृष्टतनूरुहः॥
शनैर्विज्ञापयाञ्चक्रे एकचक्ररथंरविम् । जगच्चक्षुरमेयात्मन्महाध्वान्तविधूनन

यदि प्रसन्नो भगवन् ! यदि देयो वरो मम ।
तदात्वद्भक्तिनिष्ठा ये कुष्ठं मास्तु तदन्वये ॥ ९३ ॥

अन्येपिरोगामासन्तुमास्तुतेषां दरिद्रता । मास्तुकश्चनसन्तापस्त्वद्भक्तानांसहस्रगो

श्रीसूर्य्य उवाच

तथास्त्वितिमहाप्राज्ञ श्रृण्वन् यंवरमुत्तमम् । त्वयेयं पूजितामूर्तिरेवंकाश्यांमहामते

अस्याः सान्निध्यमत्राऽहं न त्यक्ष्यामि कदाचन ।
प्रथिता तव नाम्ना च प्रतिमैषा भविष्यति ॥ ९६ ॥
विमलादित्यइत्याख्या भक्तानां वरदा सदा ।
सर्वव्याधिनिहन्त्री च सर्वपापक्षयङ्करी ॥ ९७ ॥

इति दत्त्वा वरान्सूर्यस्तत्रैवाऽन्तरधीयत । विमलोनिर्मलतनुःसोऽपिस्वभवनं ययौ
इत्थं सविमलादित्यो वाराणस्यां शुभप्रदः । तस्य दर्शनमात्रेण कुष्ठरोगःप्रणश्यति

यश्चैतां विमलादित्यकथां वै श्रृणुयान्नरः ।
प्राप्नोति निर्मलां शुद्धिं त्यज्यते च मनोमलैः ॥ १०० ॥

स्कन्द उवाच

गङ्गादित्योऽस्ति तत्राऽन्यो विश्वेशाद्दक्षिणेन वै ।
तस्य दर्शनमात्रेण नरः शुद्धिमियादिह ॥ १०१ ॥

यदा गङ्गासमायाता भगीरथपुरस्कृता । तदागङ्गांपरिष्टोतुं रविस्तत्रैवसंस्थितः ॥
अद्याप्यहर्निशंगङ्गां सम्मुखीकृत्य भास्करः । परिष्टौतिप्रसन्नात्मा गङ्गाभक्तवरप्रदः
गङ्गादित्यंसमाराध्य वाराणस्यांनरोत्तमः । नजातुदुर्गतिं क्वापि लभतेनच रोगभाक्

स्कन्द उवाच

अन्यच्छृणुमहाभाग यमादित्यस्यसम्भवम् । यच्छ्रुत्वापिनरोजातुयमलोकंनपश्यति
यमेशात्पश्चिमेभागे वीरेशात्पूर्वतो मुने !। यमादित्यं नरोदृष्ट्वा यमलोकं न पश्यति ॥
यमतीर्थे नरः स्नात्वा भूतायाम्भौमवासरे । यमेश्वरंविलोक्याशु सर्वैः पापैःप्रमुच्यते
यमतीर्थे यमः पूर्वं तप्त्वा सुविमलन्तपः । यमेशञ्चयमादित्यं प्रत्यष्ठाद्भक्तसिद्धिदम्

यमेन स्थापितो यस्मादादित्यस्तत्र कुम्भज !।
अतः स हि यमादित्यो यामीं हरति यातनाम् ॥ ६ ॥

यमेशञ्चयमादित्यं यमेन स्थापितं नमन् । यमतीर्थे कृतस्नानो यमलोकं न पश्यति
यमतीर्थे चतुर्दश्यां भरण्याम्भौमवासरे । तर्पणं पिण्डदानञ्च कृत्वापित्रनृणीभवेत्
अभिलष्यन्तिसततं पितरोनरकौकसः । भौमेभरण्याम्भूतायांयदि योगोऽयमुत्तमः

काश्यां कश्चिद्यमे तीर्थे कृत्वा स्नानं महामतिः ।
अपि यस्तर्पणं कुर्यात्सतिलं नो विमुक्तये ॥ १३ ॥
किं गयागमनैः पुंसां किं श्राद्धैर्भूरिदक्षिणैः ।
यदि काश्यां यमे तीर्थे योगेऽस्मिञ्छ्राद्धमाप्यते ॥ १४ ॥

श्राद्धंकृत्वा यमेतीर्थे पूजयित्वायमेश्वरम् । यमादित्यंनमस्कृत्य पितॄणामनृणोभवेत्

स्कन्द उवाच

इतितेद्वादशादित्याः कथिताःपापनाशनाः । यत्सम्भवंसमाकर्ण्य नरो न निरयीभवेत्
अन्येऽपिसन्तिघटजरविभक्तैरनेकशः । काश्यां संस्थापिताःसूर्यागुह्यकार्कादयःकिल

श्रुत्वाध्यायानिमान्पुण्यान् द्वादशादित्यसूचकान् ।
श्रावयित्वाऽपि नो मर्त्यो दुर्गतिं याति कुत्रचित् ॥ ११८ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे उत्तरार्धे ऽरुणवृद्धकेशवविमलगङ्गायमादित्यवर्णनं नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

—:*:—

द्विपञ्चाशत्तमोऽध्यायः

दशाश्वमेधमाहात्म्यवर्णनम्

स्कन्द उवाच

गभस्तिमालिनि गते काशीं त्रैलोक्यमोहिनीम् ।
पुनश्चिन्तामवापोच्चैर्मन्दरस्थोमुनेहरः ॥ १ ॥
नाद्याप्यायान्ति योगिन्यो नाद्याप्यायाति तिग्मगुः ।
प्रवृत्तिरपि मे काश्याश्चित्रमप्यन्तदुर्लभा ॥ २ ॥

किमत्रचित्रं यत्काशी मदीयमपि मानसम् । निश्चलं चञ्चलयति गणना केतरेसुरे अधाक्षिषमहंकाम त्रिजगज्जित्वरं दृशा । अहो काश्यभिलाषोऽत्रमामेवदुनुयात्तराम् काशीप्रवृत्तिमन्वेष्टुं कम्वा प्रहिणुयामितः । ज्ञातुंकएवनिपुणो यतः स चतुराननः इत्याहूय विधातारं वहुमानपुरःसरम् । तत्रोपवेश्य श्रीकण्ठः प्रोवाच चतुराननम् योगिन्यः प्रेषिताःपूर्वंप्रेषितोऽथसहस्रगुः । नाद्यापितेनिवर्तन्तेकाश्याः कमलसम्भव सासमुत्सुकयेत्काशी लोकेश ममंमानसम् । प्राकृतस्यजनस्येव चञ्चलाक्षीवकाचन मन्दरेऽत्र रतिर्मे न भृशं सुन्दरकन्दरे । अनच्छतुच्छपानीये नक्रस्येवाल्पपल्वले नाबाधिष्टतथामां स नापोहालाहलोद्भवः । काशीविरहजन्माऽत्र यथामामतिबाधते शीतरश्मिः शिरस्थोऽपिवर्षन्पीयूषसीकरैः । काशीविश्लेषजंतापंनाहोगमयितुंप्रभुः

विधेविधेहि मे कार्यं मार्यधुर्य महामते! । याहिकाशीमितस्तूर्णं यतस्व च ममेहि ते ब्रह्मंस्त्वमेवतवेत्सिकाशीत्यजनकारणम् । मन्दोपिनत्यजेत्काशींकिमुयोवेत्तिकिञ्चन अद्यैवकिंनगच्छेयं काशींब्रह्मन्स्वमायया । दिवोदासं स्वधर्मस्थं नतूल्लंघितुमुत्सहे विधेसर्वविधेयानित्वमेवविद्धोसियत् । इतिचेतिचवक्तव्यंत्वय्यपार्थमतोऽखिलम्
अरिष्टं गच्छपन्थास्ते शुभोदर्को भवत्वलम् ।
आदायाऽऽज्ञां विधिर्मूर्ध्नि ययौ वाराणसीं मुदा ॥ १६ ॥

सितहंसरथस्तूर्णं प्राप्यवाराणसीं पुरीम् । कृतकृत्यमिवात्मानममन्यत तदात्मभूः हंसयानफलं मेऽद्यजातं काशीसमागमे । काशीप्राप्तौयतः प्रोक्ता अन्तरायाः पदे पदे दृशिधातुरभूदद्यमद्दृशौप्राप्यसान्वयः । स्पष्टं दृष्टिपथं प्राप्ता यदेषाऽऽऽनन्दवाटिका स्वयंसिञ्चतियामद्भिःस्वाभिःस्वर्गतरङ्गिणी । यत्रानन्दमयावृक्षायत्रानन्दमयाजनाः
निर्विशन्ति सदा काश्यां फलान्यानन्दवन्त्यपि ।
सदैवानन्दभूः काशी सदैवानन्ददःशिवः ॥ २१ ॥

आनन्दरूपाजायन्ते तेनकाश्यांहिजन्तवः । चरणौ चरितुं वित्तस्तावेव कृतिनामिह चरणौविचरेतांयौ विश्वभर्तृपुरीभुवि । तावेव श्रवणौ श्रोतुं सम्विदाते बहुश्रुतौ इहश्रुतिमतां पुंसांयाभ्यां काशीश्रुतासकृत् । तदेवमनुतेसर्वंमनस्त्विहमनस्विनाम् येनानुमन्यतेचैषा काशीसर्वप्रमाणभूः । बुद्धिर्बुध्यति सा सर्वमिहबुद्धिमतां सताम्
ययैतद्धूर्जटेर्धाम ध्रुवं स्वविषयीकृतम् ॥ २५ ॥
वरंतृणानि धान्यानि तानि वात्याहतान्यपि ।
काश्यां यान्यापतन्तीह न जनाः काश्यदर्शनाः ॥ २६

अद्यमेसफलञ्चायुः परार्धद्वयसम्मितम् । यस्मिन्सतिमयाप्रापिदुष्प्रापाकाशिकापुरी अहोमेधर्मसम्पत्तिरहोमेभाग्यगौरवम् । यदद्राक्षिषमद्याहं काशीं सुचिरचिन्तिताम् अद्यमेस्वतपोवृक्षो मनोरथफलैरलम् । शिवभक्त्यम्बुनासिक्तः फलितोऽतिबृहत्तरैः मयाव्यधायिबहुधा सृष्टिःसृष्टिंवितन्वता । परमन्यादृशीकाशीस्वयंविश्वेशनिर्मितिः इति हृष्टमनावेधा दृष्ट्वा वाराणसीं पुरीम् । वृद्धब्राह्मणरूपेण राजानञ्चददर्शह

जलार्द्राक्षतपाणिश्चस्वस्त्युक्त्वापृथिवीभुजे। कृतप्रणामोराज्ञाथ भेजेतद्दत्तमासनम्
कृतमानोनृपतिना सोभ्युत्थानासनादिभिः। विप्रोव्यजिज्ञपद्भूपं पृष्टागमनकारणम्

ब्राह्मण उवाच

भूपालबहुकालीनोऽस्म्यहमत्रचिरन्तनः। त्वन्तुमांनैवजानासिजानेत्वांहिरिपुञ्जतम्
परःशतामयादृष्टाराजानोभूरिदक्षिणाः। विजितानेकसङ्ग्रामा यायजूकाजितेन्द्रियाः
विनिष्कृतारिषड्वर्गाः सुशीलाः सत्त्वशालिनः।
श्रुतस्य पारदृश्वानो राजनीतिविचक्षणाः ॥ ३६ ॥
दयादाक्षिण्यनिपुणाः सत्यव्रतपरायणाः। क्षमयाक्षमयातुल्यागाम्भीर्यजितसागराः
जितरोषरयाःशूराः सौम्यसौन्दर्यभूमयः। इत्यादिगुणसम्पन्नाः सुसञ्चितयशोधनाः
परंद्वित्राःपवित्रायेराजर्षे तव सद्गुणाः। तेष्वेषु राजसु मम प्रायशो न दृशंगताः
प्रजानिजकुटुम्बस्त्वं त्वन्तु भूदेवदैवतः। महातपःसहायस्त्वं यथानान्ये तथानृपाः
धन्योमान्योऽसि च सतां पूजनीयोऽसि सद्गुणैः।
देवाअपिदिवोदास! त्वत्त्रासान्न विमार्गगाः ॥ ४१ ॥
किं नः स्तुत्या तव नृप! द्विजा नामस्पृहावताम्।
किं कुर्मस्त्वद् गुणग्रामाः स्तावकान्नः प्रकुर्वते ॥ ४२ ॥
गोष्ठीतिष्ठत्वियं तावत्प्रस्तुतं स्तौमि साम्प्रतम्।
यष्टुकामोऽस्म्यहं राजंस्त्वां सहायमतो वृणे ॥ ४३ ॥
त्वया राजन्वती चैषाऽवनिः सर्वर्धिभाजनम्।
अहं चास्तिधनो राजन्! न्यायोपात्तमहाधनः ॥ ४४ ॥
इयञ्चराजधानी ते कर्मभूमावनुत्तमा। यस्यां कृतानांकार्याणां सम्वर्तेऽपि न संक्षयः
सञ्चितं यद्धनं पुम्भिर्नयसन्मार्गगामिभिः।
तत्काश्यां विनियुज्येत क्लेशायेतरथा भवेत् ॥ ४६ ॥
महिमानं परं काश्याः कोऽपिवेदन भूपते!। ऋतेत्रिनयनाच्छम्भोः सर्वज्ञानप्रदायिनः
मन्ये धन्यतरोऽसि त्वं बहुजन्मशतार्जितैः।

सुकृतैः पासि यत्काशीं विश्वभर्तुः परां तनुम् ॥ ४८ ॥
काशीत्रिजगतीसारस्त्रिवेदीसार एव वै। त्रिवर्गोत्तरसारश्च निर्णीतेति महर्षिभिः
विश्वेशानुग्रहेणैव त्वयैषापाल्यतेपुरी। एकस्याप्यवनात्काश्यांत्रैलोक्यमवितम्भवेत्
अन्यच्च ते हितं वच्मि यदि ते रोचतेऽनघ!।
प्रीणनीयः सदैवैको विश्वेशः सर्वकर्मभिः ॥ ५१ ॥
अन्यदेव धिया राजन् विश्वेशं पश्य माकचित्।
ब्रह्मविष्णिवन्द्रचन्द्रार्काः क्रीडेयन्तस्य धूर्जटेः ॥ ५२ ॥
विप्रैरुदर्कमिच्छद्भिः शिक्षणीया यतो नृपाः।
अतस्तव हितं ख्यातं किम्वा मे चिन्तयाऽनया ॥ ५३ ॥
इति जोषं स्थितंविप्रं प्रत्युवाचनृपोत्तमः। सर्वं मयाहृदिधृतंयत्त्वयोक्तंद्विजोत्तम!

राजोवाच

अहं यियक्षमाणस्य तव साहाय्यकर्मणि।
दासोऽस्मि यज्ञसम्भारान्नय मे कोशतोऽखिलान् ॥ ५५ ॥
यदस्ति मेऽखिलन्तत्र सप्ताङ्गेऽपि भवान्प्रभुः।
यजस्वैकमनाब्रह्मन्!सिद्धं मन्यस्व वाञ्छितम् ॥ ५६ ॥
राज्यंकरोमि यद् ब्रह्मन्!स्वार्थं तन्नमनागपि। पुत्रैः कलत्रैर्देहेन परोपकृतये यते ॥
राज्ञांक्रतुक्रियाभ्योपितीर्थेभ्योपिसमन्ततः। प्रजापालनमेवैकोधर्मःप्रोक्तोमनीषिभिः
प्रजासन्तापजोवह्निर्वज्राग्नेरपिदारुणः। द्वित्रान्दहतिवज्राग्निः पूर्वो राज्यं कुलंतनुम्
यदाऽवभृथसिस्नासुर्भवेयंद्विजसत्तम!। तदा विप्रपदाम्भोभिरभिषेकंकरोम्यहम्
हवनं ब्राह्मणमुखे यत् करोमि द्विजोत्तम!। मन्येक्रतुक्रियाभ्योऽपितद्विशिष्टंमहामते
अभिलाषेषु सर्वेषु जागर्त्यैकोहृदीह मे। अद्यापिमार्गणःकोऽपि द्रष्टव्यःस्वतनोरपि
अहो अहोभिर्बहुभिः फलितो मे मनोरथः। यत्त्वंमेऽद्यगृहेप्राप्तःकिञ्चित्प्रार्थयितुंद्विज
एकाग्रमानसोविप्र! यज्ञान्विपुलदक्षिणान्।
बहून्यज कृतं विद्धि साहाय्यं सर्ववस्तुषु ॥ ६४ ॥

इति राज्ञो मह बुद्धेर्धर्मशीलस्य भाषितम् । श्रुत्वा तुष्टमनाःस्रष्टाक्रतुसम्भारमाहरत्
साहाय्यंप्राप्य राजर्षेर्दिवोदासस्यपद्मभूः । इयाजदशभिः काश्यामश्वमेधैर्महामखैः
अद्यापि होमधूमौघैर्यद्व्याप्तंगगनान्तरम् । तदाप्रभृति न व्योमनीलिमानंजहात्यदः
तीर्थं दशाश्वमेधाख्यं प्रथितंजगतीतले । तदाप्रभृति तत्रासीद्वाराणस्यां शुभप्रदम्
पुरारुद्रसरोनाम तत्तीर्थं कलशोद्भव !। दशाश्वमेधिकं पश्चाज्जातं विधिपरिग्रहात्
स्वधुन्यथ ततः प्राप्ताभगीरथसमागमात् । अतीवपुण्यवज्जातमतस्तत्तीर्थमुत्तमम्

विधिर्दशाश्वमेधेशं लिङ्गं संस्थाप्य तत्र वै ।
स्थितवान्नगतोऽद्यापि क्वाऽपि काशीं विहाय तु ॥ ७१ ॥

राज्ञो धर्मरतेस्तस्यच्छिद्रंनावापकिञ्चन । अतःपुरारेः पुरतो व्रजित्वा किं वदेद्विधिः

क्षेत्रप्रभावं विज्ञाय ध्यायन्विश्वेश्वरं शिवम् ।
ब्रह्मेश्वरं च संस्थाप्य विधिस्तत्रैव संस्थितः ॥ ७३ ॥
परा तनुरियं काशी विश्वेशस्येति निश्चितम् ।
अस्याः संसेवनाच्छम्भुर्न कुप्यति पुरो मयि ॥ ७४ ॥

कः प्राप्य काशीं दुर्मेधाः पुनस्त्यक्तुमिहेहते । अनेकजन्मजनितकर्मनिर्मूलनक्षमाम्

विश्वसन्तापसंहर्तुः स्थाने विश्वपतेस्तनुः ।
सन्ताप्यतेतरां काश्या विश्लेषजमहाग्निना ॥ ७६ ॥
प्राप्य काशीं त्यजेद्यस्तु समस्ताघौघनाशिनीम् ।
नृपशुः स परिज्ञेयो महासौख्यपराङ्मुखः ॥ ७७ ॥
निर्वाणलक्ष्मीं यः काङ्क्षेत्त्यक्त्वा संसारदुर्गतिम् ।
तेन काशी न सन्त्याज्या यद्यासैशादनुग्रहात् ॥ ७८ ॥

यः काशीं सम्परित्यज्य गच्छेदन्यत्रदुर्मतिः । तस्यहस्ततलाद्गच्छेच्चतुर्वर्गफलोदयः

निबर्हणीमघौघस्य सुपुण्यपरिबृंहिणीम् ।
कःप्राप्य काशीं दुर्मेधास्त्यजेन्मोक्षसुखप्रदाम् ॥ ८० ॥
सत्यलोके क्व तत्सौख्यं क्व सौख्यं वैष्णवे पदे ।

यत्सौख्यं लभ्यते काश्यां निमेषार्धनिषेवणात् ॥ ८१ ॥

वाराणसीगुणगणान्निर्णीयद्रुहिणस्त्विति । व्यावृत्यमन्दरगिरिंनपुनःप्रत्यगान्मुने

स्कन्द उवाच

मित्रावरुणयोः पुत्र!महिमानं ब्रवीमिते । काश्यां दशाश्वमेधस्य सर्वतीर्थशिरोमणेः
दशाश्वमेधिकं प्राप्य सर्वतीर्थोत्तमोत्तमम् । यत्किञ्चित्क्रियतेकर्म तदक्षयमिहेरितम्

स्नानं दानं जपोहोमः स्वाध्यायो देवतार्चनम् ।
सन्ध्योपास्तिस्तर्पणं च श्राद्धं पितृसमर्चनम् ॥ ८५ ॥

दशाश्वमेधिके तीर्थे सकृत्स्नात्वा नरोत्तमः । दृष्ट्वा दशाश्वमेधेशं सर्वपापैः प्रमुच्यते
ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिम् । दशाश्वमेधिकेस्नात्वामुच्यतेजन्मपातकैः
ज्येष्ठे शुक्लद्वितीयायां स्नात्वारुद्रसरोवरे । जन्मद्वयकृतंपापंतत्क्षणादेव नश्यति
एवं सर्वासुतिथिषु क्रमस्नायीनरोत्तमः । आशुक्लपक्षदशमि प्रतिजन्माघमुत्सृजेत्
तिथिंदशहरांप्राप्यदशजन्माघहारिणीम् । दशाश्वमेधिकेस्नातोयामींपश्येन्नयातनाम्

लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैस्त्यज्यते नाऽत्र संशयः ॥ ९१ ॥

स्नातोदशहरायां यः पूजयेल्लिङ्गमुत्तमम् । भक्त्यादशाश्वमेधेशं न तं गर्भदशास्पृशेत्
ज्येष्ठेमासि सितेपक्षे पक्षं रुद्रसरे नरः । कुर्वन्वैवार्षिकीं यात्रां न विघ्नैरभिभूयते
दशाश्वमेधावभृथैर्यत्फलंसम्यगाप्यते । दशाश्वमेधे तन्नूनं स्नात्वा दशहरातिथौ ॥
स्वधुन्याः पश्चिमेतीरेनत्वादशहरेश्वरम् । नदुर्दशामवाप्नोतिपुमान्पुण्यतमःक्वचित्
यत्काश्यां दक्षिणद्वारमन्तर्गेहस्यकीर्त्यते । तत्र ब्रह्मेश्वरंदृष्ट्वा ब्रह्मलोके महीयते
इति ब्राह्मणवेषेणवाराणस्यां महाधिया । द्रुहिणेन स्थितंतावद्यावद्विश्वेश्वरागमः
दिवोदासोऽपि राजेन्द्रो वृद्धब्राह्मणरूपिणे । ब्रह्मणेकृतयज्ञाय ब्रह्मशालामकल्पयत्
ब्रह्मेश्वरसमीपेतु ब्रह्मशाला मनोहरा । ब्रह्मा तत्रावसद्व्योम ब्रह्मघोषैर्निनादयन् ॥
इति ते कथितोब्रह्मन्महिमातिमहत्तरः । दशाश्वमेधतीर्थस्य सर्वाघौघविनाशनः ॥

श्रुत्वाऽध्यायमिमं पुण्यं श्रावयित्वा तथैव च ।

ब्रह्मलोकमवाप्नोति श्रद्धया मानवोत्तमः ॥ १०१ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये काशीखण्डे उत्तरार्धे दशाश्वमेधवर्णनंनामद्विपञ्चाशत्तमोऽध्यायः ॥५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

सवाराणसीवर्णनं गणप्रेषणकथनम्

अगस्तिरुवाच

अपूर्वेयं कथाख्याताब्रह्मणो ब्रह्मवित्तम !। किंचकारपुनः शम्भुस्तत्र ब्रह्मण्यपिस्थिते

स्कन्द उवाच

शृण्वगस्त्य महाभाग! काश्यां ब्रह्मण्यपि स्थिते ।

गिरिशश्चिन्तयामास भृशमुद्विग्नमानसः ॥ २ ॥

पुरीसायादृशीकाशी वशीकरणभूमिका । नतादृशीदृशाहासीत्कचिन्मेप्रायशो ध्रुवम्
योयोयातिपुरींतान्तुससतत्रैवतिष्ठति । अभूवन्ननुयोगिन्योऽयोगिन्यःकाशीसङ्गताः
अकिञ्चित्करतांप्राप्तःससहस्रकरोऽप्यरम् । विधिर्विधानदक्षोपिनप्रेससविधोऽभवत्
चिन्तयन्नितिदेवेशो गणानाहूय भूरिशः । प्रेषयामास भोयात क्षिप्रंवाराणसीं पुरीम्

किं कुर्वन्ति तु योगिन्यः किंकरोति स भानुमान् ।

गत्वा चित्तत्वरायुक्ता विधिश्च विदधाति किम् ॥ ७ ॥

नामग्राहन्ततोऽप्रैषीद्बहुमानपुरः सरम् । शङ्कुकर्णमहाकाल घण्टाकर्णमहोदर
सोमनन्दिन्नन्दिषेण कालपिङ्गलकुक्कुट !। कुण्डोदर मयूराक्ष! बाणगोकर्णतारक
तिलपर्णस्थूलकर्ण द्रुमिचण्डप्रभामय !। सुकेश! विन्दते छाग कपर्दिन् पिङ्गलाक्षक!
वीरभद्रकिराताख्य चतुर्मुख! निकुम्भक! । पञ्चाक्षभारभूताख्य त्र्यक्षक्षेमकलाङ्गलिन्
विराधसुमुखाषाढे भवन्तो मम सूनवः । यथेमौ स्कन्दहेरम्बौ नैगमेयोयथात्वयम्
यथाशाखविशाखौ च यथेमौनन्दिभृङ्गिणौ । भवत्सुविद्यमानेषु महाचिक्रमशालिषु

काशीप्रवृत्तिंनोजाने दिवोदासनृपस्यच । योगिन्यर्कविधीनांचतद्द्वौयातंभवत्स्वम्
शङ्कुकर्णमहाकालौ कालस्यापिप्रकम्पनौ । ज्ञातुंवाराणसीवार्तामायातंचत्वरान्वितौ
कृतप्रतिज्ञौतौतूर्णंप्राप्यवाराणसींपुरीम्। शङ्कुकर्णमहाकालौ विस्मृत्यशाम्भवींगिरम्
यथेन्द्रजालिकीं दृष्ट्वा मायामिहविचक्षणः । क्षणेनमोहमायातिकाशीम्वीक्ष्यतथैवतौ

अहो मोहस्य माहात्म्यमहोभाग्यविपर्ययः ।

निर्वाणराशिं यत्काशीं प्राप्य यान्त्यन्यतोऽबुधाः ॥ १८ ॥

तत्यजेयैरियं काशीमहाशीर्वादभूमिका । तेषाकरतलान्मुक्तिः प्राप्ताऽपि परितोगता
यत्रसर्वावभृथतःस्नानमात्रंविशिष्यते । अप्यूषणीकृतपानीयैस्तांकाशींकःपरित्यजेत्
यत्रैकपुष्पदानेन शिवलिङ्गस्यमूर्धनि । दशसौवर्णिकंपुण्यं कस्तां काशींपरित्यजेत्
यत्रदण्डप्रणामेन अप्येकेनशिवाग्रतः । तुच्छमैन्द्रपदं प्राहुस्तां काशीं कोविमुञ्चति
यत्रैकद्विजमात्रन्तुभोजयित्वायथेच्छया । वाजपेयाधिकंपुण्यंतांकाशीं को विमुञ्चति
एकांगांयत्रदत्त्वावैविधिवद्ब्राह्मणायवै । लभेदयुतगोपुण्यंकस्तांकाशीं त्यजेत्सुधीः

एकं लिङ्गं प्रतिष्ठाप्य यत्र संस्थापितम्भवेत् ।

अपि त्रैलोक्यमखिलं तां काशीं कः समुज्झति ॥ २५ ॥

परिनिश्चित्यतावित्थं लिङ्गे संस्थाप्य पुण्यदे ।

तत्रैव संस्थितिं प्राप्तौ काशीं नाऽद्यापि मुञ्चतः ॥ २६ ॥

शङ्कुकर्णेश्वरं लिङ्गं शङ्कुकर्णगणार्चितम् । दृष्ट्वा न जायते जन्तुर्जातुमातुर्महोदरे
विश्वेशाद्वायुदिग्भागे शङ्कुकर्णेश्वरं नरः । सम्पूज्य न विशेदत्र घोरे संसारसागरे
महाकालेश्वरं लिङ्गम्महाकालगणार्चितम् । अर्चयित्वाचनत्वाचस्तुत्वाकालभयंकुतः

स्कन्द उवाच

शङ्कुकर्णे महाकाले चिरन्तनविलम्बिते । ज्ञात्वा सर्वज्ञनाथोऽथ प्राहैषीदपरौगणौ
घण्टाकर्ण!त्वमागच्छ महोदरमहामते । काशीं यातं युवां तूर्णं ज्ञातुं तत्रत्यचेष्टितम्

इत्यगस्तेगणौ तौ तु गत्वा काशीं महापुरीम् ।

व्यावृत्याद्यापि नो यातौ क्वापि तत्रैव संस्थितौ ॥ ३२ ॥

घण्टाकर्णेश्वरं लिङ्गं घण्टाकर्णगणोत्तमः ।
काश्यां संस्थाप्य विधिवत्स्वयं तत्रैव निर्वृतः ॥ ३३ ॥
कुण्डंतत्रैवसंस्थाप्यलिङ्गस्नपनकर्मणे । नाद्यापिसन्त्यजेत्काशीं ध्यायँल्लिङ्गन्तथैवहि
महोदरोपितत्प्राच्यांशिवध्यानपरायणः । महोदरेश्वरं लिङ्गं ध्यायेदद्यापि कुम्भज
महोदरेश्वरंदृष्ट्वावाराणस्यांद्विजोत्तम । कदाचिदपिवै मातुः प्रविशेन्नौदरीं दरीम्
घण्टाकर्णह्रदेस्नात्वादृष्ट्वाव्यासेश्वरंविभुम् । यत्रकुत्रविपन्नोपिवाराणस्यांमृतोभवेत्
घण्टाकर्णेमहातीर्थे श्राद्धं कृत्वाविधानतः । अपि दुर्गतिमापन्नानुद्धरेत्सप्त पूर्वजान्
निमज्ज्याद्याऽपि तत्कुण्डे क्षणं योऽवहितोभवेत् ।
विश्वेश्वरमहापूजाघण्टारावाञ्छृणोति सः ॥ ३६ ॥
वदन्तिपितरःकाश्यांघण्टाकर्णेऽमलेजले । दातातिलोदकस्यापिवंशेनःकोऽपिजायते
यद्वश्यामुनयःकाश्यांघण्टाकर्णेमहाह्रदे । कृतोदकक्रियाः प्राप्ताः परां सिद्धिं घटोद्भव

स्कन्द उवाच

घण्टाकर्णेगणेयाते प्रयाते च महोदरे । विसिस्मायस्मरद्वेष्टामौलिमान्दोलयन्मुहुः
उवाचचमनस्येवहरःस्मित्वापुनः पुनः । महामोहनविद्याऽसि काशित्वाम्पर्यवैश्यहम्
पुराविदः प्रशंसन्ति त्वाम्महामोहहारिणीम् ।
काशीं त्विति न जानन्ति महामोहनभूरियम् ॥ ४४ ॥
प्रेषयिष्याम्यहं सर्वान्भवती मोहयिष्यति ।
इति सम्यग्विजानामि काशित्वाम्मोहनौषधिम् ॥ ४५ ॥
तथापि प्रेषयिष्यामि यावान्मेऽस्ति परिच्छदः ।
नोद्यमाद्विरमन्तीह ज्ञानिनः साध्यकर्मणि ॥ ४६ ॥
नोद्यमाद्विरतिः कार्या क्वापि कार्ये विचक्षणैः ।
प्रतिकूलोऽपि खिद्येत विधिस्तत्सततोद्यमात् ॥ ४७ ॥
शीतोष्णभानुःस्वर्भानुग्रस्तावपिनभोङ्गणे । गतिंनत्यजतोऽद्यापिःक्रान्तव्यकृतोद्यमौ
एकत्र हन्ति कार्याणि प्रातिकूल्याद्विधिर्मुहुः ।

एकत्रकरणीयानि सेत्स्यन्त्यत्र भृशोद्यमात् ॥ ४९ ॥
दैवं पूर्वकृतं कर्म कथ्यते नेतरत्पुनः । तन्निराकरणे यत्नः स्वयं कार्यो विपश्चिता
भाजनोपस्थितं दैवाद्भोज्यं नास्यं स्वयं विशेत् ।
हस्तवक्त्रो द्यमात्तच्च प्रविशेदौदरीं दरीम् ॥ ५१ ॥
इत्युद्यमंसमर्थ्येशोनिश्चितंदैवजित्वरम् । पुनश्चप्रेषयाञ्चक्रेगणान्पञ्चमहारयान्
सोमनन्दीनन्दिषेणःकालपिङ्गलकुक्कुटाः । तेद्यापिननिवर्तन्तेकाश्यांजीवामृतायथा
तेऽपि स्वनाम्नालिङ्गानि शम्भुसन्तुष्टिकाम्यया ।
प्रतिष्ठाप्य स्थिताः काश्यां विश्वनिर्वाणजन्मनि ॥ ५४ ॥
सोमनन्दीश्वरं दृष्ट्वा लिङ्गं नन्दवनेपरम् । सोमलोके परानन्दं प्राप्नुयाद्भक्तिमान्नरः
तदुत्तरेविलोक्याथ नन्दिषेणेश्वरं नरः । आनन्दसेनांसम्प्राप्यजयेन्मृत्युमपिक्षणात्
कालेश्वरम्महालिङ्गं गङ्गायाः पश्चिमोत्तरे । प्रणम्य कालपाशेन नो बध्येत कदाचन
पिङ्गलेश्वरमभ्यर्च्य कालेशात्किञ्चिदुत्तरे । लभते पिङ्गलज्ञानं येन तन्मयतां व्रजेत्
कुक्कुटेश्वरलिङ्गस्ययेऽत्रभक्तिं वितन्वते । कुक्कुटाण्डाकृतेस्तस्य नतेगर्भमवाप्नुयुः

स्कन्द उवाच

सोमनन्दिप्रभृतिषु मुनेपञ्चगणेष्वपि । आनन्दकाननम्प्राप्य स्थितेषु स्थाणुरब्रवीत्
कार्यमस्माकमेवैतद्यदि सम्यग्विमृश्यते । अनेनोपाधिनाप्येते तत्र तिष्ठन्तुमामकाः
प्रथमेषु प्रविष्टेषु मायावीर्यमहत्स्वपि । अहमेव प्रविष्टोऽस्मिवाराणस्यां न संशयः
क्रमेणप्रेषयिष्यामियोऽस्तिमेस्वपरिच्छदः । तत्रसर्वेषु यातेषु ततोयास्याम्यहम्पुनः
सम्प्रधार्येतिहृदये देवदेवेन शूलिना । प्रेषिष्ट प्रमथानां तु ततो गणचतुष्टयम्
कुण्डोदरोमयूराख्यो बाणोगोकर्णएवच । मायाबलंसमाश्रित्यकाशीम्प्रविविशुर्गणाः
कृत्वोपायशतं तैस्तुदिवोदासस्यसम्भ्रमे । यदैकोपिसमर्थोनतदातत्रैव संस्थितम्
अपराधशतेष्वीशः केन तुष्यतिकर्मणा । सम्प्रधार्येति ते चक्रुर्लिङ्गाराधनमुत्तमम्
एकस्मिञ्छाम्भवे लिङ्गे विधिनाऽत्र समर्चिते ।
क्षमेत् त्र्यक्षोऽपराधानां शतम्मोक्षञ्च यच्छति ॥ ६८ ॥

न तुष्यति तथा शम्भुर्यज्ञदानतपोव्रतैः । यथातुष्येत्सकृल्लिङ्गे विधिनाभ्यर्चिते सति
लिङ्गार्चनविधानज्ञो लिङ्गार्चनरतःसदा । त्र्यक्षएवसविज्ञेयःसाक्षादद्व्यक्षोऽपिमानवः
न गोशतप्रदानेन न स्वर्णशतदानतः । तत्फलं लभ्यतेपुम्भिर्यत्सकृल्लिङ्गपूजनात्
अश्वमेधादिभिर्यागैर्नतत्फलमवाप्यते । यत्फलं लभ्यतेमर्त्यैर्नित्यं लिङ्गप्रपूजनात्

स्नापयित्वा विधानेन यो लिङ्गस्नपनोदकम् ।
त्रिः पिबेत्त्रिविधम्पापं तस्येहाऽऽशु प्रणश्यति ॥ ७३ ॥
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनम् ।
गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः ॥ ७४ ॥
लिङ्गं समर्चितं दृष्ट्वा यः कुर्यात्प्रणतिं सकृत् ।
सन्देहो जायते तस्य पुनर्देहनिबन्धने ॥ ७५ ॥
लिङ्गं यः स्थापयेद्भक्त्या सप्तजन्मकृतादघात् ।
मुच्यते नात्र सन्देहो विशुद्धः स्वर्गभाग्भवेत् ॥ ७६ ॥
विचार्येऽतिगणैः काश्यां स्वामिद्रोहोपशान्तये ।
प्रतिष्ठितानि लिङ्गानि महापातकभिन्त्यपि ॥ ७७ ॥

कुण्डोदरेश्वरंलिङ्गं दृष्ट्वा लोलार्कसन्निधौ । सर्वपापविनिर्मुक्तः शिवलोके महीयते
कुण्डोदरेश्वराल्लिङ्गात्प्रतीच्यामसिरोधसि । मयूरेश्वरमभ्यर्च्य न गर्भम्प्रतिपद्यते
मयूरेशप्रतीच्यांचलिङ्गम्बाणेश्वरम्महत् । तस्य दर्शनमात्रेण सर्वैः पापैः प्रमुच्यते
गोकर्णेशम्महालिङ्गमन्तर्गेहस्यपश्चिमे । द्वारेसमर्च्य वै काश्यां न विघ्नैरभिभूयते
गोकर्णेश्वरभक्तस्य पञ्चत्वसमये सति । ज्ञानभ्रंशो न जायेत क्वचिदप्यन्तमृच्छतः

स्कन्द उवाच

चिरयत्सुगणेष्वेषु चतुर्ष्वपिगणेश्वरः । महिमानम्महत्त्वं तु तत्काश्याः पर्यवर्णयत्

वैष्णव्या मायया विश्वम्भ्राम्यतेऽत्र ययाऽखिलम् ।
ध्रुवं मूर्त्तिमती सैषा काशी विश्वैकमोहिनी ॥ ८४ ॥

अपास्य सोदरान्दारान् पुत्रं क्षेत्रं गृहं वसु । अप्यङ्गीकृत्यनिधनं सर्वेकाशीमुपासते

मरणादपिनोकाश्यामभयंयत्रमनागपि । गणास्तत्रतु तिष्ठन्तःकुतोमत्तोऽपिबिभ्यति
मरणम्मङ्गलं यत्र विभूतिर्यत्रभूषणम् । कौपीनं यत्रकौशेयं काशीकुत्रोपमीयते ॥
निर्वाणरमणीयत्ररङ्कं वाऽरङ्कमेव वा । ब्राह्मणं वा स्वपाकंवा वृणीतेप्रान्त्यभूषणम्
मृतानां यत्रजन्तूनांनिर्वाणपदमृच्छताम् । कोट्यंशेनापिनसमाअपिशक्रादयःसुराः
यत्रकाश्यांमृतोजन्तुर्ब्रह्मनारायणादिभिः । प्रबद्धमूर्धाञ्जलिभिर्नमस्यैतातियत्नतः

यत्र काश्यां शवत्वेऽपि जन्तुर्नाऽशुचितां व्रजेत् ।
अतस्तत्कर्णसंस्पर्शंकरोम्यहमपि स्वयम् ॥ ६१ ॥
यस्तु काशीति काशीति द्विस्त्रिर्जपति पुण्यवान् ।
अपि सर्वपवित्रेभ्यः स पवित्रतरो महान् ॥ ६२ ॥

येनकाशीहृदिध्याता येनकाशीहसेविता । तेनाऽहं हृदिसन्ध्यातस्तेनाहंसेवितःसदा
काशीं यः सेवतेजन्तुर्निर्विकल्पेन चेतसा । तमहं हृदये नित्यं धारयामि प्रयत्नतः ॥
स्वयंवस्तुमशक्तोपिवासयेत्तीर्थवासिनाम् । अप्येकमपिमूल्येनसवस्तुःफलभाग्ध्रुवम्

काश्यां वसन्ति ये धीरा आपञ्चत्वविनिश्चयाः ।
जीवन्मुक्तास्तु ते ज्ञेया वन्द्याः पूज्यास्त एव हि ॥ ६६ ॥
इत्थं विमृश्य बहुशः स्थाणुर्वाराणसीगुणान् ।
गणानन्यान्समाहूय प्राहिणोत्प्रीतिपूर्वकम् ॥ ६७ ॥
तारकत्वं समागच्छ गच्छाऽतिस्वच्छमानस ! ।
दिवोदासो वृषावासो यामधीष्टे वरां पुरीम् ॥ ६८ ॥

तिलपर्ण! स्थूलकर्ण! द्रुमिचण्ड! प्रभामय ! । सुकेश! विन्दते! छाग! कपर्दिन्पिङ्गलाक्षक!
वीरभद्र! किराताख्य! चतुर्मुख! निकुम्भक ! । पञ्चाक्षभारभूताख्य! त्र्यक्षक्षेमकलाङ्गलिन्
विराधसुमुखाषाढेयान्तुसर्वे पृथक् पृथक् । एतेगणामहाभागाःस्वामिभक्तादृढव्रताः

कृत्वा माया बहुविधा बहुरूपा विचक्षणाः ।
अनिमेषेक्षणास्तस्थुः क्षोणीशच्छिद्रकाङ्क्षिणः ॥ १०२ ॥

अपरिज्ञाततच्छिद्रा विद्राविततयशोधनाः । आःकिमेतदहोजातंनिनिन्दुःस्वमितोहते

गणा ऊचुः

धिगस्मान्स्वामिनानित्यं कृतसम्भावनान्मुहुः । मनुष्यमात्रमप्यत्रयैरेकंनवशीकृतम्
बहुमानेन दानेन सौहार्देन महीयसा । कृतप्रसादांस्त्वक्षेणधिङ्नस्तत्कार्यवञ्चकान्
कागतिर्नोभवित्रीहस्वामिकृत्यप्रमादिनाम् । अन्धं तमोमयैलोकेध्रुवंवासोभविष्यति
अकृतस्वामिकार्याणामहोजीवितधारिणाम् । अक्षतेन्द्रियवृत्तीनांदुर्गतिश्च पदे पदे
लब्धसम्भावनानाञ्च न्यक्कृतस्वामिकर्मणाम् ।
भृत्यानाम्भूरिभाजाञ्च भङ्गुराः स्युर्मनोरथाः ॥ १०८ ॥
अनिष्पादितकार्यार्थाये मुखं प्रेक्षयन्त्यहो । अपत्रपाः पुरोभर्तुस्तैर्भू र्भारवतीत्वियम्
नाद्रीणां न समुद्राणां न द्रुमाणां महीयसाम् ।
भूतधात्र्यास्तथाभारो यथा स्वामिद्रुहां महान् ॥ ११० ॥
अहो पौराणिकी गाथा स्मृताऽस्माभिरनिन्दिता ।
तदर्थमवलम्ब्येह स्थास्यामः कृतनिश्चयाः ॥ १११ ॥
अनाकलितपुण्यानां परिक्षीणधनायुषाम् । सर्वोपायविहीनानांगतिर्वाराणसीपुरी
अपुण्यभारखिन्नानां पश्चात्तापमुपेयुषाम् । विश्वगृध्र्वगतीनाञ्च गतिर्वाराणसीपुरी
स्वामिद्रुहः कृतघ्नाश्च ये चविश्रम्भघातकाः ।
तेषां काऽपि गतिर्नास्ति मुक्त्वा वाराणसींपुरीम् ॥ ११४ ॥
इत्थंनिश्चित्य गाथार्थं प्रमथाअवतस्थिरे । अविज्ञातस्वरूपाश्च दिवोदासेन भूभुजा
न बुबोध सभूपालोनितरांबुद्धिमानपि । विबुधान्विविधाकारैःस्थितानीशप्रभावतः
चित्रं न चित्रगुप्तोऽपि वेत्ति वाराणसीस्थितान् ।
जन्तून्का गणनाऽन्येषां मर्त्यलोकनिवासिनाम् ॥ ११७ ॥
अविच्छिन्नप्रभावाणामपरिच्छिन्नतेजसाम् ।
कृतलिङ्गप्रतिष्ठानां नान्तं प्राप्नोति धर्मराट् ॥ ११८ ॥
इति ते प्रमथाःसर्वे घटोद्भवमहामुने! । कृतलिङ्गार्चनाःकाशींनाद्याऽप्युज्झन्तिशर्मदम्
तारकेशं महालिङ्गं तारकाख्योगणोत्तमः । तारकज्ञानदंपुंसां मुनेऽद्यापि समर्चयेत्

तारकेश्वरलिङ्गस्य कृत्वाभक्तिं सुनिश्चलाम् । सुखेन तारकज्ञानं लभ्यते तैर्नरोत्तमैः
तिलपर्णेश्वरंलिङ्गं तिलपर्णप्रतिष्ठितम् । तिलप्रमाणमप्यत्र दृष्ट्वा पापं न सम्भवेत्
स्थूलकर्णेश्वरंलिङ्गम्परिपूज्यनरोत्तमः । नदुर्गतिमवाप्नोतिपुण्यमाप्नोतिचोत्तमम्
द्रुमिचण्डेश्वरंलिङ्गं तथालिङ्गंप्रभामयम् । आराध्यतत्प्रतीच्याञ्चनपापैरभिभूयते ॥
प्रभामयेश्वरंलिङ्गंदृष्ट्वाऽन्यत्रापिसंस्थितः । प्रभामयेनयानेन शिवलोकेव्रजेत्सुधीः
सुकेशेश्वरमभ्यर्च्य हरिकेशवनेनरः । षाट्कौशिकमयंदेहं धारयेन्नपुनः पुनः
विन्दतीशं नरोऽभ्यर्च्यभीमचण्डीसमीपतः ।
त्यक्त्वाप्रचण्डमप्येनोमोक्षं विन्दति शाश्वतम् ॥ १२७ ॥
छागलेशमहालिङ्गं पित्रीश्वरसमीपगम् । विलोक्यपशुवत्कोपिनपापं प्राकृतंस्पृशेत्

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्डे
उत्तरार्धे वाराणसीवर्णनगणप्रेषणंनामत्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुष्पञ्चाशत्तमोऽध्यायः

पिशाचमोचनमहत्त्ववर्णनम्

स्कन्द उवाच

कुम्भसम्भव! वक्ष्यामि शृणोत्ववहितोभवान् ।
कपर्दीशस्य लिङ्गस्य महामाहात्म्यमुत्तमम् ॥ १ ॥
कपर्द्दीनाम गणपः शम्भोरत्यन्तवल्लभः ।
पित्रीशादुत्तरे भागे लिङ्गं संस्थाप्य शाम्भवम् ॥ २ ॥
कुण्डंचखानतस्याग्रेविमलोदकसञ्ज्ञकम् । यस्यतोयस्यसंस्पर्शाद्विमलोजायतेनरः
इतिहासं प्रवक्ष्यामि तत्र त्रेतायुगे पुरा । यथावृत्तंकुम्भयोने! श्रवणात्पातकापहम्
एकः पाशुपतश्रेष्ठोवाल्मीकिरिति सञ्ज्ञितः । तपश्चचार स मुनिः कपर्दीशंसमर्चयन्

एकदा स हि हेमन्ते मार्गे मासि तपोधनः ।
स्नात्वा तत्र महातीर्थे मध्याह्ने विमलोदके ॥ ६ ॥

चकारभस्मनास्नानमापादतलमस्तकम् । लिङ्गस्यदक्षिणेभागे कृतमाध्याह्निकक्रियः

न्यस्तमस्तकपांसुश्च सन्ध्यामाध्यात्मिकीं स्मरन् ।
जपन्पञ्चाक्षरीं विद्यां ध्यायन्देवं कपर्दिनम् ॥ ८ ॥

कृत्वा संहारमार्गेण सप्रमाणं प्रदक्षिणम् । हुडु्ंकृत्य हुडुंकृत्यहुडुंकृत्यत्रिरुच्चकैः प्रणवं पुरतःकृत्वा षड्जादिस्वरभेदतः । गीतंविधायसानन्दं सनृत्यंहस्तकान्वितम् अङ्गहारैर्मनोहारि चारीमण्डलसंयुतम् । क्षणं तत्र सरस्तीरे उपविष्टो महातपाः अद्राक्षीद्राक्षसंघोरमतीवविकृताकृतिम् । शुष्कशङ्खकपोलास्यंनिमग्नापिङ्गलोचनम् रूक्षस्फुटितकेशाग्रं महालम्बशिरोधरम् । अतीवचिपिटघ्राणं शुष्कौष्ठमतिदन्तुरम्

महाविशालमौलिश्च प्रोर्ध्वीभूतशिरोरुहम्
प्रलम्बकर्णपालीकं पिङ्गलश्मश्रुभीषणम् १४ ॥
प्रलम्बितललज्जिह्वमत्युत्कटकृकाटिकम् ।
स्थूलास्थिजत्रुसंस्थानं दीर्घस्कन्धद्वयोत्कटम् ॥ १५ ॥

निमग्नकक्षाकुहरं शुष्कह्रस्वभुजद्वयम् । विरलाङ्गुलिहस्ताग्रं नतपीननखावलिम् विशुष्कपांसुलोत्क्रोडं पृष्ठलग्नोदरत्वचम् । कटीतटेन विकटं निर्मांसत्रिकबन्धनम्

प्रलम्बस्फिग्युगयुतं शुष्कमुष्कालपमेहनम् ।
दीर्घनिर्मांसलोरूकं स्थूलजान्वस्थिपञ्जरम् ॥ १८ ॥
अस्थिचर्मावशेषं च शिराजालितविग्रहम् ।
शिरालंदीर्घजङ्घं च स्थूलगुल्फास्थिभीषणम् ॥ १९ ॥

अतिविस्तृतपादश्च दीर्घवक्रकृशाङ्गुलिम् । अस्थिचर्मावशेषेण शिराताडितविग्रहम् विकटं भीषणाकारं क्षुत्क्षाममतिलोमशम् । दावदग्धद्रुमाकारमतिचञ्चललोचनम् मूर्तंभयानकमिव सर्वप्राणिभयप्रदम् । हृदयाकम्पनं दृष्ट्वा तं प्रेतं वृद्धतापसः ॥

अतिदीनाननं कस्त्वमिति धैर्येण पृष्टवान् ॥ २२ ॥

कुतस्त्वमिह सम्प्राप्तः कस्मात्ते गतिरीदृशी ।
अनुक्रोशधिया रक्षः पृच्छामि वद निर्भयम् ॥ २३ ॥
अस्माकं तापसानां च न भयं त्वद्विधान्मनाक् ।
शिवनामसहस्राणां विभूतिकृतवर्मणाम् ॥ २४ ॥

तापसोदीरितमिति तद्रक्षः प्रीतिपूर्वकम् । निशम्यप्राञ्जलिःप्राहतंकृपालुंतपोधनम्

राक्षस उवाच

अनुक्रोशोऽस्ति यदि ते भगवंस्तापसोत्तम !।
स्ववृत्तान्तं तदा वच्मि शृणुष्वावहितः क्षणम् ॥ २६ ॥

प्रतिष्ठानाभिधानोस्तिदेशोगोदावरीतटे । तीर्थप्रतिग्रहरुचिस्तत्रासंब्राह्मणस्त्वहम् तेन कर्मविपाकेन प्राप्तोऽस्मि गतिमीदृशीम् । मरुस्थलेमहाघोरे तरुतोयविवर्जिते गतो बहुतरः कालस्तत्रमेवसतो मुने । क्षुधितस्य तृषार्तस्य शीततापसहस्य च

वर्षत्यपि महामेघे धारासारैर्दिवानिशम् ।
प्रावृट्कालेऽनिले वाति किञ्चित् प्रावरणं न मे ॥ ३० ॥

पर्वण्यदत्तदाना ये कृततीर्थप्रतिग्रहाः । त इमां योनिमृच्छन्तिमहादुःखनिबन्धनीम् गते बहुतिथे काले मरुभूमौ मुने! मया । दृष्टो ब्राह्मणदायाद एकदा कश्चिदागतः

सूर्योदयमनुप्राप्य सन्ध्याविधिविवर्जितः ।
कृत्वा मूत्रपुरीषे तु शौचाचमनवर्जितः ॥ ३३ ॥
मुक्तकच्छमशौचं च सन्ध्याकर्मविवर्जितम् ।
तं दृष्ट्वा तच्छरीरेऽहं संक्रान्तो भोगलिप्सया ॥ ३४ ॥

सद्विजो मन्दभाग्यान्मे केनचिद्वणिजा सह । अर्थलोभेनसम्प्राप्तःपुरींपुण्यामिमांमुने अन्तःपुरिप्रविष्टोभूत्सद्विजोमुनिसत्तम !। तच्छरीराद्बहिर्भूतस्त्वहंपापैःसमंक्षणात्

प्रवेशो नास्ति चास्माकं प्रेतानां तपसां निधे !।
महतामपातकानां च वाराणस्यां शिवाज्ञया ॥ ३७ ॥
अद्यापि तानि पापानि तद्बहिर्निर्गमेच्छया ।

बहिरेव हि तिष्ठन्ति सीम्नि प्रमथसाध्वसात् ॥ ३८ ॥
अद्य श्वो वा परश्वो वा स बहिर्निर्गमिष्यति ।
इत्याशया स्थिताः स्मो वै यावदद्य तपोधन !॥ ३९ ॥
नाद्यापि स बहिर्गच्छेन्नाद्याप्याशा प्रयाति नः ।
इत्यास्महे निराधारा आशापाशनियन्त्रिताः ॥ ४० ॥

चित्रमद्यतनं वच्मि तपस्विस्तन्निशामय । अतीवभाविकल्याणमितिमन्येऽधुनैवहि
आप्रयागंप्रतिदिनंप्रयामःक्षुधितावयम् । आहारकाम्ययाक्वापिपरंनोकिञ्चिदाप्नुमः

सन्ति सर्वत्र फलिनः पादपाः प्रतिकाननम् ।
जलाशयाश्च स्वच्छापाः सन्ति भूम्यास्पदे पदे ॥ ४३ ।
अन्यान्यपि च भक्ष्याणि सर्वेषां सुलभान्यहो ।
पानान्यपि विचित्राणि सन्ति भूयांसि सर्वतः ॥ ४४ ॥

यत्नोद्गतान्येव दूरे दूरेव्रजन्त्यहो । दैवादद्यैकमायान्तं दृष्ट्वा कार्पटिकम्मुने ॥४५॥
तस्यान्तिकमहं प्राप्तः क्षुधया परिपीडतः । प्रसह्य भक्षयाम्येनमितिमत्वात्वरान्वितः
यावत्तं तुजिघृक्षामितावत्तद्वदनाम्बुजात् । शिवनामपवित्रावाङ्निरगाद्विघ्नहारिणी
शिवनामस्मरणतो मदीयमपि पातकम् । मन्दीभूतं ततस्तेन प्रवेशं लब्धवानहम्
सीमस्थैः प्रमथैर्नाहं सद्यो दृग्गोचरीकृतः । शिवनामश्रुतौयेषांतान्नपश्येद्यमोपियत्
अन्तर्गेहस्य सीमानं प्राप्तस्तेनसहाधुना । सतुकार्पटिकोमध्यंप्रविष्टोऽहमिहस्थितः

आत्मानं बहुमन्येऽहं त्वां विलोक्याधुना मुने !।
मामुद्धर कृपालो! त्वं योनेरस्मात्सुदारुणात् ॥ ५१ ॥

इति प्रेतवचःश्रुत्वासकृपालुस्तपोधनः । मनसाचिन्तयामासधिङ्निजार्थोद्यमान्नरान्
स्वोदरम्भरयः सर्वे पशुपक्षिमृगादयः । सएव धन्यः संसारे यः परार्थोद्यतः सदा
तपसाऽद्य निर्जेनाऽहं प्रेतमेतमघातुरम् । मामेव शरणं प्राप्तमुद्धरिष्याम्यसंशयम् ॥

विमृश्येति सर्वं चित्ते पिशाचं प्राह सत्तमः ।
विमलोदे सरस्यस्मिन् स्नाहि रे पापनुत्तये ॥ ५५ ॥
पिशाच! ते पिशाचत्वं तीर्थस्यास्य प्रभावतः ।

कपर्दीशे क्षणादद्य क्षणात्क्षीणं विनङ्क्ष्यति ॥ ५६ ॥

श्रुत्वेति स मुनेर्वाक्यं प्रेतः प्राह प्रणम्यतम् । प्रीतात्मा प्रीतमनसं प्रबद्धकरसम्पुटः
पानीयं पातुमपि नो लभेयं मुनिसत्तम !। स्नानस्य का कथा नाथ रक्षेयुर्जलदेवताः
पानस्याप्यत्रकावार्ताजलस्पर्शोपिदुर्लभः । इतिप्रेतोक्तमाकर्ण्यसभृशम्प्रीतिमानभूत्
उवाच च तपस्वी तं जगदुद्धरणक्षमः । गृहाणेमां विभूतिं त्वं ललाटफलके कुरु

अस्माद्विभूतिमाहात्म्यात्प्रेत! कोऽपि न कुत्रचित् ।
बाधांकरोति कस्यापि महापातकिनोऽप्यहो ॥ ६१ ॥

भालंविभूतिधवलं विलोक्य यमकिङ्कराः । पापिनोऽपिपलायन्तेभीताःपाशुपतास्त्रतः
अस्थिध्वजाङ्कितंदृष्ट्वायथापान्थाजलाशयम् । दूरयन्तितथाभस्मभालाङ्कं यमकिङ्कराः
कृतभूतितनुत्राणं शिवमन्त्रैर्नरोत्तमम् । नोपसर्पन्ति नियतमपि हिंस्राः समन्ततः

भक्त्या बिभर्ति यो भस्म शिवमन्त्रपवित्रितम् ।
भाले वक्षसि दोर्मूले न तं हिंसन्ति हिंसकाः ॥ ६५ ॥

सर्वेभ्योदुष्टसत्त्वेभ्यो यतो रक्षेदहर्निशम् । रक्षेत्येषा ततः प्रोक्ता विभूतिर्भूतिकृद्यतः
भासनाद्भर्त्सनाद्भस्मपांसुः पांसुत्वदायतः । पापानां क्षारणात्क्षारो बुधैरेवंनिरुच्यते
गृहीत्वाधारमध्यात्स भस्मप्रेतकरेऽर्पयत् । सोप्यादरात्समादायभालदेशेन्यवेशयत्
विभूतिधारिणं वीक्ष्यपिशाचं जलदेवताः । जलावगाहनपरं वारयाञ्चक्रिरे न तम्

स्नात्वा पीत्वा स निर्गच्छेद्यावत्तस्माज्जलाशयात् ।
तावत्पैशाच्यमगमद्दिव्यदेहमवाप च ॥ ७० ॥

दिव्यमालाम्बरधरो दिव्यगन्धानुलेपनः । दिव्ययानं समारुह्यवर्त्म प्राप्तोऽथ पावनम्
गच्छता तेन गगनेसतपस्वीनमस्कृतः । प्रोच्चैःप्रोवाचभगवन्मोचितोऽस्मित्वयानघ

तस्मात्कदर्ययोनित्वादतीव परिनिन्दितात् ।
अस्य तीर्थस्य माहात्म्याद्दिव्यं देहमवाप्तवान् ॥ ७३ ॥

पिशाचमोचनं तीर्थमद्यारभ्यसमाख्यया । अन्येषामपिपैशाच्यमिदंस्नानाद्धरिष्यति

अस्मिन्तीर्थे महापुण्ये ये स्नास्यन्तीह मानवाः ।

पिण्डांश्च निर्वपिष्यन्ति सन्ध्यातर्पणपूर्वकम् ॥ ७५ ॥
दैवात्पैशाच्यमापन्नास्तेषां पितृपितामहाः ।
तेऽपि पैशाच्यमुत्सृज्य यास्यन्ति परमां गतिम् ॥ ७६ ॥
अद्यशुक्लचतुर्दश्यां मार्गे मासितपोनिधे !। अत्रस्नानादिकंकार्यं पैशाच्यपरिमोचनम्
इमां सांवत्सरीं यात्रां ये करिष्यन्ति मानवाः ।
तीर्थप्रतिग्रहात्पापान्निःसरिष्यन्ति ते नराः ॥ ७८ ॥
पिशाचमोचनेस्नात्वा कपर्दीशंसमर्च्य च । कृत्वातत्रान्नदानंच नरोऽन्यत्रापिनिर्भयाः
मार्गशुक्लचतुर्दश्यांकपर्दीश्वरसन्निधौ । स्नात्वाऽन्यत्रापि मरणान्नपैशाच्यमवाप्नुयुः
इत्युक्त्वांदिव्यपुरुषोभूयोभूयोनमस्यतम् । तपोधनंमहाभागोदिव्यांगतिमवाप्तवान्
तपोधनोऽपितद्दृष्ट्वामहाश्चर्यं घटोद्भव !। कपर्दीश्वरमाराध्य कालान्निर्वाणमाप्तवान्
पिशाचमोचनं तीर्थं तदारभ्यमहामुने !। वाराणस्यां परां ख्यातिमगमत्सर्वपापहृत्
पैशाचमोचनेतोर्थेसम्भोज्यशिवयोगिनम् ।कोटिभोज्यफलंसम्यगेकैकपरिसङ्ख्यया
श्रुत्वाध्यायमिमंपुण्यं नरोनियतमानसः । भूतैः प्रेतैः पिशाचैश्च कदाचिन्नाभिभूयते
बालग्रहाभिभूतानां बालानांशान्तिकारकम् । पठनीयं प्रयत्नेनमहाख्यानमिदं परम्
इदमाख्यानमाकर्ण्यगच्छन्देशान्तरंनरः । चोरव्याघ्रपिशाचाद्यैर्नाभिभूयेत कुत्रचित्

इति श्रीस्कन्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्डे उत्तरार्धे पिशाचमोचनमहिमकथनंनामचतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

—:*:—

पञ्चपञ्चाशत्तमोऽध्यायः

काशीवर्णने गणेशप्रेषणवर्णनम्

स्कन्द उवाच

अन्येपियेगणास्तत्रकाश्यांलिङ्गानिचक्रिरे । तांश्चतेकथयिष्यामिकुम्भयोनेनिशामय
गणेनपिङ्गलाख्येनपिङ्गलाख्येशसञ्ज्ञितम् । लिङ्गंप्रतिष्ठितंशम्भोःकपर्दीशादुदग्दिशि
तस्य दर्शनमात्रेण पापानां जायते क्षयः । वीरभद्रो महाप्रीतो देवदेवस्य शूलिनः
वीरभद्रेश्वरं लिङ्गंध्यायेदद्यापि निश्चलः । तस्यदर्शनमात्रेण वीरसिद्धिः प्रजायते
अविमुक्तेश्वरात्पश्चाद्वीरभद्रेश्वरं नरः । समर्च्य नरणेभङ्गं कदाचिदपि चाप्नुयात्
वीरभद्रः स्वयं साक्षाद्वीरमूर्तिधरो मुने !। संहरेद्विघ्नसंघातमविमुक्तनिवासिनाम्
भद्रयाभद्रकाल्या चभार्ययाशुभयायुतम् । वीरभद्रं नरोऽभ्यर्च्य काशीवासफलंलभेत्
किरातेनकिरातेशं लिङ्गंकाश्यांप्रतिष्ठितम् । केदाराद्दक्षिणे भागे भक्तानामभयप्रदम्
चतुर्मुखोगणः श्रीमान्वृद्धकालेशसन्निधौ । चतुर्मुखेश्वरं लिङ्गंध्यायेदद्यापिनिश्चलः
भक्ताश्चतुर्मुखेशस्य चतुराननवद्दिवि । पूज्यन्ते सुरसङ्घातः सर्वभोगसमन्विताः
निकुम्भेश्वरमालोक्य निकुम्भगणपूजितम् ।
पूजयित्वा व्रजन् ग्रामं कार्यसिद्धिमवाप्नुयात् ।
कुवेरेशसमीपे तु शिवलोके महीयते ॥ ११ ॥
पञ्चाक्षेशं महालिङ्गं महादेवस्य दक्षिणे ।
समभ्यर्च्य नरः काश्यां जातिस्मृतिमवाप्नुयात् ॥ १२ ॥
भारभूतेश्वरं लिङ्गं भारभूतगणार्चितम् । अन्तर्गृहोत्तरद्वारिध्यात्वाशिवपुरे वसेत्
भारभूतेश्वरंलिङ्गंयैः काश्यांनविलोकितम् । भारभूताःपृथिव्यास्तेऽवकेशिनइवद्रुमाः
गणेन त्र्यक्षसञ्ज्ञेन लिङ्गं त्र्यक्षेश्वरं परम् । त्रिलोचनपुरोभागेशीलयेताद्यापिकुम्भज
तस्य लिङ्गस्ययेभक्तास्तेतुदेहावसानतः । त्र्यक्षा एव प्रजायन्तेनात्र कार्याविचारणा

क्षेमकोनामगणपः काश्यांमूर्त्तिधरःस्वयम् । विश्वेश्वरंसर्वगतं ध्ययेद्यापि निश्चलः
क्षेमकंपूजयेद्यस्तुवाराणस्यां महागणम् । विघ्नास्तस्य प्रलीयन्ते क्षेमं स्याच्च पदेपदे
देशान्तरंगतोयस्तु तस्यागमनकाम्यया । क्षेमकः पूजनीयोऽत्रक्षेमेणाशु स आव्रजेत्
लाङ्गलीश्वरमालोक्यलिङ्गंलाङ्गलिनार्चितम् । विश्वेशादुत्तरेभागे न नरोरोगभाग्भवेत्
लाङ्गलीशंसकृत्पूज्यपञ्चलाङ्गलदानजम् । फलं प्राप्नोत्यविकलं सर्वसम्पत्करं परम्
विराधेश्वरमाराध्य विराधगणपूजितम् । सर्वापराधयुक्तोऽपि नापराध्यतिकुत्रचित्
दिनेदिनेपराधोयः क्रियतेकाशिवासिभिः । स याति संक्षयं क्षिप्रं विराधेशसमर्चनात्
नैर्ऋते दण्डपाणेस्तु विराधेशं प्रयत्नतः । नत्वा सर्वापराधेभ्यो मुच्यते नात्र संशयः
सुमुखेशंमहालिङ्गंसुमुखाख्यगणार्जितम् । पश्चिमाभिमुखं लिङ्गं दृष्ट्वापापैः प्रमुच्यते

स्नात्वा पिलिपिलातीर्थे सुमुखेशं विलोक्य च ।
सदैव सुमुखं पश्येद्धर्मराजं न दुर्मुखम् ॥ २६ ॥
आषाढिनाऽर्चितं लिङ्गमाषाढीश्वरसञ्ज्ञिकम् ।
दृष्ट्वाऽऽषाढ्यां नरो भक्त्या सर्वैः पापैः प्रमुच्यते ॥ २७ ॥

उदीच्यांभारभूतेशादाषाढीशं समर्चयन् । आषाढ्यां पञ्चदश्यांवै न पापैः परितप्यते
शुचिशुक्लचतुर्दश्यां पञ्चदश्यामथापिवा । कृत्वा सांवत्सरीं यात्रामनेना जायतेनरः

स्कन्द उवाच

मुने! गणेषु चैतेषु वाराणस्यां स्थितेष्विति ।
स्वनाम्ना स्थाप्य लिङ्गानि विश्वेशपरितुष्टये ॥ ३० ॥

विश्वेशश्चिन्तयाञ्चक्रे पुनः काशीप्रवृत्तये । कं वाहितं प्रहित्याद्य निर्वृतिं परमाम्भजे

योगिन्यस्तिग्मगुर्वेधाः शङ्कुकर्णमुखा गणाः ।
व्यावृत्य नागताः काश्याः सिन्धुगा इव सिन्धवः ॥ ३२ ॥

ध्रुवंकाश्यांप्रविष्टाये तेप्रविष्टाममोदरे । तेषांविनिर्गमो नास्ति दीप्तेऽग्नौ हविषामिव
येषांहिसंस्थितिःकाश्यां लिङ्गार्चनरतात्मनाम् । तएवममलिङ्गानिजङ्गमानिनसंशयः
स्थावराजङ्गमाःकाश्यामचेतनसचेतनाः । सर्वेममैव लिङ्गानितेभ्यो द्रुह्यन्ति दुर्धियः

वाग्विवाराणसीयेषां श्रुतौवैश्वेश्वरीकथा । तएवकाशीलिङ्गानिवराण्यर्च्यान्यहंयथा
वाराणसीतिकाशीतिरुद्रावास इतिस्फुटम् । मुखाद्विनिर्गतं येषां तेषां न प्रभवेद्यमः
आनन्दकाननंप्राप्ययेनिरानन्दभूमिकाम् । अन्यांहृदापिवाञ्छन्तिनिरानन्दाःसदात्रते
अद्यैववाम्तुमरणंबहुकालान्तरेपिवा । कलिकालभियापुंसांकाशीत्याज्यानकर्हिचित्
अवश्यंभाविनोभावाभविष्यन्तिपदेपदे । सलक्ष्मीनिलयांकाशींतेत्यजन्तिकुतोधियः
वरंविघ्नसहस्राणिसोढव्यानिपदेपदे । काश्यांनान्यत्रनिर्विघ्नंवाञ्छेद्राज्यमपिक्वचित्
कियन्निमेरसम्भोग्याःसन्तिलक्ष्म्यःपदेपदे । परंनिरन्तरसुखाऽमुत्राप्यत्रापिकाशिका

विश्वनाथो ह्यहं नाथः काशिकामुक्तिकाशिका ।
सुधातरङ्गा स्वर्गङ्गा त्र्येषा किन्न यच्छति ॥ ४३ ॥

पञ्चक्रोश्यापरिमिता तनुरेषा पुरी मम । अविच्छिन्नप्रमाणर्धिर्भक्तनिर्वाणकारणम्
संसारभारखिन्ननां यातायातकृतां सदा । एकैव मे पुरी काशी ध्रुवं विश्रामभूमिका
मण्डपःकल्पवल्लीनांमनोरथफलैरलम् । फलितःकाशिकाख्योयं संसाराध्वजुषां सदा
चक्रवर्तेरियं छत्रं विचित्रं सर्वतापहृत् । काशीनिर्वाणराजस्य मम शूलोच्चदण्डवत्

निर्वाणलक्ष्मीं ये पुण्याः परिवाञ्छन्ति लीलया ।
निरन्तरसुखप्राप्त्यै काशी त्याज्या न तैर्नृभिः ॥ ४८ ॥

ममानन्दवने ये वै निरन्तरवनौकसः । मोक्षलक्ष्मीफलान्यत्र सुस्वादूनि लभन्ति ते

निर्ममञ्चापि निर्मोहं या मामपि विमोहयेत् ।
कैर्न संस्मरणीया सा काशी विश्वविमोहिनी ॥ ५० ॥
नामाऽपि मधुरं यस्याः परानन्दप्रकाशकम् ।
काश्याः काशीति काशीति सा कैः पुण्यैर्न जप्यते ॥ ५१ ॥

काशीनामसुधापानं ये कुर्वन्तिनिरन्तरम् । तेषां वर्त्मभवत्येव सुधामवसुधामयम्
ममतारहितस्यापिममसर्वात्मनो ध्रुवम् । तएवमामकालोके ये काशीनामजापकाः
रहस्यमितिविज्ञायवाराणस्या गणेश्वरैः । सब्रह्मयोगिनीब्रध्नैः स्थितंतत्रैव नान्यथा
अन्यथाताश्चयोगिन्यःसरविःसपितामहः । तेगणा मां परित्यज्य कथंतिष्ठेयुरन्यतः

अतीवभद्रं सञ्जातं काश्यां तिष्ठत्सुतेषुहि । एकोपिभेदेप्रभवेद्राज्येराज्यान्तरं विना
लब्धप्रवेशास्तावन्तस्ते सर्वे मत्स्वरूपिणः । यतिष्यन्ति यतोऽवश्यंमदागमनहेतवे
अन्यानपिप्रेषयामिमत्पार्श्वपरिवर्तिनः । येतेतत्रस्थिताःश्रेष्ठाअपिगन्ताऽस्म्यहं ततः
विचार्येतिमहादेवःसमाहूयगजाननम् । प्राहिणोत्कथयित्वेति गच्छ काशीमितःसुतः

तत्र स्थितोऽपि संसिद्ध्यै यतस्व सहितो गणैः ।
निर्विघ्नं कुरु चास्माकं नृपे विघ्नं समाचर ॥ ६० ॥

आधायशाननंमूर्ध्निगणाधीशोथधूर्जटेः । प्रतस्थेत्वरितःकाशींस्थितिज्ञःस्थितिहेतवे

इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे-
उत्तरार्धे काशीवर्णनगणेशप्रेषणं नामपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

—:*:—

षट्पञ्चाशत्तमोऽध्यायः

गणेशमायाप्रपञ्चवर्णनम्

स्कन्द उवाच

अथेशाज्ञां समादाय गजवक्त्रः प्रतस्थिवान् ।
शम्भोः काश्यागमोपायं चिन्तयन्मन्दराद्रितः ॥ १ ॥
प्राप्य वाराणसीं तूर्णमाखुस्यन्दनगो विभुः ।
वाडवीं मूर्तिमालम्ब्य प्राविशच्छकुनैस्तु सः ॥ २ ॥

नक्षत्रपाठकोभूत्वावृद्धः प्रत्यवरोधगः । चचार मध्ये नगरं पौराणां प्रीतिमावहन्
स्वयमेवनिशाभागेस्वप्नं सन्दर्शयन्नृणाम् । प्रातस्तेषांगृहान्गत्वातेषांवक्तिबलाबलम्
भवद्भिरद्यरात्रौयद्दृष्टं स्वप्नविचेष्टितम् । भवत्कौतूहलोत्पत्त्यै तदेव कथयाम्यहम्
स्वपताभवता रात्रौ तुर्ये यामेमहाह्रदः । अदर्शि तत्र च भवान् मज्जन्मज्जंस्तटंगतः

तदम्बुपिच्छिले पङ्के मग्नोन्मग्नोऽसि भूरिशः ।

दुःस्वप्नस्यास्य च महान्विपाकोऽतिभयप्रदः ॥ ७ ॥

काषायवसनो मुण्डः प्रैक्ष्यहोभवतापियः । परितापं महानेष जनयिष्यति दारुणम्
रात्रौ सूर्यग्रहो दृष्टो महानिष्टकरो ध्रुवम् । ऐन्द्रं धनुर्द्वयं रात्रौ यदलोकि नतच्छुभम्
प्रतीच्यांरविरागत्यप्रोद्यन्तंव्योम्नि शीतगुम् । पातयामास भूपृष्ठे तद्राज्यभयसूचकम्
युगपत्केतुयुगलं युध्यमानं परस्परम् । यददर्शि नतद्भद्रं राष्ट्रभङ्गाय केवलम् ॥ ११ ॥
विशीर्यत्केशदशनंनीयमानञ्च दक्षिणे । आत्मानंयत्समद्राक्षीःकुटुम्बस्यापिभीषणम्
प्रासादध्वजभङ्गोयस्त्वयैक्षतनिशाक्षये । राज्यक्षयकरंविद्धिमहोत्पाताय निश्चितम्
नगरीप्लावितास्वप्ने तरङ्गैः क्षीरनीरधेः । पक्षैस्त्रिचतुरैः शङ्के महाशङ्कां पुरौकसाम्
स्वप्ने वानरयानेन यत्त्वमूढोऽसि दक्षिणाम् । अतस्तद्भञ्जनोपायःपुरत्यागो महामते
रुदतीयात्वयादृष्टा महिलैका निशात्यये । मुक्तकेशी विवसना सा नारी श्रीरिवोद्गता
देवालयस्यकलशोयत्त्वयावीक्षितः पतन् । दिनैः कतिपयैरेव राज्यभङ्गो भविष्यति
पुरीपरिवृतास्वप्ने मृगयूथैः समन्ततः । रोरूयमाणैरत्यर्थं मासेनैवोद्वसी भवेत्

आतायियूकगृध्राद्यैः पुरीमुपरिचारिभिः ।
सूच्यतेत्याहितं किञ्चिद् ध्रुवमत्र निवासिनाम् ॥ १६ ॥
स्वप्नोत्पातानिति बहूञ्छंसञ्छंसन्नितस्ततः ।
बहूनुच्चाटयाञ्चक्रे सविघ्नेशः पुरौकसः ॥ २० ॥

केषांचित्पुरतोवादीद्ग्रहचारंप्रदर्शयन् । एकराशिस्थिताः सौरिसितभौमानशोभनाः

योऽयं धूमग्रहो व्योम्नि भित्त्वा सप्तर्षिमण्डलम् ।
प्रयातः पश्चिमामाशां स नाशाय विशाम्पतेः ॥ २२ ॥

अतिचारगतो मन्दः पुनर्वक्राध्वसंस्थितः । पापग्रहसमायुक्तो न युक्तो यमिहेष्यते
व्यतीते वासरे योऽयं भूकम्पः समपद्यत । कम्पं जनयतेऽतीव हृदो मेपिपुरौकसः

उदीच्यां दक्षिणाशायां ये यमुल्का प्रधाविता ।
विलीना च वियत्येव स निर्घातं न सा शुभा ॥ २५ ॥

उन्मूलितो महामूलो महानिलरयेण यः । चत्वरे चैत्यवृक्षोऽयं महोत्पातं प्रशंसति

सूर्योदयमनुप्राप्य प्राच्यां शुष्कतरूपरि । करटो रारटीत्येष कटूत्कटभयप्रदः

मध्ये विपणि यत्तूर्णं कौचिच्चारण्यचारिणौ ।

मृगौ मृगयतां यातौ पौराणां पुरतोऽहितौ ॥ २८ ॥

रसालशालमुकुलं वीक्ष्यते यच्छरद्यदः । महाकालभयं मन्येऽप्यकालेपि पुरौकसाम्
साध्वसंजनयित्वेति केचिदुच्चाटिताः पुरः । तेन विघ्नकृता पौराःकपटद्विजरूपिणा
अथ मध्येऽवरोधं स प्रविश्य निजमायया । दृष्टार्थमेवकथयंस्त्रीणांविस्रम्भभूरभूत्
तव पुत्रशतं जज्ञे सप्तोनं शुभलक्षणे । तेष्वेकस्तुरगारूढो बाह्यालयां पतितो मृतः

अन्तर्वत्नीत्वियं कन्यां जनयिष्यति शोभनाम् ।

एषा हि दुर्भगा पूर्वं साम्प्रतं सुभगाऽभवत् ॥ ३३ ॥

असौ हि राज्ञोराज्ञीनामत्यन्तमिहवल्लभा । मुक्तालङ्कृतिरेतस्यैराज्ञादत्तानिजोरसः
पञ्चसप्तदिनान्येव जातानीतीह तर्क्यते । अस्यै राज्ञा प्रसादेन ग्रामौ दातुमुदीरितौ
इतिदृष्टार्थकथनैराज्ञीमान्योऽभवद्द्विजः । वर्णयन्ति चताराज्ञःपरोक्षेऽपिगुणान्बहून्
अहोयादृगसौ विप्रःसर्वत्रातिविचक्षणः । सुशीलश्च सुरूपश्चसत्यवाङ्मितभाषणः
अलोलुप उदारश्च सदाचारो जितेन्द्रियः । अपिस्वल्पेन संतुष्टः प्रतिग्रहपराङ्मुखः
जितक्रोधः प्रसन्नास्यस्त्वनसूयुरवञ्चकः । कृतज्ञः प्रीतिसुमुखः परिवादपराङ्मुखः
पुण्योपदेष्टा पुण्यात्मा सर्वव्रतपरायणः । शुचिः शुचिचरित्रश्चश्रुतिस्मृतिविशारदः

धीरः पुण्येतिहासज्ञः सर्वदृक् सर्वसम्मतः ।

कलाकलापकुशलो ज्योतिःशास्त्रविदुत्तमः ॥ ४१ ॥

क्षमी कुलीनोऽकृपणो भोक्ता निर्मलमानसः ।

इत्यादिगुणसम्पन्नः कोऽपि क्वापि न दृग्गतः ॥ ४२ ॥

इत्थं तास्तद्गुणग्रामंवर्णयन्त्यः पदे पदे । कालंविनोदयन्तिस्मअन्तःपुरचराःस्त्रियः
एकदावसरं प्राप्य दिवोदासस्य भूभुजः । राज्ञी लीलावती नामराज्ञेतंविन्यवेदयत्

राजन् !वृद्धोगुणैर्वृद्धो ब्राह्मणः सुविचक्षणः ।

एकोऽस्ति स तु द्रष्टव्यो मूर्ता ब्रह्मनिधिः परः ॥ ४५ ॥

राज्ञी राज्ञा कृतानुज्ञा सखीं प्रेष्य विचक्षणाम् ।

आनिनाय च तं विप्रं ब्राह्मं तेज इवाङ्गवत् ॥ ४६ ॥

राजापि दूरादायान्तं तं विलोक्य महीसुरम् ।

यत्राकृतिर्गुणास्तत्र जहर्षेति वदन् हृदि ॥ ४७ ॥

पदैर्द्वित्रैर्नृपतिना कृताभ्युत्थानसत्कृतिः । चतुर्निगमजाभिः स तमाशीर्भिरनन्दयत्
कृतप्रणामो राज्ञा ससादरं दत्तमासनम् । भेजेऽथ कुशलं पृष्टः स राज्ञा तेन भूपतिः
परस्परं कुशलिनौ कुशलौ च कथागमे । प्रश्नोत्तराभ्यां संतुष्टौ द्विजवर्यक्षमाभृतौ
कथावसाने राज्ञाथ गेहं विससृजेद्विजः । लब्धमानमहापूजः सस्वमाश्रममाविशत्
गतेऽथस्वाश्रमं विप्रेदिवोदासोनरेश्वरः । लीलावत्याः पुरोविप्रं वर्णयामासभूरिशः
महादेवि!महाप्राज्ञे! लीलावति! गुणप्रिये !। यथाशंसितथाविप्रस्ततोऽपिगुणवत्तरः
अतीतं वेत्ति सकलं वर्त्तमानमवैति च । प्रष्टव्यः प्रातराहूय भविष्यं किञ्चिदेष वै
महाविभवसम्भारैर्महाभोगैरनेकधा । व्युष्टायां सनृपो रात्र्यांप्रातराहूतवान्द्विजम्

सत्कृत्य तं द्विजं भक्त्या दुकूलादिप्रदानतः ।

एकान्ते तं द्विजं राजा पप्रच्छ निजहृत्स्थितम् ॥ ५६ ॥

राजोवाच

द्विजवर्यो भवानेकः प्रतिभातीति निश्चितम् ।

यथा तत्त्ववतीते धीर्नतथा न्यस्य मे मतिः ॥ ५७ ॥

दृष्ट्वा त्वां तु महाप्राज्ञं शान्तं दान्तं तपोनिधिम् ।

किञ्चित्प्रष्टुमना विप्र! तदाख्याहि यथार्थवत् ॥ ५८ ॥

शासितेयं मया पृथ्वी न तथान्यैस्तु पार्थिवैः ।

यावद्भूतिमया भुक्ता दिव्या भोगा अनेकधा ॥ ५९ ॥

निर्जौरसेभ्योप्यधिकंरात्रिदिवमतन्द्रितम् । विनिर्जित्यहठाद्दुष्टान्प्रजेयंपरिपालिता
द्विजपादार्चनात्किञ्चित्सुकृतं वेद्मि नापरम् । अनेनापरिकथ्येन कथितेनेहकिंमम
निर्विस्ममिव मे चेतःसाम्प्रतंसर्वकर्मसु । विचार्यार्य! शुभोदर्कमतआख्याहिसत्तम!

द्विज उवाच

अपि स्वल्पतरं कृत्यं यद्भवेद्भूभुजामिह । एकान्ते तत्तु पृष्टेन वक्तव्यं सुधियासदा
अमात्येनाप्यपृष्टेन न वक्तव्यं नृपाग्रतः । महापमानभीतेन स्तोकमप्यत्र किञ्चन ॥
पृष्टश्चेत्कथयामीह मा तत्र कुरु संशयम् । तत्कृते तव गन्तावै मनो निर्वेदकारणम्

शृणु राजन् ! महाबुद्धे! नायथार्थं ब्रवीम्यहम् ।
विक्रान्तोऽस्यतिशूरोऽसि भाग्यवानसि सर्वदा ॥ ६६ ॥
पुण्येन यशसा बुद्ध्या सम्पन्नोऽस्ति भवान् यथा ।
मन्ये तथामरावत्यां त्रिदशेशोऽपि नैव हि ॥ ६७ ॥

सुधिया त्वां गुरुं मन्ये प्रसादेनसुधाकरम् । तेजसास्तिभवानर्कःप्रतापेनाशुशुक्षणिः
प्रभञ्जनो बलेनासिश्रीदोऽसिश्रासमर्पणैः । शासनेनभवान्रुद्रो निर्ऋतिस्त्वंरणाङ्गणे

दुष्टपा शयिता पाशी यमो नियमने सताम् ।
इन्दनात्त्वं महेन्द्रोऽसि क्षमया त्वमसि क्षमा ॥ ७० ॥

मर्यादया भवानब्धिर्महत्त्वे हिमवानसि । भार्गवो राजनीत्यासिराज्येनमनुनासमः
सन्तापहर्ताम्बुदवत्पवित्रो गाङ्गनामवत् । सर्वेषामेव जन्तूनां काशीव सुगतिप्रदः
रुद्रः संहाररूपेण पालनेन चतुर्भुजः । विधिवत्त्वं विधातासि भारती ते मुखाम्बुजे

त्वत्पाणिपद्मे कमला त्वत्क्रोधेऽस्ति हलाहलः ।
अमृतं तव वागेव त्वद्भुजावश्विनीसुतौ ॥ ७४ ॥
तत्क्रियत्त्वयि भूजानौ सर्वदेवमयो ह्यसि ।
तस्मात्तव शुभोदर्को मया ज्ञातोऽस्ति तत्त्वतः ॥ ७५ ॥

आरभ्याद्यदिनाद्भूपब्राह्मणोऽष्टादशेऽहनि। उदीच्यःकश्चिदागत्यध्रुवंत्वामुपदेक्ष्यति

तस्य वाक्यं त्वया राजन्कर्तव्यमविचारितम् ।
ततस्ते हृत्स्थितं सर्वं सेत्स्यत्येव महामते !॥ ७७ ॥
इत्युक्त्वा पृच्छ्य राजानं लब्धानुज्ञो द्विजोत्तमः ।
विवेश स्वाश्रमं तुष्टो नृपोऽप्याश्चर्यवानभूत् ॥ ७८ ॥

इत्थं विघ्नजिता सर्वा पुरी स्वात्मवशीकृता ।
स पौरा सावरोधा च सनृपा निजमायया ॥ ७९ ॥
कृतकृत्यमिवात्मानं ततो मत्वा स विघ्नजित् ।
विधाय बहुधात्मानं काश्यां स्थितिमवाप च ॥ ८० ॥

यदासनदिवोदासः प्रागासीत्कुम्भसम्भव । तदातनंनिजं स्थानमलञ्चक्रे गणाधिपः
दिवोदासे नरपतौ विष्णुनोच्चाटिते सति । पुनर्नवीकृतायाञ्च नगर्यां विश्वकर्मणा
स्वयमागत्य देवेन मन्दरात्सुन्दरांपुरीम् । वाराणसीं प्रथमतस्तुष्टुवे गणनायकम्

अगस्त्य उवाच

कथंस्तुतोभगवता देवदेवेन विघ्नजित् । कथं च बहुधात्मानं स चकार विनायकः
केनकेनसवैनाम्ना काशिपुर्यां व्यवस्थितः । इति सर्वं समासेन कथयस्व षडानन
इत्युदीरितमाकर्ण्यकुम्भयोनेः षडाननः । यथावत्कथयामास गणराजकथां शुभाम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये काशीखण्डे
उत्तरार्धे गणेशमायाप्रपञ्चोनाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

—:*:—

सप्तपञ्चाशत्तमोऽध्यायः

ढुण्ढिविनायकप्रादुर्भाववर्णनम्

स्कन्द उवाच

विश्वेशोविश्वयासार्धंमयाच मुनिसत्तम !। महाशाखविशाखाभ्यांनन्दिभृङ्गिपुरोगमः
नैगमेयेन सहितो रुद्रैः सर्वत्र सम्वृतः । देवर्षिभिः समायुक्तः सनकाद्यैरभिष्टुतः
समस्तायतनाधीशैर्दिक्पालैरभिनन्दितः । तीर्थैर्दर्शिततीर्थश्च गन्धर्वैर्गीतमङ्गलः ॥
कृतपूजोऽप्सरोभिश्च नृत्यहस्तकपल्लवैः । वियत्यनाहतैर्वाद्यैः समन्तादनुमोदितः
ऋषीणां ब्रह्मनिर्घोषैर्बधिरीकृतदिङ्मुखः । कृतस्तुतिश्चारणौघैर्विमानैरभितो वृतः

त्रिविष्टपवधूमुष्टिभ्रष्टैर्लाजैरितस्ततः । अभिवृष्टो महादेवः सम्प्रहृष्टतनूरुहः ॥ ६ ॥
दत्तमाल्योपहारश्च ।बहुविद्याधरीगणैः । यक्षगुह्यकसिद्धैश्च खेचरैरभिनन्दितः ॥
कृतप्रवेशशकुनो मृगैः शकुनिभिः पुरः । किन्नरीभिः प्रहृष्टास्यैः किन्नरै रुपवर्णितः
विष्णुनाचमहालक्ष्म्याब्रह्मणाविश्वकर्मणा । नन्दिनाऽथगणेशेनआविष्कृतमहोत्सवः
नागाङ्गनाभिः परितः कृतनीराजनाविधिः । प्रविवेशमहादेवःपुरीं वाराणसीं शुभाम्
पश्यतां सर्वदेवानामवरुह्य वृषेन्द्रतः । परिष्वज्य गणाधीशं प्रोवाच वृषभध्वजः
यदहंप्राप्तवानस्मिपुरींवाराणसींशुभाम् । मयाप्यतीवदुष्प्राप्यांसप्रसादोस्यवैशिशोः
यद्दुष्प्रसाध्यंहिपितुरपित्रिजगतीतले । तत्सूनुना सुसाध्यं स्यादत्र दृष्टान्तता मयि
अनेन गजवक्त्रेण स्वबुद्धिविभवैरिह । काशीप्राप्तिर्यथामेस्यात्तथाकिञ्चिदनुष्ठितम्
पुत्रवानहमेवास्मियच्चमे चिरचिन्तितम् । स्वपौरुषेण कृतवानभिलाषं करस्थितम्
इत्युक्त्वात्रिपुरीहर्त्ता पुरुहूतादिभिः स्तुतः । परितुष्टाव संहृष्टः स्पष्टगीर्भिर्गजाननम्

श्रीकण्ठ उवाच

जयविघ्नकृतामाद्य!भक्तनिर्विघ्नकारक !। अविघ्न!विघ्नशमन!महाविघ्नैकविघ्नकृत्
जय सर्वगणाधीश! जय सर्वगणाग्रणीः !। गणप्रणतपादाब्जगणनातीतसद्गुण!
जय सर्वग! सर्वेश सर्वबुद्ध्येकशेवधे । सर्वमायाप्रपञ्चज्ञ सर्वकर्माग्रपूजित ॥ १९ ॥
सर्वमङ्गलमाङ्गल्य! जय त्वं सर्वमङ्गल !। अमङ्गलोपशमन ! महामङ्गलहेतुक !॥ २० ॥
जय सृष्टिकृतां वन्द्य!जयस्थितिकृतानत !। जयसंहृतिकृत्स्तुत्य!जयसत्कर्मसिद्धिद!
सिद्धवन्द्यपदाम्भोज! जयसिद्धिविधायक !।
सर्वसिद्ध्येकनिलयमहासिद्ध्यृद्धिसूचक !॥ २३ ॥
अशेषगुणनिर्माणगुणातीतगुणाग्रणीः !। परिपूर्णचरित्रार्थ ! जय त्वं गुणवर्णित ॥
जय सर्वबलाधीश! बलारातिबलप्रद ! । बलाकोज्ज्वलदन्ताग्रबालाबालपराक्रम !॥
अनन्तमहिमाधार ! धराधरविदारण ! । दन्ताग्रप्रोतदिङ्नाग ! जयनागविभूषण !॥
ये त्वां नमन्ति करुणामयदिव्यमूर्ते! सर्वैनसामपि भुवो भुवि मुक्तिभाजः
तेषां सदैव हरसीह महोपसर्गान्स्वर्गापवर्गमपि संप्रददासि तेभ्यः ॥ २६ ॥

ये विघ्नराज भवता करुणाकटाक्षैः सम्प्रेक्षिताःक्षितितले क्षणमात्रमत्र ।
तेषां क्षयन्ति सकलान्यपि किल्बिषाणि लक्ष्मीः कटाक्षयति तान्पुरुषोत्तमान्हि ।
ये त्वां स्तुवन्ति नतविघ्नविघातदक्ष दाक्षायणीहृदयपङ्कजतिग्मरश्मे !।
श्रूयन्त एव त इह प्रथिता न चित्रं चित्रं तदत्र गणपा यदहोत एव ॥ २८॥
येशीलयन्तिसततं भवतोऽङ्घ्रियुग्मं ते पुत्रपौत्रधनधान्यसमृद्धिभाजः ।
संशीलिताङ्घ्रिकमलाबहुभृत्यवर्गैर्भूपालभोग्यकमलां विमलां लभन्ते ॥२९
त्वं कारणं परमकारणकारणानां वेद्योऽसि वेदविदुषां सततं त्वमेकः ।
त्वंमार्गणीयमसिकिञ्चनमूलवाचां वाचामगोचरचराचरदिव्यमूर्ते !॥ ३० ॥
वेदा विदन्ति न यथार्थतया भवन्तं ब्रह्मादयोऽपि न चराचरसूत्रधार !।
त्वं हंसि पासि विदधासि समस्तमेकः कस्तेस्तुतिव्यतिकरोमनसाप्यगम्य!
त्वद्दुष्टदृष्टिविशिखैर्निहतान्निहन्मि दैत्यान्पुरान्धकजलन्धरमुख्यकांश्च ।
कस्यास्ति शक्तिरिहयस्त्वदृतेपितुच्छं वाञ्छेद्विधातुमिह सिद्धिद! कार्यजातम् ।
अन्वेषणे ढुढिरयंप्रथितोऽस्ति धातुःसर्वार्थढुण्ढिततया तव दुण्ढिनाम ।
काशीप्रवेशमपि कोलभतेऽत्रदेही तोषं विनातव विनायक दुण्ढिराज !॥ ३३
दुण्ढे! प्रणम्य पुरतस्तव पादपद्मं यो मां नमस्यति पुमानिह काशिवासी ।
तत्कर्णमूलमधिगम्य पुरा दिशामि तत्किञ्चिदत्र न पुनर्भवताऽस्ति येन ॥ ३४ ॥
स्नात्वा नरःप्रथमतोमणिकर्णिकायामुद्धूलिताङ्घ्रियुगलस्तुसचैलमाशु ।
देवर्षिमानवपितॄनपि तर्पयित्वा ज्ञानोदतीर्थमभिलभ्य भजेत्ततस्त्वाम् ॥३५॥
सामोदमोदकभरैर्वरधूपदीपैर्माल्यैः सुगन्धबहुलैरनुलेपनैश्च ।
सम्प्रीण्य काशिनगरीफलदानदक्षं प्रोक्त्वाऽथमांकइहसिध्यतिनैवदुण्ढे !॥
तीर्थान्तराणि च ततः क्रमवर्जितोऽपिसंसाधयन्निह भवत्करुणाकटाक्षैः ।
दूरीकृतस्वहितघात्युपसर्गवर्गो दुण्ढे ! लभेदविकलं फलमत्र काश्याम् ॥ ३७
यःप्रत्यहं नमति दुण्ढविनायकं त्वांकाश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः ।
नो तस्य जातुजगतीतलवर्तिवस्तु दुष्प्रापमत्र च परत्र च किञ्चनापि ॥ ३८

यो नाम ते जपति दुण्ढिविनायकस्यतं वैजपन्त्यनुदिनं हृदि सिद्धयोऽष्टौ ।
भोगान्विभुज्य विविधान्विबुधोपभोग्यान्निर्वाणया कमलया व्रियते स चान्ते ।
दूरेस्थितोऽप्यहरहस्तव पादपीठं यः संस्मरेत्सकलसिद्धिद! दुण्ढिराज !।
काशीस्थितेरविकलं सफलं लभेत नैवान्यथा न वितथा मम वाक्कदाचित् ॥ ४० ॥
जानेविघ्नानसंख्यातान्विनिहन्तुमनेकधा । क्षेत्रस्यास्यमहाभागनानारूपैरिहस्थितः
यानियानिचरूपाणि यत्र यत्र च तेऽनघ । तानितत्रप्रवक्ष्यामिश्रृण्वन्त्वेतेदिवोकसः
प्रथमं दुण्ढिराजोऽसि मम दक्षिणतोमनाक् ।
आदुण्ढ्यसर्वभक्तेभ्यः सर्वार्थान्सम्प्रयच्छसि ॥ ४३ ॥
अङ्गारवासरवतीमिह यैश्चतुर्थीं सम्प्राप्य मोदकभरैःपरिमोदवद्भिः ।
पूजा व्यधायि विविधा तव गन्धमाल्यैस्तानत्रपुत्रविदधामिगणान्गणेश ॥
ये त्वामिह प्रतिचतुर्थिसमर्चयन्ति दुण्ढे! विगाढमतयःकृतिनस्तएव ।
सर्वापदां शिरसि वामपदं निधाय सम्यग्गजानन! गजाननतां लभन्ते ॥ ४५
माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः ।येत्वांदुण्ढेऽर्चयिष्यन्तितेऽर्च्याःस्युरसुरद्रुहाम्
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
शुक्लां शुक्लतिलैर्बद्ध्वा प्राश्नीयाल्लड्डुकान्व्रती ॥ ४७ ॥
कार्या यात्रा प्रयत्नेन क्षेत्रसिद्धिमभीप्सुभिः ।
तस्यां चतुर्थ्यां त्वत्प्रीत्यै दुण्ढे! सर्वोपसर्गहृत् ॥ ४८ ॥
तां यात्रां नात्र यः कुर्यान्नैवेद्यंतिललड्डुकैः । उपसर्गसहस्रैस्तु सहन्तव्योममाज्ञया
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः ।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रःप्रसेत्स्यति ॥ ५० ॥
वैदिकोऽवैदिको वापि यो मन्त्रस्ते गजानन !।
जप्तस्त्वत्सन्निधौ दुण्ढे! सिद्धिं दास्यति वाञ्छिताम् ॥ ५१ ॥

ईश्वर उवाच

इमां स्तुतिं मम कृतिं यः पठिष्यति सन्मतिः

न जातु तं तुविघ्नौघाःपीडयिष्यन्तिनिश्चितम् ॥ ५२ ॥
ढौण्ढीं स्तुतिमिमां पुण्यां यः पठेद्दुण्ढिसन्निधौ ।
सान्निध्यं तस्य सततं भजेयुः सर्वसिद्धयः ॥ ५३ ॥
इमां स्तुतिंनरो जप्त्वा परंनियतमानसः । मानसैरपि पापैस्तैर्नाभिभूयेत कर्हिचित्
पुत्रान्कलत्रं क्षेत्राणिवराश्वान्वरमन्दिरम् । प्राप्नुयाच्च धनंधान्यंदुण्ढिस्तोत्रंजपन्नरः
सर्वसम्पत्करं नाम स्तोत्रमेतन्मयेरितम् । प्रजप्तव्यं प्रयत्नेन मुक्तिकामेन सर्वदा
जप्त्वा स्तोत्रमिदं पुण्यं क्वापि कार्ये गमिष्यतः ।
पुंसःपुरःसमेष्यन्ति नियतं सर्वसिद्धयः ॥ ५७ ॥
अन्यच्च कथयाम्यत्र श्रृण्वन्त्वेते दिवौकसः ।
दुण्ढिना क्षेत्ररक्षार्थं यत्र यत्र स्थितिःकृता ॥ ५८ ॥
काश्यां गङ्गासिसम्भेदेनामतोऽर्कविनायकः । दृष्टोऽर्कवासरेपुम्भिःसर्वतापप्रशान्तये
दुर्गो नाम गणाध्यक्षः सर्वदुर्गतिनाशनः । क्षेत्रस्य दक्षिणे भागे पूजनीयः प्रयत्नतः
भीमचण्डीसमीपे तु भीमचण्डविनायकः । क्षेत्रनैर्ऋ तदेशस्थो दृष्टोहन्तिमहाभयम्
क्षेत्रस्य पश्चिमे भागे सदेहलिविनायकः । सर्वान्निवारयेद्विघ्नान्भक्तानांनात्रसंशयः
क्षेत्रवायव्यदिग्भागे उद्दण्डाख्यो गजाननः ।
उद्दण्डानपि विघ्नौघान् भक्तानां दण्डयेत्सदा ॥ ६३ ॥
काश्याः सदोत्तराशायां पाशपाणिर्विनायकः ।
विनायकान्पाशयन्ति भक्त्या काशीनिवासिनाम् ॥ ६४ ॥
गङ्गावरणयोः सङ्गेरम्यःखर्वविनायकः । अखर्वानपिविघ्नौघान्भक्तानांखर्वयेत्सताम्
प्राच्यां तु क्षेत्ररक्षार्थं सिद्धः सिद्धिविनायकः ।
पश्चिमे यमतीर्थस्य साधकक्षिप्रसिद्धिदः ॥ ६६ ॥
बाह्यावरणगाश्चैतेकाश्यामष्टौविनायकाः । उच्चाटयन्त्यभक्तांश्चभक्तानांसर्वसिद्धिदाः
द्वितीयावरणे चैव ये रक्षन्ति विनायकाः । अविमुक्तमिदंक्षेत्रं तानहं कथयाम्यतः
स्वर्धुन्याः पश्चिमे कूले उत्तरेऽर्कविनायकात् ।

लम्बोदरो गणाध्यक्षः क्षालयेद्विघ्नकर्दमम् ॥ ६६ ॥
तत्पश्चिमे कूटदन्त उदग्दुर्गविनायकात् । दुर्गोपसर्गसंहर्ता रक्षेत्क्षेत्रमिदं सदा
भीमचण्डगणाध्यक्षात्किञ्चिदीशानदिग्गतः ।
क्षेत्ररक्षोगणाध्यक्षः पूज्यः शालकटङ्कटः ॥ ७१ ॥
प्राच्यां देहलिविघ्नेशात्कूश्माण्डाख्यो विनायकः ।
पूजनीयः सदाभक्तैर्महोत्पातप्रशान्तये ॥ ७२ ॥
उद्दण्डाख्याद्गणपतेराशुशुक्षणिदिक्स्थितः ।
महाप्रसिद्धः सम्पूज्योभक्तैर्मुण्डविनायकः ॥ ७३ ॥
पाताले तस्य देहोऽस्ति मुण्डं काश्यां व्यवस्थितम् ।
अतः सङ्गीयते काश्यां देवा मुण्डविनायकः ॥ ७४ ॥
पाशपाणेर्गणेशानाद्दक्षिणे विकटद्विजम् । पूजयित्वा गणपतिंगाणपत्यपदं लभेत्
खर्वाख्यान्नैर्ऋते भागे राजपुत्रोविनायकः । भ्रष्टराज्यश्च राजानंराजानं कुरुतेऽर्चितः
गङ्गायाः पश्चिमे कूले प्रणवाख्योगणाधिपः । अवाच्यांराजपुत्राच्चप्रणतःप्रणयेद्दिवम्
द्वितीयावरणे काश्यामष्टावेते विनायकाः ।
उत्सादयेयुर्विघ्नौघान्काशीस्थितिनिवासिनाम् ॥ ७८ ॥
क्षेत्रे तृतीयावरणे क्षेत्ररक्षाकृतः सदा । ये विघ्नराजाः सन्तीह ते वक्तव्या मयाधुना
उदग्वहायाः स्वर्धुन्या रम्ये रोधसि विघ्नराट् ।
लम्बोदरादुदीच्यान्तु वक्रतुण्डोऽघसङ्घहृत् ॥ ८० ॥
कूटदन्ताद्गणवतेरुदीच्यामेकदन्तकः । सदोपसर्गसंसर्गात्पायादानन्दकाननम् ॥
काशीभयहरो नित्यमैश्यांशालकटङ्कटात् । त्रिमुखोनामविघ्नेशःकपिसिंहद्विपाननः
कूश्माण्डात्पूर्वदिग्भागे पञ्चास्यो नाम विघ्नराट् ।
पञ्चास्यस्यन्दनवरः पाति वाराणसीं पुरीम् ॥ ८३ ॥
हेरम्बाख्यः सदाग्नेय्यां पूज्यो मुण्डविनायकात् ।
अम्बावत्पूरयेत्कामान्सर्वेषां काशिवासिनाम् ॥ ८४ ॥

अवाच्यामर्चयेद्धीमान्सिद्ध्यै विकटदन्ततः । विघ्नराजंगणपतिं सर्वविघ्नविनाशनम्
विनायकाद्राजपुत्रात्किञ्चिद्रक्षोदिशिस्थितः ।
वरदाख्यो गणाध्यक्षः पूज्यो भक्तवरप्रदः ॥ ८६ ॥
याम्यां प्रणवविघ्नेशाद्गणेशो मोदकप्रियः । पूज्यः पिशङ्गिलातीर्थे देवनद्यास्तटेशुभे
चतुर्थावरणे काश्यां भक्तविघ्नविनाशकाः । द्रष्टव्या हृष्टचेतोभिःस्पष्टमष्टौविनायकाः
वक्रतुण्डादुदग्दिक्स्थः स्वः सिन्ध्वो रोधसि स्थितः ।
विनायकोऽस्त्यभयदः सर्वेषां भयनाशनः ॥ ८६ ॥
कौबेर्यामेकदशनात्सिंहतुण्डोविनायकः । उपसर्गगजान्हन्तिवाराणसिनिवासिनाम्
कूणिताक्षो गणाध्यक्षस्त्रितुण्डादीशदिक्स्थितः ।
महाश्मशानं सततं पायाद्दुष्टकुदृष्टितः ॥ ९१ ॥
प्राच्यां पञ्चास्यतः पायात्पुरीं क्षिप्रप्रसादनः ।
क्षिप्रप्रसादनार्चातः क्षिप्रं सिध्यन्ति सिद्धयः ॥ ९२ ॥
हेरम्बाद्वह्निदिग्भागे चिन्तामणिविनायकः ।
भक्तचिन्तामणिः साक्षाच्चिन्तितार्थसमर्पकः ॥ ९३ ॥
विघ्नराजादवाच्यान्तुदन्तहस्तोगणेश्वरः । लिखेद्विघ्नसहस्राणिनृणांवाराणसीद्रुहाम्
वरदाद्या तुधान्यां चयातुधानगणावृतः । देवः पिचिण्डिलो नाम पुरींरक्षेदहर्निशम्
दृष्टःपिलिपिलार्पीर्थेदक्षिणेमोदकप्रियात् । उद्दण्डमुण्डोहेरम्बोभक्तेभ्यःकिंनयच्छति
प्रावारे पञ्चमे काश्यां द्विचतुष्कविनायकाः । कुर्वन्तिरक्षांक्षेत्रस्ययेतानत्रब्रवीम्यहम
तीरे स्वर्गतरङ्गिण्या उत्तरे चाभयप्रदात् ।
स्थूलदन्तो गणेशानःस्थूलाःसिद्धीर्दिशेत्सताम् ॥ ९८ ॥
सिंहतुण्डादुदग्भागेकलिप्रियविनायकः । कलहंकारयेन्नित्यमन्योन्यंतैर्थिकद्रुहाम्
कूणिताक्षात्तथैशान्याञ्चतुर्दन्तोविनायकः । यस्यदर्शनमात्रेणविघ्नसङ्घःक्षयेत्स्वयम्
क्षिप्रप्रसादनादैन्द्र्यां द्वितुण्डोगणनायकः । अग्रतःपृष्ठतश्चापिबिभर्तिसदृशींश्रियम्
तस्यसन्दर्शनात्पुंसांभवेच्छ्रीःसर्वतोमुखी । ज्येष्ठोनामगणाध्यक्षोज्येष्ठेमेपुत्रसम्पदि

ज्येष्ठशुक्लचतुर्दश्यां सम्पूज्यो ज्येष्ठतातये।
स्थितो वह्निदिशोभागे चिन्तामणिविनायकात्॥ १०३ ॥

दन्तहस्ताद्यमाशायांपूज्योगजविनायकः।तस्यसम्पूजनाद्भक्त्यागजान्ताश्रीरवाप्यते
पिचिण्डिलाद्गणपतेर्याम्यांकालविनायकः। भयंनकालकलितंतस्यसंसेवनान्नृणाम्
उद्दण्डमुण्डाद्गणपात्कीनाशदिशिसंस्थितम्। नागेशंगणपं दृष्ट्वा नागलोके महीयते
अथषष्ठावरणगाः प्रोच्यन्ते विघ्ननायकाः। तेषांनामश्रवादेव पुंसां सिद्धिः प्रजायते

मणिकर्णो गणपतिः प्राच्यां विघ्नविघातकृत्।
आशाविनायको वह्न्यां भक्ताशां पूरयन् स्थितः ॥ १०८ ॥

याम्यां सृष्टिगणेशश्च सृष्टिसंहारसूचकः। नैर्ऋत्यांयक्षविघ्नेशः सर्वविघ्नहरः परः
प्रतीच्यां गजकर्णश्च सर्वेषांक्षेमकारकः। चित्रघण्टो गणपतिर्वायव्यांपालयेत्पुरीम्

स्थूलजङ्घ उदीच्यां च शमयेच्छमिनामघम्।
ऐश्यामैशीं पुरीं पायात्समङ्गलविनायकः॥ १११ ॥

यमतीर्थादुदीच्यांच पूज्योमित्रविनायकः। सप्तमावरणे येचतांश्चवक्ष्येविनायकान्
मोदाद्याः पञ्चविघ्नेशाः षष्ठो ज्ञानविनायकः। सप्तमो द्वारविघ्नेशो महाद्वारपुरश्चरः
अष्टमः सर्वकष्टौघानविमुक्तविनायकः। अविमुक्ते मम क्षेत्रे हरेत्प्रणतचेतसाम्
षट्पञ्चाशद्गजमुखानेतान्यःसंस्मरिष्यति। दूरदेशान्तरस्थोऽपिसमृतोज्ञानमाप्नुयात्

ढुण्ढिस्तुतिं महापुण्यां षट्पञ्चाशद्गजाननाम।
यः पठिष्यति पुण्यात्मा तस्य सिद्धिः पदे पदे ॥ ११६ ॥

इमे गणेश्वराः सर्वेस्मर्तव्यायत्रकुत्रचित्। महाविपत्समुद्रान्तःपतन्तंपान्तिमानवम्

इति स्तुतिं महापुण्यां श्रुत्वा चैतान्विनायकान्।
जातु विघ्नैर्नबाध्येत पापेभ्योऽपि प्रहीयते ॥ ११८ ॥
इत्युक्त्वा देवदेवोऽपि महोत्सवितमानसः।
कृताभिषेको ब्रह्माद्यैस्तेभ्योदत्वाऽभिवाञ्छितम् ॥ ११६ ॥

सम्प्रसाद्य यथायोगं सर्वानुचितचक्षुरः। अविशद्राजसदनं विश्वकर्मविनिर्मितम्

स्कन्द उवाच

एवं स्तुतो भगवतादेवदेवेन विघ्नजित्। इत्थञ्च बहुधात्मानं स चकार विनायकः

एतानि तस्य नामानि ढुण्ढिराजस्य कुम्भज !।
जपित्वा यानि मनुजो लप्स्यते निजवाञ्छितम् ॥ १२२ ॥

अन्येऽपिस्तत्रवैभेदातस्यढुण्ढेर्गणेशितुः। भक्तैःसमर्चिताभत्तयाह्यसंख्याताःसहस्रशः
भगीरथगणाध्यक्षो हरिश्चन्द्रविनायकः। कपर्दाख्यो गणपतिस्तथाबिन्दुविनायकः

इत्याद्यास्तत्र विघ्नेशाः प्रतिभक्तप्रतिष्ठिताः।
तेषामप्यर्चनात्पुंसां जायन्ते सर्वसम्पदः ॥ १२५ ॥

श्रुत्वाध्यायमिमंपुण्यंनरःश्रद्धासमन्वितः।सर्वविघ्नान्समुत्सृज्यलभतेवाञ्छितम्पदम

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्त्र्यांसंहितायां चतुर्थे काशीखण्डे उत्तरार्धे ढुण्ढिविनायकप्रादुर्भावोनामसप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशत्तमोऽध्यायः

दिवोदासनिर्वाणप्राप्तिवर्णनम्

अगस्त्य उवाच

किं चकार हरःस्कन्द!मन्दराद्रिगतस्तदा। विलम्बमालम्बयति तस्मिन्नपि गजानने

स्कन्द उवाच

शृणवगस्त्य! कथाम्पुण्यां कथ्यमानां मयाधुना
वाराणस्येकविषयामशेषाघौघनाशिनीम् ॥ २ ॥

करीन्द्रवदने तत्र क्षेत्रवर्येऽविमुक्तके। विलम्बभाजि त्र्यक्षेण प्रोक्षि क्षिप्रमधोक्षजः

प्रोक्तोऽथ बहुशश्चेति बहुमानपुरःसरम्।
तथा त्वमपि माकार्षीर्यथाप्राक्प्रस्थितैः कृतम् ॥ ४ ॥

श्रीविष्णुरुवाच

उद्यमः प्राणिभिःकार्यो यथाबुद्धिबलाबलम् । परंफलन्तिकर्माणित्वदधीनानिशङ्कर!

अचेतनानि कर्माणि स्वतन्त्राः प्राणिनोऽपि न ।

त्वञ्च तत्कर्मणां साक्षी त्वञ्च प्राणिप्रवर्तकः ॥ ६ ॥

किन्तु त्वत्पादभक्तानां तादृशीजायतेमतिः । ययात्वमेवकथयेःसाध्वनेनत्वनुष्ठितम्

यत्किञ्चिदिह वै कर्म स्तोकम्वास्तोकमेववा ।

तत्सिद्ध्यत्येव गिरिश! त्वत्पादस्मृत्यनुष्ठितम् ॥ ८ ॥

सुसिद्धमपि वै कार्यं सुबुद्ध्याऽपि स्वनुष्ठितम् ।

अत्वत्पदस्मृतिकृतं विनश्यत्येव तत्क्षणात् ॥ ६ ॥

शम्भुना प्रेषितेनाद्य सूद्यमः क्रियते मया ।

त्वद्भक्तिसम्पत्तिमतां सम्पन्नप्राय एव एव नः ॥ १० ॥

अतीव यदसाध्यं स्यात्स्वबुद्धिबलपौरुषैः ।

तत्कार्यं हि सुसिद्धं स्यात्त्वदनुध्यानतः शिव !॥ ११ ॥

यान्तिप्रदक्षिणीकृत्ययेभवन्तंभवंविभो !। भवन्ति तेषांकार्याणिपुरोभूतानितेभयात्

जातंविद्धिमहादेवकार्यमेतत्सुनिश्चितम् । काशीप्रावेशिकश्चिन्त्यःशुभलग्नोदयःपरम्

अथवाकाशिसम्प्राप्तौनचिन्त्यंहिशुभाशुभम् । तदैवहिशुभःकालोयदैवाप्येत काशिका

शम्भुम्प्रदक्षिणीकृत्यप्रणम्य च पुनः पुनः । प्रतस्थेऽथसलक्ष्मीको मन्दराद्गरुडध्वजः

दृशोरतिथितां नीत्वा विष्णुर्वाराणसीं ततः ।

पुण्डरीकाक्ष इत्याख्यां सफलीकृतवान्मुदा ॥ १६ ॥

गङ्गावरणयोर्विष्णुः सम्भेदेस्वच्छमानसः । प्रक्षाल्यपाणिचरणंसचैलः स्नातवानथ

तदाप्रभृति तत्तीर्थं पादोदकमितीरितम् । पादौयदादौ शुभदौक्षालितौपीतवाससा

तत्रपादोदकेतीर्थे ये स्नास्यन्तीह मानवाः । तेषां विनश्यतिक्षिप्रंपापंसप्तभवार्जितम्

तत्रश्राद्धंनरः कृत्वादत्त्वाचैव तिलोदकम् । सप्तसप्ततथा सप्तस्ववंश्यांस्तारयिष्यति

गयायांयादृशीतृप्तिर्लभ्यते प्रपितामहैः । तीर्थेपादोदके काश्यांतादृशी लभ्यते ध्रुवम्

कृतपादोदकस्नानं पीतपादोदकोदकम् । दत्तपादोदपानीयं नरं न निरयः स्पृशेत्

विष्णुपादोदके तीर्थे प्राश्य पादोदकं सकृत् ।

जातुचिज्जननीस्तन्यं न पिबेदिति निश्चितम् ॥ २३ ॥

सचक्रशालग्रामस्यशङ्खेनस्नापितस्यच । अद्भिःपादोदकस्याम्बुपिबन्नमृततांव्रजेत्

विष्णुपादोदकेतीर्थेविष्णुपादोदकंपिबेत् । यदितत्सुधया किं नुबहुकालीनया तया

काश्यांपादोदकेतीर्थेयैःकृतानोदकक्रियाः । जन्मैवविफलं तेषांजलबुद्बुदसश्रियाम्

कृतनित्यक्रियो विष्णुः सलक्ष्मीकः सकाश्यपिः ।

उपसंहृत्य ताम्मूर्ति त्रैलोक्यव्यापिनीं तथा ॥ २७ ॥

विधायदार्षदींमूर्ति स्वहस्तेनादिकेशवः । स्वयंसम्पूजयामाससर्वसिद्धिसमृद्धिदाम्

आदिकेशवनाम्नींतांश्रीमूर्तिंपारमेश्वरीम् । सम्पूज्यमर्त्योवैकुण्ठंमन्यतेस्वगृहाङ्गणम्

श्वेतद्वीपइतिख्यातंतत्स्थानंकाशिसीमनि । श्वेतद्वीपेवसन्त्येवनरास्तन्मूर्तिसेवकाः

क्षीराब्धिसञ्ज्ञंतत्रान्यत्तीर्थंकेशवतोऽग्रतः । कृतोदकक्रियस्तत्रवसेत्क्षीराब्धिरोधसि

तत्रश्राद्धंनरः कृत्वागांदत्वाचपयस्विनीम् । यथोक्तसर्वाभरणांक्षीरोदेवासयेत्पितॄन्

एकोत्तरशतं वंश्यान्नयेत्पायसकर्दमम् । क्षीरोदरोधः पुण्यात्मा भक्त्या तत्रैकधेनुदः

बह्वीश्चनैचिकीर्दत्त्वाश्रद्धयात्र सदक्षिणाः । शय्योत्तरांश्चप्रत्येकंपितॄंस्तत्रसुवासयेत्

क्षीरोदाद्दक्षिणे तत्र शङ्खतीर्थमनुत्तमम् । तत्रापिसन्तर्प्यपितॄन् विष्णुलोके महीयते

तद्याम्याञ्चक्रतीर्थंवपितॄणामपिदुर्लभम् । तत्रापिविहितश्राद्धो मुच्यते पैतृकादृणात्

तत्सन्निधौ गदातीर्थं विष्वगाधिनिबर्हणम् ।

तारणञ्च पितॄणां वै कारणं चैनसां क्षये ॥ ३७ ॥

पद्मतीर्थं तदग्रे तुतत्रस्नात्वा नरोत्तमः । पितॄन्सन्तर्प्य विधिना पद्मया नैव हीयते

तत्रैव च महालक्ष्म्यास्तीर्थं त्रैलोक्यविश्रुतम् ।

स्वयं यत्र महालक्ष्मीः स्नाता त्रैलोक्यहर्षदा ॥ ३६ ॥

तत्रतीर्थं कृतस्नानोदत्त्वारत्नानिकाञ्चनम् । पट्टाम्बराणिविप्रेभ्योनलक्ष्म्यापरिहीयते

यत्रयत्रहिजायेततत्रतत्रसमृद्धिमान् । पितरोपिहिसश्रीकास्तस्यस्युस्तीर्थगौरवात्

तत्रास्ति हि महालक्ष्म्या मूर्तिस्त्रैलोक्यवन्दिता।
ताम्प्रणम्य नरो भक्त्या न रोगी जायते क्वचित् ॥ ४२ ॥
नभस्यबहुलाष्टम्यांकृत्वाजागरणंनिशि । समर्च्य च महालक्ष्मीं व्रती व्रतफलं लभेत्
तार्क्ष्यतीर्थं हि तत्रास्ति तार्क्ष्यकेशवसन्निधौ ।
तत्र स्नात्वा नरो भक्त्या संसाराहिं न पश्यति ॥ ४४ ॥
तदग्रे नारदं तीर्थं महापातकनाशनम् । ब्रह्मविद्योपदेशञ्च प्राप्तवान्यत्र नारदः ॥ ४५
तत्रस्नातोनरः सम्यग्ब्रह्मविद्यामवाप्नुयात् । केशवात्तेनतत्रोक्तः काश्यांनारदकेशवः
अर्चयित्वा नरो भक्त्या देवंनारदकेशवम् । जनन्या जठरं पीठमध्यास्ते न कदाचन
प्रह्लादतीर्थं तस्याग्रे यत्र प्रह्लादकेशवः । तत्र श्राद्धादिकं कृत्वा विष्णुलोके महीयते
आम्बरीषमहातीर्थमघघ्नंतस्य सन्निधौ । तत्रौदकींक्रियां कुर्वन्निष्कालुष्यं लभेन्नरः
आदित्यकेशवः पूज्य आदिकेशवपूर्वतः । तस्य संदर्शनादेव मुच्यते चोच्चपातकैः
दत्तात्रेयेश्वरं तीर्थं तत्रैवादिगदाधरः । पितृन्सन्तर्प्य तत्रैव ज्ञानयोगमवाप्नुयात्
भृगुकेशवपूर्वेण तीर्थं वै भार्गवं परम् । तत्रस्नातो नरः प्राज्ञो भवेद्भार्गववत्सुधीः
तत्रवामनतीर्थंचप्राच्यां वामनकेशवात् । पूजयित्वा च तं विष्णु वसेद्वामनसन्निधौ
नरनारायणं तीर्थं नरनारायणात्पुरः । तत्र तीर्थे कृतस्नानो नरो नारायणो भवेत्
यज्ञवाराहतीर्थं च तदग्रे पापनाशनम् । प्रतिमज्जनतस्तत्र राजसूयक्रतोः फलम्
विदारनारसिंहाख्यं तत्रतीर्थंसुनिर्मलम् । स्नातो विदारयेत्तत्र पापं जन्मशतार्जितम्
गोपिगोविन्दतीर्थं च गोपिगोविन्दपूर्वतः ।
स्नात्वा तत्र समभ्यर्च्य विष्णुं विष्णुप्रियो भवेत् ॥ ५७ ॥
तीर्थं लक्ष्मीनृसिंहाख्यं गोपिगोविन्ददक्षिणे ।
न लक्ष्म्या त्यज्यते क्वापि तत्तीर्थपरिमज्जनात् ॥ ५८ ॥
तदग्रे शेषतीर्थं च शेषमाधवसन्निधौ । तर्पितानां पितृणां च यत्र तृप्तिर्नशिष्यते
शङ्खमाधवतीर्थं चतदवाच्यां सुनिर्मलम् । कृतोदकोनरस्तत्र भवेत्पापोऽपि निर्मलः
तदग्रे च हयग्रीवं तीर्थं परमपावनम् । तत्र स्नात्वा हयग्रीवं केशवं परिपूज्य च

पिण्डंच तत्र निर्वाप्य हयग्रीवस्यसन्निधौ । हायग्रीवींश्रियम्प्राप्यसमुच्येत सपूर्वजः

स्कन्द उवाच

प्रसङ्गतोमयैतानितीर्थानि कथितानिते । भूमौ तिलान्तरायां यत्तत्र तीर्थान्यनेकशः
उद्दिष्टानां तु तीर्थानामेतेषां कलशोद्भव !। नाममात्रमपि श्रुत्वा निष्पापोजायते नरः
इदानींप्रस्तुतं विप्रश्शृणुवक्ष्यामि तेऽग्रतः । वैकुण्ठनाथो यच्चक्रे शङ्खचक्रगदाधरः
तस्यांमूर्तौसमावेश्यकैशव्यामथ केशवः । शम्भोः कार्यंकृतमनाअंशांशांशेन निर्गतः

अगस्त्य उवाच

अशांशांशेननिश्चक्रे कुतोभो!चक्रपाणिना । क्वनिर्गतं च हरिणाप्राप्यकाशीं षडानन!

स्कन्द उवाच

सामस्त्येन यदर्थं न निर्गतं विष्णुना मुने !। ब्रुवे तत्कारणमितिक्षणमात्रं निशामय
सम्प्राप्य पुण्यसम्भारैः प्राज्ञोवाराणसीं पुरीम् । नत्यजेत्सर्वभावेनमहालाभैरपीरितः
अतः प्रतिकृतिः स्वीया तत्र काश्यां मुरारिणा ।
प्रतितस्थे कलशज! स्तोकांशेन च निर्गतम् ॥ ७० ॥
किञ्चित्काश्या उदीच्याञ्च गत्वा देवेन चक्रिणा ।
स्वस्थित्यै कल्पितं स्थानं धर्मक्षेत्रमितीरितम् ॥ ७१ ॥
ततस्तु सौगतंरूपं शिश्रायश्रीपतिःस्वयम् । अतीवसुन्दरतरंत्रैलोक्यस्यापिमोहनम्
श्रीः परिव्राजिका जाता नितरां सुभगाकृतिः ।
यामालोक्य जगत्सर्वं चित्रन्यस्तमिवास्थितम् ॥ ७३ ॥
विश्वयोनिं जगद्धात्रीं न्यस्तहस्ताग्रपुस्तकाम् ।
गरुत्मानपि तच्छिष्यो जातो लोकोत्तराकृतिः ॥ ७४ ॥
अत्यद्भुतमहाप्राज्ञो निः स्पृहः सर्ववस्तुषु । गुरुशुश्रूषणपरो न्यस्तहस्ताग्रपुस्तकः
अपृच्छत्परमंधर्मं संसारविनिमोचकम् । आचार्यवर्यंसौम्यास्यंप्रसन्नात्मानमुत्तमम्
धर्मार्थशास्त्रकुशलं ज्ञानविज्ञानशालिनम् । सुस्वरंसुपदव्यक्तिसुस्निग्धमृदुभाषिणम्
स्तम्भनोच्चाटनाकृष्टिवशीकर्मादिकोविदम् ।

व्याख्यानसमयाकृष्टपक्षिरोमाञ्चकारिणम् ॥ ७८ ॥

पीततद्गीतपीयूषमृगपूगैरुपासितम् । महामोदभराक्रान्तवातचाञ्चल्यहारिणम् ॥ वृक्षैरपि पतत्पुष्पच्छलैःकृतसमर्चनम् । ततः प्रोवाचपुण्यात्मापुण्यकीर्तिःससौगतः

शिष्यं विनयकीर्तिं तं महाविनयभूषणम् ॥ ८१ ॥

पुण्यकीर्तिरुवाच

त्वया विनयकीर्त्तेयो धर्मः कृष्टः सनातनः । वक्ष्याम्यहमशेषेणशृणुष्व त्वं महामते! अनादिसिद्धः संसारः कर्तृकर्मविवर्जितः । स्वयं प्रादुर्भवेदेष स्वयमेव विलीयते ब्रह्मादिस्तम्बपर्यन्तं यावद्देहनिबन्धनम् । आत्मैवैकेश्वरस्तत्र नद्वितीयस्तदीशिता

यद्ब्रह्मविष्णुरुद्राद्यास्तथाख्या देहिनामिमाः ।

आख्या यथाऽस्मदादीनां पुण्यकीर्त्यादिरुच्यते ॥ ८५ ॥

देहोयथाऽस्मदादीनां स्वकालेन विलीयते ।

ब्रह्मादिमशकान्तानां स्वकालाल्लीयते तथा ॥ ८६ ॥

विचार्यमाणेदेहेऽस्मिन्नकिञ्चिदधिकं क्वचित् । आहारोमैथुनंनिद्राभयंसर्वत्रयत्समम् निजाहारपरीमाणं प्राप्यसर्वोपि देहभृत् । सदृशीमेव संतृप्तिं प्राप्नुयान्नाधिकेतराम्

यथा वितृषिताः स्याम पीत्वा पेयं मुदावयम् ।

तृषितास्तु तथाऽन्येपि न विशेषोऽल्पकोधिकः ॥ ८६ ॥

सन्तु नार्यः सहस्राणि रूपलावण्यभूमयः । परन्निधुवने कालेह्येकैवेहोपयुज्यते अश्वाःपरःशताःसन्तुसन्त्वनेकेऽप्यनेकपाः । अधिरोहेतथाप्येकोनद्वितीयस्तथात्मनः पर्यङ्कशायिनां स्वापे सुखं यदुपपद्यते । तदेव सौख्यंनिद्रायामिह भूशायिनामपि यथैव मरणाद्भीतिरस्मदादिवपुष्मताम् । ब्रह्मादिकीटकान्तानां तथा मरणतो भयम्

सर्वे तनुभृतस्तुल्या यदि बुद्ध्या विचार्यते ।

इदं निश्चित्य केनाऽपि नो हिंस्यः कोऽपि कुत्रचित् ॥ ६४ ॥

धर्मो जीवदयातुल्यो न क्वापि जगतीतले । तस्मात्सर्वप्रयत्नेनकार्याजीवदयानृभिः

एकस्मिन् रक्षिते जीवे त्रैलोक्यं रक्षितं भवेत् ।

घातिते घातितं तद्वत्तस्माद्रक्षेन्न घातयेत् ॥ ६६ ॥

अहिंसापरमो धर्म इहोक्तः पूर्वसूरिभिः । तस्मान्न हिंसा कर्तव्यानरैर्नरकभीरुभिः नहिंसासदृशम्पापं त्रैलोक्ये सचराचरे । हिंसको नरकंगच्छेत्स्वर्गंगच्छेदहिंसकः सन्ति दानान्यनेकानि किं तैस्तुच्छफलप्रदैः । अभीतिदानसदृशं परमेकमपीहन इह चत्वारि दानानि प्रोक्तानि परमर्षिभिः ! विचार्य नानाशास्त्राणि शर्मणेऽत्रपरत्रच भीतेभ्यश्चाभयं देयंव्याधितेभ्यस्तथौषधम् । देयाविद्यार्थिनांविद्यादेयमन्नंक्षुधातुरे अविचिन्त्यप्रभावं हिमणिमन्त्रौषधीबलम् । तदभ्यस्यम्प्रयत्नेननानार्थोपार्जनायवै अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै । परितः परिपूज्यानिकिमन्यैरिह पूजितैः

पञ्च कर्मन्द्रियाण्येव पञ्चबुद्धीन्द्रियाणि च ।

मनोबुद्धिरिह प्रोक्तं द्वादशायतनं शुभम् ॥ १०४ ॥

इहैव स्वर्गनरकौ प्राणिनांनान्यतःक्वचित् । सुखंस्वर्गः समाख्यातोदुःखंनरकएवहि सुखेषु भुज्यमानेषुयत्स्याद्देहविसर्जनम् । अयमेवपरोमोक्षो न मोक्षोऽन्यःक्वचित्पुनः वासनासहितक्लेशसमुच्छेदेसतिध्रुवम् । विज्ञानोपरमोमोक्षोविज्ञेयस्तत्त्वचिन्तकैः

प्रामाणिकी श्रुतिरियम्प्रोच्यते वेदवादिभिः ।

न हिंस्यात्सर्वभूतानि नान्या हिंसा प्रवर्तिका ॥ १०८ ॥

अग्नीषोमीयमिति या भ्रामिका साऽसतामिह ।

न सा प्रमाणं ज्ञातॄणाम्पश्वालम्भनकारिका ॥ १०६ ॥

वृक्षांश्छित्त्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।

दग्ध्वा वह्नौ तिलाज्यादिचित्रं स्वर्गोऽभिलष्यते ॥ ११० ॥

इत्येवं धर्मजिज्ञासाम्पुण्यकीर्तौ प्रकुर्वति । पारम्पर्येण तच्छ्रुत्वापौरायात्राम्प्रचक्रिरे परिव्राजिकयाप्येवं समाकृष्टाः पुराङ्गनाः । तयाविज्ञानकौमुद्यासर्वविद्याविदग्धया ततस्तासाम्पुरस्तात्साबौद्धधर्मानवीवदत् । दृष्टार्थप्रत्ययकरान्देहसौख्यैकसाधनान्

विज्ञानकौमुद्युवाच

आनन्दं ब्रह्मणो रूपं श्रुत्यैवं यन्निगद्यते । तत्तथैवेह मन्तव्यं मिथ्यानानात्वकल्पना

यावत्स्वस्थमिदं वर्ष्म यावन्नेन्द्रियविक्लवः ।
यावज्जरा च दूरेऽस्ति तावत्सौख्यं प्रसाधयेत् ॥ ११५

अस्वास्थ्येन्द्रियवैकल्येवार्धकेतुकुतःसुखम् ।शरीरमपिदातव्यमर्थिभ्योतःसुखेप्सुभिः याचमानमनोवृत्तिप्रीणने यस्य नोजनिः । तेन भूर्भारवत्येषा समुद्रागद्रुमैर्नहि सत्वरो गत्वरो देहः सञ्चयाःसपरिक्षयाः। इति विज्ञायविज्ञातादेहेसौख्यंप्रसाधयेत् श्ववायसकृमीणांच प्रान्ते भोज्यमिदं वपुः। भस्मान्तंतच्छरीरं च वेदे सत्यंप्रपद्यते

मुधा जातिविकल्पोऽयं लोकेषु परिकल्प्यते ।
मानुष्ये सति सामान्ये कोऽधमः कोऽथ चोत्तमः ॥ १२० ॥

ब्रह्मादिसृष्टिरेषेति प्रोच्यते वृद्धपूरुषैः ।तस्य स्रष्टुः सुतौ दक्षमरीची चेति विश्रुतौ मारीचिनाकश्यपेनदक्षकन्याः सुलोचनाः । धर्मेण किलमार्गेण परिणीतास्त्रयोदश अपीदानीन्तनैर्मर्त्यैरल्पबुद्धिपराक्रमैः । अयंगम्यस्त्वगम्योऽयं विचारः क्रियतेमुधा मुखबाहूरुपज्जातश्चातुर्वर्ण्यमिहोदितम् । कल्पनेयं कृता पूर्वैर्नघटेत विचारतः

एकस्याश्च तनौ जाता एकस्माद्यदि वा क्वचित् ।
चत्वारस्तनयास्तत्किं भिन्नवर्णत्वमाप्नुयुः ॥ १२५ ॥

वर्णावर्णविवेकोयं तस्मान्नप्रतिभासते । अतोभेदोनमन्तव्योमानुष्ये केनचित्क्वचित् विज्ञानकौमुदीवाणीमित्याकर्ण्य पुराङ्गनाः । भर्त्तृशुश्रूषणवतीं विजहुर्मतिमुत्तमाम् अभ्यस्याकर्षणीं विद्यां वशीकृतिमतीमपि । पुरुषाःसफलीचक्रुः परदारेषु मोहिताः अन्तःपुरचरानार्यस्तथाराजकुमारकाः । पौराः ,पुराङ्गनाश्चापिसर्वेताभ्यांविमोहिताः

वन्ध्यानाञ्चापि वन्ध्यात्वं सा परिव्राजिकाऽहरत् ।
तैस्तैश्च कार्मणोपायैरसौभाग्यवतीः स्त्रियः ॥१ ३० ॥
सौभाग्यभाग्यसम्पन्ना व्यधाद्विज्ञानकौमुदी ।
कस्यैचिदञ्जनं दत्तं कस्यैचित्तिलकौषधम् ॥ १३१ ॥
वशीकरणमन्त्रैश्च तथा बह्व्योपदीक्षिताः ।
मन्त्राञ्जपेयुः काश्चिच्च यन्त्राण्यन्यालिखन्ति च ॥ १३२ ॥

काश्चिज्जुहुवतिकुण्डाग्नौनानाद्रव्याणिनिश्चलाः । एवंसर्वेषुपौरेषुनिजधर्मेषुसर्वथा

पराङ्मुखेषु जातेषु प्रोल्ललास वृषेतरः ॥ १३३ ॥
सिद्धयोऽकृष्टपच्याद्या नष्टा पुनःप्रवेशनात् ।
आसीत्कुण्ठितसामर्थ्यो नृपोऽपि स मनाङ्मनाक् ॥ १३४ ॥

दूरस्थितोपिविघ्नेशोनृपंनिर्विण्णमानसम् । चकारराज्यकरणेढुण्ढिराजो रिपुञ्जयम् अजीगणद्दिवोदासोह्यष्टादशदिनावधिम् । कदागन्तासवैविप्रो योमांसमुपदेक्ष्यति इत्थमष्टादशे प्राप्ते दिवसे दिवसेश्वरे । प्राप्ते मध्यंनभोभागं द्वारम्प्राप्तो द्विजोत्तमः सएवपुण्यकीर्त्याख्योधर्मक्षेत्रादधोक्षजः । द्विजवेषंसमालम्ब्यसमायातोनृपान्तिकम् द्वित्रैः पवित्रैर्बहुधाजयजीवेतिवादिभिः । स्मेतः स इतो विप्रो मूर्तिमानिव पावकः विलोक्य तं समायान्तं दूरादुत्कण्ठितो नृपः । मेने भवेद्गुरुरयं युक्तो मदुपदेशने अभिगम्य च तंराजाप्रणम्यच पुनः पुनः । गृहीतम्वस्तिवचनोनिनायान्तःपुरंद्विजम् मधुपर्केणविधिनातंसम्पूज्यजनाधिपः । व्यपेताध्वश्रमं स्वस्थम्प्रोल्लसन्मुखपङ्कजम् निवेद्यखाद्यवस्तूनिकृतकृत्यक्रियाविधिम् । परितृप्तं सुखासीनं पप्रच्छ ब्राह्मणं नृपः

राजोवाच

खिन्नोऽस्मिविप्रवर्याहंराज्यभारं समुद्वहन् । खेदो नास्त्येवहिपरंवैराग्यमिव जायते किंकरोमिक्वगच्छामिकथंमेनिर्वृतिर्भवेत् । पक्षद्वयेव यातेति मम चिन्तयतो द्विज! असीमसुखसन्तानं शुक्तंराज्यं मया द्विज !। परिक्षीणविपक्षंचत्र्यक्षैश्वर्यमिवस्फुटम्

स्वसामर्थ्यादहं जातः पर्जन्याग्न्यनिलात्मकः ।
प्रजाश्च पालिताः सम्यक् पुत्रा इव निजौरसाः ॥ १४७ ॥

तर्पिताश्चापिभूदेवावसुभिश्च दिनेदिने । एकमेवापराद्धं च मया राज्यं प्रशासता देवास्तृणीकृताः सर्वे स्वतपोबलदर्पतः । तच्च प्रजोपकारार्थं न स्वार्थं भवताशपे अधुनागुरुरेधि त्वं मम भाग्योदयागतः । राज्यंतुप्रकरोम्येवंन्यक्कृतान्तकसाध्वसम् अकालकालकलनंमम राज्ये न कुत्रचित् । जराव्याधिदरिद्रेभ्योममराज्येपि नोभयम् कोप धर्मेतरां वृत्तिनश्रयेन्मयि शासति । धर्मोदयाजनाःसर्वेसर्वेसन्ति सुखोदयाः

सद्विद्याव्यसनाः सर्वे सर्वे सन्मार्गचञ्चुराः ।
अथवा यदि कल्पान्तं तिष्ठेदायुस्ततोऽपि किम् ॥ १५३ ॥

सर्वेभोग्यास्तथाभान्ति यथा चर्वितचर्वणम् । किंपिष्टपेषणेनाऽत्र राज्येन द्विजपुङ्गव! किमप्युपदिश प्राज्ञ! गर्भवासोपशान्तये । अथवा त्वां प्रपन्नस्य ममकिञ्चिन्तनैरिमैः यद्देवकथयस्यद्यतत्करिष्याम्यसंशयम् । त्वद्विलोकनमात्रेण सर्व एव मनोरथाः अन्येषामपि जायन्ते जातप्राया ममैव तु । जाने देवविरोधेन के के न प्रलयंगताः अवन्तोऽपिप्रजाः स्वीयानिजधर्ममनुव्रताः । पुरा ते त्रिपुराःशूराःशिवभक्तिपराअपि

धरामयं रथं कृत्वा धनुः कृत्वा हिमाचलम् ।
वेदांश्च वाजिनः कृत्वा गुणं कृत्वा च वासुकिम् ॥ १५६ ॥
विरिञ्चिं सारथिं कृत्वा कृत्वा विष्णुञ्च पत्त्रिणम् ।
रथचक्रे पुष्पवन्तौ प्रतोदं प्रणवात्मकम् ॥ १६० ॥

ताराग्रहमयान्कीलान् वरूथंगगनात्मकम् । ध्वजदण्डंसुमेरुञ्च प्रांशुकल्पतरुंध्वजम्

योक्त्राणि चक्षुःश्रवसश्छन्दांस्यङ्गानि रक्षकान् ।
भल्लं कालाग्निरुद्राख्यं पुङ्खीकृत्य प्रभञ्जनम् ॥ १६२ ॥

हरेणैकेषुपातेन लीलया भस्मसात्कृताः । बलिर्यज्ञकृतांश्रेष्ठः कृत्वा कपटखर्वताम् पातालंगमितः पूर्वं हरिणाविक्रमैस्त्रिभिः । वृत्तवानपिवै वृत्रः सुत्राम्णाविनिसूदितः दधीचिरपिविप्रेन्द्रोदेवैरस्थिकृते हतः । पूर्ववैरमनुस्मृत्य जयार्थं युध्यतो हरेः

कुशास्त्रैर्विजितस्याजौ तेनैव च दधीचिना ॥ १६५ ॥

शिवभक्तस्यबाणस्यदोःसहस्रंपुराहरिः । चिच्छेदसंख्ये किन्तेनापराद्धं साधुवर्तिना तस्माद्विरोधो भद्राय नभवेद्दैवतैः सह । देवेभ्योमद्भयंनास्तिसत्पथीनस्यवै मनाक्

यज्ञैर्देवत्वमापन्ना गीर्वाणा वासवादयः ।
यज्ञैर्दानैस्तपोभिश्च तेभ्योऽप्याधिक्यमस्ति मे ॥ १६८ ॥

अस्तुन्यूनत्वमाधिक्यं किमनेनाधुनामम । इन्द्रियोपरमः प्राप्तः सुखदस्तव दर्शनात् इदानींदिश मे तात कर्मनिर्मूलनक्षमम् । उपायं त्वमुपायज्ञ येननिर्वृतिमाप्नुयाम्

स्कन्द उवाच

गणेशावेशवशतो राज्ञेतियदुदीरितम् । तदाकर्ण्य हृषीकेशः प्राह ब्राह्मणवेषभृत्

श्रीविष्णुरुवाच

साधु साधु महाप्राज्ञ! नृपचूडामणेऽनघ !। मया यदुपदेष्टव्यंतत्त्वयैव निरूपितम् त्वमादावेवनिर्वृत्तःपरम्मेमानदोह्यसि । क्षालितेन्द्रियपङ्कश्चसुतपः स्वच्छवारिभिः यदुक्तंभवता भूप! तत्सर्वं तथ्यमेव हि । तवशक्तिश्च जानामि विरक्तिं च महामते नभवत्सदृशोराजा भुविभूतोभविष्यति । राज्यम्भोक्तुंत्वयाज्ञायियुक्तुंयत्तुमुमुक्षसि

विरोधेऽपि हि देवानां त्वया नापकृतं भवेत् ।
धर्मेतरप्रवेशश्च तव राष्ट्रेऽपि नोऽभवत् ॥ १७६ ॥

प्रवर्तिताभिर्भवता प्रजाभिर्यदनुष्ठितम् । धर्मं धर्मं स्वधर्मज्ञ! तेन तृप्तादिवौकसः एक एव हि ते दोषो हृदि मे प्रतिभासते । काश्याविश्वेश्वरोदूरंयत्कृतोभवताकिल महान्तमपराधं ते जाने भूजानिसत्तम !। इमं तत्पापशान्त्यै च वच्म्युपायम्महत्तरम् सङ्ख्यास्तियावतीदेहेदेहिनोरोमसम्भवा । तावन्तोऽप्यपराधावैयान्तिलिङ्गप्रतिष्ठया एकं प्रतिष्ठितं येन लिङ्गमत्रेशभक्तितः । तेनात्मना समं विश्वं जगदेतत्प्रतिष्ठितम्

रत्नाकरे रत्नसङ्ख्या सङ्ख्याविद्भिरपीष्यते ।
लिङ्गप्रतिष्ठा पुण्यस्य न तु सङ्ख्येति लिख्यते ॥ १८२ ॥

तस्मात्सर्वप्रयत्नेनकुरुलिङ्गप्रतिष्ठितिम् । तयालिङ्गप्रतिष्ठित्याकृतकृत्योभविष्यसि

इत्युक्त्वा ब्राह्मणो दध्यौ क्षणं निश्चलमानसः ।
उवाच च प्रहृष्टास्यो राजानं पाणिना स्पृशन् ॥ १८४ ॥

श्रीविष्णुरुवाच

अन्यच्च किञ्चित्पश्यामिभूपाल! ज्ञानचक्षुषा । शृणुष्वावहितो भूत्वातदपिप्राज्ञसत्तम धन्योऽसिकृतकृत्योसिमान्योऽसि महतामपि । जप्यञ्चतवनामेहप्रातःशुभफलेप्सुना दिवोदासत्वदभ्याशादपिधन्यतरावयम् । तेऽपि धन्यतरामर्त्यैयेत्वदाख्याम्प्रचक्षते स्मारं स्मारयज्ञगौ विप्रो मौलिमान्दोलयन्मुहुः । हृद्येवबहुशोहृष्टःसम्प्रहृष्टतनूरुहः

अहोभाग्योदयश्चास्य अहो नैर्मल्यमस्य वै ।
यदेनमनिशं ध्यायेद्भर्ग्यो यो विश्वेश्वोऽखिलैः ॥ १८६ ॥
अहो उदर्क एतस्य न कैश्चित्प्रतिपद्यते । अस्माकमपि यद्दूरमदवीयस्तदस्ययत्
हृद्यालोच्येति विप्रोऽथ वर्णयित्वा क्षितीश्वरम् ।
आविश्चकार तत्सर्वं यत्समाधावलोकयत ॥ १९१ ॥

ब्राह्मण उवाच

राजंस्तवाद्यफलितोमनोरथमहाद्रुमः । अनेननैव शरीरेण त्वंगन्तासि परम्पदम्
यथा विश्वेश्वरो नित्यं त्वामेव हृदि शीलयेत ।
तथाऽस्मदादीनपि न द्विजांस्तत्पादलोचनान् ॥ १९३ ॥
कृतलिङ्गप्रतिष्ठंत्वां सप्तमेह्यद्यवासरात् । दिव्यं विमानमागत्य नेतुमेष्यतिशाम्भवम्
राजंस्त्वं वेत्सि कस्यायं विपाकःसुकृतस्य ते ।
वाराणस्याः पुरः सम्यक् सेवनादित्यवैम्यहम् ॥ १९५ ॥
एकमप्यत्रयःपायाद्वाराणस्यांस्थितञ्जनम् ।तस्याप्येवंविपाकोस्तिदेहान्तेराजसत्तम
इति श्रुत्वा स राजर्षिर्दिवोदासः प्रतापवान् ।
ब्राह्मणाय सशिष्याय प्रादात्प्रीतोऽभिवाञ्छितम् ॥ १९७ ॥
अथ सम्प्रीणितं विप्रंप्रणम्यचमुहुर्मुहुः । प्रोवाचराजासंहृष्टस्तारितोस्मिभवार्णवात्
ब्राह्मणोऽपि प्रहृष्टात्मापरिपूर्णमनोरथः । समापृच्छ्य महीनाथंस्वेष्टंदेशंजगामह
विलोक्यकाशींपरितोमायाद्विजवपुर्हरिः । भूयोभूयोविचार्यापिकिमत्रातीवपावनम्
स्थानं यत्राहमध्यास्यनिजभक्तानशेषतः । नेष्यामिपरमंधामविश्वेशानुग्रहात्परात्
सम्प्रधार्येतिभगवान् दृष्ट्वापाञ्चनदंह्रदम् । तत्रकृत्वाविधिस्नानं ततस्तत्रैवसंस्थितः
प्रतीक्षमाणो लक्ष्मीशो मङ्क्षुत्र्यक्षसमागमम् ।
तार्क्ष्यम्प्रस्थापयाञ्चक्रे राजवृत्तान्तवेदिनम् ॥ २०३ ॥
दिवोदासोऽपि राजेन्द्रो! विप्रेन्द्रं परिवर्णयन् ।
आहूय प्रकृतीः सर्वाः सामात्यान्मण्डलेश्वरान् ॥ २०४ ॥

अध्यक्षानपिसर्वांश्चकोशाश्वेभादिदेशितान् । पुत्रान्पञ्चशतंप्राग्र्यं सुतंचसमरञ्जयम्
पुरोहितं प्रतीहारमृत्विजो गणकान् द्विजान् ।
सामन्तान् राजपुत्रांश्च सूपकारांश्चिकित्सकान् ॥ २०६ ॥
वैदेशिकानपि बहून्नानाकार्यसमागतान् । सान्तःपुराश्च महिषींवृद्धगोपालबालकान्
सर्वान्प्रोवाच हृष्टात्मा प्रबद्धकरसम्पुटः ।
यथा स ब्राह्मणः प्राह दिनसप्तावधिस्थितिम् ॥ २०८ ॥
आश्चर्यं तेषु शृण्वत्सु विषण्णवदनेषुच । स्वयं राजगृहंनीत्वा कुमारं समरञ्जयम्
अभिषिच्य महाबुद्धिःपौराञ्जानपदानपि । प्रसादीकृत्यपुण्यात्मापुनःकाशीमगान्नृपः
आगत्य काशीं मेधावी स भूपालो रिपुञ्जयः ।
प्रासादं कारयामास स्वधुन्याः पश्चिमेतटे ॥ २११ ॥
रिपून्प्रमथ्यसमरेयावतीश्रीरुपार्जिता । तावत्यासहि भूपालःशिवालयमचीक्लृपत्
भूपाललक्ष्मीरखिला यत्तत्र विनियोजिता ।
भूपालश्रीरिति ख्याता ततः सा भूरभूच्छुभा ॥ २१३ ॥
दिवोदासेश्वरं लिङ्गं प्रतिष्ठाप्य रिपुञ्जयः । कृतकृत्यमिवात्मानममन्यत नरेश्वरः
अथैकस्मिन् दिने राजा तल्लिङ्गं विधिपूर्वकम् ।
समभ्यच्चर्य नमस्कृत्य यावत्तुष्टाव तुष्टिदम् ॥ २१५ ॥
तावन्नभोङ्गणादाशु दिव्यं यानमवातरत् । पार्षदैः परितःकीर्णंशूलखट्वाङ्गपाणिभिः
अत्यादित्याग्नितेजोभिर्भालनेत्रैः कपर्दिभिः । शुद्धस्फटिकसङ्काशैरङ्गैर्दीप्तनभोङ्गणैः
विभूषाहिफणारत्नज्योतिःपूजितविग्रहैः । नित्यप्रकाशसन्त्रस्ततमःश्रितशिरोधरैः
चामरव्यग्रहस्ताग्ररुद्रकन्याशतावृतम् । अथ पारिषदैराजा दिव्यस्रगनुलेपनैः ॥२१६
दिव्यैर्दुकूलनेपथ्यैरलञ्चक्रे मुदान्वितैः । त्रिनेत्रीकृतसद्भालं श्यामीकृतशिरोधरम्
सुगौरीकृतसर्वाङ्गं कपर्दीकृतमौलिजम् । चतुर्भुजीकृततनुं भूषणीकृतपन्नगम्
चन्द्रार्धीकृतमूर्धानं निन्युस्तं पार्षदा दिवम् ॥ २२२ ॥
तदाप्रभृतितत्तीर्थंभूपालश्रीरितिश्रुतम् । तत्र श्राद्धादिकंकृत्वादानं दत्त्वास्वशक्तितः

दिवोदासेश्वरं दृष्ट्वा समभ्यर्च्य च भक्तितः ।
राज्ञश्चाख्यायिकां श्रुत्वा न नरो गर्भमाविशेत् ॥ २२४ ॥
आख्यानमेतन्नृपतेर्दिवोदासस्य पावनम् । पठित्वापाठयित्वापि नरःपापैःप्रमुच्यते
दिवोदासशुभाख्यानं श्रुत्वा यः समरं विशेत् ।
न जातु जायते तस्य भयं वैरिकृतं क्वचित् ॥ २२६ ॥
दिवोदासकथा पुण्या महोत्पातनिकृन्तनी । पठनीयाप्रयत्नेन सर्वविघ्नोपशान्तये
नावृष्टिर्जायते तत्र नाकालमरणाद्भयम् । दैवोदासी कथा यत्र सर्वपातकनाशिनी
अस्याख्यानस्य पठनाद्धिषणोरिव मनोरथाः ।
सम्पूर्णतां गमिष्यन्ति शम्भोश्चिन्तितकारिणः ॥ २२९ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
पूर्वार्धे दिवोदासनिर्वाणप्राप्तिर्नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः

पञ्चनदाविर्भाववर्णनम्

अगस्त्य उवाच

सर्वज्ञहृदयानन्द! गौरीचुम्बितमूर्धज !। तारकान्तक!षड्वक्त्र तारिणे भद्रकारिणे
सर्वज्ञाननिधे! तुभ्यंनमः सर्वज्ञसूनवे । सर्वथाजितमाराय कुमाराय महात्मने ॥ २ ॥
कामारिमर्धनारीशंवीक्ष्यकामकृतंकिल । योजिगायकुमारोऽपिमारंतस्मैनमोऽस्तुते
यदुक्तं भवता स्कन्दमायाद्विजवपुर्हरिः । काश्यां पञ्चनदं तीर्थमध्यासातीवपावनम्
भूर्भुवः स्वः प्रदेशेषु काशीपरमपावनम् । तत्रापि हरिणाऽज्ञायितीर्थंपञ्चनदम्परम्
कुतः पञ्चनदं नामतस्य तीर्थस्यषण्मुख !। कुतश्चसर्वतीर्थेभ्यस्तदासीत्पावनम्परम्
कथञ्च भगवान्विष्णुरन्तरात्माजगत्पतिः सर्वेषाञ्जगताम्पाताकर्ता हर्ता च लीलया

अरूपोरूपमापन्नोह्यव्यक्तोव्यक्ततांगतः । निराकारोपिसाकारोनिष्प्रपञ्चः प्रपञ्चभाक्
अजन्मानेकजन्मा च त्वनामास्फुटनामभृत् ।
निरालम्बोऽखिलालम्बो निर्गुणोऽपि गुणास्पदम् ॥ ६ ॥
अहृषीको हृषीकेशोऽप्यनङ्घ्रिरपिसर्वगः । उपसंहृत्य रूपं स्वंसर्वव्यापी जनार्दनः
स्थितः सर्वात्मभावेन तीर्थे पञ्चनदेपरे ।
एतदाख्याहि षड्वक्त्र! पञ्चवक्त्राद्यथाश्रुतम् ॥ ११ ॥

स्कन्द उवाच

कथयामि कथामेतांनमस्कृत्य महेश्वरम् । सर्वाघौघप्रशमनीं सर्वश्रेयोविधायिनीम्
यथा पञ्चनदं तीर्थं काश्याम्प्रथितिमागतम् । यन्नामग्रहणादेव पापं याति सहस्रधा
प्रयागोऽपि च तीर्थेशो यत्र साक्षात्स्वयं स्थितः ।
पापिनाम्पापसङ्घातं प्रसह्य निजतेजसा ॥ १४ ॥
हरन्ति सर्वतीर्थानि प्रयागस्यबलेनहि । तानि सर्वाणि तीर्थानि माघेमकरगेरवौ
प्रत्यब्दं निर्मलानि स्युस्तीर्थराजसमागमात् ।
प्रयागश्चापि तीर्थेन्द्रः सर्वतीर्थार्पितम्मलम् ॥ १६ ॥
महाघिनां महाघञ्च हरेत्पाञ्चनदाद्बलात् । यं सञ्चयति पापौघमावर्षंतीर्थनायकः
तमेकमज्जनादूर्जे त्यजेत्पञ्चनदे ध्रुवम् ॥ १७ ॥
यथा पञ्चनदोत्पत्तिस्तथा च कथयाम्यहम् । निशामय महाभागमित्रावरुणनन्दन
पुरा वेदशिरा नाम मुनिरासीन्महातपाः । भृगुवंशसमुत्पन्नो मूर्तो वेद इवापरः
तपस्यतस्तस्य मुनेः पुरोदृग्गोचरंगता । शुचिरप्सरसां श्रेष्ठा रूपलावण्यशालिनी
तस्या दर्शनमात्रेण परिक्षुब्धम्मुनेर्मनः । चस्कन्दस मुनिस्तूर्णंसाथ भीतावराप्सरा
दूरादेव नमस्कृत्य तमृषिं साभ्यभाषत । अतीववेपमानाङ्गी शुचिस्तच्छापभीतितः
नापराध्नोम्यहंकिञ्चिन्महोग्रतपसांनिधे !। क्षन्तव्यंमेक्षमाधार क्षमारूपास्तपस्विनः
मुनीनाम्मानसम्प्रायो हृत्पद्मादपि तन्मृदु । स्त्रियः कठोरहृदयाः स्वरूपेणैव सत्तम
इतिश्रुत्वावचस्तस्याःशुचेरप्सरसोमुनिः । विवेकसेतुनाऽस्तम्भीन्महारोषनदीरयम्

उवाचचप्रसन्नात्माशुचेशुचिरसिध्रुवम् । नमेऽल्पोपिहिदोषोत्रनतेदोषोस्तिसुन्दरि!
वह्निस्वरूपाललना नवनीतसमः पुमान् । अनभिज्ञा वदन्तीति विचारान्महदन्तरम्

स्निह्येदुद्धृतसारोऽपि वह्नेः संस्पर्शमाप्य वै ।
चित्रं स्त्र्याख्या समादानात्पुमान् स्निह्यति दूरतः ॥ २८ ॥

अतःशुचे!न भेतव्यं त्वया शुचिमनोगते । अतर्कितोपस्थितयात्वयाचस्खलितम्मया
स्खलनान्न तथाहानिरकामात्तपसोमुनेः । यथा क्षणान्धीकरणाद्धानिः को परयादरेः
कोपात्ततः क्षयंयातिसञ्चितंयत्सुकृच्छ्रतः । यथाभ्रपटलम्प्राप्यप्रकाशःपुष्पवन्तयोः

अनर्थकारिणः क्रोधात्कार्थानाम्परिजृम्भणम् ।
क वा खलजनोत्सेधात्साधूनाम्परिवर्धनम् ॥ ३२ ॥

अमर्षे कर्षतिमनो मनोभूसम्भवः कुतः । विधुन्तुदेतुदत्युच्चैर्विधुंकुत्रास्तिकौमुदी

ज्वलतो रोषदावाग्नेः क वा शान्तितरोः स्थितिः ।
दृष्टा केनापि किं क्वापि सिंहात्कलभसुस्थता ॥ ३४ ॥

तस्यात्सर्वप्रयत्नेन प्रदीपः प्रतिघातुकः । चतुर्वर्गस्यदेहस्य परिहेयोविपश्चिता
इदानींश्रृणु कल्याणि! कर्तव्यं यत्त्वया शुचे!। अमोघबीजा हि वयंतद्बीजमुररीकुरु
एतस्मिन् रक्षितेवीर्येपरिस्कन्ने त्वदीक्षणात् । त्वयातवभवित्रेकंकन्यारत्नंमहाशुचि
इत्युक्तातेनमुनिना पुनर्जातेव साप्सरा । महाप्रसाद इत्युक्त्वा मुनेः शुक्रमजीगिलत्
अथकालेनदिव्यश्रीकन्यारत्नमजीजनत् । अतीवनयानानन्दि निधानंरूपसम्पदाम्
तस्यैव वेदशिरसआश्रमेतांनिधाय सा । शुचिरप्सरसांश्रेष्ठा जगाम च यथेप्सितम्

तां च वेदशिराः कन्यां स्नेहेन समवर्धयत् ।
क्षीरेण स्वाश्रमस्थाया हरिण्या हरिणीक्षणाम् ॥ ४१ ॥

मुनिर्नामददौ तस्यै धूतपापेति चार्थवत् । यन्नामोच्चारणेनापि कम्पते पातकावली

सर्वलक्षणशोभाढ्यां सर्वावयवसुन्दरीम् ।
मुनिस्तस्या जनोत्सङ्गात्क्षणमात्रमपि क्वचित् ॥ ४३ ॥

दिनेदिनेवर्धमानांताम्पश्यन्मुमुदे भृशम् । क्षीरनीरधिवद्रम्यांनिशिचान्द्रमसींकलाम्

अथाष्टवार्षिकींदृष्ट्वातांकन्यांस मुनीश्वरः । कस्मैदेयेति सञ्चिन्त्य तामेव समपृच्छत

वेदशिरा उवाच

अयिपुत्रि! महाभागे! धूतपापे शुभेक्षणे ! । कस्मैदद्यांवरायत्वान्त्वमेवाख्याहितंवरम्
अतिस्नेहार्दचित्तस्य जनेतुश्चेतिभाषितम् । निशम्य धूतपापासा प्रोवाच विनतानना

धूतपापोवाच

जनेतर्यद्यहं देया सुन्दराय वराय ते । तदा तस्मै प्रयच्छ त्वं यमहं कथयामि ते॥४८
तुभ्यञ्चरोचतेतातश्रृणोत्ववहितोभवान् । सर्वेभ्योऽतिपवित्रोयोयः सर्वेषांनमस्कृतः
सर्वेयमभिलष्यन्ति यस्मात्सर्वसुखोदयः । कदाचिद्यो न नश्येत यः सदैवानुवर्तते
इहामुत्रापि यो रक्षेन्महापदुदयाद्ध्रुवम् । सर्वे मनोरथा यस्मात्परिपूर्णा भवन्तिहि
दिनेदिने चसौभाग्यंवर्धते यस्यसन्निधौ । नैरन्तर्येण यत्सेवांकुर्वतोन भयं क्वचित्
यन्नामग्रहणादेव केऽपि बाधां न कुर्वते । यदाधारेण तिष्ठन्ति भुवनानि चतुर्दश ॥
एवमाद्यागुणायस्य वरस्यवरचेष्टितम् । तस्मै प्रयच्छ मां तात मम तेऽपीह शर्मणे
एतच्छ्रुत्वापितातस्या भृशम्मुदमवापह । धन्योऽस्मिधन्यामे पूर्वे येषामेषासुतान्वये
भुवाहिधूतपापाऽसौयस्याईदृग्विधामतिः । ईदृग्विधैर्गुणगणैर्गरिम्णाकोऽत्रवैभवेत्
अथवा स कथं लभ्योविनापुण्यभरोदयम् । इति क्षणं समाधाय मनः समुनिपुङ्गवः
ज्ञानेनतंसमालोच्यवरमीदृग्गुणोदयम् । धन्यांकन्यांबभाषेऽथ श्रृणु वत्सेशुभैषिणि!

पितोवाच

वरस्य ये त्वया प्रोक्ता गुणा एते विचक्षणे ।
एषां गुणानामाधारो वरोऽस्तीति विनिश्चितम् ॥ ५६ ॥

परंससुखलभ्यो ननितरां शुभगाकृतिः । तपः पणेनसक्रय्यः सुतीर्थविपणौ क्वचित्
नार्थभारैः स सुलभो न कौलीन्येन कन्यके । न वेदशास्त्राभ्यसनैर्नचैश्वर्यबलेन वै
न सौन्दर्येण वपुषा न बुद्ध्या न पराक्रमैः । एकयैव मनः शुद्ध्या करणानांजये न च
महातपःसहायेन दमदानदयायुजा । लभ्यते स महाप्राज्ञो नान्यथा सदृशः पतिः
इति श्रुत्वाथ सा कन्यापितरं प्रणिपत्यच । अनुज्ञाम्प्रार्थयामास तपसे कृतनिश्चया

स्कन्द उवाच

कृतानुज्ञा जनेत्रासाक्षेत्रे परमपावने । तपस्ततापपरमं यदसाध्यं तपस्विभिः ॥ ६५॥
क्वसाबालातिमृद्वङ्गी क्व च तत्तादृशंतपः । कठोरवर्ष्मसंसाध्यमहो सच्चेतसोधृतिः
धारासारासुवर्षासुमहावातवतीष्वलम् । शिलासुसावकाशासुसा बह्वीरनयन्निशाः
श्रुत्वागर्जरवं घोरं दृष्ट्वाविद्युच्चमत्कृतीः । आसारशीकरैः क्लिन्नानचकम्पेमनाक् च सा
तडित्स्फुरन्ती त्वसकृत्तमिस्रासु तपोवने ।
यातायातं करोतीव द्रष्टुं तत्तपसः स्थितिम् ॥ ६६ ॥
तपर्तुरेवसाक्षाच्च कुमारी कैतवात्किल । पञ्चाग्नीन्परिधायात्र तपस्यतितपोवने
जलाभिलाषिणीबालानमनागपि साऽपिबत् । कुशाग्रतोयपृषतं पञ्चाग्निपरितापिता
रोमाञ्चकञ्चुकवती वेपमानतनुच्छदा । पर्यक्षिपत्क्षपाः क्षामा तपसा हैमनीश्वसा
निशीथिनीषु शिशिरे श्रयन्ती सारसंरसम् । मेनेसासारसैः केयमुद्यताद्येतिपद्मिनी
मनस्विनामपि मनो रागतां सृजते मधौ ।
तदोष्ठपल्लवाद्रागो जह्रे माकन्दपल्लवैः ॥ ७४ ॥
वसन्तेनिवसन्तीसावनेबालाचलंमनः । चक्रेतपस्यपिश्रुत्वा कोकिलाकाकलीरवम्
बन्धुजीवेऽधररुचिं कलहंसे कलागतीः । निक्षेपमिव साक्षिप्त्वाशरद्यासीत्तपोरता
अपास्तभोगसंपर्काभोगिनांवृत्तिमाश्रिता । क्षुदुद्बोधनिरोधाय धूतपापातपस्विनी
शाणेनमणिवल्लीढाकृशाऽप्यायादनर्घताम् । तथापितपसाक्षामादिदीपेतत्तनुस्तराम्
निरीक्ष्य तां तपस्यन्तीं विधिः संशुद्धमानसाम् ।
उपेत्योवाच सुप्रज्ञे! प्रसन्नोऽस्मि वरं वृणु ॥ ७६ ॥
सा चतुर्वक्त्रमालोक्य हंसयानोपरि स्थितम् ।
प्रणम्य प्राञ्जलिः प्रीता प्रोवाचाथ प्रजापतिम् ॥ ८० ॥

धूतपापोवाच

पितामह! वरो मह्यं यदि देयो वरप्रद !। सर्वेभ्यः पावनेभ्योऽपिकुरुमामतिपावनीम्
स्रष्टा तदिष्टमाकर्ण्यनितरांतुष्टमानसः । प्रत्युवाचाथताम्बालांविमलांविमलैषिणीम्

ब्रह्मोवाच

धूतपापे! पवित्राणि यानि सन्त्यत्र सर्वतः । तेभ्यः पवित्रमतुलं त्वमेधि वरतो मम
तिस्रः कोट्योऽर्धकोटी च सन्ति तीर्थानि कन्यके !।
दिवि भुव्यन्तरिक्षे च पावनान्युत्तरोत्तरम् ॥ ८४ ॥
तानि सर्वाणितीर्थानि त्वत्तनौ प्रतिलोमवै । वसन्तु ममवाक्येनभवसर्वातिपावनी
इत्युक्त्वान्तर्दधे वेधाः सापि निर्धूतकल्मषा । धूतपापोटजंप्राप्ताथोवेदशिरसःपितुः
कदाचित्तां समालोक्य खेलन्ती मुटजाजिरे ।
धर्मस्तत्तपसाकृष्टः प्रार्थयामास कन्यकाम् ॥ ८७ ॥

धर्म उवाच

पृथुश्रोणि विशालाक्षिक्षामोदरि शुभानने । क्रीतःस्वरूपसम्पत्त्यात्वयाऽहंदेहिमेरहः
नितराम्बाधते कामस्त्वत्कृते मां सुलोचने । अज्ञातनाम्नासातेनप्रार्थितेत्यसकृद्ग्रहः
उवाच सा पिता दाता तं प्रार्थय सुदुर्मते !।
पितृप्रदेया यत्कन्या श्रुतिरेषा सनातनी ॥ ९० ॥
निशम्येति वचो धर्मो भाविनोऽर्थस्य गौरवात् ।
पुनर्निर्बन्धयाञ्चक्रेऽपधृतिधृतिशालिनीम् ॥ ९१ ॥

धर्म उवाच

न प्रार्थयेहं सुभगेपितरं तव सुन्दरि !। गान्धर्वेण विवाहेन कुरु मे त्वंसमीहितम्
इतिनिर्बन्धवद्वाक्यंसानिशम्यकुमारिका । पितुःकन्याफलंदित्सुःपुनराहेतितंद्विजम्
अरे जडमते मात्वं पुनर्ब्रूहीति याह्यतः । इत्युक्तोऽपि कुमार्या स नातिष्ठन्मदनातुरः
ततः शशाप तं बालाप्रबलातपसोबलात् । जडोऽसिनितरांयस्माज्जलाधारोनदोभव
इति शप्तस्तया सोऽथतां शशाप क्रुधान्वितः । कठोरहृदये! त्वं तुशिलाभवसुदुर्मते

स्कन्द उवाच

इत्यन्योन्यस्य शापेन मुने!धर्मो नदोऽभवत् । अविमुक्तेमहाक्षेत्रेख्यातोधर्मनदोमहान्
साप्याह पितरं त्रस्ता स्वशिलात्वस्य कारणम् ।

ध्यानेन धर्मं विज्ञाय मुनिः कन्यामथाब्रवीत् ॥ ९८ ॥

माभैःपुत्र!करिष्यामितवसर्वंशुभोदयम् । तच्छापोनान्यथाभूयाच्चन्द्रकान्तशिलाभव
चन्द्रोदयमनुप्राप्यद्रवीभूततनुस्ततः । धुनी भव सुते! साध्वि! धूतपापेति विश्रुता
स च धर्मनदः कन्ये तवभर्तासुशोभनः । तैर्गुणैःपरिपूर्णाङ्गोयेगुणाःप्रार्थितास्त्वया
अन्यच्च शृणु सद्बुद्धे ममापि तपसो बलात् । द्वैरूप्यं भवतोर्भावि प्राकृतंचद्रवञ्चवै
इत्याश्वास्य पिताकन्यांधूतपापांपरन्तप !। चन्द्रकान्तशिलाभूतामनुजग्राहबुद्धिमान्
तदारभ्यमुनेकाश्यां ख्यातो धर्मनदोह्रदः । धर्मो द्रवस्वरूपेण महापातकनाशनः
धुनी च धूतपापा सा सर्वतीर्थमयी शुभा। हरेन्महाघसंघातान् कूलजानिवपादपान्
तत्र धर्मनदे तीर्थे धूतपापासमन्विते । यदा न स्वर्धुनी तत्र तदाब्रध्नस्तपोव्यधात्
गभस्तिमालीभगवान्गभस्तीश्वरसन्निधौ । शीलयन्मङ्गलांगौरींतपउग्रंचचारह
नाम्नामयूखादित्यस्य तीर्थे तत्र तपस्यतः । किरणेभ्यःप्रववृते महास्वेदोऽतिखेदतः
किरणेभ्यःप्रवृत्तायामहास्वेदस्यसन्ततिः । ततःसाकिरणानामजातापुण्यातरङ्गिणी
महापापान्धतमसंकिरणाख्यातरङ्गिणी । ध्वंसयेत्स्नानमात्रेणमिलिताधूतपापया
आदौ धर्मनदः पुण्यो मिश्रितो धूतपापया। ययाधूतानिपापानिसर्वतीर्थीकृतात्मना
ततोऽपि:मिलितागत्यकिरणारविर्णैधिता । यन्नाम स्मरणादेवमहामोहोन्धतांव्रजेत्
किरणाधूतपापेच तस्मिन् धर्मनदे शुभे । स्रवन्त्यौ पापसंहर्त्र्यौ वाराणस्यांशुभद्रवे
ततो भागीरथी प्राप्तातेन दैलीपिना सह । भागीरथी समायातायमुना च सरस्वती
किरणा धूतपापा च पुण्यतोयासरस्वती । गङ्गा च यमुनाचैव पञ्चनद्योऽत्रकीर्तिताः

अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
तत्राप्लुतो न गृह्णीयाद्देहं ना पाञ्चभौतिकम् ॥ ११६ ॥
अस्मिन् पञ्चनदीनाञ्च सम्भेदेऽघौघभेदिनि ।
स्नानमात्रात्प्रयात्येव भित्त्वा ब्रह्माण्डमण्डपम् ॥ ११७ ॥

तीर्थानि सन्ति भूयांसिकाश्यामत्रपदे पदे । नपञ्चनदतीर्थस्यकोट्यंशेनसमान्यपि

प्रयागे माघमासे तु सम्यक स्नातस्य यत्फलम् ।

तत्फलं स्याद्दिनैकेन काश्यां पञ्चनदे ध्रुवम् ॥ ११९ ॥

स्नात्वा पञ्चनदेतीर्थेकृत्वाचपितृतर्पणम् । बिन्दुमाधवमभ्यर्च्यनभूयोजन्मभाग्भवेत्

यावत्सङ्ख्यास्तिला दत्ताः पितृभ्यो जलतर्पणे ।
पुण्ये पञ्चनदे तीर्थे तृप्तिः स्यात्तावदाब्दिकी ॥ १२१ ॥

श्रद्धया यैः कृतं श्राद्धं तीर्थे पञ्चनदे शुभे । तेषांपितामहामुक्ता नानायोनिगता अपि
यमलोके पितृगणैर्गाथेयं परिगीयते । महिमानं पाञ्चनदं दृष्ट्वा श्राद्धविधानतः

अस्माकमपि वंश्योऽत्र कश्चिच्छ्राद्धं करिष्यति ।
काश्यां पञ्चनदं प्राप्य येन मुच्यामहे वयम् ॥ १२४ ॥

इयं गाथा प्रतिदिनं श्राद्धदेवस्य सन्निधौ । पितृभिः परिगीयेत काश्यांपञ्चनदंप्रति
तत्र पञ्चनदे तीर्थे यत्किञ्चिद्दीयते वसु । कल्पक्षयेऽपि न भवेत्तस्यपुण्यस्य संक्षयः
वन्ध्यापि वर्षपर्यन्तं स्नात्वा पञ्चनदे ह्रदे । समर्च्य मङ्गलां गौरीं पुत्रं जनयतिध्रुवम्
जलैः पाञ्चनदैः पुण्यैर्वाससापरिशोधितैः । महाफलमवाप्नोतिस्नपयित्वेष्टदेवताम्

पञ्चामृतानां कलशैरष्टोत्तरशतोन्मितैः ।
तुलितोऽधिकतां यातो बिन्दुः पाञ्चनदाम्भसः ॥ १२६ ॥

पञ्चकूर्चेनपीतेनयाऽत्र शुद्धिरुदाहृता । साशुद्धिः श्रद्धया प्राश्यबिन्दुं पाञ्चनदाम्भसः
भवेदवभृथस्नानाद्राजसूयाश्वमेधयोः । यत्फलं तच्छतगुणं स्नानात्पाञ्चनदाम्भसा
राजसूयाश्वमेधौ चभवेतांस्वर्गसाधनम् । आब्रह्मघटिकाद्वन्द्वं मुक्त्यै पाञ्चनदाप्लुतिः
स्वर्गराज्याभिषेकोऽपिनतथासम्मतःसताम् । अभिषेकःपाञ्चनदोयथाऽनल्पसुखप्रदः
वरं वाराणसीं प्राप्यभृत्यः पञ्चनदोक्षिणाम् । नान्यत्र सेवकीभूतभूपकोटिर्नरेश्वरः
यैर्नपञ्चनदे स्नातं कार्त्तिके पापहारिणि । तेऽद्यापि गर्भे तिष्ठन्तिपुनस्तेगर्भवासिनः
कृतेधर्मनदंनाम त्रेतायां धूतपापकम् । द्वापरे बिन्दुतीर्थञ्च कलौ पञ्चनदं स्मृतम्
शतंसमास्तपस्तप्त्वा कृतेयत्प्राप्यतेफलम् । तत्कार्त्तिकेपञ्चनदेसकृत्स्नानेनलभ्यते
इष्टापूर्तेषु धर्मेषु यावज्जन्मकृतेषु यत् । अन्यत्र स्यात्फलंतत् स्यादूर्जेधर्मनदाप्लवात्
न धूतपापसदृशं तीर्थं क्वापि महीतले । यदेकस्नानतो नश्येदघं जन्मत्रयार्जितम्

बिन्दुतीर्थेनरोदत्त्वा काञ्चनं कृष्णलोन्मितम् । नदरिद्रोभवेत्क्वापिनस्वर्णेनवियुज्यते

गोभूतिलहिरण्याश्ववासोन्नस्रग्विभूषणम् ।

यत्किञ्चिद्बिन्दुतीर्थेऽत्रदत्त्वाक्षयमवाप्नुयात् ॥ १४१ ॥

एकामप्याहुतिंदत्त्वा समिद्धेऽग्नौ विधानतः । पुण्येधर्मनदेतीर्थेकोटिहोमफलं लभेत्

न पञ्चनदतीर्थस्य महिमानमनन्तकम् । कोऽपिवर्णयितुं शक्तश्चतुर्वर्गशुभौकसः

श्रुत्वाख्यानमिदं पुण्यं श्रावयित्वाऽपि भक्तितः ।

सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ १४४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे उत्तरार्धे पञ्चनदाविर्भावो नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

——:*:——

षष्टितमोऽध्यायः

बिन्दुमाधवाविर्भाववर्णनम्

स्कन्द उवाच

उक्ता पञ्चनदोत्पत्तिर्मित्रावरुणनन्दन !। इदानीं कथयिष्यामिमाधवाविष्कृतिपराम्

यांश्रुत्वा श्रद्धयाधीमान्पापेभ्योमुच्यतेक्षणात् । नचश्रियावियुज्येतसंयुज्येतवृषेणच

आगत्यमन्दरादद्रे रुपेन्द्रश्चन्द्रशेखरम् । आपृच्छ्यताक्ष्यरथगः क्षणाद्वाराणसींपुरीम्

दिवोदासंमहीपालं समुच्चाट्यस्वमायया । स्थित्वापादोदकेतीर्थे केशवाख्यस्वरूपतः

महिमानं परं काश्यां विचार्य सुविचार्य च । दृष्ट्वा पञ्चनदं तीर्थं परां मुदमवापह

उवाचच प्रसन्नात्मा पुण्डरीकविलोचनः । अगण्याअपिवैकुण्ठगुणाविगणिता मया

क्षीरनीरधौसन्ति तावन्तो निर्मलागुणाः । यावन्तोविजयन्तेऽत्रकाश्यांपञ्चनदेह्रदे

श्वेतद्वीपेऽपि सामग्रीकगुणानांगरीयसी । ईदृशीयादृशीकाश्यांधूतपापेऽस्तिपावनी

मुदे कौमोदकी स्पर्शस्तथान मम जायते । धूतपापाम्बुसम्पर्को यथाभवति सर्वथा

नक्षीरनीरधिजया सुखंमे श्लिष्टगात्रया । तथा भवेद्यथाऽत्रस्यात्स्पष्टयाधूतपापया

इत्थं पञ्चनदे तीर्थेक्षीरनीरधिजाधवः । संप्रेष्यताक्ष्यं त्र्यक्षाग्रे वृत्तान्तंविनिवेदितुम्

आनन्दकाननभवं दिवोदासक्षमापतेः । सम्वर्णयन्गुणग्रामं पुण्यं पाञ्चनदोद्भवम् १२

सुखोपविष्टः संहृष्टः सुदृष्टिर्विष्टरश्रवाः । दृष्टवांस्तपसाजुष्टमपुष्टाङ्गं तपोधनम् ॥ १३

सऋषिस्तंसमभ्येत्यपुण्डरीकाक्षमच्युतम् । उपोपविष्टकमलं वनमालाविराजितम्

शङ्खपद्मगदाचक्रचञ्चत्करचतुष्टयम् । कौस्तुभोद्भासितोरस्कं पीतकौशेयवाससम्

सुनीलेन्दीवररुचिं सुस्निग्धमधुराकृतिम् । नाभीह्रदलसत्पद्मं सुपाटलरदच्छदम्

दाडिमीवीजदशनं किरीटद्योतिताम्बरम् । देवेन्द्रवन्दितपदं सनकादिपरिष्टुतम्

दिव्यर्षिभिर्नारदाद्यैः परिगीतमहोदयम् । प्रह्लादाद्यैर्भागवतैः परिनन्दितमानसम्

धृतशार्ङ्गधनुर्दण्डं दण्डिताखिलदानवम् । मधुकैटभहन्तारं कंसविध्वंससूचकम्

कैवल्यं यत्परंब्रह्म निराकारमगोचरम् । तत्पुंमूर्त्या परिणतंभक्तानां भक्तिहेतुतः ॥

वेदा विदुर्यदाकारंनैवोपनिषदोदितम् । ब्रह्माद्या नच गीर्वाणाश्चक्रे नेत्रातिथिसतम्

प्रणनाम मुदायुक्तःक्षितिविन्यस्तमस्तकः । सऋषिस्तंहृषीकेशमग्निबिन्दुर्महातपाः

तुष्टाव परया भक्त्या मौलिबद्धकराञ्जलिः ।

अध्यस्तविस्तीर्णशिलं बलिध्वंसनमच्युतम् ॥ २३ ॥

तत्र पञ्चनदाभ्याशे मार्कण्डेयादिसेविते ।

गोविन्दमग्निबिन्दुः स स्तुतवांस्तुष्टमानसः ॥ २४ ॥

अग्निबिन्दुरुवाच

ॐनमः पुण्डरीकाक्ष बाह्यान्तःशौचदायिने । सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्

नमामितेपदद्वन्द्वं सर्वद्वन्द्वनिवारकम् । निर्द्वन्द्वयाधियाविष्णोजिष्ण्वादिसुरवन्दित

यंस्तोतुंनाधिगच्छन्तिवाचो वाचस्पतेरपि । तमीष्टे क इहस्तोतुंभक्तिरत्रबलीयसी

अपियो भगवानीशो मनः प्राचामगोचरः । समादृशैरल्पधीभिःकथंस्तुत्यो वचःपरः

यं वाचोनविशन्तीशं मनतीहमनोनयम् । मनोगिरामतीतं तंकःस्तोतुंशक्तिमान्भवेत्

यस्य निःश्वसितं वेदाः सषडङ्गपदक्रमाः । तस्य देवस्य महिमामहान् कैरवगम्यते

अतन्द्रितमनोबुद्धीन्द्रियायं सनकादयः। ध्यायन्तोपिहृदाकाशेन विन्दन्तियथार्थतः
नारदाद्यैर्मुनिवरैराबालब्रह्मचारिभिः । गीयमानचरित्रोऽपि न सम्यग्योऽधिगम्यते

तं सूक्ष्मरूपमजमव्ययमेकमाद्यं ब्रह्माद्यगोचरमजेयमनन्तशक्तिम् ।
नित्यंनिरामयममूर्तमचिन्त्यमूर्तिं कस्त्वां चराचर!चराचरभिन्न! वेत्ति ॥ ३३ ॥
एकैकमेव तव नाम हरेन्मुरारे! जन्मार्जिताघमघिनां च महापदाढ्यम् ।
दद्यात्फलं च महितं महतो मखस्य जप्तं मुकुन्दमधुसूदनमाधवेति ॥ ३४ ॥
नारायणेति नरकार्णवतारणेति दामोदरेति मधुहेति चतुर्भुजेति ।
विश्वम्भरेति विरजेति जनार्दनेति क्वास्तीह जन्मजपतां क्व कृतान्तभीतिः ॥
ये त्वां त्रिविक्रम! सदाहृदि शीलयन्ति कादम्बिनीरुचिररोचिषमम्बुजाक्षम् ।
सौदामनीविलसितांशुकवीतमूर्ते! तेऽपि स्पृशन्ति तव कान्तिमचिन्त्यरूपाम्

श्रीवत्सलाञ्छन! हरेऽच्युतकैटभारे! गोविन्द! तार्क्ष्यरथ! केशव! चक्रपाणे !।
लक्ष्मीपते! दनुजसूदन! शार्ङ्गपाणे! त्वद्भक्तिभाजि नभयं क्वचिदस्ति पुंसि ॥ ३७ ॥
यैरर्चितोऽसि भगवंस्तुलसीप्रसूनैर्दूरीकृतैणमदसौरभदिव्यगन्धैः ।
तानर्चयन्ति दिवि देवगणाः समस्ता मन्दारदामभिरलं विमलस्वभावान् ॥ ३८ ॥
यद्वाचि नाम तव कामदमब्जनेत्र यच्छ्रोत्रयोस्तवकथा मधुराक्षराणि ।
यच्चित्तभित्तिलिखितं भवतोऽस्ति रूपं नीरूपभूपपदवी नहितैर्दुरापा ॥ ३९ ॥
ये त्वां भजन्ति सततं भुवि शेषशायिंस्ताञ्छ्रीपते पितृपतीन्द्रकुबेरमुख्याः ।
वृन्दारका दिवि सदैव सभाजयन्ति स्वर्गापवर्गसुखसन्ततिदानदक्ष ॥ ४० ॥
ये त्वां स्तुवन्ति सततं दिवि तांस्तुवन्ति सिद्धाप्सरोमरगणालसदब्जपाणे !।
विश्राणयत्यखिलसिद्धिद को विना त्वां निर्वाणचारुकमलां कमलायताक्ष !॥ ४१
त्वं हंसि पासि सृजसि क्षणतः स्वलीला लीलावपुर्धरविरिञ्चिनताङ्घ्रियुग्म !।
विश्वं त्वमेव परविश्वपतिस्त्वमेव विश्वस्यबीजमसितत्प्रणतोऽस्मनित्यम् ॥ ४२
स्तोता त्वमेव दनुजेन्द्ररिपोस्तुति स्त्वंस्तुत्यस्त्वमेव सकलं हि भवानिहैकः ।
त्वत्तो न किञ्चिदपि भिन्नमवैमि विष्णो तृष्णां सदा कृणुहि मे भवजाम्भवारे !॥

इति स्तुत्वा हृषीकेशमग्निबिन्दुर्महातपाः ।
तस्थौ तूष्णीं ततो विष्णुरुवाच वरदो मुनिम् ॥ ४४ ॥

श्रीविष्णुरुवाच

अग्निबिन्दो! महाप्राज्ञ! महतां तपसां निधे !। वरंवरय सुप्रीतस्तवादेयं नकिञ्चन

अग्निबिन्दुरुवाच

यदिप्रीतोऽसि भगवन्वैकुण्ठेश! जगत्पते । कमलाकान्त! तद्देहियदिहप्रार्थयाम्यहम्
कृतानुज्ञोऽथ हरिणा भ्रूभङ्गेन स्म तापसः । कृतप्रणामो हृष्टात्मा वरयामास केशवम्
भगवन्सर्वगोऽपीह तिष्ठ पञ्चनदे ह्रदे । हिताय सर्वजन्तूनां मुमुक्षूणां विशेषतः
लक्ष्मीशेन वरो मह्यमेष देयोऽविचारतः । नान्यं वरं समीहेऽहं भक्तिश्चत्वत्पदाम्बुजे
इति श्रुत्वावरं तस्याग्निबिन्दोर्मधुसूदनः । प्रीतःपरोपकारार्थंतथेत्याहाब्धिजापतिः

श्रीविष्णुरुवाच

अग्निबिन्दो! मुनिश्रेष्ठ! स्थास्याम्यहमिहध्रुवम ।
काशीभक्तिमताम्पुंसां मुक्तिमार्गं समादिशन ॥ ५१ ॥

मुने! पुनः प्रसन्नोऽस्मिवरम्ब्रूहिददामिते । अतीवममभक्तोऽसिभक्तिस्तेस्तुदृढामयि
आदावेव हि तिष्ठासुरहमत्रतपोनिधे !। ततस्त्वयासमभ्यर्थिस्थाम्याम्यत्रसदैवहि

प्राप्य काशीं सुदुर्मेधाः कस्त्यजेज्ज्ञानवान्यदि ।
अनर्घ्यम्प्राप्य माणिक्यं हित्वा काचं क ईहते ॥ ५४ ॥

अल्पीयसा श्रमेणेह वपुषो व्ययमात्रतः । अवश्यंगत्वरस्याशु यथामुक्तिस्तथाक्वहि
विनिमाय जराजीर्णं देहं पार्थिवमत्र वै । प्राज्ञाः किमु न गृह्णीयुरमृतन्नैर्जरं वपुः
न तपोभिर्नवादानैर्नयज्ञैर्बहुदक्षिणैः । अन्यत्रलभ्यतेमोक्षोयथाकाश्यांतनुव्ययात

अपि योगं हि युञ्जाना योगिनो यतमानसाः ।
नैकेन जन्मना मुक्ताः काश्यां मुक्ता वपुर्व्ययात् ॥ ५८ ॥

इदमेव महादानमिदमेव महत्तपः इदमेव व्रतं श्रेष्ठं यत्काश्यां म्रियते तनुः ॥ ५९॥

स एव विद्वाञ्जगति स एव विजितेन्द्रियः

स एव पुण्यवान् धन्यो लब्ध्वा काशीं न यस्त्यजेत् ॥ ६० ॥
तावत्स्थास्याम्यहं चात्र यावत्काशीमुने त्विह ।
प्रलयेऽपि न नाशोऽस्याः शिवशूलाग्रसुस्थितेः ॥ ६१ ॥
इत्याकर्ण्य गिरं विष्णोरग्निबिन्दुर्म्महामुनिः ।
प्रहृष्टरोमा प्रोवाच पुनरन्यं वरं वृणे ॥ ६२ ॥
मापते मम नाम्नात्रतीर्थे पञ्चनदे शुभे । अभक्तेभ्योऽपिभक्तेभ्यःस्थितोमुक्तिंसदादिश
येऽत्र पञ्चनदेस्नात्वागत्वादेशान्तरेष्वपि । नराः पञ्चत्वमापन्नामुक्तितेभ्योऽपिवैदिश
ये तु पञ्चनदे स्नात्वा त्वाम्भजिष्यन्ति मानवाः ।
चलाचलापि द्वैरूपामात्याक्षीच्छ्रीश्चतान्नरान् ॥ ६५ ॥

श्रीविष्णुरुवाच

एवमस्त्वग्निबिन्दोऽत्र भवता यद्वृतम्मुने । त्वन्नाम्नोऽर्धेनमेनाममयासहभविष्यति
बिन्दुमाधवइत्याख्या मम त्रैलोक्यविश्रुता ।
काश्याम्भविष्यति मुने! महापापौघघातिनी ॥ ६७ ॥
ये मामत्र नराः पुण्याः पुण्ये पञ्चनदे ह्रदे । सदासपर्ययिष्यन्तितेषांसंसारभीःकुतः
वसुस्वरूपिणी लक्ष्मीर्लक्ष्मीर्निर्वाणसञ्ज्ञिका । तत्पार्श्वगासदायेषांहृदिपञ्चनदेह्यहम्
यैर्नपञ्चनदम्प्राप्य वसुभिः प्रीणिताद्विजाः । आशुलभ्यविपत्तीनांतेषांतद्वसुरोदिति
त एव धन्या लोकेऽस्मिन्कृतकृत्यास्त एव हि ।
प्राप्य यैर्मम सान्निध्यं वसवो मम सात्कृताः ॥ ७१ ॥
बिन्दुतीर्थमिदं नाम तव नाम्नाभविष्यति । अग्निबिन्दोमुनिश्रेष्ठसर्वपातकनाशनम्
कार्त्तिकेबिन्दुतीर्थेयोब्रह्मचर्यपरायणः । स्नास्यत्यनुदितेभानौभानुजात्तस्यभीःकुतः
अपि पापसहस्राणिकृत्वामोहेनमानवः । ऊर्जे धर्मनदेस्नातोनिष्पापोजायतेक्षणात्
यावत्स्वस्थोऽस्ति देहोऽयं यावन्नेन्द्रियविक्लवः ।
तावद्व्रतानि कुर्वीत यतो देहफलं व्रतम् ॥ ७५ ॥
एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन देहोऽयं संशोध्योऽशुचिभाजनम्

कृच्छ्रचान्द्रायणादीनि कर्तव्यानि प्रयत्नतः ।
अशुचिः शुचितामेति कायो यद्व्रतधारणात् ॥ ७७ ॥
व्रतैः संशोधिते देहे धर्मोवसतिनिश्चलः । अर्थकामौसनिर्वाणौतत्रयत्रवृषस्थितिः
तस्माद्व्रतानि सततंचरितव्यानिमानवैः । धर्मसान्निध्यकर्तॄणिचतुर्वर्गफलेप्सुभिः
सदा कर्तुं नशक्नोति व्रतानि यदि मानवः । चातुर्मास्यमनुप्राप्य तदा कुर्यात्प्रयत्नतः
भूशय्या ब्रह्मचर्यञ्चकिञ्चिद्द्रव्यनिषेधनम् । एकभक्तादिनियमोनित्यदानं स्वशक्तितः
पुराणश्रवणं चैव तदर्थाचरणम्पुनः । अखण्डदीपोद्बोधश्च महापूजेष्टदैवते ॥
प्रभूताङ्कुरबीजाढ्ये देशे चापिगतागतम् । यत्नेनवर्जयेद्धीमान् महाधर्मविवृद्धये ॥
असम्भाष्या न सम्भाष्याश्चातुर्मास्यव्रतस्थितैः ।
मौनञ्चापि सदा कार्यं तथ्यं वक्तव्यमेव वा ॥ ८४ ॥
निष्पावांश्च मसूरांश्च कोद्रवान्वर्जयेद्व्रती ।
सदा शुचिभिरास्थेयं स्प्रष्टव्यो नाव्रतीजनः ॥ ८५ ॥
दन्तकेशाम्बरादीनि नित्यं शोध्यानि यत्नतः ।
अनिष्टचिन्ता नो कार्या व्रतिना ह्यपि क्वचित् ॥ ८६ ॥
द्वादशस्वपिमासेषुव्रतिनोयत्फलंभवेत् । चातुर्मास्यव्रतभृतांतत्फलंस्यादखण्डितम्
चतुर्ष्वपि च मासेषु नसामर्थ्यं व्रतेयदि । तदोर्जे व्रतिनाभाव्यमप्यब्दफलमिच्छता
अव्रतः कार्त्तिकोयेषांगतोमूढधियामिह । तेषाम्पुण्यस्यलेशोपिनभवेत्सूकरात्मनाम्
कृच्छ्रं वाचातिकृच्छ्रं वा प्राजापत्यमथापि वा ।
सम्प्राप्ते कार्त्तिके मासि कुर्याच्छक्त्याऽति पुण्यवान् ॥ ९० ॥
एकान्तरं व्रतं कुर्यात्त्रिरात्रव्रतमेव वा । पञ्चरात्रं सप्तरात्रं सम्प्राप्ते कार्त्तिके व्रती॥
पक्षव्रतंवाकुर्वीतमासोपोषणमेव वा । नोर्जोवन्ध्योविधातव्योव्रतिनाकेनचित्क्वचित्
शाकाहारं पयोहारं फलाहारमथापिवा । चरेद्यवान्नाहारं वासम्प्राप्ते कार्त्तिके व्रती
नित्यंनैमित्तिकं स्नानं कुर्यादूर्जे व्रती नरः । ब्रह्मचर्यं चरेदूर्जे महाव्रतफलार्थवान्
बाहुलं ब्रह्मचर्येण यः क्षिपेच्छुचिमानसः । समस्तं हायनंतेन ब्रह्मचर्यकृतम्भवेत्

यस्तु कार्त्तिकिकम्मासमुपवासैःसमापयेत् । अप्यब्दमपि तेनेहभवेत्सम्यगुपोषितम्
शाकाहारपयोहारैरूर्जो यैरतिवाहितः । अखण्डिताशरत्तेन तदाहारेण यापिता ॥

पत्रभोजी भवेदूर्जे कांस्यं त्याज्यं प्रयत्नतः ।
यो व्रती कांस्यभोजी स्यान्न तद्व्रतफलं लभेत् ॥ ९८ ॥

कांस्यस्य नियमे दद्यात्कांस्यंसर्पिःप्रपूरितम् । ऊर्जेनभक्षयेत्क्षौद्रमतिक्षुद्रगतिप्रदम्
मधुत्यागे घृतं दद्यात्पायसञ्च सशर्करम् । अभ्यङ्गेऽभ्यवहारे चतैलमूर्जे विवर्जयेत्

भूयात्स नारकी देही तत्राभ्यङ्गाद्यतोऽनघ !।
तैलत्यागे तिलान्दद्याद्द्रोणमात्रान्सकाञ्चनान् ॥ १०१ ॥
कार्त्तिके मत्स्यभोजी यः स तैमीं योनिमृच्छति ।
बाहुले मांसभोजी यः स क्रिमिः पूयशोणिते ॥ १०२ ॥
मांसाशिनोऽपि ये भूपास्त्यजेयुस्तेऽपि कार्त्तिके ।
मत्स्यमांसानि सन्त्यज्य कार्त्तिके व्रततत्परः ॥ १०३ ॥
मत्स्यमांसादनाद्दोषाद्बहिर्भवति निश्चितम् ।
नियमे मत्स्यमांसानां दद्यात्कार्त्तिकिके व्रती ॥
कूश्माण्डानि समाषाणि दशस्वर्णयुतान्यपि ॥ १०४ ॥
कार्त्तिके मौनभोजी यः सोऽश्नात्यमृतमेव हि ।
सुघण्टां सतिलाम्मौनी सहिरण्याम्प्रदापयेत ॥ १०५ ॥

कार्तिके लवणंत्यक्तं येन व्रतभृता सता । त्यक्ताःसर्वैरसास्तेनतत्त्यागीगाम्प्रदापयेत्
भूशय्यांकार्त्तिके कुर्वन्नभुवं संस्पृशेद्व्रती । पर्यङ्कं भूशयोदद्यात्सतूलं सोपधानकम्
दीपंयः कार्त्तिकेदद्यादखण्डंघृतवर्तिकम् । मोहान्धतमसम्प्राप्यसन गच्छतिदुर्गतिम्

यः कुर्यात्कार्त्तिके मासे रजन्यां दीपकौमुदीम् ।
तामिस्रं चान्धतामिस्रं न स पश्येत्कदाचन ॥ १०६ ॥

पापान्धकारसंक्रुद्धः कार्त्तिके दीपदानतः । क्रोधान्धकारितमुखम्भास्करिंसनवीक्षते
सउद्योतमयम्पश्येत्त्रैलोक्यंसचराचरम् । प्रबोधयेन्ममाग्रे योदीपंसोज्ज्वलवर्तिकम्

पञ्चामृतानाङ्कलशैरूर्जेमां स्नापयेन्नरः । क्षीराब्धितटमासाद्य वसेत्कल्पंसपुण्यवान्

प्रतिक्षपं कार्त्तिकिके कुर्वञ्ज्योत्स्नाम्प्रदीपजाम् ।
ममाग्रे भक्तिसंयुक्तो गर्भध्वान्तं न सम्विशेत् ॥ ११३ ॥

आज्यवर्त्तिकमूर्जैयो दापंमेऽग्रे प्रबोधयेत् । बुद्धिभ्रंशंनचाप्नोतिमहामृत्युभयेसति
कार्त्तिके मासिमेयात्रा यैःकृताभक्तितत्परैः । बिन्दुतीर्थेकृतस्नानैस्तेषांमुक्तिर्नदूरतः
व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम । दामोदरगृहाणार्घ्यं दनुजेन्द्रनिषूदन
स्नानेनैमित्तिके कृष्णकार्त्तिकेपापशोषणे । गृह्णात्वर्घ्यंमयादत्तंराधयासहितोभवान्
इमौमन्त्रौसमुच्चार्ययोऽर्घ्यंमह्यंप्रयच्छति । सुवर्णरत्नपुष्पाम्बुयुजा शङ्खेनपुण्यवान्
सुवर्णपूर्णपृथिवी सङ्कल्पोदकपूर्वकम् । तेन दत्ता भवेत्सम्यक्सुपात्राय सुपर्वणि
एकादशींसमासाद्य प्रबोधकरणीं मम । बिन्दुतीर्थकृतस्नानो रात्रौ जागरणान्वितः
दीपान्प्रबोध्यबहुशोममालङ्कृत्य शक्तितः । तौर्यत्रिकविनोदेनपुराणश्रवणादिभिः
महामहोत्सवं कृत्वायावत्पूर्णातिथिर्भवेत् । तत्रान्नदानं बहुशः कृत्वा मत्प्रीतये नरः
महापातकयुक्तोऽपि न विशेत्प्रमदोदरम् । बिन्दुमाधवनामानं यो मामत्र समर्चयेत्
बिन्दुतीर्थकृतस्नानो निर्वाणंसहिविन्दति । आदिमाधवनामाहं पूज्यः सत्ययुगेमुने
अनन्तमाधवो ज्ञेयस्त्रेतायां सर्वसिद्धिदः । श्रीदमाधवसञ्ज्ञोऽहं द्वापरे परमार्थकृत्
कलौकलिमलध्वंसीज्ञेयोहंबिन्दुमाधवः । कलौकल्मषसम्पन्ना नमांविन्दन्तिमानवाः
ममैव मायया मूढा भेदवादपरायणाः । ममभक्तिं प्रकुर्वाणा ये विश्वेशं द्विषन्ति वै
विद्विषो ममतेज्ञेयाःपिशाचपदगामिनः । पशाचीयोनिमाप्यापि कालभैरवशासनात्
त्रिंशद्वर्षसहस्राणि उषित्वा दुःखसागरे । विश्वेशानुग्रहादेव ततो मोक्षमवाप्नुयुः
तस्माद्द्वेषोनकर्तव्योविश्वेशेपरमात्मनि । विश्वेशद्वेषिणांपुंसांप्रायश्चित्तंयतोनहि

मनसाऽपि हि विश्वेशं विद्विषन्तीह येऽधमाः ।
अध्यासतेऽन्धतामिस्रं मृतास्तेऽन्यत्र सन्ततम् ॥ १३१ ॥

शिवनिन्दापराये चयेपाशुपतनिन्दकाः । विद्विषो मम ते ज्ञेयाः पतन्तो नरकेऽशुचौ
अष्टाविंशतिकोटीषु नरकेषु क्रमेण हि । कल्पंकल्पं वसेयुस्ते ये विश्वेश्वरनिन्दकाः

विश्वेशानुग्रहंप्राप्यमुनेऽहमपिमुक्तिदः । मद्भक्तैस्तद्विशेषेणसेव्योविश्वेश्वरोऽनिशम्

इयं वाराणसी ज्ञेया मुने! पाशुपतस्थली ।

तस्मात्पशुपतिः सेव्यः काश्यां निःश्रेयसार्थिभिः ॥ १३५ ॥

अत्रपञ्चनदे तीर्थेस्नातिविश्वेश्वरःस्वयम् । ऊर्जे सदैवसगणःसस्कन्दःसपरिच्छदः

ब्रह्मासवेदः समखोब्रह्माण्याद्याश्च मातरः । सप्ताब्धयः ससरितःस्नान्त्यूर्जे धूतपापके

सचेतनाहि यावन्तस्त्रैलोक्ये देहधारिणः । तावन्तःस्नातुमायान्तिकार्त्तिकेधूतपापके

यैर्नपञ्चनदेस्नातं प्राप्यकार्त्तिकिकं शुभम् । जलबुद्बुदवत्तेषां वृथा जन्मशरीरिणाम्

आनन्दकाननं पुण्यं पुण्यं पाञ्चनदं ततः । ततोऽपिममसान्निध्यमग्निबिन्दोमहामुने!

अनेनैवानुमानेन विद्धि पञ्चनदस्य वै । महिमानं महाप्राज्ञ! सर्वतीर्थोत्तमोत्तमम्

श्रुत्वाऽपि यं महाप्राज्ञो महापापैः प्रमुच्यते ।

विष्णोर्मुखादिति श्रुत्वा सोऽग्निबिन्दुर्महामुनिः ॥ १४२ ॥

पुनः प्रणम्य पप्रच्छ बिन्दुमाधवमच्युतम् ॥ १४३ ॥

अग्निबिन्दुरुवाच

भगवञ्छ्रोतुमिच्छामिबिन्दुमाधव! तद्वद । कतिधातवरूपाणि काश्यांसन्तिजनार्दन

भविष्याण्यपि कानाह तानि मे कथयाच्युत ।

यानि सम्पूज्य ते भक्ताः प्राप्स्यन्ति कृतकृत्यताम् ॥ १४५ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे

बिन्दुमाधवाविर्भाववर्णनंनामषष्टितमोऽध्यायः ॥ ६० ॥

——:०:——

एकषष्टितमोऽध्यायः

बिन्दुमाधवाविर्भावोमाधवाग्निबिन्दुसम्वादोवैष्णवतीर्थमाहात्म्यवर्णनञ्च

अगस्त्य उवाच

षडास्यमाधवाख्यानं श्रुतं मे पापनाशनम् । महिमापिश्रुतःश्रेयान्सम्यकपञ्चनदस्यवै

यदग्निबिन्दुनाऽऽपृच्छिमाधवोदैत्यसूदनः । तस्योत्तरंसमाख्याहियथाख्यातंमधुद्विषा

स्कन्द उवाच

शृणवगस्त्य महर्षे! त्वं कथ्यमानंमयाऽधुना । माधवेनयथाचख्षिमुनयेचाग्निबिन्दवे

बिन्दुमाधव उवाच

आदौ पादोदके तीर्थे विद्धि मामादिकेशवम् ।

अग्निबिन्दो महाप्राज्ञ! भक्तानां मुक्तिदायकम् ॥ ४ ॥

अविमुक्तेऽमृते क्षेत्रे येऽर्चयन्त्यादिकेशवम् । तेऽमृतत्वंभजन्त्येवसर्वदुःखविवर्जिता

सङ्गमेशं महालिङ्गं प्रतिष्ठाप्यादिकेशवः । दर्शनादवहं नृणां भुक्तिं मुक्तिं दिशेत्सदा

याम्यां पादोदकाच्छ्वेतद्वीपतीर्थंमहत्तरम् । तत्राहंज्ञानदोनॄणां ज्ञानकेशवसञ्ज्ञकः

श्वेतद्वीपे नरःस्नात्वा ज्ञानकेशवसन्निधौ । न ज्ञानाद्भ्रश्यते क्वापिज्ञानकेशवपूजनात्

तार्क्ष्यकेशवनामाहं तार्क्ष्यतीर्थेनरोत्तमैः । पूजनीयः सदाभक्त्यातार्क्ष्यवत्प्रिया मम

तत्रैव नारदे तीर्थेऽस्म्यहं नारद केशवः । ब्रह्मविद्योपदेष्टा च तत्तीर्थाप्लुतवर्ष्मणाम्

प्रह्लादतीर्थे तत्रैव नाम्नाप्रह्लादकेशवः । भक्तैः समर्चनीयोऽहं महाभक्तिसमृद्धये ॥

तीर्थेऽम्बरीषे तत्राहं नाम्नैवादित्यकेशवः । पातकध्वान्तनिचयं ध्वंसयामीक्षणादपि

दत्तात्रेयेश्वराद्याम्यामहमादिगदाधरः । हरामि तत्र भक्तानां संसारगदसञ्चयम्

तत्रैवभार्गवे तीर्थे भृगुकेशवनामतः । काशीनिवासिनः पुंसो बिभर्मि च मनोरथैः

वामनाख्ये महातीर्थे मनःप्रार्थितदे शुभे । पूज्योऽहंशुभमिच्छद्भिर्नाम्ना वामनकेशवः

नरनारायणे तीर्थे नरनारायणात्मकम् । भक्ताः समर्च्य मांस्युर्वै नरनारायणात्मकाः

तीर्थेयज्ञवराहाख्ये यज्ञवाराहसञ्ज्ञकः । नरैः समर्चनीयोऽहं सर्वयज्ञफलेप्सुभिः ॥
विदारनरसिंहोहं काशीविघ्नविदारणः । तन्नाम्नितीर्थे संसेव्यस्तीर्थोपद्रवशान्तये

गोपीगोविन्दतीर्थे तु गोपीगोविन्दसञ्ज्ञकम् ।
समर्च्य मां नरो भक्त्या मम मायां न संस्पृशेत् ॥ १९ ॥
मुने! लक्ष्मीनृसिंहोऽस्मि तीर्थे तं नाम्नि पावने ।
दिशामि भक्तियुक्तेभ्यः सदा नैःश्रेयसीं श्रियम् ॥ २० ॥

शेषमाधवनामाहंशेषतीर्थेऽघहारिणि । विश्राणयाम्यशेषांश्चविशेषान्भक्तचिन्तितान्
शङ्खमाधवतीर्थे च स्नात्वामांशङ्खमाधवम् । शङ्खोदकेनसंस्नाप्यभवेच्छङ्खनिधेःपतिः
हयग्रीवे महातीर्थे मां हयग्रीवकेशवम् । प्रणम्यप्राप्नुयान्नूनं तद्विष्णोःपरमम्पदम्
भीष्मकेशवनामाहं वृद्धकालेशपश्चिमे । उपसर्गान्हरेभीष्मान्सेवितोभक्तियुक्तितः
निर्वाणकेशवश्चाहम्भक्तनिर्वाणसूचकः । लोलार्कादुत्तरेभागे लोलत्वं चेतसो हरे

वन्द्यास्त्रिलोकसुन्दर्या याम्यां यो मां समर्चयेत् ।
काश्यां ख्यातं त्रिभुवनकेशवं न स गर्भभाक् ॥ २६ ॥
ज्ञानवाप्याः पुरो भागे विद्धि मां ज्ञानमाधवम् ।
तत्र मां भक्तितोऽभ्यर्च्य ज्ञानं प्राप्नोति शाश्वतम् ॥ २७ ॥

श्वेतमाधवसञ्ज्ञोहंविशालाक्ष्याःसमीपतः । श्वेतद्वीपेश्वरंरूपंकुर्याम्भक्त्यासमर्चितः
उदग्दशाश्वमेधान्माम्प्रयागाख्यञ्चमाधवम् । प्रयागतीर्थे सुस्नातोदृष्ट्वा पापैः प्रमुच्यते
प्रयागगमने पुंसां यत्फलं तपसिश्रुतम् । तत्फलंस्याद्दशगुणमत्रस्नात्वाममाऽग्रतः

गङ्गायमुनयोःसङ्गे यत्पुण्यं स्नानकारिणाम् ।
काश्याम्मत्सन्निधावत्र तत्पुण्यं स्याद्दशोत्तरम ॥ ३१ ॥

दानानिराहुग्रस्तेऽर्केददतांयत्फलम्भवेत् । कुरुक्षेत्रेहितत्काश्यामत्रैवस्याद्दशाधिकम्
गङ्गोत्तरवहा यत्र यमुना पूर्ववाहिनी । तत्सम्भेदं नरःप्राप्यमुच्यते ब्रह्महत्यया ॥
वपनं तत्र कर्तव्यं पिण्डदानं च भावतः । देयानि तत्र दानानि महाफलमभीप्सुना
गुणाः प्रजापतिक्षेत्रेयेसर्वेसमुदीरिताः । अविमुक्तेमहाक्षेत्रेऽसङ्ख्याताश्चभवन्तीह

प्रयागेशं महालिङ्गं तत्र तिष्ठति कामदम् ।
तत्सान्निध्याच्च तत्तीर्थं कामदम्परिकीर्तितम् ॥ ३६ ॥

काश्यांमाघः प्रयागे यैर्नस्नातो मकरार्कगः । अरुणोदयमासाद्यतेषां निःश्रेयसंकुतः

काश्युद्भवे प्रयागे ये तपसि स्नान्ति संयुताः ।
दशाश्वमेधजनितं फलं तेषाम्भवेद् ध्रुवम् ॥ ३८ ॥

प्रयागमाधवम्भक्त्याप्रयागेशञ्च कामदम् । प्रयागे तपसिस्नात्वायेऽर्चयन्त्यन्वहंसदा
धनधान्यसुतर्द्धीस्तेलब्ध्वाभोगान्मनोरमान् । भुक्त्वेहपरमानन्दंपरम्मोक्षमवाप्नुयुः

माघेसर्वाणि तीर्थानि प्रयागमधियान्ति हि ।
प्राच्युदीचीप्रतीचीतोदक्षिणाधस्तथोर्ध्वतः ॥ ४१ ॥
काशीस्थितानि तीर्थानि मुने ! यान्ति न कुत्रचित् ।
यदि यान्ति तदा यान्ति तीर्थत्रयमनुत्तमम् ॥ ४२ ॥

आयान्त्यूर्जं पञ्चनदं प्रातःप्रातर्ममान्तिकम् । महाघौघप्रशमने महाश्रेयोविधायिनि
प्राप्यमामघारिश्च प्रयागेशसमीपतः । प्रातः प्रयागे संस्नान्ति सर्वतीर्थानिमामनु

समासाद्य च मध्याह्नमभियान्ति च नित्यशः ।
संस्नातुं सर्वतीर्थानि मुक्तिदां मणिकर्णिकाम् ॥ ४५ ॥

काश्यांरहस्यंपरममेतत्ते कथितम्मुने । यथा तीर्थत्रयीश्रेष्ठा स्वस्वकाले विशेषतः
अन्यद्रहस्यंवक्ष्यामिन वाच्यं यत्र कुत्रचित् । अभक्तेषुसदागोप्यंनगोप्यंभक्तिमज्जने
काश्यां सर्वाणि तीर्थानि एकैकादुत्तरोत्तरम् । महैनांसिप्रहन्त्येवप्रसह्यनिजतेजसा
एतदेवरहस्यं ते वाराणस्या उदीर्यते । उत्क्षिप्यैकाङ्गुलिं तथ्यंश्रेष्ठैकामणिकर्णिका

गर्जन्ति सर्वतीर्थानि स्वस्वधिष्ण्यगतान्यहो ।
केवलम्बलमासाद्य सुमहन्माणिकर्णिकम् ॥ ५० ॥
पापानि पापिनां हत्वा महान्त्यपि बहून्यपि ।
काशीतीर्थानि मध्याह्ने प्रायश्चित्तचिकीर्षया ॥ ५१ ॥
पर्वस्वपर्वस्वपि वा नित्यं नियमवन्त्यहो ।

निर्मलानि भवन्त्येव विगाह्य मणिकर्णिकाम् ॥ ५२ ॥
विश्वेशो विश्वया सार्धं सदोपमणिकर्णिकम् ।
मध्यन्दिनं समासाद्य संस्नाति प्रतिवासरम् ॥ ५३ ॥
वैकुण्ठादप्यहं नित्यं मध्याह्नेमणिकर्णिकाम् । विगाहेपद्मयासार्धं मुदापरमया मुने!
सकृन्ममाख्यां गृणतां निर्हरन्यदघान्यहम् ।
हरिनामसमापन्नस्तद्वलान्माणिकर्णिकात् ॥ ५५ ॥
सत्यलोकात्प्रतिदिनं हंसयानः पितामहः ।
माध्याह्निकविधानाय समायान्मणिकर्णिकाम् ॥ ५६ ॥
इन्द्राद्यालोकपालाश्च मरीचाद्या महर्षयः ।
माध्याह्निकीं क्रियां कर्तुं समीयुर्मणिकर्णिकाम् ॥ ५७ ॥
शेषवासुकिमुख्याश्च नागा वै नागलोकतः ।
समायान्तीह मध्याह्ने संस्नातुं मणिकर्णिकाम् ॥ ५८ ॥
चराचरेषु सर्वेषु यावन्तश्चसचेतनाः । तावन्तःस्नान्तिमध्याह्ने मणिकर्णिजलेऽमले
के माणिकर्णिकेयानां गुणानां सुगरीयसाम् ।
शक्ता वर्णयितुं विप्रा ऽसङ्ख्येयानां मदादिभिः ॥ ६० ॥
चीर्णान्युग्राण्यरण्येषुतैस्तपांसितपोधनैः । यैरियंहिसमासादिमुक्तिभूर्मणिकर्णिका
विश्राणितमहादानास्त एव नरपुङ्गवाः । चरमे वयसि प्राप्तायैरेषामणिकर्णिका ॥
चीर्णसर्वव्रतास्ते तु यथोक्तविधिना ध्रुवम् ।
यैः स्वतल्पीकृता माणिकर्णिकेयीस्थली मृदुः ॥ ६३ ॥
त एव धन्या मर्त्येऽस्मिन् सर्वक्रतुषु दीक्षिताः ।
त्यक्त्वा पुण्यार्जितां लक्ष्मीमैक्षि यैर्मणिकर्णिका ॥ ६४ ॥
कृतानानाविधाधर्मा इष्टापूर्तास्तु तैर्नृभिः । वार्धकंसमनुप्राप्यप्रापियैर्मणिकर्णिका
रत्नानिसदुकूलानि काञ्चनं गजवाजिनः । देयाः प्राज्ञेन यत्नेन सदोपमणिकर्णिकम्
पुण्येनोपार्जितं द्रव्यमत्यल्पमपियैर्नरैः । दत्तं तदक्षयं नित्यं मुनेऽधिमणिकर्णिकम्

कुर्याद्यथोक्तमप्येकं प्राणायामं नरोत्तमः । यस्तेन विहितो नूनं षडङ्गो योग उत्तमः
जप्त्वैकामपिगायत्रीं संप्राप्यमणिकर्णिकाम् । लभेदयुतगायत्रीजपनस्य फलंस्फुटम्
एकामप्याहुतिं प्राज्ञो दत्त्वोपमणिकर्णिकम् ।
यावज्जीवाग्निहोत्रस्य लभेदविकलं फलम् ॥ ७० ॥
इति श्रुत्वा हरेर्वाक्यमग्निबिन्दुर्महातपाः । प्रणिपत्य महाभक्त्यापुनःपप्रच्छमाधवम्

अग्निबिन्दुरुवाच

विष्णो!कियत्परीमाणा पुण्यैषा मणिकर्णिका ।
ब्रूहि मे पुण्डरीकाक्ष!न त्वत्तस्तत्त्ववित्परः ॥ ७२ ॥

श्रीविष्णुरुवाच

आगङ्गाकेशवादाच हरिश्चन्द्रस्यमण्डपात् । आमध्याद्देवसरितःस्वर्द्वारान्मणिकर्णिका
स्थूलमेतत्परीमाणं सूक्ष्मं च प्रवदामिते । हरिश्चन्द्रस्यतीर्थाग्रे हरिश्चन्द्रविनायकः
सीमाविनायकश्चात्रमणिकर्णिह्रदोत्तरे । सीमाविनायकं भक्त्यापूजयित्वानरोत्तमः
मोदकैःसोपचारैश्चप्राप्नुयान्मणिकर्णिकाम् । हरिश्चन्द्रेमहातीर्थे तर्पयेयुःपितामहान्
शतंसमाःसुतृप्ताः स्युःप्रयच्छन्ति च वाञ्छितम् ।
हरिश्चन्द्रे महातीर्थे स्नात्वा श्रद्धान्वितो नरः ॥ ७७ ॥
हरिश्चन्द्रेश्वरं नत्वानसत्यात्परिहीयते । ततः पर्वततीर्थञ्च पर्वतेश्वरसन्निधौ ॥
अधिष्ठानं महामेरोर्महापातकनाशनम् । तत्रस्नात्वार्चयित्वेशंकिञ्चिद्दत्त्वास्वशक्तितः
अध्यास्यमेरुशिखरं दिव्यान्भोगान्समश्नुते । कम्बलाश्वतरंतीर्थं पर्वतेश्वरदक्षिणे
कम्बलाश्वतरेशं च तत्तीर्थात्पश्चिमे शुभम् ।
तस्मिंस्तीर्थे कृतस्नानस्तल्लिङ्गं यः समर्चयेत् ॥ ८१ ॥
अपि तस्य कुले जाता गीतज्ञाः स्युः श्रियान्विताः ।
चक्रपुष्परिणी तत्र योनिचक्रनिवारिणी ॥ ८२ ॥
संसारचक्रेगहने यत्रस्नातो विशेन्न ना । चक्रपुष्करिणीतीर्थं ममाधिष्ठानमुत्तमम् ॥
समाःपरार्धसङ्ख्यातास्तत्रतप्तं महत्तपः । तत्र प्रत्यक्षतां यातोमम विश्वेश्वरः परः

तत्रलब्धंमयैश्वर्यमविनाशि महत्तरम् । चक्रपुष्करिणी चैव ख्याताऽभून्मणिकर्णिका
द्रवरूपं परित्यज्य ललना रूपधारिणी । प्रत्यक्षरूपिणी तत्र मयैक्षिमणिकर्णिका
तस्या रूपंप्रवक्ष्यामिभक्तानांशुभदं परम् । यद्रूपध्यानतःपुम्भिराषण्मासंत्रिसन्ध्यतः
प्रत्यक्षरूपिणी देवीदृश्यतेमणिकर्णिका । चतुर्भुजाविशालाक्षीस्फुरद्भालविलोचना
पश्चिमाभिमुखी नित्यं प्रबद्धकरसम्पुटा । इन्दीवरवतीं मालां दधती दक्षिणेकरे
वरोद्यतेकरे सव्ये मातुलुङ्गफलं शुभम् । कुमारीरूपिणी नित्यंनित्यंद्वादशवार्षिकी
शुद्धस्फटिककान्तिश्च सुनीलस्निग्धमूर्द्धजा । जितप्रवालमाणिक्यरमणीयरदच्छदा
प्रत्यग्रकेतकीपुष्पलसद्धम्मिल्लमस्तका । सर्वाङ्गमुक्ताभरणा चन्द्रकान्त्यंशुकावृता
पुण्डरीकमयीं मालां सश्रीकांबिभ्रतीहृदि । ध्यातव्याऽनेनरूपेण मुमुक्षुभिरहर्निशम्

निर्वाणलक्ष्मीभवनं श्रीमती मणिकर्णिका ।
मन्त्रं तस्याश्च वक्ष्यामि भक्तकल्पद्रुमाभिधम् ॥
यस्यावर्तनतः सिद्ध्येदपि सिद्ध्यष्टकं नृणाम् ॥ ६४ ॥
वाग्भवमायालक्ष्मीमदनप्रणवान्वदेत्पूर्वम् ।
भान्त्यं बिन्दूपेतं मणिपदमथकर्णिके सहृत्प्रणवपुटः ॥ ६५ ॥
मन्त्रः सुरद्रुमसमः समस्तसुखसन्ततिप्रदो जप्यः । ।
तिथिभिः परिमितवर्णः परमपदं दिशति निशितधियाम् ॥ ६६ ॥
तारस्तारतृतीयो बिन्द्वन्तो मणिपदं ततः कर्णिके ।
प्रणवात्मिपदं केन म इति मनुसङ्ख्यवर्णमनुः ॥ ६७ ॥
अयं मन्त्रोऽनिशं जप्यः पुम्भिर्मुक्तिमभीप्सुभिः ।
होमोदशांशकः कार्यः श्रद्धाबद्धादरैर्नृभिः ॥ ६८ ॥

परिप्लुतैः पुण्डरीकैर्गव्येनहविषा स्फुटैः । सशर्करेणमेधावीसक्षौद्रेणसदा शुचिः
त्रिलक्षमन्त्रजप्येन मृतोदेशान्तरेष्वपि । अवश्यंमुक्तिमाप्नोतिमन्त्रस्यास्यप्रभावतः
सौवर्णीप्रतिमा कार्यानवरत्नसमन्विता । पूर्वोक्तरूपसम्पन्ना सम्पूज्या साप्रयत्नतः
सम्पूज्यावासदागेहे नरैर्मोक्षैककाङ्क्षिभिः । मणिकर्ण्यामथाक्षेप्यासमभ्यर्च्यप्रयत्नतः

संसारभीरुभिःपुम्भिः श्रद्धाबद्धादरैरिह । उपायः समनुष्ठेयो ह्यपिदूरनिवासिभिः ॥
मणिकर्ण्यां कृतस्नानोमणिकर्णीशवीक्षणात् । जननीजठरावासे वसतिं न लभेन्नरः

मणिकर्णीश्वरं लिङ्गं पुरा संस्थापितम्मया ।
प्राग्द्वारेऽन्तर्गृहस्याऽत्र समर्च्यो मोक्षकाङ्क्षिभिः ॥ १०५ ॥

ततःपाशुपतंतीर्थमवाच्यां मणिकर्णितः । कृतोदकक्रियस्तत्र पश्येत्पशुपतीश्वरम्
यत्र पाशुपतो योग उपदिष्टःपिनाकिना । ममापिविधिमुख्यानांसुराणाम्पशुपाशहृत्
अतः पशुपतिर्यत्र लिङ्गरूपधरः स्वयम् । पशुपाशविमोक्षाय नित्यं काश्यां प्रकाशते
तत्र चैत्रचतुर्दश्यां शुक्लायांशुचिमानसैः । कार्यायात्रा प्रयत्नेन रात्रौ जागरणं तथा

पूजयित्वा पशुपतिमुपोषणपरायणाः ।
पशुपाशैर्न बध्यन्ते दर्शे विहितपारणाः ॥ ११० ॥

रुद्रावासस्ततस्तीर्थं तीर्थात्पाशुपतात्पुरः । तत्रस्नात्वा नरैरर्च्योरुद्रावासेश्वरोहरः
मणिकर्णीश्वराद्याम्यां रुद्रावासेश्वरं नरः । समाराध्य वसेल्लोके रुद्रावासे न संशयः

विश्वतीर्थं ततो याम्यां विश्वैस्तीर्थैरधिष्ठितम् ।
तत्र स्नात्वा नरो भक्त्या विश्वनाथं विलोकयेत् ॥ ११३ ॥
विश्वां गौरीञ्च तदनु पूजयित्वाऽतिभक्तितः ।
विश्वस्य पूज्यो भवति ततो विश्वमयोभवेत् ॥ ११४ ॥

मुक्तितीर्थंच तदनुतत्रापि कृतमज्जनः । मोक्षेश्वरंततोऽभ्यर्च्यमोक्षमाप्नोत्यसंशयम्
अविमुक्तेश्वरात्पश्चान्मोक्षेशं वीक्ष्य मानवः । नपुनर्मानवेलोके यातायातङ्करोत्यहो
अविमुक्तेश्वरं तीर्थंमुक्तितीर्थान्मनाक्परे । तत्राप्लुत्याविमुक्तेशमर्चयित्वाविमुच्यते
तत्परे तारकं तीर्थं यत्र विश्वेश्वरः स्वयम् । आचष्टे तारकं ब्रह्ममृतकर्णेमृतात्मकम्
सुस्नातस्तारके तीर्थे तारकेश्वरदर्शनात् । संसारसागरं तीर्त्वा तारयेत्स्वपितॄन्नपि

तत्राभ्याशे स्कन्दतीर्थं तत्राप्लुत्य नरोत्तमः ।
दृष्ट्वा षडाननं चैव जह्यात्पाट्कौशिकीं तनुम् ॥ १२० ॥

तारकेश्वरपूर्वेण दृष्ट्वा देवं षडाननम् । वसेत्षडानने लोके कौमारं वपुरुद्वहन् ॥

दुण्ढितीर्थं ततः पुण्यंनरस्तत्र कृतोदकः । दुण्ढिगणपतिंस्तुत्वा नविघ्नैरभिभूयते
भवानातीर्थमतुलंदुण्ढितीर्थस्य दक्षिणे । तत्र स्नात्वाविधानेनभवानीं परिपूज्यच
दुकूलैरत्ननेपथ्यैर्नैवेद्यैर्बहुविस्तरैः । पुष्पैर्धूपैः प्रदीपैश्च भवानीशौ प्रपूज्यच ॥ १२४
समस्तमर्चितं तेनत्रैलोक्यं सचराचरम् । भवानीशङ्करौ काश्यामर्चितौ श्रद्धयातुयैः

चैत्राष्टम्यां महायात्राम्भवान्याः कारयेत्सुधीः ।
अष्टाधिकाः प्रकर्तव्याः शतकृत्वः प्रदक्षिणाः ॥ १२६ ॥

प्रदक्षिणीकृता तेन सप्तद्वीपवती मही । सशैला ससमुद्रा च साश्रमा च सकानना
अष्टौ प्रदक्षिणादेयाः प्रत्यहं भक्तितत्परैः । नमनीयौ प्रयत्नेन भवानीशङ्करौ सदा

भक्तानां कामदा नित्यं भवानी वाससाम्प्रदा ।
अतो भवानी सम्पूज्या काश्यां तीर्थनिवासिभिः ॥ १२६ ॥
योगक्षेमं सदा कुर्याद्भवानीकाशिवासिनाम् ।
तस्माद्भवानी संसेव्या सततं काशिवासिभिः ॥ १३० ॥
भिक्षणीया सदा भिक्षा भिक्षुणा मोक्षकाङ्क्षिणा ।
यतो भिक्षाप्रदा काश्यां विश्वेशस्य कुटुम्बिनी ॥ १३१ ॥
गृहमेध्यत्र विश्वेशो भवानी तत्कुटुम्बिनी ।
सर्वेभ्यः काशिसंस्थेभ्यो मोक्षशिक्षां प्रयच्छति ॥ १३२ ॥
दुष्प्रापमपि यत्किञ्चित्काशीक्षेत्रनिवासिनाम् ।
तत्सुप्राप्यं करोत्येव भवानी पूजिता नृभिः ॥ १३३ ॥

कुर्याज्जागरणंरात्रौमहाष्टम्यांव्रतीनरः । प्रातर्भवानीमभ्यर्च्यप्राप्नुयाद्वाञ्छितंफलम्

शुक्रेशात्पश्चिमाशायां भवानीं योऽभिवीक्षते ।
सर्वेमनोरथास्तस्य सिद्ध्यन्तीह न संशयः ॥ १३५ ॥
काश्यां सदैव वस्तव्यं स्नातव्योत्तरवाहिनी ।
भवानीशङ्करौ सेव्यौ प्राप्तव्ये भुक्तिमुक्तिके ॥ १३६ ॥

मातर्भवानि! तव पादरजोभवानि मातर्भवानि! तव दासतरो भवानि ।

मातर्भवानि न भवानि यथा भवेऽस्मिंस्त्वद्वाग्भवान्यनुदिनं न पुनर्भवानि ॥ १३७ ॥

तिष्ठता गच्छता वापि स्वपता जाग्रताऽपि वा ।
अयंमन्त्रः सदा जप्यः सुखाप्त्यै काशिवासिना ॥ १३८ ॥

ईशानतीर्थं तत्रैव भवानीतीर्थसन्निधौ । तत्रस्नातो य ईशानमर्चयेन्न सजन्मभाक्
ज्ञानतीर्थश्च तत्रैव ज्ञानदं सर्वदानृणाम् । कृताभिषेकस्तत्तीर्थे दृष्ट्वा ज्ञानेश्वरं शिवम्

ज्ञानवापीसमीपस्थो ज्ञानेशो यैः समर्चितः ।
ज्ञानभ्रंशो न तेषां स्यादपि पञ्चत्वमृच्छताम् ॥ १४१ ॥

शैलादितीर्थं तत्रैव परमर्द्धिप्रकाशकम् । तत्र श्राद्धादिकं कृत्वादत्त्वादानंस्वशक्तितः
शैलादीश्वरमालोक्य ज्ञानवाप्याउदग्दिशि । लभेद्गणत्वपदवीं नात्रकार्याविचारणा

नन्दितीर्थादवाच्यां तु विष्णुतीर्थं परं मम ।
तत्र पिण्डान्विनिर्वाप्य पितॄणामनृणो भवेत् ॥ १४४ ॥
विष्णुतीर्थे कृतस्नानो यो मां विष्णुं विलोकयेत् ।
विश्वेशाद्दक्षिणे पार्श्वे विष्णुलोकं स गच्छति ॥ १४५ ॥

यः प्रत्येकादशीम्प्राप्यशयनीम्बोधिनीं तथा । कुर्याज्जागरणं रात्रौ मममूर्तिसमीपतः

प्रातः समर्च्य माम्भक्त्या भोजयित्वा द्विजानपि ॥
दत्त्वा गाः काञ्चनम्भूमिं न भूयोभूमिभाग्भवेत् ॥ १४७ ॥
कृत्वा तत्र व्रतोत्सर्गं वित्तशाठ्यविवर्जितः ।
सम्यग्व्रतफलं धीमान् प्राप्नोत्येवममाज्ञया ॥ १४८ ॥

ममतीर्थादवाच्यां तु तीर्थम्पैतामहंशुभम् । तत्र श्राद्धविधानेनतर्पयित्वापितामहान्
पितामहेश्वरंलिङ्गंब्रह्मनालोपरिस्थितम् । पूजयित्वानरोभक्त्याब्रह्मलोकमवाप्नुयात्
ब्रह्मस्रोतःसमीपे तु कृतंकर्मशुभाशुभम् । परामक्षयतामेऽति शुभमेव ततश्चरेत् ॥
अत्यल्पमपियत्कर्म कृतमत्र शुभाशुभम् । प्रलयेऽपि न तस्यास्तिप्रलयो मुनिसत्तम
नाभितीर्थमिदम्प्रोक्तं नाभिभूतंयतःक्षितेः । अपिब्रह्माण्डगोलस्यनाभिरेषाशुभोदया

सामाणिकर्णिकेयीयं नाभिगाम्भीर्यभूमिका ।

ब्रह्माण्डगोलकं सर्वं यस्यामेति लयोदयम् ॥ १५४ ॥

ब्रह्मनालम्परंतीर्थं त्रिषुलोकेषु विश्रुतम् । तत्सङ्गमे नरः स्नात्वाकोटिजन्ममलंहरेत् ब्रह्मनाले पतेद्येषामपि कीकसमात्रकम् । ब्रह्माण्डमण्डपान्तस्ते नविशन्तिकदाचन ततो भागीरथेस्तीर्थंब्रह्मनालाच्चदक्षिणे । तत्रस्नात्वानरःसम्यङ्मुच्यतेब्रह्महत्यया भागीरथीश्वरं लिङ्गंस्वर्गद्वारस्य सन्निधौ । दर्शनाद्ब्रह्महत्यायाः पुरश्चरणमुच्यते अशुभांगतिमापन्ना यस्य पूर्वेपितामहाः । तेनभागीरथीतीर्थे तर्पणीयाः प्रयत्नतः

तत्र भागीरथे तीर्थे श्राद्धं कृत्वा विधानतः ।

ब्राह्मणान्भोजयित्वा तु ब्रह्मलोके नयेत्पितॄन् ॥ १६० ॥

तद्दक्षिणेमहातीर्थं खुरकर्तरिसञ्ज्ञितम् । गोलोकादागताभिश्चगोभिर्यत्खुरकोटिभिः स्थपुटीकृतभूभागं ततस्तत्खुरकर्तरि । तस्मिंस्तीर्थेकृतस्नानः कृतपिण्डोदकक्रियः खुरकर्तरीशं लिङ्गं दृष्ट्वा गोलोकमाप्नुयात् । गोधनैर्नविमुच्येततल्लिङ्गस्यसमर्चनात् दक्षिणे खुरकर्तर्यामार्कण्डंतीर्थमुत्तमम् । कृतश्राद्धविधानश्चतस्मिंस्तीर्थेऽघहारिणि मार्कण्डेयेश्वरंलिङ्गंदृष्ट्वायुर्दीर्घमाप्नुयात । ब्रह्मतेजोऽभिवृद्धिश्च कीर्तिश्च परमाम्भुवि वसिष्ठतीर्थम्परमं महापातकनाशनम् । तर्पयित्वा पितॄंस्तत्रवसिष्ठेशं विलोक्यच नरो न लिप्यतेपापैर्जन्मत्रयसमर्जितैः । वसिष्ठलोके वसति ब्रह्मतेजःसमन्वितः तत्रैवारुन्धतीतीर्थं स्त्रीणां सौभाग्यवर्धनम् । पतिव्रताभिस्तत्तीर्थंगाहनीयंविशेषतः

पौंश्चल्यजनितो दोषस्तत्तीर्थपरिमज्जनात् ।

क्षणाद्विनाशमागच्छेदरुन्धत्याः प्रभावतः ॥ १६६ ॥

मार्कण्डेयेश्वरात्प्राच्यां वसिष्ठेश्वरपूजनात् ।

निष्पापो जायते मर्त्यो महत्पुण्यमवाप्नुयात् ॥ १७० ॥

मूर्ती वसिष्ठारुन्धत्योस्तत्र पूज्ये प्रयत्नतः ।

न स्त्रीवैधव्यमाप्नोति न पुमांस्त्रीवियोगिताम् ॥ १७१ ॥

वसिष्ठतीर्थतोयाम्यां नर्मदातीर्थमुत्तमम् । विधायश्राद्धं मेधावीनर्मदेशं विलोक्यच तत्रदत्त्वा महादानं पद्मया न विमुच्यते । ततस्त्रिसन्ध्यं वै तीर्थं त्रिसन्ध्येश्वरपूर्वतः

तत्र तीर्थे नरः स्नात्वा कृत्वा सन्ध्यां विधानतः ।

सन्ध्याकालविलोपोत्थपातकैर्नाऽभिभूयते ॥ १७४ ॥

त्रिसन्ध्येश्वरमालोक्य कृतसन्ध्यस्त्रिकालतः ।

त्रिवेदावर्तजम्पुण्यं प्राप्नुयाच्छ्रद्धया द्विजः ॥ १७५ ॥

ततोऽनुयोगिनीतीर्थं नरस्तत्रकृताप्लवः । दृष्ट्वातुयोगिनीपीठंयोगसिद्धिमवाप्नुयात् अगस्तितीर्थंतत्रास्तिमहाघौघविघातकृत् । तत्रस्नात्वाप्रयत्नेनदृष्ट्वागस्तीश्वरं विभुम्

अगस्तिकुण्डे च ततः सन्तर्प्य च पितामहान् ।

अगस्तिना समेतां च लोपामुद्रां प्रणम्य च ॥ १७८ ॥

सर्वपापविनिर्मुक्तः सर्वक्लेशविवर्जितः । गच्छेत्स्वपूर्वजैः सार्धं शिवलोकं नरोत्तमः दक्षिणेऽगस्त्यतीर्थाच्च तीर्थमत्यतिपावनम् । गङ्गाकेशवसञ्ज्ञञ्चसर्वपातकनाशनम

तत्र मे शुभदां मूर्तिं मुने! तत्तीर्थसञ्ज्ञिकाम् ।

सम्पूज्य श्रद्धया धीमान् मम लोके महीयते ॥ १८१ ॥

तत्रपिण्डान्विनिर्वाप्यदत्त्वादानंस्वशक्तितः। शतसाम्वत्सरींतृप्तिंपितॄणांससमर्पयेत् मणिकर्णीपरीमाणमेतत्तेकीर्तितंमहत् ।सीमाविनायकाद्याम्यांसर्वविघ्नविघातनात्

वैरोचनेश्वरात्प्राच्यामहं वैकुण्ठमाधवः ।

तत्र मां भक्तितोऽभ्यर्च्य वैकुण्ठार्चामवाप्नुयात् ॥ १८४ ॥

वीरमाधवसञ्ज्ञोऽहं वीरेशात्पश्चिमे मुने । तत्र व्रतीसमभ्यर्च्यनयामीं यातनां लभेत् कालमाधवनामाहं कालभैरवसन्निधौ । कलिःकालो नकलयेन्मद्भक्तमितिनिश्चितम् मार्गशीर्षस्य शुक्लायामेकादश्यामुपोषितः । तत्रजागरणंकृत्वा यमं नालोकयेत्क्वचित् निर्वाणनरसिंहोऽहं पुलस्तीश्वरदक्षिणे । भक्तोनिर्वाणमाप्नोति तन्मूर्तिनमनादपि महाबलनृसिंहोऽहमोङ्कारात्पूर्वतोमुने ! । दूतान्महाबलान्याम्यां नपश्येत्तु तदर्चकः प्रचण्डनरसिंहोऽहं चण्डभैरवपूर्वतः । प्रचण्डमप्यघंकृत्वानिष्पाप्मास्यात्तदर्चनात् ॥ अहंगिरिनृसिंहोस्मितद्देहलिविनायकात् ।प्राच्यास्प्रबलपापौघगजनानाम्प्रविदारणः महाभयहरश्चाहं नरसिंहो महामुने !। पितामहेश्वरात्पश्चाद्भक्तसाध्वससाध्वसः

अत्युग्रनरसिंहोऽहं कलशेश्वरपश्चिमे । अत्युग्रमपिपापौघं हरामि श्रद्धयार्चितः

ज्वालामालीनृसिंहोऽहं ज्वालामुख्याः समीपतः ।

संज्वालयामि पापौघतृणानि परिपूजितः ॥ १६४ ॥

कोलाहलनृसिंहोऽस्मि दैत्यदानवमर्दनः । मम नाम समुच्चारादघकोलाहलोयतः

कङ्कालभैरवो यत्र काशीरक्षणदक्षधीः । तत्रमाम्भक्तितोऽभ्यर्च्यनोपसर्गैर्निरुध्यते

विटङ्कनरसिंहोऽस्मि नीलकण्ठेश्वरादनु । तत्र मां श्रद्धयापूज्य नरो भवति निर्भयः

अनन्तवामनश्चाहमनन्तेश्वरसन्निधौ । अनन्तान्यपि भक्तस्य कलुषाणि हरेऽर्चितः

दधिवामनसञ्ज्ञोऽहं भक्तानां दधिभक्तिदः । यन्नामस्मरणादेव न दरिद्रो नरोभवेत्

त्रिविक्रमोऽस्म्यहं काश्यामुदीच्यां च त्रिलोचनात् ।

ददामि पूजितो लक्ष्मीं हरामि वृजिनान्यपि ॥ २०० ॥

बलिवामनमामाऽहं बलिना परिपूजितः । बलिभद्रेश्वरात्प्राच्याम्भक्तानाम्बलवर्धनः

दक्षिणे भवतीर्थाच्च ताम्रद्वीपादिहागतः ।

नाम्ना ताम्रवराहोऽस्मि भक्तानां चिन्तितार्थदः ॥ २०२ ॥

मुने!धरणिवाराहःप्रयागेश्वरसन्निधौ । स्नात्वावाराहतीर्थेऽत्रदृष्ट्वामांकिटिरूपिणीम्

सम्पूज्य बहुभावेन न विशेद्योनिसङ्कटम् । तत्राल्पमपि दत्त्वाऽन्नंधरादानफलंलभेत्

महाकलुषगम्भीरसागरे निपतञ्जनः । ममभक्त्युडुपं प्राप्य प्रलयेऽपि न मज्जति ॥

अहंकोकावराहोऽस्मिकिटीश्वरसमीपतः । तत्रमाम्पूजयन्मर्त्यो लभतेचिन्तितंफलम्

नारायणाःशतम्पञ्चशतञ्चजलशायिनः । त्रिंशत्कमठरूपाणि मत्स्यरूपाणि विंशतिः

गोपालाश्च शतं सार्धं बुद्धाःसन्ति सहस्रशः । त्रिंशत्परशुरामाश्चरामाएकोत्तरंशतम्

विष्णुरूपोऽस्म्यहं चैको मुक्तिमण्डपमध्यतः ।

मुने! कृतप्रसादेन विश्वेशेन श्रितः स्वयम् ॥ २०६ ॥

नारायणस्वरूपेणगणाश्चक्रगदोद्यताः । कुर्वन्तिरक्षांक्षेत्रस्य परितोनियुतानि षट्

सोऽग्निबिन्दुरितिश्रुत्वा सम्प्रहृष्टतनूरुहः । पुनः पप्रच्छमेधावी मूर्तिभेदान्वद प्रभो

हिताय निजभक्तानां ममसन्देहशान्तये । कति ते मूर्तयोऽनन्त कथंज्ञेयास्तथा वद

इत्याकर्ण्य वचस्तस्याऽग्निबिन्दोस्तपसां निधेः ।

उवाच भगवान्विष्णुर्मूर्तिभेदाननुक्रमात् ॥ २१३ ॥

याञ्छ्रुत्वाऽपि हि नो मर्त्यो यमगोचरतां व्रजेत् ।

केशवादींश्चतुर्विंशद् भेदानाह प्रजापतिः ॥ २१४ ॥

श्रीविष्णुरुवाच

अग्निबिन्दो! महाप्राज्ञ! शृणु ते कथयाम्यहम् ।

आद्यदक्षिणहस्ताच्च विद्धि सृष्टिक्रमान्मुने !॥ २१५ ॥

शङ्खचक्रगदापद्मैर्मूर्तिं जानीहिकेशवीम् । पूजितायानृणांकुर्याच्चिन्तितार्थमसंशयम्

मधुहा परिचेतव्यः शङ्खपद्मगदारिभिः । वैरिणोनाशमायान्ति तन्मूर्तिपरिसेवनात्

सङ्कर्षणः समर्च्योऽत्रशङ्खाब्जारिगदायुधः । तन्मूर्तिपूजनाज्जातुजन्तुर्नस्यात्पुनर्भवी

शङ्खकौमोदकीचक्रपद्मैर्दामोदरोऽर्च्यते । ददाति वित्तम्पुत्रांश्चगोधनंधान्यमेव हि ॥

वामनःशङ्खचक्राब्जगदाभिरुपलक्षितः । लक्ष्मीवन्तं जनं कुर्याद् गृहेऽपि परिधारितः

पाञ्चजन्यं गदां पद्मं चित्रमूर्तिसुदर्शनम् । प्रद्युम्नः पूज्यते मर्त्यैर्बहुद्युम्नम्प्रयच्छति

ऊर्ध्ववामकरात्सृष्ट्या विष्णवाद्यं षट्कमुच्यते ।

यस्य स्मरणमात्रेण विलीयन्तेऽघराशयः ॥ २२२ ॥

शङ्खारिभ्यांगदाब्जाभ्यां पूज्यो विष्णुःश्रियैनरैः । शङ्खपद्मगदाचक्रैर्माधवःपरमर्द्धिदः

ध्येयोऽनिरुद्धःसंसिद्ध्यै शङ्खाब्जारिगदोद्यतः ।

शङ्खेन गदया चक्राम्बुजाभ्याम्पुरुषोत्तमः ॥ २२४ ॥

अधोक्षजोजनिहरः शङ्खार्यब्जगदो मुने !। शङ्खकौमोदकी पद्मचक्रेर्ध्येयोजनार्दनः॥

अधो वामकरात्सृष्ट्या षड्गोविन्दादिमूर्तयः ।

शङ्खं चक्रं गदां पद्मं गोविन्दोबिभृयात्सदा ॥ २२६ ॥

शङ्खपद्मगदाचक्रैरर्च्योलक्ष्म्यैत्रिविक्रमः । शङ्खाब्जचक्रंबिभ्राणोगदावाञ्छ्रीधरःश्रिये

हृषीकेशश्च शङ्खेन गदाचक्राम्बुजैर्मतः । नृसिंहः शङ्खचक्राभ्यां पद्मेन गदयोह्यते ॥

अच्युतः शङ्खभृन्नित्यं गदापद्मरथाङ्गवान् । दक्षिणाधः करादूह्यावासुदेवादयश्चषट्

वासुदेवश्च शङ्खारिगदाजलजभृत्सदा । शङ्खाम्बुजगदाचक्रीध्येयो नारायणो नृभिः
शङ्खी पद्मी पद्मनाभोज्ञेयश्चक्रीगदी मुने । उपेन्द्रः शङ्खचक्रीत्यं गदारिकमलायुधः
हरिर्हरेदघंशङ्खी चक्री पद्मी गदी नृणाम् । शङ्खे नगदयापद्मचक्राभ्यांकृष्णउच्यते
एते भेदामयाख्याताःस्वमूर्तीनांमहामुने । यान्विज्ञायध्रुवंमर्त्योभुक्तिमुक्तिंचविन्दति
एवं वदतिगोविन्देमुनये चाग्निविन्दवे । पक्षीन्द्रः पक्षविक्षिप्तविपक्षोऽक्षिपथंगतः
प्राह च प्रणिपत्याऽऽशुत्र्यक्षस्यागमनम्मुदा । सम्भ्रमेण हृषीकेशः क्व श इत्यवदत्ततः

गरुड उवाच

प्रत्यक्षः क्रियतामेव महावृषभकेतनः । यस्य ध्वजस्य रत्नार्चिः पूरयेद्रोदसीमिमाम्
लोकलोचननिर्माणसफलीकरणक्षमम् । कोटिमार्तण्डविद्योतप्रद्योतितदिगाननम्
निरीक्ष्य पुण्डरीकाक्षस्त्र्यक्षस्य वृषभध्वजम् ।
विमानिनां विमानौघैः परीतगगनाङ्गणम् ॥ २३८ ॥
महावाद्यनिनादौघैःप्रतिस्वानितकन्दरम् ।
विद्याधरीपरिक्षिप्तपुष्पाञ्जलिसुगन्धितम् ॥ २३९ ॥
प्रणम्य दूरादपि च सम्प्रहृष्टतनूरुहः । अभ्युत्थातुं मनश्चक्रेशङ्खचक्रगदाधरः ॥
अग्निबिन्दुमथ प्राह मुक्तिदस्तु मुदान्निधिः । इदं सुदर्शनंचक्रं स्पृशासव्येनपाणिना
अग्निबिन्दुरिति प्रोक्तः स्पृशेद्यावत्सुदर्शनम् ।
तावत्सुदर्शनो जातः परमानुग्रहाद्धरेः ॥ २४२ ॥

स्कन्द उवाच

ज्योतीरूपोऽथ समुनिः कौस्तुभे ज्योतिषां तनौ ।
एकीभूतः कलशज! विन्दुमाधवसेवनात् ॥ २४३ ॥
विन्दुमाधवपादाब्जभ्रमरीकृतमानसाः । अग्निबिन्दूपमांयान्तिकलशोद्भवनिश्चितम्
काश्यां सदैव वस्तव्यं द्रष्टव्यो बिन्दुमाधवः ।
श्रोतव्यमिदमाख्यानं जेतव्या जगतां गतिः ॥ २४५ ॥
पुण्या पञ्चनदोत्पत्तिः पुण्यामाधवसङ्कथा ।

पुण्यो वाराणसीवासः सम्भवेत्पुण्यजन्मनाम् ॥ २४६ ॥
अग्निबिन्दोः स्तुतिं योऽत्र माधवाऽग्रे पठिष्यति ।
समृद्धसर्वकामः स मोक्षलक्ष्मीपतिर्भवेत् ॥ २४७ ॥
श्राद्धकाले सदा जप्यमिदमाख्यानमुत्तमम् । द्विजानाम्भुञ्जमानानाम्पुरस्तात्परतृप्तये
जप्तव्यमिदमाख्यानं पर्वकाले विशेषतः । पुण्ये पञ्चनदाभ्याशे पुण्यलक्ष्मीविवृद्धये
पठितव्यः प्रयत्नेन बिन्दुमाधवसम्भवः । श्रोतव्यः परयाभक्त्याभुक्तिमुक्तिसमृद्धये
सम्प्राप्ते वासरे विष्णो रात्रौ जागरणान्वितः
श्रुत्वाऽऽख्यानमिदम्पुण्यं वैकुण्ठे वसतिं लभेत् ॥ २५१ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
बिन्दुमाधवाविर्भावोमाधवाग्निबिन्दुसम्वादोवैष्णवतीर्थ-
माहात्म्यञ्चनामैकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः

वृषभध्वजप्रादुर्भाववर्णनम्

अगस्त्य उवाच

श्रुत्वा स्कन्द! न तृप्तोऽस्मि तव वक्त्रेरितां कथाम् ।
अत्याश्चर्यकरम्प्रोक्तमाख्यानम्बैन्दुमाधवम् ॥ १ ॥
इदानीं श्रोतुमिच्छामि देवदेवसमागमम् ।
तार्क्ष्यात्त्र्यक्षः समाकर्ण्य दिवोदासस्य चेष्टितम् ॥ २ ॥
विष्णुमायाप्रपञ्चं च किमाह गरुडध्वजम् । के के चशम्भुनासार्धंसमीयुर्मन्दराद्गिरेः
ब्रह्मणेशः कथं दृष्टस्त्रपाकुलितचक्षुषा । किमाह देवो ब्रह्माणं किमुक्तम्भास्वतापि च
योगिनीभिः किमाख्यायि गणा ह्रीणाः किमब्रुवन् ।

एतदाख्याहि मे स्कन्द! महत्कौतूहलं मयि ॥ ५ ॥

इमं प्रश्नं निशम्यैशिर्मुनेः कलशजन्मनः । प्रत्युवाच नमस्कृत्यशिवौप्रणतसिद्धिदौ

स्कन्द उवाच

मुने शृणु!कथामेतां सर्वपातकनाशिनीम् । अशेषविघ्नशमनीम्महाश्रेयोभिवर्धिनीम्
अथदेवोऽसुररिपुःश्रुत्वा शम्भुसमागमम् । द्विजराजायसमुदासमदात्पारितोषिकम्
आयानं शंसते शम्भोरुपवाराणसिप्रियम् । ब्रह्माणमग्रतः कृत्वाततश्चाभ्युद्ययौहरिः
विवस्वता समेतश्च तैर्गणैः परितोवृतः । योगिनीभिरनूद्यातो गणेशमुपसंस्थितः
अथनेत्रातिथीकृत्य देवदेवं वृषध्वजम् । मङ्क्षुताक्ष्यादवारुह्य प्रणनाम श्रियः पतिः
पितामहोऽपि स्थविरो भृशं नम्रशिरोधरः । प्रणतेन मृडेनैव प्रणमन्विनिवारितः॥
स्वस्त्यभ्युदितपाणिश्चरुद्रसूक्तैरमन्त्रयत । अक्षतान्यथसार्द्राणिदर्शयन्सफलान्यजः

मौलिम्पादाब्जयोः कृत्वा गणेशः सत्वरो नतः ।
मूर्ध्न्युपाजिघ्रयाञ्चक्रे हरोहर्षाद्गजाननम् । ॥ १४ ॥

अभ्युपावेशयच्चापि परिष्वज्यनिजासने । सोमनन्दिप्रभृतयः प्रणेमुर्दण्डवद्गणाः
योगिन्योऽपिप्रणम्येशञ्चक्रुर्मङ्गलगायनम् । तरणिः प्रणनामाऽथ प्रमथाधिपतिंहरम्
खण्डेन्दुशेखरश्चाथउपसिंहासनं हरिम् । समुपावेशयद्वामपार्श्वे मानपुरःसरम्
ब्रह्माणं दक्षिणे भागेपरिविश्राणितासनम् । दृष्ट्वा सम्भावितः सर्वेशर्वेणप्रणतागणाः

मौलिचालनमात्रेण योगिन्योऽपि प्रसादिताः ।
सन्तोषितो रविश्चापि विशेति करसञ्ज्ञया ॥ १६ ॥

अथ शम्भुं शतधृतिः प्रबद्धकरसम्पुटः । परिविज्ञापयाञ्चक्रे प्रसन्नवदनाम्बुजम् ॥

ब्रह्मोवाच

भगवन्देवदेवेश क्षन्तव्यं गिरिजापते !। वाराणसीं समासाद्य यदहंनागतः पुनः ॥

प्रसङ्गतोऽपि कः काशीं प्राप्य चन्द्रविभूषण !।
किञ्चिद्विधातुं शक्तोऽपि त्यज्येत्स्थविरतां दधत् ॥ २२ ॥

स्वरूपतो ब्राह्मणत्वादपाकर्तुन्न शक्यते । अथ शक्तोऽप्यपाकर्तुंकःपुण्येसञ्चिकीर्षति

विभोरपि समाज्ञेयंधर्मवर्त्मानुसारिणि । न किञ्चिदपकर्तव्यंजानताकेनचित्कचित्

कस्तादृशि महीजानौ पुण्यवर्त्मन्यतन्द्रिते ।
काशीपाले दिवोदासे मनागपि विरुद्धधीः ॥ २५ ॥
निशम्येति वचस्तुष्टः श्रीकण्ठोऽतिविशुद्धधीः ।
हसन्प्रोवाच धातारम्ब्रह्मन्सर्वमवैम्यहम् ॥ २६ ॥

देवदेव उवाच

आदौतावददोषं हि ब्रह्मत्वम्ब्राह्मणस्यते । वाजिमेधाध्वराणाञ्च ततोऽपिदशकंकृतम्
ततोऽपिविहितम्ब्रह्मन्भवता परमं हितम् । अपराधसहस्राणियल्लिङ्गं स्थापितम्मम
येनैकमपिमेलिङ्गं स्थापितं यत्रकुत्रचित् । तस्यापराधलेशोपिनास्तिसर्वापराधिनः
अपराधसहस्रेऽपिब्राह्मणंयोऽपराध्नुयात् । दिनैः कतिपयैरेव तस्यैश्वर्यं विनश्यति

इति ब्रुवति देवेशेऽप्यन्तरुच्छ्वसितंगणैः ।
स मातृभिः समन्ताच्च विलोक्यास्यम्परस्परम् ॥ ३१ ॥

अर्कोऽप्यवसरं ज्ञात्वानत्वाशम्भुं व्यजिज्ञपत् । प्रसन्नास्यमुमाकान्तं दृष्ट्वादृष्टचराचरः

अर्क उवाच

नाथकाशीमितो गत्वायथाशक्ति कृतोपधिः । अकिञ्चित्करताम्प्राप्तःसहस्रकरवानपि
स्वधर्मपालके तस्मिन्दिवोदासेधरापतौ । निश्चितागमनंज्ञात्वादेवस्याहमिहस्थितः
प्रतीक्षमाणो देवेशत्वदागमनमुत्तमम् । विभज्य बहुधात्मानं त्वदाराधनतत्परः

मनोरथद्रुमश्चाद्य फलितःश्रीमदीक्षणात् ।
किञ्चिद्भक्तिलवाम्भोभिः सिक्तो ध्यानेन पुष्पितः ॥ ३६ ॥

इत्युदीरितमाकर्ण्य रवेर्वैरविलोचनः । प्रोवाच देवदेवेशो नापराध्यसि भास्कर !॥
ममैवकार्यंविहितंत्वं यदत्रव्यवस्थितः । यस्यां सुरप्रवेशोनतस्मिन्राजनिशासति
इति सूरं समाश्वास्य देवदेवःकृपानिधिः । गणानाश्वासयामासव्रीडानम्रशिरोधरान्
योगिन्योऽपि सुदृष्ट्याथशम्भुनासम्प्रसादिताः । त्रपाभरसमाक्रान्तकन्धराइवसङ्गताः
ततो व्यापारयाञ्चक्रे त्र्यक्षो नेत्राणिचक्रिणि । हरिर्नकिञ्चिदप्यूचेसर्वज्ञाग्रे महामनाः

ईशोऽपिश्रुतवृत्तान्तस्ताक्ष्यार्द्गणपशार्ङ्गिणोः । मनसैवप्रसन्नोऽभून्नकिञ्चित्पर्यभाषत
एतस्मिन्नन्तरे प्राप्तागोलोकात्पञ्चधेनवः । सुनन्दासुमनाश्चापिसुशीला सुरभिस्तथा

पञ्चमी कपिला चापि सर्वाघौघविघट्टिनी ।
वात्सल्यदृष्ट्या भर्गस्य तासामूधांसि सुस्रुवुः ॥ ४४ ॥
ववर्षुः पयसाम्पूरैस्तदूधांसि पयोधराः ।
धारासारैरविच्छिन्नैस्तावद्यावद्ध्रदोऽभवत् ॥ ४५ ॥

पयःपयोधिरिव सद्द्वितीयः प्रैक्षि पार्षदैः । देवेशसमधिष्ठानात्तत्तीर्थमभवत्परम् ॥
कपिलाह्रद इत्याख्यांचक्रे तस्य महेश्वरः । ततोदेवाज्ञया सर्वेस्नातास्तत्रदिवौकसः
आविरासुस्ततस्तीर्थादथदिव्यपितामहाः । तान् दृष्ट्वातेसुराःसर्वेतर्पयाञ्चक्रिरेमुदा

अग्निष्वात्ता बर्हिषद आज्यपाःसोमपास्तथा ।
इत्याद्या दिव्यपितरस्तृप्ताः शम्भुं व्यजिज्ञपन् ॥ ४६ ॥

देवदेव! जगन्नाथ! भक्तानामभयप्रद !। अस्मिंस्तीर्थे त्वदभ्याशाज्जातानस्तृप्तिरक्षया

तस्माच्छम्भो! वरं देहि प्रसन्नेनान्तरात्मना ।
इति दिव्यपितृणां स श्रुत्वा वाक्यं वृषध्वजः ॥ ५१ ॥

शृण्वतां सर्वदेवानामिदं वचनमब्रवीत् । सर्वः सर्वपितृणां वै परतृप्तिकरम्परम् ॥

श्रीदेवदेव उवाच

शृणुविष्णो!महाबाहोशृणुत्वञ्चपितामह !। एतस्मिन्कापिलेतीर्थेकापिलेयपयोभृते
येपिण्डान्निर्वपिष्यन्तिश्रद्धयाश्राद्धदानतः । तेषाम्पितृणांसन्तृप्तिर्भविष्यतिममाज्ञया
अन्यं विशेषंवक्ष्यामि महातृप्तिकरम्परम् । कुहूसोमसमायोगे दत्तं श्राद्धमिहाक्षयम्
संवर्तकाले सम्प्राप्ते जलराशिर्जलान्यपि । क्षीयन्ते न क्षयत्यत्र श्राद्धं सोमकुहूकृतम्
अमासोमसमायोगेश्राद्धंयद्यत्रलभ्यते । तीर्थेकपिलधारेऽस्मिन् गययापुष्करेणकिम्
गदाधरभवान्यत्र यत्रत्वं च पितामह । वृषध्वजोऽस्म्यहं यत्र फल्गुस्तत्र न संशयः

दिव्यान्तरिक्षभौमानि यानि तीर्थानि सर्वतः ।
तान्यत्र निवसिष्यन्ति दर्शे सोमदिनान्विते ॥ ५६ ॥

कुरुक्षेत्रे नैमिषे च गङ्गासागरसङ्गमे । ग्रहणे श्राद्धतोयत्स्यात्तत्तीर्थे वार्षभध्वजे ॥

अस्य तीर्थस्य नामानि यानि दिव्यपितामहाः ।
तान्यहं कथयिष्यामि भवतां तृप्तिदान्यलम् ॥ ६१ ॥

मधुस्रवेति प्रथममेषा पुष्करिणी स्मृता । कृतकृत्याततो ज्ञेयाततोऽसौक्षीरनीरधिः
वृषभध्वजतीर्थञ्च तीर्थम्पैतामहं ततः । ततो गदाधराख्यञ्च पितृतीर्थं ततः परम्
ततः कापिलधारं वै सुधाखनिरियम्पुनः । ततः शिवगयाख्यञ्चज्ञेयं तीर्थमिदंशुभम्
एतानिदशनामानि तीर्थस्यास्यपितामहाः । भवतां तृप्तिकारीणिविनापिश्राद्धतर्पणैः
सूर्येन्दुसङ्गमेयेत्रपितृणांतृप्तिकामुकाः । ब्राह्मणान्भोजयिष्यन्तितेषांश्राद्धमनन्तकम्

श्राद्धे पितृणां सन्तृप्त्यै दास्यन्ति कपिलां शुभाम् ।
येऽत्र तेषां पितृगणो वसेत्क्षीरोदरोधसि ॥ ६७ ॥

वृषोत्सर्गःकृतोयैस्तु तीर्थेऽस्मिन्वार्षभध्वजे । अश्वमेधपुरोडाशैः पितरस्तेनतर्पिताः

गयातोऽष्टगुणम्पुण्यमस्मिंस्तीर्थे पितामहाः ।
अमायां सोमयुक्तायां श्राद्धैः कापिलधारिके ॥ ६६ ॥

येषांगर्भेऽभवत्स्रावो येऽदन्तजननामृताः । तेषां तृप्तिर्भवेन्नूनंतीर्थे कापिलधारिके
अदत्तमौञ्जीदाना ये ये चादारपरिग्रहाः । तेभ्यो निर्वापितं पिण्डमिहह्यक्षयतांव्रजेत्
अग्निदाहमृता ये वै नाग्निदाहश्च येषु वै । ते सर्वेतृप्तिमायान्ति तीर्थे कापिलधारिके
और्ध्वदैहिकहीना येषोडशश्राद्धवर्जिताः । ते तृप्तिमधिगच्छन्तिघृतकुल्यांनिवापतः
अपुत्राश्च मृता ये वैयेषां नास्त्युदकप्रदः । तेऽपितृप्तिंपरांयान्ति मधुस्रवसितर्पिताः
अपमृत्युमृता ये वै चोरविद्युज्जलादिभिः । तेषामिह कृतं श्राद्धंजायते सुगतिप्रदम्
आत्मघातेन निधनंयेषामिहविकर्मणाम् । तेऽपितृप्तिंलभन्तेत्रपिण्डैः शिवगयाकृतैः
पितृगोत्रे मृता येवै मातृपक्षेचये मृताः । तेषामत्र कृतः पिण्डो भवेदक्षयतृप्तिदः ॥
पत्नीवर्गेमृतायेवै मित्रवर्गे च ये मृताः । ते सर्वे तृप्तिमायान्तितर्पिता वार्षभध्वजे
ब्रह्मक्षत्त्रविशांवंशे शूद्रवंशेऽन्त्यजेषुच । येषां नाम गृहीत्वाऽत्रदीयते ते समुद्धृताः
तिर्यग्योनिमृतायेवैयेपिशाचत्वमागताः । तेप्यूर्ध्वगतिमायान्तितृप्ताःकापिलधारिके

येतुमानुषलोकेऽस्मिन् पितरोमर्त्ययोनयः। तेदिव्ययोनयःस्युर्वैमधुस्रवसितर्पिताः
येदिव्यलोके पितरःपुण्यैर्देवत्वमागताः। ते ब्रह्मलोके गच्छन्तितृप्तास्तीर्थे वृषध्वजे

कृते क्षीरमयं तीर्थं त्रेतायां मधुमत्पुनः।
द्वापरे सर्पिषा पूर्णं कलौ जलमयं भवेत् ॥ ८३ ॥

सीमाबहिर्गतमपि ज्ञेयं तीर्थमिदं शुभम्। मध्येवाराणसिश्रेष्ठंममसान्निध्यतो नरैः
काशीस्थितैर्यतोऽदर्शिध्वजोमेवृषलाञ्छनः। वृषध्वजेननाम्नातःस्थास्यत्रपितामहाः
पितामहेन सहितो गदाधरसमन्वितः । रविणा पार्षदैः सार्धन्तुष्टये वः पितामहः
इति यावद्वरं दत्तेपितृभ्यो वृषभध्वजः। तावन्नन्दी समागत्य प्रणम्येशं व्यजिज्ञपत्

नन्दिकेश्वर उवाच

विहितः स्यन्दनः सज्जस्ततोऽस्तु विजयोदयः।
अष्टौ कण्ठीरवा यत्र यत्रोक्ष्णामष्टकं शुभम् ॥ ८८ ॥

यत्रेभाःपरिभान्त्यष्टौयत्राष्टौजविनोहयाः। मनःसंयमनंयत्रकशापाणिव्यवस्थितम्
गङ्गा यमुनयोरीषे चक्रे पवनदेवता । सायंप्रातर्मये चक्रे छत्रं द्योर्मण्डलं शुचि ॥
तारावलीमयाःकीलाआहेया उपनायकाः। श्रुतयो मार्गदर्शिन्यः स्मृतयो रथगुप्तयः
दक्षिणाधूर्वूढा यत्र मखायत्राभिरक्षकाः। आसनं प्रणवो यत्र गायत्रीपादपीठभूः
साङ्गाव्याहृतयो यत्र शुभाः सोपानवीथिकाः। सूर्याचन्द्रमसौयत्र सततंद्वाररक्षकौ
अग्निर्मकरतुण्डश्च रथभूः कौमुदीमयी । ध्वजदण्डो महामेरुः पताकाहस्करप्रभा

स्वयं वाग्देवता यत्र चञ्चच्चामरधारिणी।

स्कन्द उवाच

शैलादिनेति विज्ञप्तो देवदेव उमापतिः ॥ ९५ ॥

कृतनीराजनविधिरष्टभिर्देवमातृभिः। पिनाकपाणिरुत्तस्थौदत्तहस्तोऽथ शार्ङ्गिणा
निनादो दिव्यवाद्यानां रोदसी पर्यपूरयत्। गीतमङ्गलगीर्भिश्च चारणैरनुवर्धितः॥
तेन दिव्यनिनादेन बधिरीकृतदिङ्मुखाः। आहूता इव आजग्मुर्विष्वग्भुवनवासिनः

देवाः कोट्यस्त्रयस्त्रिंशद्गणाः कोट्ययुतद्वयम्।

नवकोट्यस्तु चामुण्डा भैरव्यः कोटिसम्मिताः ॥ ९९ ॥

षडाननाः कुमाराश्च मयूरवरवाहनाः। ममानुगाः समायाताः कोट्योऽष्टौ महाबलाः
आययुःकोटयः सप्तस्फुरत्परशुपाणयः। पिचण्डिलामहावेगा विघ्नविघ्ना गजाननाः
षडशीतिसहस्राणि मुनयोब्रह्मवादिनः। तावन्तोऽपि समाजग्मुस्तत्राऽन्येगृहमेधिनः

नागानांकोटयस्तिस्रः पातालतलवासिनाम्।
दानवानाञ्च दैत्यानां द्वे द्वे कोटी शिवात्मनाम् ॥ १०३ ॥

गन्धर्वानियुतान्यष्टौ कोट्यर्धं यक्षरक्षसाम्। विद्याधराणामयुतं नियुतद्वयसंयुतम्

तथा षष्टिसहस्राणि दिव्याश्चाप्सरसः शुभाः।
गोमातरोऽष्टौ लक्षाणि सुपर्णान्ययुतानि षट् ॥ १०५ ॥

सागराः सप्तसम्प्राप्ता नानारत्नोपदप्रदाः। सरिताञ्चसहस्राणित्रीणि पञ्चायुतानि च

गिरयोऽष्टौसहस्राणि वनस्पतिशतत्रयम्।
आजग्मुर्दिग्गजाअष्टौ यत्र देवः पिनाकधृक् ॥ १०७ ॥

एतैःसमेतः सन्तुष्टः परिष्टुत इतस्ततः। श्रीकण्ठोरथमारुह्यकाशीं प्राविशदुत्तमाम्

स गिरीन्द्रसुतस्त्र्यक्षो मुदां धाममुधाङ्कनिः।
काशीं प्रैक्षिष्ट संहृष्टस्त्रिविष्टपसमुत्कटाम् ॥ १०९ ॥

स्कन्द उवाच

श्रुत्वाऽऽख्यानमिदम्पुण्यं कोटिजन्माघनाशनम्।
पठित्वा पाठयित्वा च शिवसायुज्यमाप्नुयात् ॥ ११० ॥

श्राद्धकाले विशेषेण पठनीयम्प्रयत्नतः । अक्षयन्तद्भवेच्छ्राद्धं पितृतुष्टिकरम्परम् ॥
वृषभध्वजमाहात्म्यं पठित्वाशिवसन्निधौ। प्रत्यहं वर्षमात्रं तु ह्यपुत्रः पुत्रवान्भवेत्

विश्वेशितुः सम्प्रवेशो यः काश्यां समुदाहृतः।
परमानन्दकन्दस्य बीजमेतत्सुनिश्चितम् ॥ ११३ ॥

पठित्वैतन्मुदाख्यानम्प्रविशेद्यो नवं गृहम्। ससर्वसौख्यनिलयो भवेदेव न संशयः
त्रैलोक्यानन्दजनकमेतदाख्यानमुत्तमम्। अस्य श्रवणमात्रेण विश्वेशःसम्प्रसीदति

अलभ्यलाभोदेवस्यजातोऽत्रहियतःपरः । ततः काशीप्रवेशाख्यंजप्यमाख्यानमुत्तमम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे
वृषभध्वजप्रादुर्भावोनामद्विषष्टितमोऽध्यायः ॥ ६२ ॥

——:*:——

त्रिषष्टितमोऽध्यायः

ज्येष्ठेशाख्यानवर्णनम्

अगस्त्य उवाच

दृष्ट्वा काशींदृगानन्दां तारकारे पुरारिणा । किमकारि समाचक्ष्व प्राप्ताम्बहुमनोरथैः

स्कन्द उवाच

पतिव्रतापतेऽगस्त्य! शृणु वक्ष्याम्यशेषतः ।
मृगाङ्कलक्ष्मणोत्कण्ठं काशीनेत्रातिथीकृता ॥ २ ॥

अथ सर्वज्ञनाथेन भक्तवत्सलचेतसा । जैगीषव्यो मुनिश्रेष्ठोगुहान्तस्थो निरीक्षितः
यमनेहसमारभ्य मन्दराद्रिं विनिर्ययौ । अद्रीन्द्रसुतया सार्धं रुद्रेणोक्षेन्द्रगामिना
तंवासरम्पुरस्कृत्य जग्राहनियमं दृढम् । जैगीषव्यो महामेधाः कुम्भयोने महाकृती
विषमेक्षणपादाब्जं समीक्षिष्येयदा पुनः । तदाम्बुविप्रुषमपि भक्षयिष्यामि चेत्यहो
कुतश्चिद्धारणायोगादथवाशम्भ्वनुग्रहात् । अनश्नन्नपिबन्योगीजैगीषव्यःस्थितोमुने
तंशम्भुरेव जानाति नान्योजानातिकश्चन । अत एव ततः प्राप्तः प्रथमम्प्रमथाधिपः
ज्येष्ठशुक्लचतुर्दश्यां सोमवारानुराधयोः । तत्पर्वणि महायात्रा कर्तव्या तत्र मानवैः

ज्येष्ठस्थानं ततः काश्यां तदाऽभूदपिपुण्यदम् ।
तत्र लिङ्गं समभवत्स्वयं ज्येष्ठेश्वराभिधम् ॥ १० ॥

तल्लिङ्गदर्शनात्पुंसां पापंजन्मशतार्जितम् । तमोऽर्कोदयमाप्येव तत्क्षणादेव नश्यति

ज्येष्ठवाप्यांनरः स्नात्वा तर्पयित्वा पितामहान् ।
ज्येष्ठेश्वरं समालोक्य न भूयो जायते भुवि ॥ १२ ॥

आविरासीत्स्वयं तत्र ज्येष्ठेश्वरसमीपतः । सर्वसिद्धिप्रदागौरीज्येष्ठाश्रेष्ठासमन्ततः
ज्येष्ठेमासिसिताष्टम्यांतत्र कार्यामहोत्सवः । रात्रौजागरणं कार्यं सर्वसम्पत्समृद्धये

ज्येष्ठां गौरीं नमस्कृत्य ज्येष्ठवापीपरिप्लुता ।
सौभाग्यभाजनम्भूयाद्योषा सौभाग्यभागपि ॥ १५ ॥
निवासं कृतवाञ्छम्भुस्तस्मिन् स्थाने यतः स्वयम् ।
निवासेश इति ख्यातं लिङ्गं तत्र परन्ततः ॥ १६ ॥

निवासेश्वरलिङ्गस्य सेवनात्सर्वसम्पदः । निवसन्ति गृहे नित्यंनित्यं प्रतिपदम्पुनः
कृत्वाश्राद्धं विधानेन ज्यष्ठस्थानेनरोत्तमः । ज्येष्ठांतृप्तिंददात्येव पितृभ्योमधुसर्पिषा

ज्येष्ठतीर्थे नरः काश्यां दत्त्वा दानानि शक्तितः ।
ज्येष्ठान्स्वर्गानवाप्नोति नरो मोक्षञ्च गच्छति ॥ १९ ॥
ज्येष्ठेश्वरोऽर्च्यः प्रथमं काश्यां श्रेयोऽर्थिभिर्नरैः ।
ज्येष्ठा गौरी ततोऽभ्यर्च्या सर्वज्येष्ठमभीप्सुभिः ॥ २० ॥

अथनन्दिनमाहूय धूर्जटिःसकृपानिधिः । शृण्वतांसर्वदेवानामिदं वचनमब्रवीत् ॥

ईश्वर उवाच

शैलादेप्रविशाऽऽशुत्वंगुहास्त्यत्र मनोहरा । तदन्तरेऽस्तिमेभक्तोजैगीषव्यस्तपोधनः
महानियमवान्नन्दिंस्त्वगस्थिस्नायुशेषितः । तमिहानय मद्भक्तंमद्दर्शनदृढव्रतम् ॥
यदाप्रभृत्यगांकाश्यामन्दरं सर्वसुन्दरम् । महानियमवानेष तदारभ्योज्झिताशनः
गृहाणलीलाकमलमिदम्पीयूषपोषणम् । अनेन तस्य गात्राणि स्पृशसद्यःसुबृंहिणा

ततो नन्दी समादाय तल्लीलाकमलं विभोः ।
प्रणम्य देवदेवेशमाविशद्गह्वरां गुहाम् ॥ २६ ॥

नन्दीदृष्ट्वाऽथ तं तत्र धारणादृढमानसम् । तपोग्निपरिशुष्काङ्गं कमलेन समस्पृशत्
तपान्ते वृष्टिसंयोगाच्छालूर इव कोटरे । उल्ललाससयोगीन्द्रःस्पर्शमात्रात्तदब्जजात्

अथ नन्दीसमादाय सत्वरंमुनिपुङ्गवम् । देवदेवस्य पादाग्रे नमस्कृत्य न्यपातयत्
जैगीषव्योऽथसम्भ्रान्तः पुरतो वीक्ष्यशङ्करम् । वामाङ्गसन्निविष्टाद्रितनयम्प्रणनामह
प्रणम्य दण्डवद्भूमौपरिलुठ्यसमन्ततः । तुष्टाव परया भक्त्या समुनिश्चन्द्रशेखरम्

जैगीषव्य उवाच

नमः शिवाय शान्ताय सर्वज्ञाय शुभात्मने । जगदानन्दकन्दाय परमानन्दहेतवे ॥
अरूपाय सरूपाय नानारूपधरायच । विरूपाक्षाय विधये विधिविष्णुस्तुताय च ।
स्थावराय नमस्तुभ्यंजङ्गमाय नमोऽस्तुते । सर्वात्मने नमस्तुभ्यन्नमस्तेपरमात्मने
नमस्त्रैलोक्यकाम्याय कामाङ्गदहनाय च । नमोशेषविशेषाय नमः शेषाङ्गदाय ते ॥
श्रीकण्ठाय नमस्तुभ्यं विषकण्ठाय ते नमः ।
वैकुण्ठवन्द्य पादाय नमोऽकुण्ठितशक्तये ॥ ३६ ॥
नमः शक्त्यर्धदेहाय विदेहाय सुदेहिने । सकृत्प्रणाममात्रेण देहिदेहनिवारिणे ॥
कालाय कालकालाय कालकूटविषादिने । व्यालयज्ञोपवीताय व्यालभूषणधारिणे
नमस्ते खण्डपरशो नमः खण्डेन्दुधारिणे । खण्डिताशेषदुःखायखड्गखेटकधारिणे
गीर्वाणगीतनाथाय गङ्गाकल्लोलमालिने । गौरीशाय गिरीशाय गिरिशाय गुहारणे
चन्द्रार्धशुद्धभूषाय चन्द्रसूर्याग्निचक्षुषे । नमस्ते चर्मवसन ! नमो दिग्वसनाय ते ॥
जगदीशाय जीर्णाय जराजन्महरायते । जीवाय ते नमस्तुभ्यञ्जपूकादिहारिणे ॥
नमोडमरुहस्ताय धनुर्हस्ताय ते नमः । त्रिनेत्राय नमस्तुभ्यं जगन्नेत्राय ते नमः
त्रिशूलव्यग्रहस्ताय नमस्त्रिपथगाधर । त्रिविष्टपाधिनाथाय त्रिवेदीपठिताय च ॥
त्रयीमयाय तुष्टाय भक्ततुष्टिप्रदायच । दीक्षिताय नमस्तुभ्यं देवदेवाय ते नमः
दारिताशेषपापाय नमस्ते दीर्घदर्शिने । दूराय दुरवाप्याय दोषनिर्दलनाय च ॥
दोषाकरकलाधार त्यक्तदोषागमायच । नमो धूर्जटये तुभ्यं धत्तूरकुसुमप्रिय !॥
नमो धीराय धर्माय धर्मपालाय ते नमः । नीलग्रीव! नमस्तुभ्यंनमस्ते नीललोहित
नाममात्रस्मृतिकृतान्त्रैलोक्यैश्वर्यपूरक । नमः प्रमथनाथाय पिनाकोद्यतपाणये ॥
पशुपाशविमोक्षाय पशूनाम्पतये नमः । नामोच्चारणमात्रेण महापातकहारिणे ॥

परात्पराय पाराय परापरपराय च । नमोऽपारचरित्राय सुपवित्रकथाय च ॥
वामदेवाय वामार्धधारिणे वृषगामिने । नमो भर्गाय भीमाय नतभीतिहराय च ॥
भवाय भवनाशाय भूतानाम्पतये नमः । महादेव! नमस्तुभ्यम्महेश महसाम्पते ॥
नमो मृडानीपतये नमो मृत्युञ्जयाय ते । यज्ञारये नमस्तुभ्यं यक्षराजप्रियाय च॥
यायजूकाय यज्ञाय यज्ञानाम्फलदायिने । रुद्राय रुद्रपतये कद्रुद्राय रमाय च ॥ ५५॥
शूलिने शाश्वतेशाय श्मशानावनिचारिणे । शिवाप्रियाय सर्वाय सर्वज्ञाय नमोस्तुते
हराय क्षान्तिरूपाय क्षेत्रज्ञाय क्षमाकर !। क्षमाय क्षितिहर्त्रे च क्षीरगौराय ते नमः
अन्धकारे नमस्तुभ्यमाद्यन्तरहिताय च । इडाधाराय ईशाय उपेन्द्रेन्द्रस्तुतायच ॥
उमाकान्ताय उग्राय नमस्ते ऊर्ध्वरेतसे । एकरूपाय चैकाय महदैश्वर्यरूपिणे ॥
अनन्तकारिणे तुभ्यमम्बिकापतयेनमः । त्वमोङ्कारोवषट्कारोभूर्भुवःस्वस्त्वमेवहि
दृश्यादृश्यं यदत्रास्ति तत्सर्वं त्वमुमाधव !।
स्तुतिकर्तुं न जानामि स्तुतिकर्ता त्वमेव हि ॥ ६१ ॥
वाच्यस्त्वं वाचकस्त्वं हि वाक्च त्वं प्रणतोऽस्मि ते ।
नाऽन्यं वेद्मि महादेव! नान्यं स्तौमि महेश्वर !॥ ६२ ॥
नान्यं नमामिगौरीशनान्याख्यामाददेशिव । मूकोन्यनामग्रहणेबधिरोऽन्यकथाश्रुतौ
पङ्गुरन्याभिगमनेऽस्म्यन्धोऽन्यपरिवीक्षणे । एक एव भवानीश एकः कर्तात्वमेवहि
पाता हर्ता त्वमेवैको नानात्वं मूढकल्पना । अतस्त्वमेव शरणं भूयो भूयः पुनःपुनः
संसारसागरे मग्नं मामुद्धर महेश्वर !। इति स्तुत्वा महेशानं जैगीषव्यो महामुनिः
वाचंयमोऽभवत्स्थाणोः पुरतः स्थाणुसन्निभः ।
इति स्तुतिं समाकर्ण्य मुनेश्चन्द्रविभूषणः ।
उवाच च प्रसन्नात्मा वरं ब्रूहीति तं मुनिम् ॥ ६७ ॥

जैगीषव्य उवाच

यदि प्रसन्नो देवेश! ततस्तव पदाम्बुजात् । माभवानि! भवानीश दूरं दूरपदप्रद !॥
अपरश्च वरो नाथ! देयोऽयमविचारतः । यन्मयास्थापितंलिङ्गं तत्रसान्निध्यमस्तुते

ईश्वर उवाच

जैगीषव्यमहाभाग यदुक्तं भवताऽनघ !। तदस्तु सर्वं तेऽभीष्टं वरमन्यं ददामि च ॥

योगशास्त्रं मया दत्तं तव निर्वाणसाधकम् ।

सर्वेषां योगिनां मध्ये योगाचार्योऽस्तु वै भवान् ॥ ७१ ॥

रहस्यं योगविद्याया यथावत्त्वंतपोधन । संवेत्स्यसेप्रसादान्मेयेननिर्वाणमाप्स्यसि

यथा नन्दी यथा भृङ्गी सोमनन्दी यथा तथा ।

त्वं भविष्यसि भक्तो मे जरामरणवर्जितः ॥ ७३ ॥

सन्ति व्रतानि भूयांसि नियमाः सन्त्यनेकधा ।

तपांसि नाना सन्त्यत्र सन्ति दानान्यनेकशः ॥ ७४ ॥

श्रेयसां साधनान्यत्र पापघ्नान्यपि सर्वथा । परं हि परमश्चैष नियमो यस्त्वयाकृतः

परोहिनियमश्चैष मां विलोक्य यदश्यते । मामनालोक्य यद्भुक्तं तद्भुक्तं केवलं त्वघम्

असमर्च्य च योभुङ्क्ते पत्रपुष्पफलैरपि । रेतोभक्षीभवेन्मूढःसजन्मान्येकविंशतिम्

महतो नियमस्याऽस्य भवताऽनुष्ठितस्य वै ।

नार्हन्ति षोडशीं मात्रामप्यन्ये नियमायमाः ॥ ७८ ॥

अतो मच्चरणाभ्याशे त्वं निवत्स्यसि सर्वथा ।

अतो नैःश्रेयसीं लक्ष्मीं तत्रैव प्राप्स्यसि ध्रुवम् ॥ ७६ ॥

जैगीषव्येश्वरंनामलिङ्गंकाश्यां सुदुर्लभम् । त्रीणि वर्षाणि संसेव्यलभेद्योगंनसंशयः

जैगीषव्यगुहां प्राप्य योगाभ्यसनतत्परः ।

षण्मासेन लभेत्सिद्धिं वाञ्छितां मदनुग्रहात् ॥ ८१ ॥

तव लिङ्गमिदं भक्तैः पूजनीयंप्रयत्नतः । विलोक्याचगुहारम्यापरांसिद्धिमभीप्सुभिः

अत्र ज्येष्ठेश्वरक्षेत्रे त्वल्लिङ्गं सर्वसिद्धिदम् ।

नाशयेदघसङ्घानि दृष्टं स्पृष्टं समर्चितम् ॥ ८३ ॥

अस्मिञ्ज्येष्ठेश्वरक्षेत्रे सम्भोज्य शिवयोगिनः ।

कोटिभोज्यफलंसम्यगेकैकपरिसङ्ख्यया ॥ ८४ ॥

जैगीषव्येश्वरंलिङ्गं गोपनीयं प्रयत्नतः । कलौ कलुषबुद्धीनां पुरतश्च विशेषतः ॥

करिष्याम्यत्र सान्निध्यमस्मिलिङ्गे तपोधन !।

योगसिद्धिप्रदानाय साधकेभ्यः सदैवहि ॥ ८६ ॥

ददे शृणु महाभाग! जैगीषव्याऽपरं वरम्। त्वयेदं यत्कृतंस्तोत्रंयोगसिद्धिकरंपरम्

महापापौघशमनं महापुण्यप्रवर्धनम् । महाभीतिप्रशमनं महाभक्तिविवर्धनम् ॥

एतत्स्तोत्रजपात्पुंसामसाध्यंनैवकिञ्चन । तस्मात्सर्वप्रयत्नेन जपनीयं सुसाधकैः

इति दत्त्वा वरं तस्मैस्मरारिःस्मेरलोचनः । ददर्शब्राह्मणांस्तत्रसमेतान्क्षेत्रवासिनः

स्कन्द उवाच

निशम्याख्यानमतुलमेतत्प्राज्ञः प्रयत्नतः । निष्पापो जायते मर्त्यो नोपसर्गैःप्रबाध्यते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे ज्येष्ठेशाख्यानं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः

क्षेत्ररहस्यकथनम्

अगस्त्य उवाच

दृष्ट्वा भूदेवताः शम्भुःकिमाचक्षेषडानन !। कानिकानिचलिङ्गानि तत्रतान्यपिचक्ष्वमे

ज्येष्ठस्थाने महापुण्ये देवदेवस्य वल्लभे । आश्चर्यं किमभूत्तत्र तदाचक्ष्वषडानन !॥

स्कन्द उवाच

शृण्वगस्त्ययथापृच्छिभवतातद्ब्रवीम्यहम् । मन्दराद्रियदादेवोगतवान्ब्रह्मगौरवात्

तदा निराश्रया विप्राः क्षेत्रसंन्यासिनोऽनघाः । उपाकृताश्चाविरतंमहाक्षेत्रप्रतिग्रहात्

खातं खातं च दण्डाग्रैर्भूमि कन्दादिवृत्तयः ।

चक्रुः पुष्करिणीं रम्यां दण्डखाताभिधां मुने !॥ ५ ॥

तत्तीर्थंपरितः स्थाप्य महालिङ्गान्यनेकशः । महेशाराधनपरास्तपश्चक्रुः प्रयत्नतः
विभूतिधारिणोनित्यं नित्यं रुद्राक्षधारिणः । लिङ्गपूजारतानित्यंशतरुद्रियजापिनः
ते श्रुत्वा देवदेवस्य पुनरागमनं मुने। तपः कृशाअतितरा मासुरानन्दमेदुराः ॥
द्विजाः पञ्चसहस्राणि चरन्तो विपुलंतपः । दण्डखातान्महातीर्थादाजग्मुर्देवदर्शने

तीर्थान्मन्दाकिनीनाम्नो द्विजाः पाशुपतव्रताः ।
शिवैकाराधनपराः समेता अयुतोन्मिताः ॥ १० ॥

हंसतीर्थात्परिप्राप्ता अयुतं त्रिशतोत्तरम् । शतंदुर्वाससस्तीर्थादेकादशशताधिकम्
मत्स्योदर्याः परापेतुः सहस्राणिषडेवहि । कपालमोचनात्सप्तशतान्यभ्यागताद्विजाः
ऋणमोचनतस्तीर्थात्सहस्रं द्विशताधिकम् । वैतरण्याअपिमुनेद्विजानामयुतार्धकम्
ततः पृथूदकात्कुण्डात्पृथुना परिखानितात् । अयासिषुर्द्विजानांचशतान्येव त्रयोदश

तथैवाप्सरसः कुण्डान्मेनकाख्याच्छतद्वयम् ।
उर्वशीकुण्डतः प्राप्तः सहस्रं द्विशताधिकम् ॥ १५ ॥

तथैरावतकुण्डाच्च ब्राह्मणास्त्रिशतानि च । गन्धर्वाप्सरसः सप्तशतानिद्विशतानिच
वृषेशतीर्थादाजग्मुर्नवतिः सशतत्रया । यक्षिणीकुण्डतः प्राप्तः सहस्रंत्रिशतोत्तरम्
लक्ष्मीतीर्थात्परंजग्मुःषोडशैवशतानिच । पिशाचमोचनात्सप्तसहस्राणिद्विजोत्तमाः
पितृकुण्डाच्छतंसाग्रं ध्रुवतीर्थाच्छतानिषट् । मानसाख्याच्चसरसोद्विशतीसशतत्रया
ब्राह्मणा वासुकिह्रदात्सहस्राणिदशैवतु । तथैवाष्टशतंद्रष्टुं जानकीकुण्डतोद्विजाः
काशीनाथमनुप्राप्तः परमानन्ददायिनम् । तथागौतमकुण्डाच्च शतानि न वचागताः
तीर्थाद्दुर्गतिसंहर्तुर्ब्राह्मणाः प्रतिपेदिरे । एकादशशतान्येव द्रष्टुंदेवमुमापतिम् ॥
असीसम्भेदमारभ्यगङ्गातीरस्थिताद्विजाः । आसङ्गमेश्वरात्तत्रपरिप्राप्तावटोद्भव ॥
अष्टादशसहस्राणि तथा पञ्चशतान्यपि । ब्राह्मणाः पञ्चपञ्चाशद्गङ्गातीरात्समागताः
सार्द्रदूर्वाक्षतकरैः सपुष्पफलपाणिभिः । सुगन्धमाल्यहस्तैश्च ब्राह्मणैर्जयवादिभिः
स्तुतोमङ्गलसूक्तैश्च प्रणतश्च पुनः पुनः । तेभ्योदत्ताभयः शम्भुः पप्रच्छकुशलम्मुदा

ततस्ते ब्राह्मणाः प्रोचुः प्रबद्धकरसम्पुटाः । क्षेत्रेनिवसतां नाथ सदा नःकुशलोदयः
विशेषतः कृतोऽस्माभिः साक्षान्नयनगोचरः । त्वंयत्स्वरूपंश्रुतयोन विदुःपरमार्थतः

सदैवाऽकुशलं तेषां ये त्वत्क्षेत्रपराङ्मुखाः ।
चतुर्दशापि वै लोकास्तेषां नित्यम्पराङ्मुखाः ॥ २६ ॥

येषां हृदिसदैवास्ते काशीत्वाशीविषाङ्गद । संसाराशीविषविषंनतेषांप्रभवेत्कचित्
गर्भरक्षामणिर्मन्त्रःकाशीवर्णद्वयात्मकः । यस्यकण्ठे सदातिष्ठेत्तस्याकुशलता कुतः
सुधांपिबतियो नित्यंकाशीवर्णद्वयात्मिकाम् । सनैर्जरींदशांहित्वासुधैवपरिजायते
श्रुतंकर्णामृतं येन काशात्यक्षरयुग्मकम् । न समाकर्णयत्येव स पुनर्गर्भजांकथाम् ॥
काशीरजोऽपियन्मूर्ध्निपतेदप्यनिलाहतम् । चन्द्रशेखरतन्मूर्धा भवेच्चन्द्रकलाङ्कितः
प्रसङ्गतोऽपियन्नेत्रपथमानन्दकाननम् । यातं तेऽत्रनजायन्ते नेक्षेरन् पितृकाननम् ॥
गच्छता तिष्ठतावापि स्वपता जाग्रताथवा । काशीत्येषमहामन्त्रोयेन जप्तःसनिर्भयः
येन बीजाक्षरयुगंकाशीति हृदि धारितम् । अबीजानिभवन्त्येव कर्मबीजानितस्यवै

काशीकाशीतिकाशीति जपतो यस्य संस्थितिः ।
अन्यत्रापि सतस्तस्य पुरो मुक्तिः प्रकाशते ॥ ३८ ॥

क्षेममूर्त्तिरियंकाशी क्षेममूर्त्तिर्भवान्भव । क्षेममूर्त्तिस्त्रिपथगा नान्यत्क्षेमत्रयं क्वचित्
ब्राह्मणानामितिवचःक्षेत्रभक्तिविबृंहितम् । निशम्यगिरिजाकान्तस्तुतोषनितरांहरः
प्रोवाच च प्रसन्नात्माधन्या यूयं द्विजर्षभाः । येषामिहेदृशीभक्तिर्ममक्षेत्रेऽतिपावने ॥

जाने सत्त्वमया जाताः क्षेत्रस्याऽस्य निषेवणात् ।
नीरजस्का वितमसः संसारार्णवपारगाः ॥ ४२ ॥
वाराणस्यास्तु ये भक्तास्ते भक्ता मम निश्चितम् ।
जीवन्मुक्ता हि ते नूनं मोक्षलक्ष्म्या कटाक्षिताः ॥ ४३ ॥

यैश्चकाशीस्थितोजन्तुरल्पकोपिविरोधितः । तैर्वैविश्वम्भरासर्वामयासहविरोधिता

वाराणस्याः स्तुतिमपि यो निशम्याऽनुमोदते ।
अपि ब्रह्माण्डमखिलं ध्रुवं तेनानुमोदितम् ॥ ४५ ॥

निवसन्तिहियेमर्त्याअस्मिन्नानन्दकानने। ममान्तःकरणे ते वै निवसेयुरकल्मषाः॥
निवसन्ति ममक्षेत्रे ममभक्तिं प्रकुर्वते । मम लिङ्गधरा ये तु तानेवोपदिशाम्यहम्
निवसन्ति मम क्षेत्रे मम भक्तिं न कुर्वते। मम लिङ्गधरा ये नो नतानुपदिशाम्यहम्
काशीनिर्वाणनगरीयेषां चित्तेप्रकाशते। तेमत्पुरः प्रकाशन्तेनैःश्रेयस्याश्रियावृताः

मोक्षलक्ष्मीरियं काशी नयेभ्यः परिरोचते।
स्वर्लक्ष्मीं काङ्क्षमाणेभ्यः पतितास्ते न संशयः॥ ५०॥

काशीं सङ्काङ्क्षमाणानां पुरुषार्थचतुष्टयम् । पुरः किङ्करवत्तिष्ठेन्ममानुग्रहतोद्विजाः
आनन्दकाननेह्यत्रज्वलद्दावानलोऽस्म्यहम्। कर्मबीजानि जन्तूनां ज्वालयेन प्ररोहये
वस्तव्यं सततंकाश्यांयष्टव्योऽहंप्रयत्नतः। जेतव्यौकलिकालौचरन्तव्यामुक्तिरङ्गना
प्राप्यापिकाशींदुर्बुद्धिर्योनमांपरिसेवते। तस्यहस्तगताप्याशुकैवल्यश्रीःप्रणश्यति
धन्यामद्भक्तिलक्ष्माणोब्राह्मणाःकाशिवासिनः। यूयंयच्चेतसोवृत्तेर्नदूरेऽहंन काशिका
दातव्यो वोवरःकोऽत्रव्रियतां मे यथारुचि। प्रेयांसोमेयतोयूयंक्षेत्रसंन्यासकारिणः
इति पीत्वा महेशानमुखक्षीराब्धिजांसुधाम्। परितृप्ताद्विजाःसर्वे वव्रुर्वरमनुत्तमम्

ब्राह्मणाऊचुः

उमापते! महेशान! सर्वज्ञ! वर एष नः। काशी कदापिनत्याज्या भवता भवतापहृत्

वचनाद् ब्राह्मणानां तु शापो माप्रभवत्विह।
कदाचिदपि केषाञ्चित्काश्यां मोक्षान्तरायकः॥ ५६॥

तवपादाम्बुजद्वन्द्वे निर्द्वन्द्वाभक्तिरस्तुनः। आकलेवरपातञ्चकाशीवासोऽस्तुनोनिशम्
किमन्येन वरेणेशदेय एष वरो हि नः। अवधे ह्यन्धकध्वंसिन्वरमन्यं वृणीमहे॥

तव प्रतिनिधीकृत्याऽस्माभिस्त्वद्भक्तिभावितैः।
प्रतिष्ठितेषु लिङ्गेषु सान्निध्यं भवतोऽस्त्विह॥ ६२॥
श्रुत्वेति तेषां वाक्यानि तथाऽस्त्विति पिनाकिना।
प्रोचेऽन्योऽपि वरो दत्तो ज्ञानं वश्च भविष्यति॥ ६३॥

पुनः प्रोवाच देवेशोनिशामयत भोद्विजाः। हितं वः कथयाम्यत्र तदनुष्ठीयतांध्रुवम्

सेव्योत्तरवहानित्यं लिङ्गमर्च्यं प्रयत्नतः। दमोदानंदयानित्यंकर्तव्यं मुक्तिकाङ्क्षिभिः
इदमेवरहस्यंच कथितं क्षेत्रवासिनाम्। मतिःपरहिता कार्या वाच्यं नोद्वेगकृद्वचः
मनसापि न कर्तव्यमेनोऽत्रविजिगीषुणा । अत्रत्यमक्षयं यस्मात्सुकृतं सुकृतेतरम्
अन्यत्र यत्कृतं पातं तत्काश्यांपरिणश्यति। वाराणस्यांकृतंपापमन्तर्गेहेप्रणश्यति
अन्तर्गेहे कृतं पापं पैशाच्यनरकावहम् । पिशाचनरकप्राप्तिर्गच्छत्येव बहिर्यदि॥
न कल्पकोटिभिः काश्यांकृतंकर्मप्रमृज्यते। किन्तुरुद्रपिशाचत्वंजायतेऽत्रायुतत्रयम्

वाराणस्यां स्थितो यो वै पातकेषु रतःसदा।
योनिं प्राप्यापि पैशाचीं वर्षाणामयुतत्रयम्॥ ७१॥

पुनरत्रैवनिवसञ्ज्ञानं प्राप्स्यत्यनुत्तमम्। तेनज्ञानेन सम्प्रान्तेमोक्षमाप्स्यत्यनुत्तमम्
दुष्कृतानिविधायेह बहिःपञ्चत्वमागताः। तेषांगतिं प्रवक्ष्यामिश्रृणुत द्विजसत्तमाः

यामाख्या मे गणाः सन्ति घोरा विकृतमूर्तयः।
मूषायान्ते धमन्त्यादौ क्षेत्रदुष्कृतकारिणः॥ ७४॥

नयन्त्यनूपप्रायाञ्चततः प्राचीं दुरासदाम्। वर्षाकालेदुराचारान् पातयन्ति महाजले
जलौकाभिः सपक्षाभिर्दन्दशूकैर्जलोद्भवैः। दुर्निवारैश्च मशकैर्दश्यन्ते ते दिवानिशम्
ततोयामैर्हिमर्तौते नीयन्तेऽद्रौहिमालये। अशनावरणैर्हीनाःक्लेश्यन्तेते दिवानिशम्
मरुस्थले ततोग्रीष्मेवारिवृक्षविवर्जिते। दिवाकरकरैस्तीव्रैस्ताप्यन्तेतेपिपासिताः

क्लेशितास्ते गणैरुग्रैर्यातनाभिः समन्ततः।
इत्थंकालमसङ्ख्यातमानीयन्ते ततस्त्विह॥ ७६॥

निवेदयन्तितेयामाःकालराजान्तिकेततः। कालराजोपितान्दृष्ट्वाकर्मसंस्मार्यदुष्कृतम्
विवस्त्रान् क्षुत्तृषार्तांश्च लग्नपृष्ठोदरत्वचः । अन्यैरुद्रपिशाचैश्च सहसंयोजयत्यपि
ततो रुद्रपिशाचास्तेभैरवानुचराः सदा। सहन्ते क्लममत्यर्थंक्षुत्तृष्णोग्रत्वसम्भवम्
आहारंरुधिरोन्मिश्रंते लभन्ते कदाचन। एवंत्र्ययुतसङ्ख्याकंकालंतत्रातिदुःखिताः

श्मशानस्तम्भमभितो नीयन्ते कण्ठपाशिताः।
पिपासिता अपि न तेऽम्बुस्पर्शमपि चाप्नुयुः॥ ८४॥

अथ संक्षीणपापास्ते कालभैरवदर्शनात् ।
इहैव देहिनो भूत्वा मुच्यन्ते ते ममाऽऽज्ञया ॥ ८५ ॥
तस्मान्नकामयेताऽत्रवाङ्मनःकर्मणाप्यघम् । शुचौपथिसदास्थेयंमहालाभमभीप्सुभिः
नाविमुक्ते मृतः कश्चिन्नरकं यातिकिल्बिषी । ममानुग्रहमासाद्यगच्छत्येवपरांगतिम्
अनाशनं यः कुरुते मद्भक्तइह सुव्रतः । न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥
अशाश्वतमिदं ज्ञात्वामानुष्यं बहुकिल्बिषम् । अविमुक्तंसदासेव्यंसंसारभयमोचकम्
नाऽन्यत्पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् ।
सर्वपापप्रशमनीं प्रायश्चित्तं कलौ युगे ॥ ९० ॥
जन्मान्तरसहस्रेषु यत्पापं समुपार्जितम् । अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजतिक्षयम्
जन्मान्तरसहस्रेषु युञ्जन्योगी यदाप्नुयात् । तदिहैव परो मोक्षो मरणादधिगम्यते
तीर्यग्योनिगताः सत्त्वा ये विमुक्तकृतालयाः ।
कालेन निधनं प्राप्तास्तेऽपि यान्ति परांगतिम् ॥ ९३ ॥
अविमुक्तं न सेवन्ते ये मूढास्तमसावृताः । विण्मूत्ररेतसांमध्ये ते वसन्तिपुनः पुनः
अविमुक्तं समासाद्य यो लिङ्गं स्थापयेत्सुधीः ।
कल्पकोटिशतैर्वाऽपि नास्ति तस्य पुनर्भवः ॥ ९५ ॥
ग्रहनक्षत्रताराणां कालेन पतनं ध्रुवम् । अविमुक्ते मृतानां तु पतनं नैव विद्यते ॥
ब्रह्महत्यांनरःकृत्वापश्चात्संयतमानसः । प्राणांस्त्यजतियःकाश्यांसमुक्तोनात्रसंशयः
स्त्रियः पतिव्रता याश्च मम भक्तिसमाहिताः ।
अविमुक्ते मृता विप्रा! यान्ति ताः परमां गतिम् ॥ ९८ ॥
अत्रोत्क्रमणकालेऽहंस्वयमेव द्विजोत्तमाः!। दिशामितारकंब्रह्मदेहीस्याद्येन तन्मयः
मन्मना ममभक्तश्च मयिसर्वार्पितक्रियः । यथामोक्षमिहाप्नोतिन तथान्यत्रकुत्रचित्
मरणंनिश्चितं ज्ञात्वागतिंचासुखरूपिणीम् । चलमागन्तुकंसर्वंततःकाशींसमाश्रयेत्
काशीसमाश्रिता यैस्तु मनोवाक्कायकर्मभिः ।
तानत्र निर्मलधियो निर्वाणश्रीः समाश्रयेत् ॥ १०२ ॥

काशीस्थितैकमपियः प्रीणयेन्न्यायजैर्धनैः । तेन त्रैलोक्यमखिलंप्रीणितंतु मयासह
यः प्रीणयति पुण्यात्मा निर्वाणनगरी नरम् ।
पुमर्थेन स्थितेर्नित्यं ब्राह्मणाः प्रीणयामि तम् ॥ १०४ ॥
दिवोदासोऽपि राजर्षिः काशींधर्मेण पालयन् । सदेहोमत्पदंप्राप्तोयतोनपुनरागतिः
अत्र योगस्तथा ज्ञानं मुक्तिरेकेनजन्मना । अतोऽविमुक्तमासाद्यनान्यद्गच्छेत्तपोवनम्
मोक्षं सुदुर्लभं ज्ञात्वा संसारंचातिभीषणम् । अश्मनाचरणौहत्वाकालमत्रप्रतीक्षयेत्
अविमुक्तं परित्यज्य यदा यास्यन्ति दुर्धियः ।
हसिष्यन्ति तदा भूतान्यन्योन्यकरताडनैः ॥ १०८ ॥
प्राप्य वाराणसीं पुण्यां सिद्धिक्षेत्रमनुत्तमम् ।
परिनिष्क्रान्तुमन्यत्र कस्य जन्तोर्मतिर्भवेत् ॥ १०९ ॥
महादानेन चान्यत्र यत्फलंलभ्यते नरैः । अविमुक्तेतु काकिण्यां दत्तायां तदवाप्यते
एकंसमर्चयेल्लिङ्गं तपस्तप्येतचापरः । तयोर्मध्येतु स श्रेष्ठो यो लिङ्गं पूजयेदिह ॥
तीर्थान्तरे गवां कोटिं विधिवद्यः प्रयच्छति ।
एकाऽहं यो वसेत्काश्यां काशीवासी तयोर्वरः ॥ ११२ ॥
अन्यत्र ब्राह्मणानांतुकोटिंलम्भोज्ययत्फलम् । वाराणस्यांतुचैकेनभोजितेनतदाप्यते
सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे । तुलापुरुषदानेन काशीभिक्षासमाभवेत्
ममेह परमंज्योतिरापातालाद्व्यवस्थितम् । अतीत्यसमलोकादीननन्तंलिङ्गरूपधृक्
पृथिव्यन्तेऽपि ये लिङ्गमविमुक्तं स्मरन्ति मे ।
कलुषैस्ते विमुच्यन्ते महद्भिरिति निश्चितम् ॥ ११६ ॥
अस्मिन्क्षेत्रेतु येनाहं दृष्टःस्पृष्टःसमर्चितः । सम्प्राप्यतारकंज्ञानंनसभूयोऽभिजायते
यो मामिह समभ्यर्च्य म्रियतेऽन्यत्र कुत्रचित् ।
जन्मान्तरेऽपि माम्प्राप्य स विमुक्तो भविष्यति ॥ ११८ ॥
इत्युक्त्वा क्षेत्रमाहात्म्यं द्विजानामग्रतो हरः । पश्यतामेवतेषांतुतत्रैवान्तर्हितोभवत्
तेऽपिसाक्षाद्विरूपाक्षंप्रत्यक्षीकृत्यवाडवाः । प्रहृष्टमनसोऽत्यन्तंप्रययुःस्वंस्वमाश्रयम्

शम्भोर्वाक्यं विनिश्चित्य सर्वज्ञस्य कृपानिधेः ।
त्यक्त्वा कार्यान्तरं विप्रा लिङ्गान्येव समर्चिषुः ॥ १२१ ॥

स्कन्द उवाच

पठित्वा पाठयित्वा च रहस्याख्यानमुत्तमम् । श्रद्धालुःपातकैर्मुक्तःशिवलोकेमहीयते

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे क्षेत्ररहस्यकथनंनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥

———

पञ्चषष्टितमोऽध्यायः

पराशरेश्वरादिकन्दुकेशव्याघ्रेश्वरादिलिङ्गसम्भववर्णनम्

स्कन्द उवाच

ज्येष्ठेश्वरस्य परितो यानि लिङ्गानि कुम्भज! ।
तानि पञ्चसहस्राणि मुनीनां सिद्धिदान्यलम् ॥ १ ॥

पराशरेश्वरं लिङ्गं ज्येष्ठेशादुत्तरेमहत् । तस्यदर्शनमात्रेण निर्मलं ज्ञानमाप्यते ॥
तत्रैव सिद्धिदंलिङ्गं माण्डव्येश्वरसञ्ज्ञितम् । न तस्यदर्शनाज्जातुदुर्बुद्धिप्राप्नुयान्नरः
लिंगंचशङ्करेशाख्यं तत्रैव शुभदंसदा । भृगुनारायणस्तत्र भक्तानां सर्वसिद्धिदः ॥
जाबालीश्वरसञ्ज्ञंचलिङ्गं तत्रातिसिद्धिदम् । तस्यसन्दर्शनाज्जातुनजन्तुर्दुर्गतिव्रजेत्
सुमन्तुमुनिनाश्रेष्ठस्तत्रादित्यःप्रतिष्ठितः । तस्यसंदर्शनादेव कुष्ठव्याधिः प्रशाम्यति
भैरवीभीषणानाम तत्रभीषणरूपिणी । क्षेत्रस्यभीषणं सर्वं नाशयेद्भावतोऽर्चिता ॥
तत्रोपजङ्घनेर्लिङ्गं कर्मबन्धविमोक्षणम् ।
नृभिः संसेवितं भक्त्या षण्मासात्सिद्धिदम्परम् ॥ ८ ॥
भारद्वाजेश्वरं लिङ्गं लिङ्गं माद्रीश्वरं वरम् । एकत्र संस्थितेद्वेतुद्रष्टव्येसुकृतात्मना
अरुणिस्थापितंलिङ्गं तत्रैवकलशोद्भव । तस्यलिङ्गस्यसेवातःसर्वामृद्धिमवाप्नुयात्

लिङ्गं वाजसवेयाख्यं तत्राऽस्त्यतिमनोहरम् ।
तस्यसन्दर्शनात्पुंसां वाजपेयफलम्भवेत् ॥ ११ ॥
कण्वेश्वरंशुभंलिङ्गं लिङ्गंकात्यायनेश्वरम् । वामदेवेश्वरं लिङ्गमौतथ्येश्वरमेव च ॥
हारीतेश्वरसञ्ज्ञं च लिङ्गं वै गालवेश्वरम् । कुम्भेलिङ्गंमहापुण्यंतथावैकौसुमेश्वरम्
अग्निवर्णेश्वरं चैव नैध्रुवेश्वरमेव च । वत्सेश्वरं महालिङ्गं पर्णादेश्वरमेव च ॥
सक्तुप्रस्थेश्वरंलिङ्गं कणादेशं तथैव च । अन्यत्तत्रमहालिङ्गं माण्डूकायनिरूपितम्
बाभ्रवेयेश्वरं लिङ्गं शिलावृत्तीश्वरं तथा । च्यवनेश्वरलिङ्गञ्च शालङ्कायनकेश्वरम् ॥
कलिन्दमेश्वरं लिङ्गं लिङ्गमक्रोधनेश्वरम् । लिङ्गं कपोतवृत्तीशंकङ्केशं कुन्तलेश्वरम्
कण्ठेश्वरं कहोलेशं लिङ्गं तुम्बुरुपूजितम् । मतङ्गेशम्मरुत्तेशम्मगधेयेश्वरं तथा ॥
जातूकर्णेश्वरं लिङ्गं जम्बुकेश्वरमेव च । जारुधीशं जलेशञ्च जालमेशं जालकेश्वरम्
एवमादीनि लिङ्गानि अयुतार्धानि कुम्भज !।
एतेषां शुभलिङ्गानां ज्येष्ठस्थानेऽतिपावने ॥ २० ॥
स्मरणाद्दर्शनात्स्पर्शादर्चनान्नमनात्स्तुतेः । न जातुजायते जन्तोः कलुषस्यसमुद्भवः

स्कन्द उवाच

एकदा तत्र यद्वृत्तं ज्येष्ठस्थानेमहामुने !। तदहं ते प्रवक्ष्यामिश्रृणुष्वाऽघविनाशनम्
स्वैरं विहरतस्तत्र ज्येष्ठस्थाने महेशितुः । कौतुकेनैवचिक्रीडशिवाकन्दुकलीलया
उदञ्चन्त्यञ्चदङ्गानां लाघवं परितन्वती । निःश्वासामोदमुदितभ्रमराकुलितेक्षणा
भ्रश्यद्धम्मिल्लसन्माल्यस्थपुटीकृतभूमिका ।
स्विद्यत्कपोलपत्रालीस्रवदम्बुकणोज्ज्वला ॥ २५ ॥
स्फुटच्चोलांशुकपथनिर्यदङ्गप्रभावृता । उल्लसत्कन्दुकास्फालातिशोणितकराम्बुजा
कन्दुकानुगसद्दृष्टिर्नर्तितभ्रूलताञ्चला । मृडानी किलखेलन्ती ददृशे जगदम्बिका ॥
अन्तरिक्षचराभ्याञ्चदितिजाभ्यांमनोहरा । कटाक्षिताभ्यामिववैसमुपस्थितमृत्युना
विदलोत्पलसञ्ज्ञाभ्यां दृप्ताभ्यां वरतो विधेः ।
तृणीकृतत्रिजगतीपुरुषाभ्यां स्वदोर्बलात् ॥ २६ ॥

देवींपरिजिहीर्षू तौ विषमेषुप्रपीडितौ । दिवोऽवतेरतुःक्षिप्रंमायांस्वीकृत्यशाम्बरीम्
धृत्वापारषदीं मूर्त्तिमायातावम्बिकान्तिकम् । तावत्यन्तंसुदुर्वृत्तावतिचञ्चलमानसौ
सर्वज्ञेन परिज्ञातौचाञ्चल्याल्लोचनोद्भवात् । कटाक्षिताथदेवेन दुर्गा दुर्गारिघातिनी
विज्ञाय नेत्रसञ्ज्ञां तु सर्वज्ञार्धशरीरिणी । तेनैवकन्दुकेनाथ युगपन्निजघानतौ ॥
महाबलौमहादेव्या कन्दुकेन समाहतौ । परिभ्रम्य परिभ्रम्य तौ दुष्टौ विनिपेततुः
वृन्तादिव फले पक्के तालादनिललोलिते । दम्भोलिना परिहते शृङ्गेइव महागिरेः
तौनिपात्य महादैत्यावकार्यकरणोद्यतौ । ततः परिणतिं यातो लिङ्गरूपेणकन्दुकः
कन्दुकेश्वरसञ्ज्ञं च तं लिङ्गमभवत्तदा । ज्येष्ठेश्वरसमीपे तु सर्वदुष्टनिवारणम् ॥३७

कन्दुकेशसमुत्पत्तिं यः श्रोष्यति मुदान्वितः ।
पूजयिष्यति यो भक्तस्तस्य दुःखभयं कुतः ॥ ३८ ॥

कन्दुकेश्वरभक्तानां मानवानाञ्चिरेनसाम् । योगक्षेमं सदा कुर्याद्भवानीभयनाशिनी ॥

मृडानी तस्य लिङ्गस्य पूजां कुर्यात्सदैवहि ।
तत्रैव देव्याः सान्निध्यं पार्वत्या भक्तसिद्धिदम् ॥ ४० ॥
कन्दुकेशम्महालिङ्गं काश्यां यैर्न समर्चितम् ।
कथं तेषां भवानीशौ स्यातां सर्वेप्सितप्रदौ ॥ ४१ ॥

द्रष्टव्यं च प्रयत्नेन तल्लिङ्गं कन्दुकेश्वरम् । सर्वोपसर्गसङ्घातविघातकरणं परम् ॥
कन्दुकेश्वरनामापि श्रुत्वावृजिनसन्ततिः । क्षिप्रंक्षयमवाप्नोतितमःप्राप्योष्णगुं यथा

स्कन्द उवाच

संशृणुष्व महाभागज्येष्ठेश्वरसमीपतः । यद्वृत्तान्तमभूद्विप्रपरमाश्चर्यकृद्ध्रुवम् ॥
दण्डखाते महातीर्थे देवर्षिपितृतृप्तिदे । तप्यमानेषु विप्रेषु निष्कामं परमन्तपः ॥
दैत्यो दुन्दुभिनिर्ह्रादोदुष्टःप्रह्लादमातुलः । देवाःकथंसुजेयाःस्युरित्युपायमचिन्तयत्

किं बलाश्च किमाहाराः किमाधारा हि देवताः ।
विचार्य बहुशो दैत्यस्तत्त्वं विज्ञाय निश्चितम् ॥ ४७ ॥

अवश्यमग्रजन्मानो हेतवोऽत्रविचारतः । ब्राह्मणं हन्तुमसकृत्कृतवानुद्यमं ततः ॥

यतः क्रतुभुजो देवाःक्रतवो वेदसम्भवाः । तेवेदाब्राह्मणाधीनास्ततो देवबलं द्विजाः
निश्चितं ब्राह्मणाधाराःसर्वेवेदाःसवासवाः । गीर्वाणाब्राह्मणबलानात्रकार्याविचारणा
ब्राह्मणा यदिनष्टाःस्युर्वेदानष्टास्ततः स्वयम् । आम्नायेषु प्रणष्टेषु विनष्टाःशततन्तवः
यज्ञेषु नाशंगच्छत्सुहृताहारास्ततः सुराः । निर्बलाःसुखजेयाःस्युर्जितेषु त्रिदशेष्वथ
अहमेव भविष्यामि मान्यस्त्रिजगतीपतिः । आहरिष्यामिदेवानामक्षयाःसर्वसम्पदः
निर्वेक्ष्यामिसुखान्येवराज्येनिहतकण्टके । इतिनिश्चित्यदुर्बुद्धिःपुनश्चिन्तितवान्मुने

द्विजाः क्व सन्ति भूयांसो ब्रह्मतेजोऽतिबृंहिताः ।
श्रुत्यध्ययनसम्पन्नास्तपोबलसमन्विताः ॥ ५५ ॥

भूयसांब्राह्मणानां तुस्थानंवाराणसीभवेत् । तानादावुपसंहृत्ययामितीर्थान्तरन्ततः
यत्र यत्र हि तीर्थेषु यत्र यत्राश्रमेषु च । सन्ति सर्वेऽग्रजन्मानस्तेमयाद्याःसमन्ततः

इति दुन्दुभिनिर्ह्रादो मतिं कृत्वा कुलोचिताम् ।
प्राप्याऽपि काशीं दुर्वृत्तो मायावी न्यवधीद् द्विजान् ॥ ५८ ॥
समित्कुशान्समादातुं यत्र यान्ति द्विजोत्तमाः ।
अरण्ये तत्र तान्सर्वान्स भक्षयति दुर्मतिः ॥ ५९ ॥

यथा कोऽपिनवेत्त्येव तथाच्छन्नोऽभवत्पुनः । वनेवनेचरो भूत्वा यादोरूपी जलाशये
अदृश्यरूपी मायावी देवानामप्यगोचरः । दिवाध्यानपरस्तिष्ठेन्मुनिवन्मुनिमध्यगः
प्रवेशमुटजानाञ्च निर्गमञ्च विलोकयन् । यामिन्यांव्याघ्ररूपेण ब्राह्मणान्भक्षयेद्बहून्
निःशब्दमेव नयति नत्यजेदपि कीकसम् । इत्थंनिपातिताविप्रास्तेन दुष्टेन भूरिशः
एकदाशिवरात्रौतुभक्तस्त्वेकोनिजोटजे । सपर्यांदेवदेवस्यकृत्वाध्यानस्थितोऽभवत्
सच दुन्दुभिनिर्ह्रादो दैत्येन्द्रो बलदर्पितः । व्याघ्ररूपंसमास्थाय तमादातुं मतिं दधे
तम्भक्तं ध्यानमापन्नंदृढचित्तंशिवेक्षणे । कृतास्त्रमन्त्रविन्यासं सङ्क्रान्तुमशकन्न सः
अथसर्वगतःशम्भुर्ज्ञात्वा तस्याशयं हरः । दैत्यस्यदुष्टरूपस्य वधायविदधे धियम्
यावदादित्सतिव्याघ्रस्तावदाविरभूद्धरः । जगद्रक्षामणिस्त्र्यक्षो भक्तरक्षणदक्षधीः
रुद्रमायान्तमालोक्य तद्भक्तार्चितलिङ्गतः । दैत्यस्तेनैव रूपेण ववृधे भूधरोपमः ॥

सावज्ञमथ सर्वज्ञं यावत्पश्यति दानवः । तावदायान्तमादाय कक्षायन्त्रेन्यपीडयत्
पञ्चास्यस्त्वथ पञ्चास्यम्मुष्ट्यामूर्धन्यताडयत् । सचतेनैवरूपेणकक्षानिष्पेषणेन च
अत्यार्तमरटद्व्याघ्रो रोदसी परिपूरयन् । तेन नादेन सहसा सम्प्रवेपितमानसाः ॥
तपोधनाः समाजग्मुर्निशिशब्दानुसारतः । तत्रेश्वरं समालोक्य कक्षीकृतमृगेश्वरम्
तुष्टुवुः प्रणताः सर्वे शर्वंजयजयाक्षरैः । परित्राता जगत्त्रातः प्रत्यूहाद्दारुणादितः
अनुग्रहं कुरुष्वेश तिष्ठात्रैव जगद्गुरो! । अनेनैवहि रूपेण व्याघ्रेश इति नामतः ॥
कुरुरक्षां महादेव!ज्येष्ठस्थानस्यसर्वदा । अन्येभ्योऽप्युपसर्गेभ्योरक्ष नस्तीर्थवासिनः
इतिश्रुत्वावचस्तेषां देवश्चन्द्रविभूषणः । तथेत्युक्त्वापुनःप्राहश्रृणुध्वं द्विजपुङ्गवाः
योमामनेन रूपेणद्रक्ष्यति श्रद्धयाऽत्रवै । तस्योपसर्गसङ्घातंघातयिष्याम्यसंशयम्
एतल्लिङ्गंसमभ्यर्च्ययोयातिपथिमानवः । चौरव्याघ्रादिसम्भूतम्भयं तस्यकुतोभवेत्
मच्चरित्रमिदंश्रुत्वास्मृत्वालिङ्गमिदंहृदि । संग्रामेप्रविशन्मर्त्यो जयमाप्नोतिनान्यथा

इत्युक्त्वा देवदेवेशस्तस्मिँल्लिङ्गे लयं ययौ ।
सविस्मयास्ततो विप्राः प्रातर्याता यथागतम् ॥ ८१ ॥

स्कन्द उवाच

तदाप्रभृति कुम्भोत्थलिङ्गंव्याघ्रेश्वराभिधम् । ज्येष्ठेशादुत्तरेभागेदृष्टंस्पृष्टंभयापहम्

व्याघ्रेश्वरस्य ये भक्तास्तेभ्यो बिभ्यति किङ्कराः ।
यामा अपि महाक्रूरा जयजीवेति वादिनः ॥ ८३ ॥

पराशरेश्वरादीनां लिङ्गानामिह सम्भवम् । श्रुत्वा नरो न लिप्येत महापातककर्दमैः
कन्दुकेशसमुत्पत्तिं व्याघ्रेशाविर्भवं तथा । समाकर्ण्य नरो जातु नोपसर्गैः प्रदूयते ॥
उटजेश्वरलिङ्गन्तुव्याघ्रेशात्पश्चिमेस्थितम् ।भक्तरक्षार्थमुद्भूतंस्यात्समभ्यर्च्यनिर्भयः

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे पराशरेश्वरादिकन्दुकेशव्याघ्रेश्वरादिलिङ्गसम्भवोनाम पञ्चषष्टितमोऽध्यायः ॥

——:*:——

षट्षष्टितमोऽध्यायः

शैलेशादिलिङ्गनिर्णयवर्णनम्

स्कन्द उवाच

ज्येष्ठेश्वरस्य परितो लिङ्गान्यन्यानि यानि तु ।
तानि ते कथयिष्यामि श्रृणु वा तापितापन ! ॥ १ ॥

ज्येष्ठेशाद्दक्षिणे भागे लिङ्गमप्सरसांशुभम् । तत्रैवाप्सरसः कूपःसौभाग्योदकसंज्ञकः
तत्कूपजलसुस्नातोविलोक्याप्सरसेश्वरम् । नदौर्भाग्यमवाप्नोतिनारीवापुरुषोथवा
तत्रैव कुक्कुटेशाख्यं लिङ्गं वापीसमीपगम् । तस्य पूजनतःपुंसांकुटुम्बं परिवर्धते
पितामहेश्वरं लिङ्गं ज्येष्ठवापीतटे शुभम् । तत्र श्राद्धं नरः कृत्वा पितॄणां मुदमर्पयेत्
पितामहेशान्नैर्ऋत्यां पूजनीयम्प्रयत्नतः । गदाधरेश्वरं लिङ्गं पितॄणां परितृप्तिदम्
विशिपुण्यजनाख्यायांलिङ्गाज्ज्येष्ठेश्वरान्मुने । वासुकीश्वरसंज्ञञ्चलिङ्गमर्च्यंसमन्ततः

तत्र वासुकिकुण्डे च स्नानदानादिकाः क्रियाः ।
सर्पभीतिहराः पुंसां वासुकीशप्रभावतः ॥ ८ ॥

यः स्नातो नागपञ्चम्यां कुण्डेवासुकिसञ्ज्ञिते । नतस्यविषसंसर्गोभवेत्सर्पसमुद्भवः
कर्तव्या नागपञ्चम्यां यात्रावर्षासु तत्र वै । नागाःप्रसन्नाजायन्तेकुलेतस्यापिसर्वदा

तत्कुण्डात्पश्चिमे भागे लिङ्गं वै तक्षकेश्वरम् ।
पूजनीयं प्रयत्नेन भक्तानां सर्वसिद्धिदम् ॥ ११ ॥

मुने तस्योत्तरे भागे कुण्डं तक्षकसञ्ज्ञितम् । कृतोदकक्रियस्तत्र न सर्पैरभिभूयते
तत्कुण्डादुत्तरे भागे क्षेत्रक्षेमकरः सदा । भक्तानां साध्वसध्वंसीकपालीनामभैरवः

भैरवस्य महाक्षेत्रं तद्वै साधकसिद्धिदम् ।
तत्र संसाधिताविद्या षण्मासात्सिद्धिमाप्नुयुः ॥ १४ ॥

तत्रचण्डीमहामुण्डाभक्तविघ्नोपशान्तिदा । बलिपूजोपहाराद्यैःपूज्यास्वाभीष्टसिद्धये

तस्या यात्रां तु यः कुर्यान्महाष्टम्यां नरोत्तमः ।
यशस्वी पुत्रपौत्राढ्यो लक्ष्मीवांश्चापि जायते ॥ १६ ॥
महामुण्डा प्रतीच्यां तु चतुःसागरवापिका ।
तस्यां स्नातो भवेत्स्नातःसागरेषु चतुर्ष्वपि ॥ १७ ॥
महाप्रसिद्धं तत्स्थानं चतुःसागरसञ्ज्ञितम् ।
चत्वारि तत्र लिङ्गानि सागरैः स्थापितानि च ॥ १८ ॥

तस्या वाप्याश्चतुर्दिक्षु पूजितानि दहन्त्यघम् । तदुत्तरेमहालिङ्गंवृषभेश्वरसञ्ज्ञितम्

हरस्य वृषभेणैव स्थापितं तत्स्वभक्तितः ।
तस्य दर्शनतः पुंसां षण्मासान्मुक्तिरुद्भवेत् ॥ २० ॥

वृषेश्वरादुदीच्यां तुगन्धर्वेश्वरसंज्ञितम् । गन्धर्वकुण्डंतत्प्राच्यांतत्रस्नात्वानरोत्तमः
गन्धर्वेश्वरमभ्यर्च्य दत्त्वा दानानिशक्तितः । सन्तर्प्यपितृदेवांश्च गन्धर्वैः सह मोदते
कर्काटनामा नागोऽस्ति गन्धर्वेश्वरपूर्वतः । तत्र कर्कोटवापीच लिङ्गं कर्कोटकेश्वरम्

तस्यां वाप्यां नरः स्नात्वा कर्कोटेशं समर्च्यच ।
कर्कोटनागमाराध्य नागलोके महीयते ॥ २४ ॥

कर्कोटनागो यैर्दृष्टस्तद्वाप्यां विहितोदकैः । क्रमते नविषं तेषां देहे स्थावरजङ्गमम्

कर्कोटेशात्प्रताच्यान्तु धुन्धुमारीश्वराभिधम् ।
तल्लिङ्गाभ्यर्चनात्पुंसां न भवेद्वैरिजम्भयम् ॥ २६ ॥

पुरूरवेश्वरं लिङ्गं तदुदीच्यां :व्यवस्थितम् । द्रष्टव्यन्तत्प्रयत्नेन चतुर्वर्गफलप्रदम्
दिग्गजेनार्चितं लिङ्गं सुप्रतीकेन तत्पुरः । सुप्रतीकेश्वरं नाम्ना यशोबलविवर्धनम्

सरश्च सुप्रतीकाख्यं तत्पुरो भासते महत् ।
तत्र स्नात्वा च तल्लिङ्गं दृष्ट्वा दिक्पतितां लभेत् ॥ २६ ॥

तत्रास्त्येका महागौरी नाम्ना विजयभैरवी । रक्षार्थमुत्तरद्वारिस्थितापूज्येष्टसिद्धये
वरणायास्तटे रम्येगणौ हुण्डनमुण्डनौ । क्षेत्ररक्षांविधत्तस्तौविघ्नस्तम्भनकारकौ
तौ द्रष्टव्यौ प्रयत्नेन क्षेत्रनिर्विघ्नहेतवे । हुण्डनेशम्मुण्डनेशं तत्र दृष्ट्वा सुखीभवेत्

स्कन्द उवाच

इल्वलारे कथामेकां शृणुष्वावहितोभव । वरणायास्तटे रम्ये यद्वृत्तं पूर्वमुत्तमम्
एकदाद्रीन्द्रमालोक्यमेनासंहृष्टमानसम् । उमांसंस्मृत्यनिःश्वस्यप्रोवाचेतिपतिव्रता

मेनोवाच

आर्यपुत्र! न जानामि प्रवृत्तिमपि काञ्चन । विवाहसमयादूर्ध्वं तस्यागौर्यागिरीश्वर
सवृषेन्द्रगतिर्देवो भस्मोरगविभूषणः । महापितृवनावासो दिग्वासाःक्वास्तिसम्प्रति
अष्टौ यामातरो दृष्टाब्राह्मीप्रभृतयःप्रिय !। स्वस्वरूपास्तामन्येऽहंबालिकाःकष्टहेतवः

तस्यैकस्य न कोऽप्यन्योऽस्त्यद्वितीयस्य शूलिनः ।
तदुदन्तप्रवृत्त्यै च क्रियतामुद्यमो विभो !॥ ३८॥

तस्याःप्रियायावाक्येनतदपत्यप्रियोगिरिः । उवाचवचनंसास्रमुमावात्सल्यसन्नगीः

गिरिराज उवाच

अहमेवगमिष्यामि तस्या मेने! गवेषणे । नितरांबाधतेप्रेम तदृष्ट्यग्निदूषितम्
यदाप्रभृति सा गौरी निर्गता मम सद्मतः । मन्ये मेनेतदारभ्यपद्मसद्माविनिर्ययौ
तदालापामृतधयौ नमे शब्दग्रहौप्रिये । प्राणेश्वरि! तदारभ्यस्यातां शब्दान्तरग्रहौ

जैवातृकी यतोऽह्नः स्याद् दूरीभूताद्दृशोर्मम ।
अहो जैवातृकीज्योत्स्ना ततोऽह्नोऽतिदुनोति माम् ॥ ४३ ॥

इत्युक्त्वाऽऽदायरत्नानिवासांसिविविधानिच । धराधरेन्द्रोनिर्यातः शुभलग्नबलोदये

अगस्त्य उवाच

कानिकानिचरत्नानिकियन्त्यपिच षण्मुख !। यान्यादायप्रतस्थेसतानिमेब्रूहिपृच्छतः

स्कन्द उवाच

तुलामुक्ताफलानां तु कोटिद्वयपरीमिताः । तथावारितराणांचहीरकाणान्तुलाशतम्
नवलक्षाधिकंविप्रषडस्राणांसुतेजसाम् । लक्षद्वयं विदूराणान्तुला विमलवर्चसाम्
कोटयः पद्मरागाणांपञ्चा वै हि तुलामुने । पुष्परागतुला लक्षं गुणितंनवसङ्ख्यया
तथागोमेदरत्नानां तुलालक्षमिता मुने !। इन्द्रनीलमणीनांचतुलाःकोट्यर्धसम्मिताः

गरुडोद्गाररत्नानां तुलाः प्रयुतसम्मिताः । शुद्धविद्रुमरत्नानां तुलाश्च नवकोटयः

अष्टाङ्गाभरणानां च सङ्ख्या कर्तुं न शक्यते ।

वाससां च विचित्राणां कोमलानां तथा मुने ! ॥ ५१ ॥

चामराणि च भूयांसि द्रव्याण्यामोदवन्ति च ।

सुवर्णदासदास्यादीन्यसंख्यातानि वै मुने !॥ ५२ ॥

सर्वाण्यपि समादाय प्रतस्थे भूधरेश्वरः । आगत्य वरणातीरं दूरात्काशीमलोकयत्

अनेकरत्ननिचयैः खचिताऽखिलभूमिकाम् ।

नानाप्रासादमाणिक्यज्योतिस्ततताम्बराम् ॥ ५४ ॥

सौधाग्रविविधस्वर्णकलशोज्ज्वलदिङ्मुखाम् ।

जयन्ती वैजयन्तीनां निकरैस्त्रिदिवस्थलीम् ॥ ५५ ॥

महासिद्धयष्टकस्यापि क्रीडाभवनमद्भुतम् । जितकल्पद्रुमवनां वनैः सर्वफलावनैः

इतिकाशीसमृद्धिंसविलोक्याभूद्विलज्जितः । उवाचचमनस्येव भूधरेन्द्र इदं वचः ॥

प्रासादेषु प्रतोलीषु प्राकारेषु गृहेषु च । गोपुरेषु विचित्रेषु कपाटेषु तटेष्वपि ॥

मणिमाणिक्यरत्नानामुच्छलच्चारुरोचिषाम् ।

ज्योतिर्जालैर्जटिलितं यथेदमवलोक्यते ॥ ५६ ॥

द्यावाभूम्योरन्तरालन्तथेतिसमवैम्यहम् । ईदृक्सम्पत्तिसम्भारःकुबेरस्यापि नो गृहे

अपिवैकुण्ठभुवने नेतरस्येह का कथा । इति यावद्गिरीन्द्रोऽसौ संभावयति चेतसि

तावत्कार्पटिकः कश्चित्तल्लोचनपथंगतः । आहूय बहुमानंतमपृच्छच्चाचलेश्वरः ॥

हिमवानुवाच

हंहो कार्पटिकश्रेष्ठ! अध्यास्स्वैतदिहासनम् ।

स्वपुरोदन्तमाख्याहि किमपूर्वमिहाऽध्वग !॥ ६३ ॥

कोऽत्र सम्प्रत्यधिष्ठाता किमधिष्ठातृचेष्टितम् ।

यदि जानासि तत्तत्सर्वमिहाचक्ष्व ममाग्रतः ॥ ६४ ॥

सोपिकार्पटिकस्तस्यगिरिराजस्यभाषितम् । समाकर्ण्य समाचष्टुं मुनेसमुपचक्रमे

कार्पटिक उवाच

आचक्षे शृणुराजेन्द्र यत्पृष्टोऽस्मि त्वयाऽखिलम् ।

अहानि पञ्चषाण्येव व्यतिक्रान्तानि मानद !॥ ६६ ॥

समायाते जगन्नाथे पर्वतेन्द्रसुतापतौ । सुन्दरान्मन्दराद्द्रे र्दिवोदासे गते दिवि ॥

योवैजगदधिष्ठातासोऽधिष्ठाताऽत्रसर्वगः । सर्वदृक्सर्वदःशर्वःकथं नज्ञायते विभो

मन्ये दृषत्स्वरूपोऽसि दृषदोऽपि कठोरधीः ।

यतो विश्वेश्वरं काश्यां न वेत्सि गिरिजापतिम् ॥ ६९ ॥

स्वभावकठिनात्माऽपि स वरं हिमवान् गिरिः ।

प्राणाधिकसुतादानाद्योऽधिनोद्विश्वनायकम् ॥ ७० ॥

विभ्रत्सहजकाठिन्यंजातो गौरीगुरुर्गुरुः । शम्भुं प्रपूज्य सुतया स्रजाविश्वगुरोरपि

चेष्टितन्तस्य कोवेदवेदवेद्यस्य चेशितुः । मनागितिच जानेहं तच्चेष्टितमिदं जगत्

अधिष्ठातामयाख्यातस्तथाधिष्ठातृचेष्टितम् । अपूर्वंयस्त्वयापृष्टं तदाख्यामितच्छृणु

शुभेज्येष्ठेश्वरस्थानेसाम्प्रतं सउमापतिः । काशीं प्राप्यमुदातिष्ठेद्गिरिराजाङ्गजासखः

स्कन्द उवाच

यदायदासगिरिजा मृदुनामाक्षरामृतम् । आविष्करोतिपथिकोऽद्रीन्द्रोहृष्येत्तदातदा

उमा नामामृतम्पीतं येनेह जगतीतले । न जातु जननीस्तन्यं स पिबेत्कुम्भसम्भव

उमेति द्व्यक्षरंमन्त्रं योऽहर्निशमनुस्मरेत् । न स्मरेच्चित्रगुप्तस्तं कृतपापमपि द्विज !

पुनः शुश्राव हिमवान् हृष्टः कार्पटिकोदितम् ।

कार्पटिक उवाच

राजन्विश्वेश्वरार्थे यः प्रासादो विश्वकर्मणा ॥ ७८ ॥

निर्मीयतेसुनिर्माणो जन्मिनिर्वाणदायिनः । तदपूर्वंनकर्णाभ्यामप्याकर्णितवानहम्

यत्रातिमित्रतेजोभिः शलाकाभिः समन्ततः ।

मणिमाणिक्यरत्नानां प्रासादे भित्तयः कृताः ॥ ८० ॥

यत्र सन्ति शतं स्तम्भा भास्वन्तो द्वादशोत्तराः ।

एकैकम्भुवनं धर्तुमष्टाष्टाविति कल्पिताः ॥ ८१ ॥
चतुर्दशसु याशोभाविष्टपेषु समन्ततः । तस्मिन्विमाने सास्तीहशतकोटिगुणोत्तरा
चन्द्रकान्तमणीनाञ्च स्तम्भाधारशिलाश्च याः ।
चित्ररत्नमयैः स्तम्भैः स्तम्भितास्तत्प्रभाभराः ॥ ८३ ॥
पद्मरागेन्द्रनीलानां शालीनाः शालभञ्जिकाः । नीराजयन्त्यहोरात्रं यत्ररत्नप्रदीपकैः
स्फुरत्स्फटिकनिर्माणश्लक्ष्णपद्मशिलातले । अनेकरत्नरूपाणिविचित्राणिसमन्ततः
आरक्तपीतमञ्जिष्ठनीलकिर्मीरवर्णकैः । विन्यस्तानीव भासन्ते चित्रे चित्रकृता यतः
दृक् पिच्छिला विलोक्यन्ते माणिक्यस्तम्भराजयः ।
यतोऽविमुक्ते स्वक्षेत्रे मोक्षलक्ष्म्यङ्कुरा इव ॥ ८७ ॥
रत्नाकरेभ्यःसर्वेभ्योगणारत्नोच्चयान्बहून् । राशींश्चक्रुःसमानीययत्राद्रिशिखरोपमान्
यत्रपातालतलतो नागानां कोशवेश्मतः । गणैर्मणिगणाः सर्वे समाहृत्यगिरीकृताः
शिवभक्तःस्वयंयत्र पौलस्त्यःस्वद्रिकूटतः । कोटिहाटककूटानिआनयामासराक्षसैः
प्रासादनिर्मितिं श्रुत्वा भक्ता द्वीपान्तरस्थिताः ।
माणिक्यानि समाजह्रुर्यथासंख्यान्यहो नृप !॥ ९१ ॥
चिन्तामणिः स्वयं यत्र कर्मणे विश्वकर्मणे ।
विश्राणयेदहोरात्रं विचित्रांश्चिन्तितान्मणीन् ॥ ९२ ॥
नानावर्णपताकाश्च यत्रकल्पमहीरुहः । अनल्पाः कल्पयन्त्येवनित्यम्भक्तिसमन्विताः
अब्धयो यत्रसततंदधि क्षीरेक्षुसर्पिषाम् । पञ्चामृतानांकलशैः स्नपयन्ति दिने दिने
यत्र कामदुघा नित्यं स्नपयेन्मधुधारया ।
स्वदुग्धया स्वयम्भक्त्या विश्वेशं लिङ्गरूपिणम् ॥ ९५ ॥
गन्धसाररसैर्यश्च सेवते मलयाचलः । कर्पूररम्भाकर्पूरपूरैर्भक्त्या निषेवते ॥ ९६ ॥
इत्याद्यपूर्वंयत्रास्ति प्रत्यहं शङ्करालये । कथं तं त्वमुमाकान्तं न वेत्सि कठिनाशयः
इतितस्य समृद्धिं तां दृष्ट्वा जामातुरद्रिराट् । त्रपया परिभूतोऽभून्नितरांकुम्भसम्भव
तस्मै कार्पटिकायाथ स दत्त्वा पारितोषिकम् ।

पुनश्चिन्तापरो जातोऽद्रिराट् कार्पटिके गते ॥ ९९ ॥
उवाचेतिमनस्येवविस्मयोत्फुल्ललोचनः । अहोभद्रमिदंजातं यत्त्वयाऽश्रावि शर्मभाक्
यावत्सम्पत्तिसंभारः श्रूयते दृश्यतेऽत्रवै । जामातुरत्र सदने लीला त्रिजगतीपतेः ॥
ततःप्राभृतकस्तुच्छो नितरांप्रतिभातिमे । कन्यार्थंयोमयानीतोजामातुःपरितोषकृत्
अहंमन्येतथैवाऽसौयथादर्शि मया पुरा । वृद्धोक्षमात्र सम्पत्तिः सर्वकर्मपराङ्मुखः
नैनंकोपिविजानीयान्नान्वयोऽस्य कदाचन । नामापियस्य नैकंच किंदेशीयश्चनोह्यते
किंवृत्तश्चकिमाचारोनाममात्रेण चेश्वरः । ऐश्वर्यसूचकं वस्तुयस्य किञ्चिन्न लक्ष्यते
सोऽसौनिर्वाणसम्पत्तिरङ्कायापिददात्यहो । सुमुखःसर्वकर्माणिफलवन्तिकरोतिसः
वेदवेद्योहिसर्वज्ञो यत्सन्तानोऽखिलं जगत् । यंनकोपिहिवेदादौ वेदवेद्यः सएष वै
योऽनभिज्ञः सदाज्ञातः स सर्वज्ञोऽयमेव हि । यस्यैकमपिनोनामपुंसाज्ञेयंनकेनचित्
सर्वेषां सर्वनामानि यस्य नामानि निश्चितम् ।
सोऽसौ हि सर्वदेशीयः सर्वेभ्यः सर्वसिद्धिदः ॥ १०९ ॥
यस्यदेशोनविदितो यस्तुवृत्तिपराङ्मुखः । आचारहीनमिव यं पुराऽपश्यंकठोरधीः
श्रुतिस्मृतीयतः सर्वमाचारं वित्तएवहि । नाममात्रेण नियतं यमज्ञासिषमीश्वरम् ॥
साक्षादीश्वरएवैष सोऽन्येष्वैश्वर्यसूचकः । अपिसर्वगुणाधारो गुणातीतः परापरः ॥
अर्वाचीनइहाप्येष पराचीनः परात्परः । भूधराणामहं नाथो विश्वनाथ उमापतिः ॥
अहं प्रमितसम्पत्तिरप्रमेयधनो ह्यसौ । तुच्छप्राभृतकस्तस्मान्नेदानीमस्य दर्शनम्
करिष्येऽथ करिष्यामि व्यावृत्त्यागत्य कर्हिचित् ।
संप्रधार्येति मनसि सायं स च गिरीश्वरः ॥ ११५ ॥
आहूयसर्वाननुगान्पार्वतीयान्महाबलान् । आदिष्टवानिदंवाक्यं सर्वे यूयं बलाधिकाः
कुर्वन्त्वेकंममादेशं यावन्नोद्यति भानुमान् । तावच्छिवालयंचैकं विदधत्वत्र सत्वरम्
यस्मिन्कृतेकृतार्थःस्यामिहलोके परत्रच । समागत्येहकाश्यांयःकुर्यादेकंशिवालयम्
तेनत्रैलोक्यमखिलंसालयं कृतमेवहि । तेनदत्तानि दानानि महान्ति विधिपूर्वकम् ॥
सुपर्वणिसुपात्राय सुतीर्थेश्रद्धयाधिकम् । येन स्ववित्तमानेन धर्मोपार्जितवित्ततः ॥

कृतंशम्भोर्महासद्म नतंपश्चात्यजेत्कचित् । तपांसितेनतप्तानि शीर्णपर्णाशनान्यपि
वाराणसींसमासाद्ययेनाऽकारिशिवालयः। अशेषाःसुविशेषाढ्याइष्टास्तेनमहामखाः
आनन्दकानने येन देवदेवालयः कृतः । इति तस्य समादेशं समाकर्ण्यानुगास्ततः
चक्रुर्देवालयंश्रेष्ठंयावद्व्युष्टा न यामिनी ।तावच्छैलेश्वरं लिङ्गं शैलेशेन प्रतिष्ठितम्

चन्द्रकान्तमणेश्चञ्चत्कान्तिश्वेतितमण्डपम् । ॥ १२४ ॥
अलेखयत्प्रशस्तिञ्च प्रशस्ताक्षरमालिनीम् ।
व्याचक्षाणां निजां सर्वगोत्रेभ्योऽप्यधिकोन्नतिम् । १२५ ।

ततोऽरुणोदये जातेस्नात्वापञ्चनदे ह्रदे । शैलराजः कालराजं नमस्कृत्य समर्च्य च
तत्रराशिंसमुत्सृज्य परितस्त्वरितो ययौ । पार्वतीयैरनुगतः सर्वैरपि निजालयम्
ततःप्रातः समालोक्य गणौढुण्डनमुण्डनौ ।दृष्टौ देवालयंरम्यं वरणायास्तटे शुभे
अदृष्टपूर्वं देवाय निवेदयितुमागतौ । तौ तु दृष्ट्वामहादेवमुमादर्शितदर्पणम् ॥ १२६ ॥
प्रणम्य दण्डवद्भूमौ कृताञ्जलिपुटौ गणौ । कृताभ्यनुज्ञौ भ्रूक्षेपाद्विज्ञप्तिमथ चक्रतुः
देवदेव न जानीवः केनचिद्द दृढभक्तिना । अतीवरम्यःप्रासादो निर्मितो वरणातटे

आसायं नैक्षि चावाभ्यां दृष्टोऽद्यैव प्रगे विभो !।
गणोदितमितीशानो निशम्याऽऽह गिरीन्द्रजाम् ॥ १३२ ॥

विज्ञातसर्ववृत्तान्तः सर्वज्ञोऽप्यनभिज्ञवत् । अचलेन्द्राङ्गजेयावस्तत्प्रासादविलोकने ॥
इत्युक्त्वेशः सगिरिजोनिरगात्सगणो मुने । महास्यन्दनमारुह्यप्रासादंद्रष्टुमुत्सुकः
अथाऽऽलुलोके गिरिशः प्रासादं वरणातटे । अतीववरम्यरचनंयामिनीमात्रनिर्मितम्
स्यन्दनादवरुह्याथ गर्भागारमवीविशत् । ददर्शचमहालिङ्गं चन्द्रकान्तशिलामयम्
देदीप्यमानं महसा मोक्षलक्ष्म्यङ्कुराकृति । दृष्टिप्रसादजननं पुनर्जननशातनम् ॥
केनेदंस्थापितं लिङ्गं यावज्जिज्ञासतीश्वरः । तावद्ददर्शपुरतःप्रशस्तिं कर्तृसूचिकाम्

वाचयित्वेव च मनाङ्मनस्येव मनोजहृत् ।
उवाच देवीं दिष्ट्येति प्रेक्षस्वात्मपितुः कृतिम् ॥ १३६ ॥

उमाश्रुत्वेतिसंहृष्टा कदम्बकुसुमश्रियम् । आनन्दाङ्कुरलक्ष्मीवदङ्गेषु परिबिभ्रती ॥

ततोव्यजिज्ञपद्देवं देवीपादौ प्रणम्य च । अस्मिँल्लिङ्गवरेनाथत्वया स्थेयमहर्निशम्
अस्यलिङ्गस्ययेभक्ताः शैलेशस्यमहेशितुः । तेभ्यस्त्वं महतीमृद्धिंदास्यसीहपरत्रच
तथेतिदेवउक्त्वातांपार्वतीं पुनरब्रवीत् । वरणायां कृतस्नानैः शैलेशो यैः समर्चितः
पितॄन्सन्तर्प्य च मुदादत्त्वादानानि शक्तितः । न तेषां पुनरावृत्तिरत्रसंसारवर्त्मनि
शैलेश्वरेमहालिङ्गे नित्यंस्थास्याम्यहं शुभे !। प्रदास्यामिपरांमुक्तिमेतल्लिङ्गार्चकेजने

शैलेश्वरं ये द्रक्ष्यन्ति वरणायाः सुरोधसि ।
तेषां काश्यां निवसतां दुःखं नाभिभविष्यति ॥ १४६ ॥

उमयाऽपि वरो दत्तस्तत्रलिङ्गे घटोद्भव !। शैलेश्वरस्य ये भक्तास्तेमे पुत्रा न संशयः

स्कन्द उवाच

इतिशैलेश्वरं लिङ्गं कथितं ते महामुने !। इदानीं कथयिष्यामि रत्नेश्वरसमुद्भवम्
श्रुत्वाशैलेशमाहात्म्यं श्रद्धयापरयानरः । पापकञ्चुकमुत्सृज्य शिवलोकमवाप्नुयात्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे
शैलेशादिलिङ्गनिर्णयो नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

——:*:——

सप्तषष्टितमोऽध्यायः

रत्नेश्वरप्रशंसनवर्णनम्

अगस्त्य उवाच

रत्नेश्वरसमुत्पत्तिं कथयस्व षडानन !। रत्नभूत महालिङ्गं यत्काश्यांपरिवर्ण्यते ॥
कोस्य लिङ्गस्य महिमा केनैतच्च प्रतिष्ठितम् । एवंविस्तरतो ब्रूहिगौरीहृदयनन्दन!

स्कन्द उवाच

रत्नेश्वरस्यमाहात्म्यंकथयिष्यामितेमुने !। यथाचतस्यलिङ्गस्यप्रादुर्भावोऽभवद्भुवि
श्रुतंनामापिलिङ्गस्य यस्य जन्मत्रयार्जितम् । वृजिनंनाशयेत्तस्य प्रादुर्भावंब्रुवेमुने

शैलराजेन रत्नानि यानि पुञ्जीकृतान्यहो । उत्तरे कालराजस्य तानितस्यगिरेर्वृषात्
सर्वरत्नमयं लिङ्गं जातं तत्सुकृतात्मनः । शक्रचापसमच्छायं सर्वरत्नद्युतिप्रभम्
तल्लिङ्गदर्शनादेव ज्ञानरत्नमवाप्यते । शैलेश्वरं समालोक्य शिवौ तत्र समागतौ ॥
यत्र रत्नमयं लिङ्गमाविर्भूतं स्वयं मुने !। तस्य स्फुरत्प्रभाजालैस्ततमम्बरमण्डलम्
तत्र दृष्ट्वा शुभंलिङ्गं सर्वरत्नसमुद्भवम् । भवान्यदृष्टपूर्वा हि परिपप्रच्छ शङ्करम् ॥
देवदेव! जगन्नाथ ! सर्वभक्ताभयप्रद !। कुतस्त्यमेतल्लिङ्गं हि सप्तपातालमूलवत् ॥

ज्वालाजटिलिताकाशं प्रभ.भासितदिङ्मुखम् ।
किमाख्यां किंस्वरूपञ्च किं प्रभावम्भवान्तक !॥ ११ ॥

यस्य सम्वीक्षणादेव मनो मेऽतीवहृष्टवत् । इहैव रमते नाथ कथयैतत्प्रसादतः ॥

देवदेव उवाच

शृण्वपर्णे समाख्यामियत्त्वयापृच्छिपार्वति !। स्वरूपमेतल्लिङ्गस्यसर्वतेजोनिधेःपरम्
तव पित्रा हिमवतागिरिराजेनभामिनि । त्वामुद्दिश्य महारत्नसंभारोऽत्राप्यनायिहि
अत्र तानि च रत्नानिराशीकृत्यहिमाद्रिणा । सुकृतोपार्जितान्येवयर्यौस्वसदनंपुनः
तवार्थंग्राममार्थं वा श्रद्धयायत्समर्प्यते । काश्यां तस्यपरीपाकोभवेदीदृग्विधोऽनघे

लिङ्गं रत्नेश्वराख्यं वै मत्स्वरूपं हि केवलम् ।
अस्य प्रभावो हि महान्वाराणस्यामुमे! ध्रुवम् ॥ १७ ॥

सर्वेषामिहलिङ्गानां रत्नभूतमिदं परम् । अतोरत्नेश्वरं नामपरं निर्वाणरत्नदम् ॥
अनेनैव सुवर्णेन पित्राराशीकृतेन च । प्रासादमस्यलिङ्गस्य विधापय महेश्वरि!

लिङ्गप्रासादकरणात् खण्डस्फुटितसंस्कृतेः ।
लिङ्गस्थापनजं पुण्यं हेलयैवेह लभ्यते ॥ २० ॥

तथेतिभगवत्योक्त्वागणाःप्रासादनिर्मितौ। सोमनन्दिप्रभृतयोऽसंख्याव्यापारिताम्मुने
गणैश्च काञ्चनमयो नानाकौतुकचित्रितः । निर्ममे याममात्रेण प्रासादोमेरुश्रृङ्गवत्
देवीप्रहृष्टवदना दृष्ट्वा प्रासादनिर्मितिम् । गणेभ्योव्यतरद्भूरिसम्मानंपारितोषिकम्
पुनश्चदेवी पप्रच्छ प्रणिपातपुरःसरम् । महिमानं महादेवं लिङ्गस्यास्य महामुने

देवदेव उवाच

लिङ्गंत्वनादिसंसिद्धमेतद्देविशुभप्रदम् । आविर्भूतमिदानीञ्चत्वत्पितुःपुण्यगौरवात्
गुह्यानां परमंगुह्यं क्षेत्रेऽस्मिंश्चिन्तितप्रदम् । कलौकलुषबुद्धीनांगोपनीयं प्रयत्नतः
यथारत्नं गृहे गुप्तं न कैश्चिज्ज्ञायते परैः । अविमुक्ते तथा लिङ्गंरत्नभूतं गृहे मम ॥

यानि ब्रह्माण्डमध्येऽत्र सन्ति लिङ्गानि पार्वति !।
तैरर्चितानि सर्वाणि रत्नेशो यैः समर्चितः ॥ २८ ॥

प्रमादेनाऽपि यैर्गौरि! लिङ्गं रत्नेशंमर्चितम् । ते भवन्त्येव नियतं सप्तद्वीपेश्वरान्नृपाः

त्रैलोक्ये यानि वस्तूनि रत्नभूतानि तानि तु ।
रत्नेश्वरं समभ्यर्च्य सकृत्प्राप्नोति मानवः ॥ ३० ॥
पूजयिष्यन्ति ये लिङ्गं रत्नेशं कामवर्जिताः ।
ते सर्वे मद्गणा भूत्वा प्रान्ते द्रक्ष्यन्ति मामिह ॥ ३१ ॥

रुद्राणांकोटिजप्येन यत्फलं परिकीर्तितम् । तत्फलंलभ्यते देविरत्नेशस्यसमर्चनात्
लिङ्गे चानादिसंसिद्धे यद्वृत्तं तद्ब्रवीमिते । इतिहासं महाश्चर्यं सर्वपापनिकृन्तनम्

पुरेह नर्तकी काचिदासीन्नाट्यार्थकोविदा ।
सैकदा फाल्गुने मासि शिवरात्र्यां कलावती ॥ ३४ ॥

ननर्त जागरं प्राप्य जगौ गीतं च पेशलम् । स्वयंचवादयामासनानावाद्यानिवाद्यवित्
तेन तौर्यत्रिकेणापि प्रीणयित्वाऽथ सा नटी । रत्नेश्वरंमहालिङ्गंदेशमिष्टंजगामह
कालधर्मवशं याता तत्रसावरनर्तकी । सुता गन्धर्वराजस्य वसुभूतेर्बभूवह ॥३७ ॥

सङ्गीतस्य सवाद्यस्य तस्य लास्यस्य पुण्यतः ।
तत्रेशाग्रे कृतस्येह जागरे शिवरात्रिजे ॥ ३८ ॥

रम्या रत्नावली नामरूपलावण्यशालिनी । कलाकलापकुशला मधुरालापवादिनी
पितुरानन्दकृन्नित्यं वसुभूतेर्घटोद्भव !। सर्वगान्धर्वकुशला गुणरत्नमहाखनिः ॥
मुने! सखीत्रयं तस्याश्चारुचातुर्यभाजनम् । शशिलेखानङ्गलेखाचित्रलेखेति नामतः

तिसृभिस्ताभिरेकत्र वाग्देवी परिशीलिता ।

ताभ्यःसर्वाः कलाःप्रादात्परिप्रीता सरस्वती ॥ ४२ ॥

प्राप्यरत्नावलीगौरिसाजन्मान्तरवासनाम् । रत्नेश्वरस्यलिङ्गस्यजग्राहनियमंशुभम्
रत्नभूतस्य लिङ्गस्य काश्यांरत्नेश्वरस्यवै । नित्यं संदर्शनंप्राप्यवक्ष्याम्यपिवचोमुखे

इत्थं नियमवत्यासीत्सा गन्धर्वसुतोत्तमा ।
ताभिः सखीभिः सहिता नित्यं लिङ्गं च पश्यति ॥ ४५ ॥

एकदाराध्य रत्नेशंममैतल्लिङ्गमुत्तमम् । समानर्च च सा बाला रम्यया गीतमालया

सख्यः प्रदक्षिणीकर्तुंलिङ्गं तिस्रोऽप्युमे! गताः ।
तस्या गीतेन तुष्टोऽहं लिङ्गस्थो वरदोऽभवम् ॥ ४७ ॥

यस्त्वया रंस्यते रात्रावद्यगन्धर्वकन्यके । तव नाममसमानाख्यःसतेभर्ताभविष्यति
इति लिङ्गाम्बुधेर्जाताम्परिपीयवचः सुधाम् । बभूवानन्दसन्दोहमन्थरातीवह्रीमती
गताथव्योममार्गेणसखीभिःस्वपितुर्गृहम् ।कथयन्तीनिजोदन्तं तमालीनाम्पुरोमुदा

ताभिर्दिष्ट्येति दिष्ट्येति सखीभिः परिनन्दिता ।
अद्य ते वाञ्छितम्भावि रत्नेशस्य समर्चनात् ॥ ५१ ॥

यद्यायाति सते रात्रावद्य कौमारहारकः । चोरोबाहुलतापाशैःपाशितव्योऽतियत्नतः
गोचरीक्रियतेऽस्माभिर्यथास सुकृतैकभूः । प्रातरेव तवप्रेयान् रत्नेशादिष्टइष्टकृत्
यातास्वस्मासुहृष्टासु भवतीपुण्यगौरवात् । अहोरत्नेश्वरंलिङ्गं प्रत्यक्षीकृतवत्यसि
अहोभाग्योदयोनृणामहोपुण्यसमुच्छ्रयः । एकस्यैव भवेत्सिद्धिर्यदेकत्रापितिष्ठताम्
सत्यंवदन्ति नासत्यं दैवप्राधान्यवादिनः । दैवमेव फलेदेकंनोद्यमो नापरम्बलम् ॥
भवत्या अपि चास्माकमेकएव हि चोद्यमः । परंदैवंफलत्येकंयथातव न नः पुरः ॥
लोकानांव्यवहारोऽयमालिप्रोक्तः प्रसङ्गतः। परंमनोरथावाप्तिस्तवयासैव नःस्फुटम्

इति सख्याहरन्तीनामनन्तोऽध्वाऽति तुच्छवत् ।
क्षणात्तासां व्यतिक्रान्तः प्राप्ताश्च स्वं स्वमालयम् ॥ ५६ ॥

अथप्रातः समुत्थाय पुनरेकत्र सङ्गताः । साचमौनवतीताभिः परिभुक्तेव लक्षिता

तूष्णीं प्राप्याथ काशीं सा स्नात्वा मन्दाकिनीजले ।

सखीभिः सहिताऽपश्यल्लिङ्गं रत्नेश्वरं मम ॥ ६१ ॥

निर्वर्त्य नियमं साऽथ लज्जामुकुलितेक्षणा । निर्बन्धेन वयस्याभिः परिपृष्टाजगादह

रत्नावल्युवाच

अथरत्नेशयात्रायाः प्रयातासुस्वमन्दिरम् । भवतीषु स्मरन्त्येवतद्रत्नेशवचोऽमृतम्
सविशेषाङ्गसंस्काराऽविशंसंवेशमन्दिरम् । निद्रादरिद्रनयना तद्विलोकनलालसा
बलात्स्वप्नदशांप्राप्ताभाविनोऽर्थस्यगौरवात् । आत्मविस्मरणेहेतूततोमेद्वौबभूवतुः
तन्द्रीतदङ्गसंस्पर्शौममबोधापहारकौ । तन्द्र्या परवशाचाऽऽसं ततस्तत्स्पर्शनेन च
नजाने त्वथकिवृत्तंकाहं क्वाहं स चाथकः । तन्निर्जिगमिषुंसख्योयावद्धर्तुं प्रसारितः
दोःकङ्कणेन रिपुणा क्वणितन्तावदुत्कटम् । महतासिञ्जितेनाहं तेनाल्पम्परिबोधिता
सुखसन्तानपीयूषह्रदेपरिनिमज्ज्य वै । क्षणेन तद्वियोगाग्निकीलासुपतिताबलात्

किं कुलीयः स नो वेद्मि किंदेशीयः किमाख्यकः ।
दुनोति नितरां सख्यस्तद्विश्लेषानलो महान् ॥ ७० ॥

अनल्पोत्कलितं चेतःपुनस्तत्सङ्गमाशया । प्राणानां मे यियासूनामेकमेव महौषधम्
वयस्यानिशिभुक्तस्य तस्यैव पुनरीक्षणम् । भवतीनामधीनञ्च तत्पुनर्दर्शनं मम ॥

काऽलीकमालयो वक्ति स्निग्धमुग्धे सखीजने ।
तद्दर्शनेन स्थास्यन्ति प्राणा यास्यन्ति चान्यथा ॥ ७३ ॥
दशम्यवस्था सन्नह्येद् बाधितुं माऽधुना भृशम् ।
इति तस्या गिरः श्रुत्वा दूनायानितरां च ताः ॥ ७४ ॥
प्रवेपमानहृदयाः प्रोचुर्वीक्ष्य परस्परम् ॥ ७५ ॥

सख्य ऊचुः

यस्यग्रामो ननो नामनान्वयो नापिबुध्यते । सकथंप्राप्यतेभद्रेकउपायोविधीयताम्
इति रत्नावली श्रुत्वा ससन्देहांचतद्गिरम् । वयस्यास्तदवाप्तौमेयूयं कुण्ठिमुमूर्च्छह
इत्यर्धोक्तेनसावालायर्यंकुण्ठितशक्तयः । यद्वक्तव्यं त्वितितयायूयंकुण्ठीतिभाषितम्

ततस्तास्त्वरिताः सख्यः परितापोपहारकान् ।

वहुशः शीतलोपायान् व्यधुर्मोहप्रशान्तये ॥ ७६ ॥

व्यपैतिनयदामूर्च्छा तत्तच्छीतोपचारतः । तस्यास्तदैकया नीतंरत्नेशस्नपनोदकम्

तदुक्षणात्क्षणादेवतन्मूर्च्छा विरराम ह । सुप्तोत्थितेवसावादीन्मुहुःशिवशिवेतिच

स्कन्द उवाच

श्रद्धावतांस्वभक्तानामुपसर्गे महत्यपि । नोपायान्तरमस्त्येव विनेशचरणोदकम्

येव्याधयोपिदुःसाध्याबहिरन्तःशरीरगाः । श्रद्धयेशोदकस्पर्शात्तेनश्यन्त्येवनान्यथा

सेवितं येन सततम्भगवच्चरणोदकम् । तम्बाह्याभ्यन्तरशुचिं नोपसर्पति दुर्गतिः ॥

आधिभौतिकतापञ्च तापञ्चप्याधिदैविकम् ।

आध्यात्मिकं तथा तापं हरेच्छ्रीचरणोदकम् ॥ ८५ ॥

व्यपेतसंज्वराचाथ गन्धर्वतनया मुने !। उचितज्ञेतिहोवाचताःसखीःस्निग्धधीरधीः

रत्नावल्युवाच

शशिलेखेऽनङ्गलेखे!चित्रलेखेमदीहिते । यूयंकुण्ठितसामर्थ्याःकुतोवस्ताःकलाःक्वचा

मत्प्रियप्राप्तये सम्यगुपायोऽस्ति मयेक्षितः । रत्नेश्वरानुग्रहतोऽनुतिष्ठतहितं हिताः

शशिलेखेऽभिलषितप्राप्त्यै लेखांस्त्वमालिख ।

सँल्लिखानङ्गलेखे! त्वं यूनः सर्वावनीचरान् ॥ ८६ ॥

चित्रज्ञेचित्रलेखेत्वंपातालतलशायिनः । किञ्चिदाविर्भवच्चारुतारुण्यालङ्कृतीन्लिख

अथाकर्ण्यैति ताः संख्यास्तच्चातुर्यं प्रवर्ण्य च ।

लिलिखुः क्रमशः सख्यो यूनो यौवनशेवधीन् ॥ ९१ ॥

निर्यत्कौमारलक्ष्मीकान्पुंवत्त्वश्रीसमावृतान् ।

प्रातः सन्ध्येव गन्धर्वी नृपाद्यांस्तानवैक्षत ॥ ९२ ॥

सर्वान्सुरनिकायान्सा व्यलोकत शुभेक्षणा

न चाञ्चल्यंजहावक्ष्णोस्तेषु स्वर्लोकवासिषु ॥ ९३ ॥

ततो मध्यमलोकस्थान्मुनिराजकुमारकान् ।

विलोक्याऽपि न सा प्रीतिं क्वाप्याऽऽप प्रेमनिर्भरा ॥ ९४ ॥

अथरत्नावली बाला कर्णाभ्यर्णविलोचना । दृशौ व्यापारयामासबलिसद्मयुवस्वपि

दितिजान्दनुजान्वीक्ष्य सा गन्धर्वी कुमारकान् ।

रतिम्बबन्ध न क्वापि तापिता मान्मथैः शरैः ॥ ९६ ॥

सुधाकरकरस्पृष्टाप्यतिदूनाङ्गयष्टिका ।

पश्यन्ती नागयूनः सा किञ्चिदुच्छ्वसिताऽभवत् ॥ ९७ ॥

भोगिनस्तान्विलोक्याऽपि चित्रश्चित्रगतानथ ।

मनाक्संभुक्तभोगेव क्षणमासीत्कुमारिका ॥ ९८ ॥

यूनः प्रत्येकमद्राक्षीदशेषाच्छेषवंशजान् । तक्षकान्वयगांस्तद्वदथ वासुकिगोत्रजान्

पुलीकानन्तकर्कोटभद्रसन्तानगानपि । दृष्ट्वा नागकुमारांस्ताञ्छङ्खचूडमथैक्षत ॥

शङ्खचूडेक्षणादेव परांलज्जाम्बभारसा । उद्भिन्नपुलकाप्यासीदङ्गप्रत्यङ्गसन्धिषु॥

तत्त्रपाभरतोऽज्ञायि तत्कौमारहरो वरः । तया वैदग्ध्यवरया क्षणतश्चित्रलेखया

अथचित्रपटीं चित्रलेखाचित्रपटाञ्चलम् । परिक्षिप्यावृणोत्तूर्णम्परिहासैकपेशला ॥

रत्नावली चित्रलेखांह्रियामौनावलम्बिनी । दृशाकुटिलयाद्राक्षीत्प्रस्फुरद्दशनाम्बरा

कटाक्षितानङ्गलेखा तयाऽथ शशिलेखया । चित्रलेखा परिक्षिप्तपटाञ्चलमपाकरोत्

वसुभूतिसुतासाथ कन्या रत्नावली शुभा । शङ्खचूडान्ववाये तं रत्नचूडमवैक्षत ॥

तदीक्षणक्षणाद्दृष्टिरानन्दाश्रुभिरावृता । कपोलभित्तिरभवत्स्वेदोदकणिकाञ्चिता

सकम्पेगात्रलतिकाधृतरोमाञ्चकञ्चुका । चित्रन्यस्तेव तस्तम्भ क्षणम्मुकुलितानना

ततः सा चित्रलेखा तामेत्याश्वासयदातुराम् ।

मौत्सुक्यं व्रज गन्धर्वि! सिद्धस्तेऽद्य मनोरथः ॥ १०६ ॥

ज्ञतस्याऽवगतं सर्वंदेशनामान्वयादिकम् । मा विषीदालिसुलभस्त्वेष रत्नेश्वरार्पितः

अहो सद्दृग्वरावाप्त्या रत्नेशेनाऽसितोषिता । उत्तिष्ठयामःसदनंरत्नेशः सर्वदोहिनः

अथ दैववशाद्यान्त्यस्ता दृष्टा गगनाध्वगाः । सुबाहुना दानवेनपातालतलवासिना

गृहीत्वा ताश्चतस्रोऽपि निरगाद्दानवोगृहम् । हरिर्विकटदंष्ट्रास्यःप्रान्तरेहरिणीरिव

तास्तं विलोक्य गन्धर्व्यो दंष्ट्राविकटितााननम् । रुधिरारुणनेत्रंचजाता वेपथुभूमयः

हामातर्हापितस्त्राहि हाविधे! मा विधेहि तत् ।
यदेतत्कर्तुमारब्धमनाथास्वतिनिष्ठुरम् ॥ ११५ ॥
हादैव मन्दभाग्याभिः किमस्माभिरनुष्ठितम् ।
सुकृतेतरवार्ताऽपि नो चित्ते व्याहृता क्वचित् ॥ ११६ ॥

शिशुक्रीडनकंहित्वाहित्वारत्नेश्वरार्चनम् । पित्रोःस्वाधीनसच्चेष्टाइष्टंविद्मोनकिञ्चन
अधोभुवनगादीना हीनानाथेनकोऽत्रनः । त्राति त्राणार्थिनीर्बालाःशम्भोरत्नेशसर्वग,
इत्थंगन्धर्वतनया विलपन्तीःकृपातुरम् । शुश्राव नागराजोऽसौ रत्नचडोमहामनाः
कोऽसौ मत्स्वामिनोनामरत्नेशस्यमहेशितुः । लिङ्गराजस्यगृह्णातिकर्मबन्धनभेदिनः
पुनरप्यार्त्तरावं स श्रुत्वाबालामुखेरितम् । रत्नेश! रक्षरक्षेतिगृहीतास्त्रो विनिर्ययौ ॥
तंवसासवपानेन महामांसनिषेवणात् । अत्यन्तोन्मत्तदुश्चेष्टं रत्नचूडो निरैक्षत ॥
अध्याक्षिपच्चरेदुर्धर्शिष्टकन्यापहारक !। मद्दृष्टिगोचरं यातः क्वयास्यस्यद्यरेऽधम
मम बाणहतप्राणः प्रयाणं कुरु दुर्मते !। आर्तत्राणोद्यतमतेर्वैवस्वतपुरम्प्रति ॥ १२४
रत्नेश्वरस्य यैर्नाम प्रलयापद्यपि स्फुटम् । गृहीतंनभवाद्गभ्यस्तेषु भीतिर्भयात्मसु
रत्नेश्वरमहानामकृतत्राणास्तु ये नराः । तेषां जन्मजराव्याधिकलिकालभयं कुतः

इत्युक्त्वा ता भयत्रस्तास्तन्मुखप्रहितेक्षणाः ।
व्याघ्रघ्राता इव मृगीर्माभैषिष्टेत्युवाच सः ॥ १२७ ॥

इत्याश्वास्याथगन्धर्वीःसर्वैभुजगराजजः ।आकर्णपूर्णमाकृष्यकोदण्डम्प्राहिणोच्छरम्
सोऽपिक्रुद्धोदनुजराट्पदास्पृष्टभुजङ्गवत् । आविद्ध्यकालदण्डाभम्परिघंव्यसृजन्महत्
हृदिरत्नेश्वरंलिङ्गंयस्यसम्यग्विजृम्भते । अलातदण्डवत्तस्मिन्कालदण्डोऽपिजायते
अन्तरेव सच्चिच्छेद परिघं स्वमहेषुभिः । दुर्वृत्तस्य यथेहायुर्विच्छिद्येतान्तरैर्बहि
ततोऽस्यबाणंचिक्षेप कालानलसमप्रभम् । सबाणस्तस्य हृदयं प्रविश्य प्रगवेष्य च

प्राणानस्य विनिर्यात्य स्वयं तूणमगात्पुनः ।
हृदिस्थं तस्य दौरात्म्यं सर्वं विज्ञाय तत्त्वतः ॥ १३३ ॥
दिगङ्गनापुरः ख्यातुमिव नागाशुगो गतः ॥ १३४ ॥

अन्यायोपार्जितैर्द्रव्यै र्यः सुखम्भोक्तुमिच्छति ।
तानि द्रव्याणि यान्त्येव सप्राणानि कुतः सुखम् ॥ १३५ ॥
इति तं दानवं हत्वा नागराजो महाबली ।
प्रत्युवाचाऽथ ताः कन्याः का यूयं कस्य चात्मजाः ॥ १३६ ॥

दुरात्मना कुतोऽनेन सङ्गतादनुजन्मना । क्व वारत्नेश्वरं लिङ्गं भवतीभिर्विलोकितम्
यस्य नामाक्षरोच्चाराद्व्यपेतपरामापदः । यूयमाशु तदाख्यात येन जानामितत्त्वतः
इतिश्रुत्वागिरस्तस्यनितरांप्रेमनिर्भराः । परस्परंमुखंवीक्ष्यकोऽसौस्याद्दृष्टपूर्ववत्

अकारणसखा कोऽसौ प्रान्तरे समुपस्थितः ।
निजप्राणान्पणीकृत्य येन त्राताः स्म बालिकाः ॥ १४० ॥

अस्य सन्दर्शनादेवस्वभावचपलान्यपि । मन्थराणीन्द्रियाणिस्युःपरिपीयसुधामिव
यातुमन्यत्र नो नेत्रे प्रोत्सहेते यथा तथा । अन्यद्वस्त्वन्तरं प्रेक्ष्य रमणीयतरन्त्वपि
वचः पीयूषमाधुर्यं नितरां प्राप्य नः श्रुती । शब्दान्तरग्रहापेक्षां न कुर्वातेस्वजन्मनः
आप्लुतः पङ्गुतामेतौ पादौ नश्चञ्चलावपि । अमुं युवानमालोक्यचोरं नः सन्मनोमणेः

इति ब्रुवन्त्यस्ता बालाः परस्परमनुल्बणम् ।
दृष्ट्वाऽपि चित्रमध्यस्थं विविदुस्तन्न बालिकाः ॥ १४५ ॥
अतीव भीषणाकारदनुजस्याऽति साध्वसात् ।
अन्धीभूतेक्षणास्तं नाज्ञासिषुर्हरिणीक्षणाः ॥ १४६ ॥

ऊचुश्चतं युवानंतानिजजीवितरक्षिणम् । यदङ्गभवता पृष्टंस्नेहनिर्भरचेतसा ॥
तदाचक्ष्महे सर्वमवधेहि क्षणं मनः । इयंगन्धर्वराजस्य वसुभूतेस्तनूद्भवा ॥ १४८॥
कन्यारत्नावलीनामगुणरत्नमहाखनिः । वयं वयस्या एतस्याश्छायेवानुगताःसदा
आरभ्यबाल्यमप्येषालिङ्गं रत्नेश्वराभिधम् ।यातिपित्राप्यनुज्ञाताकाश्यामर्चयितुंसदा
वरोपि दत्तस्तेनास्यै प्रसन्नेनाथशम्भुना । हरिष्यतीति यःस्वप्नेकौमारंतेकुमारिके

तव नामसमानाख्यः स ते भर्ता भविष्यति ।
युवानं स्वप्नभोक्तारं प्राप्याऽप्येषा सुदुःखिता ॥ १५२ ॥

पुनस्तद्विरहोत्थेनवह्निनातीवतापिता । कलाकौशल्यतोऽस्माभिःसोपिचित्रेप्रदर्शितः

यस्य न ग्राम नामापि नान्वयोप्यवबुध्यते । तं दृष्ट्वा चित्रलिखितमप्येषाजीवितापुनः

ततो रत्नेश्वरं नत्वा स्वगृहायोत्सुकाऽभवत ।

यान्तीस्ततोऽनया सार्धं प्रान्तरे गगनाध्वनि ॥ १५५ ॥

अतर्किता गमश्चास्मान्धृत्वा पातालमाविशत् । अनन्तरम्भवानेव तं वेत्तिदनुजाधमम्

अङ्ग ! इत्येव वृत्तान्तो निजोऽस्माभिरुदीरितः ।

प्रसादं कुरु चास्माकं पुरः कोऽसि कृपानिधे! ॥ १५७ ॥

यदाप्रभृति चाऽस्माभिः सदृष्टोदुष्टदानवः । तदा प्रभृति नो नेत्रेविद्युते च हतप्रभे

कान्दिशीका भयत्रातर्नविद्मः किञ्चिदेवहि ।

क्व वयं का वयं कस्त्वं किं जातं किं भविष्यति ॥ १५६ ॥

निशम्येति स पुण्यात्मा नागराजकुमारकः ।

आश्वास्य ता भयत्रस्ताः प्रोवाचेदञ्च पुण्यधीः ॥ १६० ॥

मया सहसमायात रत्नेशं दर्शयामिवः । इत्याहूय सतानिन्ये क्रीडावापींसुखोदकाम्

विचित्रमणिसोपानांहंसकोककृतारवाम् ।कवीनांवासितव्याजात्स्वागतंकुर्वतीमिव

तत्र तेनाभ्यनुज्ञाताः क्रीडावाप्यां निमज्ज्य ताः ।

सचेलपुष्पाभरणाः प्रोन्ममज्जुस्ततः पुनः ॥ १६३ ॥

बहिर्निर्गत्यगन्धर्व्यः पश्यन्त्यःस्थगिताइव । रत्नेशालयमालोक्यकालराजसमीपतः

परस्परंततः प्रोचुर्गन्धर्व्योविस्मिताइव । स्वप्नोयंकिनुवासत्यंखेलोरत्नेश्वरस्यवा

वयमेवहिवा भ्रान्ता गन्धर्व्यो न वयंकिमु । किमेतन्नैव जानीमऐन्द्रजालिकखेलवत्

एषोत्तरवहा गङ्गा स्फुटमेव भवेदिह । शङ्खचूडस्यवाप्येषाशङ्खचूडालयस्त्वसौ

एतत्पञ्चनदंतीर्थमेषवागीश्वरालयः । यस्य सन्दर्शनादेव वाग्विभूतिर्विजृम्भते

शङ्खचूडेश्वरश्चैष शङ्खचूडप्रतिष्ठितः । यस्य सन्दर्शनात्पुंसां न भयंकालसर्पजम्

एषा मन्दाकिनी नाम दीर्घिका पुण्यतोयभूः ।

यस्यां कृतोदका मर्त्या मर्त्यलोके विशन्ति न ॥ १७० ॥

असावाशापुरी देवी यास्तुता त्रिपुरारिणा । त्रिपुरं जेतुकामेनमन्दाकिन्यास्तटेशुभे

याद्यापिपूजिता मर्त्यैराशाम्पूरयतेऽर्थिनाम् ।

मन्दाकिन्याः प्रतीच्यान्तु एष सिद्ध्यष्टकेश्वरः ॥ १७२ ॥

भवेद्यस्य सपर्यातो गृहे सिद्ध्यष्टकं स्फुटम् ।

कुण्डं सिद्ध्यष्टकाख्यं च तत्रैव विरजोदकम् ॥ १७३ ॥

यत्र स्नात्वा कृतश्राद्धो विरजस्को दिवं व्रजेत् ।

मूर्त्यस्ताः सिद्धयश्चाष्टौ याः काश्यां सर्वसिद्धिदाः ॥ १७४ ॥

सर्वसिद्धिप्रदश्चासौमहाराजविनायकः । विनायकाःप्रणश्यन्तियस्मैप्रणमतांनृणाम्

असौ सिद्धेश्वरस्योच्चैः प्रासादः काञ्चनोज्ज्वलः ।

रत्नध्वजपताकाश्च सिद्धिः स्याद्यद्विलोकनात ॥ १७६ ॥

क्षेत्रस्य मध्यमे भागे मध्यमेश्वरएषवै । मध्याधोलोकयोर्मध्येनवसेद्यस्यवीक्षणात्

मध्यमेशं समभ्यर्च्यनरोमध्यमविष्टपे । आसमुद्रक्षितीन्द्रःस्यात्ततोमोक्षञ्चविन्दति

ऐरावतेश्वरं लिङ्गं तत्प्राच्यामिष्टसिद्धिकृत् ।

दृश्यते यत्पताकायां रम्य ऐरावतो गजः ॥ १७६ ॥

वृद्धकालेश्वरस्यैष प्रासादोरत्ननिर्मितः । प्रतिदर्शं वसेद्यत्र रात्रौ चन्द्रः सतारकः

यस्यसन्दर्शनान्नृणां न कालः प्रभवेद्ध्रुवे । न कलिः प्रभवेत्सत्यं न च कल्मषराशयः

इति यावत्कथाश्चक्रुः सम्भ्रान्ता इव बालिकाः ।

तावद्वसुविभूतिः स गन्धर्वस्त्वरया ययौ ॥ १८२ ॥

नारदाच्छ्रुतवृत्तान्तः सुबाहुदनुजन्मनः । रत्नावलीसुता प्रीता ससखीका यथाहृता

रत्नेश्वरात्समायान्ति शून्ये गगनवर्त्मनि । यथाऽनयच्च पातालं यथायुद्धमभूत्पुनः

यथारत्नेशभक्तेन रत्नचूडेनघातितः । ससुबाहुर्दनुजनुर्महेष्वासेन चेषुणा ॥ १८५ ॥

यथा च पृष्ठवृत्तान्तो वापीमार्गेणचानयत् । शङ्खचूडस्यवापीं तां पातालेषुप्रवर्तिनीम्

यथा च प्राप्य निर्याताः काशीं दृष्ट्वाऽपि बालिकाः ।

भृशं सम्भ्रान्तिमापन्नाः पश्यन्त्योऽपि समुत्सुकाः ॥ १८७ ॥

दृष्ट्वागन्धर्वराजस्ताम्पुनर्जातामिवात्मजाम् । सवयस्यामनम्लानमुखपङ्कजसुश्रियम्
परिष्वज्य समाघ्राय ललाटफलकंमुहुः । अङ्कमारोप्य पप्रच्छ सर्वं वृत्तान्तमादरात्
अथसाकथयामास दनुजापहृतेः कथाम् । रत्नेश्वरवरावाप्ति स्वप्नावस्थांविहायच
रत्नावलीमनोवृत्तिविज्ञायाऽथ मुखेङ्गितैः । शशिलेखासमाचष्टस्पष्टवर्णैःसविस्तरम्
तुतोषनितरां सोऽथ गन्धर्वाधिपतिः कृतिः । प्रभावं वर्णयामाससमुदारत्नेश्वरस्य च

स्कन्द उवाच

आकर्णय मुनिश्रेष्ठ! विन्ध्यवृद्धिविवर्द्धन !। प्रत्यहं रत्नचूडोऽपि वापीमार्गेण संयमी
नागलोकात्समागत्य स्नात्वा मन्दाकिनीजले ।
रत्नेश्वरं समभ्यर्च्य रत्नाञ्जल्यष्टकेन वै ॥ १६४ ॥
सुवर्णपङ्कजान्यष्टौ समर्पयति हृष्टवत् । एकदा स्वप्नसमये रत्नेशो लिङ्गरूपधृक् ॥
रत्नचूडमुवाचेदं निजभक्तं दृढव्रतम् । दानवेन हृतां कन्यां मोचयिष्यति याम्भवान्
तं दानवं रणेजित्वा सा ते पत्नी भविष्यति ।
इति स्मरन्वरं सोऽथ नागराजो महामनाः ॥ १६७ ॥
तां कन्यां दानवंहत्वाविमोच्यनिजवीर्यतः । वापीमार्गेणपातालादानिनायपुनर्महीम्
स्वयं च साधयाञ्चक्रेप्रत्यहंनियमंसुधीः । लिङ्गंसमर्चयित्वाथकृत्वाचापिप्रदक्षिणम्
यावद्बहिःसमागच्छेद्रम्याद्रत्नेशमण्डपात् । तावद्गन्धर्वराजायताभिः सवसुभूतये
सोऽयं सोऽयं युवाधन्यस्तर्जन्यग्रेणदर्शितः । गन्धर्वराजस्तंदृष्ट्वानागराजकुमारकम्
अतीवस्मेरनयनः सम्प्रहृष्टतनूरुहः । मनस्येनञ्च संवर्ण्य तद्रूपं सवयोन्वयम् ॥
धन्योऽस्म्यनुगृहीतोऽस्मि रत्नेशेन वरार्पणात् ।
कन्या धन्यतरा चेयमनुरूपोऽस्ति यत्पतिः ॥ २०३ ॥
सम्प्रधार्येति हृद्येनं समाकार्य च सुन्दरम् । पृष्ट्वातन्नामगोत्रञ्च गणयित्वाबलाबलम्
रत्नेश्वरस्य पुरतस्तस्मै कन्यां ददौ मुदा । नीत्वागन्धर्वलोकञ्चकृतकौतुकमङ्गलम्
मधुपर्केण सम्पूज्य पाणिमग्राहयत्ततः । वैवाहिकेन विधिना ददौ रत्नान्यनेकशः ॥
शशिलेखाऽनङ्गलेखाचित्रलेखापिकुम्भज ! । विज्ञाप्य स्वजनेतारंवरयामासतंपतिम्

उपयम्य चतस्रोऽपिसगन्धर्वसुताःशुभाः । रत्नचूडोजगामाथताभिःस्वपितृमन्दिरम्
यथा चतसृभिः सार्धं श्रुतिभिः प्रणवः शिवम् ।
स्वपित्रोश्चरणौ नत्वा नवोढाभिः स नागराट् ॥ २०६ ॥
विनिवेदितवृत्तान्तो रत्नेशानुग्रहस्य च । उवासताभिःससुखं पितृभ्यामभिनन्दितः

ईश्वर उवाच

रत्नेश्वरस्य लिङ्गस्य ममस्थावररूपिणः । सर्वेषांसर्वदस्यास्यप्रभावोगिरिजेऽतुलः
अस्मिँल्लिङ्गे परां सिद्धिं प्राप्ताः सिद्धाः सहस्रशः ।
गुप्तमासीदिदं लिङ्गमद्य यावत्सुमध्यमे ॥ २१२ ॥
तव पित्रा हिमवता मम भक्तेन सर्वथा । पुण्यार्जितैर्महारत्नैरत्नेशः प्रकटीकृतः ॥
अस्मिँल्लिङ्गे ममप्रीतिर्नितरामद्रिराजजे !। वाराणस्यामिदं लिङ्गं पूजनीयं प्रयत्नतः
नानारत्नानिलभ्यन्ते रत्नेशानुग्रहादुमे !। स्त्रीरत्नपुत्ररत्नादि स्वर्गमोक्षावपि प्रिये
योऽत्र रत्नेश्वरं नत्वा मृतो देशान्तरेष्वपि ।
न स स्वर्गादिहागच्छेत्कल्पकोटिशतैरपि ॥ २१६ ॥
असितायां चतुर्दश्यामुपोष्य निशि जागरात् ।
रत्नेशसन्निधौ देवि! मम सान्निध्यमाप्नुयात् ॥ २१७ ॥
अस्यलिङ्गस्य पूर्वेणत्वयाजन्मान्तरेप्रिये । दाक्षायणीश्वरंलिङ्गंमद्भक्त्यात्रप्रतिष्ठितम्
तस्य सन्दर्शनादेवनरो यातिदुर्गतिम् । अम्बिकानामगौरीत्वंतत्राहंचाम्बिकेश्वरः
मूर्तःषडाननस्तत्र तवपुत्रः सुमध्यमे !। एतत्त्रयं नरो दृष्ट्वा न गर्भं प्रविशेदुमे ॥ २२०
रत्नेश्वरस्य माहात्म्यं मयातेसमुदीरितम् । गोपनीयंप्रयत्नेनकलिकल्मषचेतसाम्
इदंरत्नेश्वराख्यानं यः पठिष्यति सर्वदा । सपुत्रपौत्रपशुभिर्नवियुज्येत कर्हिचित्
श्रुत्वा रत्नेश्वरोत्पत्तिं सेतिहासां नरोत्तमः ।
अनूढो लभते सत्यं कन्यारत्नं कुलोचितम् ॥ २२३ ॥
कन्यापीमं समाकर्ण्य त्वितिहासं मनोरमम् ।
श्रद्धया सत्पतिं प्राप्य भविष्यति पतिव्रता ॥ २२४ ॥

इतिहासमिमं श्रुत्वानारी वापुरुषोऽपि वा । न जात्विष्टवियोगाग्नितापेन परितप्यते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्रयांसंहितायां चतुर्थे काशीखण्डे
रत्नेश्वरप्रशंसनंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः

कृत्तिवासःसमुद्भववर्णनम्

स्कन्द उवाच

अन्यच्च श्रृणु विप्रेन्द्र! वृत्तान्तं तत्र सम्भवम् । महाश्चर्यप्रजननं महापातकहारि च
इत्थं कथां प्रकुर्वाणे रत्नेशस्य महेश्वरे । कोलाहलो महानासीत्त्रातत्रातेति सर्वतः
महिषासुरपुत्रोऽसौ समायाति गजासुरः । प्रमथन्प्रमथान्सर्वान्निजवीर्यमदोद्धतः ॥
यत्र यत्र धरायां स चरणं प्रमिणोति हि । अचलोल्लोलयाश्चक्रे तत्र तत्रास्यभारतः
ऊरुवेगेन तरवः पतन्ति शिखरैः सह । यस्यदोर्दण्डघातेन चूर्णाःस्युश्चशिलोच्चयाः

यस्य मौलिजसङ्घर्षाद्घना व्योम त्यजन्त्यपि ।
नीलिमानं न चाद्यापि जह्युस्तत्केशसङ्गजम् ॥ ६ ॥

यस्य निःश्वाससंभारैरुत्तरङ्गामहाब्धयः । नद्योऽप्यमन्दकल्लोलाभवन्तितिमिभिःसह

योजनानां सहस्राणि न वयस्यसमुच्छ्रयः ।
तावानेव हि विस्तारस्तनोर्मायाविनोस्य हि ॥ ८ ॥

यन्नेत्रयोःपिङ्गलिमातथातरलिमापुनः । विद्युतानोज्झ्यतेऽद्यापिसोयमायातिसत्वरः

यां यां दिशं समभ्येति सोऽयं दुःसहदानवः ।
सा सा समीभवेदस्य साध्वसादिवदिग्ध्रुवम् ॥ १० ॥

ब्रह्मलब्धवरश्चायं तृणीकृतजगत्त्रयः । अवध्योऽहं भवामीतिस्त्रीपुंसैः कामनिर्जितैः
ततस्त्रिशूलहेतिस्तमायान्तं दैत्यपुङ्गवम् । विज्ञायावध्यमन्येन शूलेनाभिजघान तम्

प्रोतस्तेन त्रिशूलेन सचदैत्यो गजासुरः । छत्रीकृतमिवात्मानं मन्यमानो जगौ हरम्

गजासुर उवाच

त्रिशूलपाणे! देवेश!जाने त्वां स्मरहारिणम् । तव हस्ते ममवधः श्रेयानेवपुरान्तक
किञ्चिद्विज्ञप्तुमिच्छामि अवधेहि ममेरितम् । सत्यं ब्रवीमिनासत्यंमृत्युञ्जयविचारय

त्वमेको जगतां वन्द्यो विश्वस्योपरि संस्थितः ।
अहं त्वदुपरिष्टाच्च स्थितोऽस्मीति जितं मया ॥ १६ ॥

धन्योस्म्यनुगृहीतोस्मित्वत्त्रिशूलाग्रसंस्थितः । कालेनसर्वैर्मर्तव्यंश्रेयसेमृत्युरीदृशः
इति तस्य वचः श्रुत्वा देवदेवःकृपानिधिः । प्रोवाचप्रहसञ्छम्भुर्घटोद्भव! गजासुरम्

ईश्वर उवाच

गजासुर! प्रसन्नोऽस्मि महापौरुषशेवधे !। स्वानुकूलं वरं ब्रूहि ददामि सुमतेऽसुर

इत्याकर्ण्य स दैत्येन्द्रः प्रत्युवाच महेश्वरम् ।

गजासुर उवाच

यदि प्रसन्नो दिग्वासस्तदा नित्यं वसान मे ॥ २० ॥
इमां कृत्तिं विरूपाक्ष! त्वत्त्रिशूलाग्निपाविताम् ।
स्वप्रमाणां सुखस्पर्शां रणाङ्गणपणिकृताम् ॥ २१ ॥
दृष्टगन्धिः सदैवास्तु सदैवास्त्वतिकोमला ।
सदैव निर्मला चास्तु सदैवास्त्वतिमण्डनम् ॥ २२ ॥

महातपोऽनलज्वालाःप्राप्यापिसुचिरंविभो । नदग्धाकृत्तिरेषामेपुण्यगन्धनिधिस्ततः
यदि पुण्यवती नैषाममकृत्तिर्दिगम्बर !। तदा त्वदङ्गसङ्गोऽस्याः कथं जातोरणाङ्गणे
अन्यच्च मेवरंदेहि यदि तुष्टोऽसिशङ्कर !। नामास्तुकृत्तिवासास्तेप्रारभ्याद्यतनंदिनम्
इति तस्यवचः श्रुत्वातथेत्युक्त्वाचशङ्करः । पुनःप्रोवाचतं दैत्यं भक्तिनिर्मलमानसम्

ईश्वर उवाच

श्रृणुपुण्यनिधे दैत्य वरमन्यं सुदुर्लभम् । अविमुक्ते महाक्षेत्रे रणत्यक्तकलेवर !॥
इदं पुण्यशरीरं ते क्षेत्रेऽस्मिन्मुक्तिसाधने । ममलिङ्गंभवत्वत्र सर्वेषां मुक्तिदायकम्

कृत्तिवासेश्वरं नाम महापातकनाशनम् । सर्वेषामेव लिङ्गानां शिरोभूतमिदं वरम् ॥
यावन्तिसन्तिलिङ्गानि वाराणस्यांमहान्त्यपि । उत्तमंतावतामेतदुत्तमाङ्गवदुत्तमम्
मानवानांहितायाऽत्रस्थास्येऽहं सपरिग्रहः । दृष्टेनाने नलिङ्गेन पूजितेन स्तुतेन च

कृतकृत्यो भवेन्मर्त्यः संसारं न विशेत्पुनः ॥ ३१ ॥
रुद्राः पाशुपताः सिद्धा ऋषयस्तत्त्वचिन्तकाः ।
शान्ता दान्ता जितक्रोधा निर्द्वन्द्वा निष्परिग्रहाः ॥ ३२ ॥

अविमुक्तेस्थिताये तुममभक्तामुमुक्षवः । मानापमानयोस्तुल्याःसमलोष्टाश्मकाञ्चनाः
कृत्तिवासेश्वरेलिङ्गेस्थास्येऽहं तदनुग्रहे । दशकोटिसहस्राणितीर्थानि प्रतिवासरम्
त्रिकालमागमिष्यन्ति कृत्तिवासेनसंशयः । कलिद्वापरसम्भूता नराः कल्मषबुद्धयः ॥
सदाचारविनिर्मुक्ताःसत्यशौचपराङ्मुखाः ।माययादम्भलोभाभ्यांमोहाहंकृतिसंयुताः
शूद्रान्नसेविनोविप्राजिह्वालाअतिलालसाः । सन्ध्यास्नानजपेज्यासुदूरीकृतमनोधियः
कृत्तिवासेश्वरंप्राप्य सर्वपापविवर्जिताः । सुखेनमोक्षमेष्यन्ति यथा सुकृतिनस्तथा
कृत्तिवासेश्वरंलिङ्गंसेव्यंकाश्यां ततो नरैः । जन्मान्तरसहस्रेषुमोक्षोऽन्यत्रसुदुर्लभः
कृत्तिवासेश्वरे लिङ्गेलभ्यस्त्वेकेन जन्मना । पूर्वजन्मकृतं पापं तपोदानादिभिः शनैः

नश्येत्सद्यो विनश्येत कृत्तिवासेश्वरेक्षणात् ॥ ४० ॥

कृत्तिवासेश्वरं लिङ्गं येऽर्चयिष्यन्तिमानवाः । प्रविष्टास्तेशरीरेमेतेषां नास्तिपुनर्भवः
अविमुक्तेऽत्र वस्तव्यं जप्तव्यं शतरुद्रियम् । कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनःपुनः
सप्तकोटिमहारुद्रैःसुजप्तैर्यत्फलम्भवेत् । तत्फलंलभ्यते काश्यांपूजनात्कृत्तिवाससः

माघकृष्णचतुर्दश्यामुपोष्य निशि जागृयात् ।
कृत्तिवासेशमभ्यर्च्य यः स यायात्परां गतिम् ॥ ४४ ॥

शुक्लायांपञ्चदश्यां यश्चैत्र्यांकर्तामहोत्सवम् । कृत्तिवासेश्वरेलिङ्गे न सगर्भंप्रवेक्ष्यते
कथयित्वेतिदेवेशस्तत्कृत्तिम्परिगृह्य च । गजासुरस्य महतींप्रावृणोद्धरिदम्बरः ॥
महामहोत्सवोजातस्तस्मिन्नहनिकुम्भजः । कृत्तिवासत्वमापेदेयस्मिन्देवोदिगम्बरः
यत्रच्छत्रीकृतो दैत्यःशूलमारोप्यभूतले । तच्छूलोत्पाटनाज्जातं तत्र कुण्डं महत्तरम्

तस्मिन्कुण्डेनरः स्नात्वाकृत्वाचपितृतर्पणम् । कृत्तिवासेश्वरंदृष्ट्वाकृतकृत्योनरोभवेत्

स्कन्द उवाच

तस्मिंस्तीर्थेतुयद्द् वृत्तांतदगस्तेनिशामय । काकाहंसत्वमापन्नास्तत्तीर्थस्यप्रभावतः
एकदा कृत्तिवासेतुचैत्र्यां यात्राऽभवत्पुरा । अन्नं राशीकृतं तत्र ह्युपहारसमुद्भवम्
बहुदेवलकैर्विप्र! तं दृष्ट्वा पक्षिणोऽमिलन् । परस्परं तदन्नार्थंयुध्यन्तो व्योमवर्मनि
बलिपुष्टैरपुष्टाङ्गा रटन्तः करटाः कटु । बलिभिश्चातिपुष्टाङ्गैरबलाश्चञ्चुभिर्हताः ॥

ते हन्यमाना न्यपतंस्तस्मिन्कुण्डे नभोऽङ्गणात् ।
आयुः शेषेण सन्त्राता हंसीभूतास्तु वायसाः ॥ ५४ ॥

आश्चर्यवन्तस्तत्रत्या यात्रायांमिलिताजनाः । ऊचुरङ्गुलिनिर्देशैरहोपश्यतपश्यत

अस्मासु वीक्षमाणेषु काकाः कुण्डेऽत्र येऽपतन् ।
धार्त्तराष्ट्रास्तुते जातास्तीर्थस्याऽस्य प्रभावतः ॥ ५६ ॥

हंसतीर्थं तदारभ्य कृत्तिवाससमीपतः । नाम्नाख्यातमभूल्लोके तत्कुण्डं कलशोद्भव
अतीवमलिनात्मानो महामलिनकर्मभिः ! क्षणान्निर्मलतां यान्तिहंसतीर्थकृतोदकाः
काश्यांसदैव वस्तव्यं स्नातव्यं हंसतीर्थके । द्रष्टव्यः कृत्तिवासेशःप्राप्तव्यंपरमंपदम्
काश्यां लिङ्गान्यनेकानि मुनेसन्तिपदेपदे । कृत्तिवासेश्वरंलिङ्गंसर्वलिङ्गशिरःस्मृतम्
कृत्तिवासं समाराध्य भक्तियुक्तेन चेतसा । सर्वलिङ्गाराधनजं फलंकाश्यामवाप्यते
जपोदानं तपोहोमस्तर्पणं देवतार्चनम् । समीपे कृत्तिवासस्य कृतं सर्वमनन्तकम्
तीर्थं त्वनादिसंसिद्धमेतत्कलशसम्भव !। पुनर्देवस्य सान्निध्यादाविरासीन्महेशितुः

एतानि सिद्धलिङ्गानि छन्नानि स्युर्युगे युगे ।
अवाप्य शम्भुसान्निध्यं पुनराविर्भवन्ति हि ॥ ६४ ॥

हंसतीर्थस्य परितो लिङ्गानामयुतं मुने । प्रतिष्ठितं मुनिवरैरत्राऽस्ति द्विशतोत्तरम्
एकैकंसिद्धिदंनृणामविमुक्तनिवासिनाम् । लिङ्गंकात्यायनेशादिच्यवनेशान्तमेवहि

लोमशेशं महालिङ्गं लोमशेन प्रतिष्ठितम् ।
कृत्तिवासः प्रतीच्यांतु तद्द दृष्ट्वा क्वाऽन्तकाद्भयम् ॥ ६७ ॥

मालतीशं शुभं लिङ्गं कृत्तिवासोत्तरेमहत्। सपर्ययित्वातल्लिङ्गं राजागजपतिर्भवेत्
अन्तकेश्वरसञ्ज्ञं च लिङ्गं तदुद्रदिक्स्थितम्।
अतिपापोऽपि निष्पापो जायते तद्विलोकनात्॥ ६१॥
जनकेशं महालिङ्गं तत्पार्श्वे ज्ञानदं परम्। तल्लिङ्गवरिवस्यातो ब्रह्मज्ञानमवाप्यते॥
तदुत्तरे महामूर्त्तिरसिताङ्गोऽस्तिभैरवः। तस्यदर्शनतः पुंसां नभवेद्यमदर्शनम्॥
शुष्कोदरी च तत्राऽस्ति देवी विकटलोचना।
कृत्तिवासादुदीच्यान्तु काशी प्रत्यूहभक्षिणी॥ ७२॥
अग्निजिह्वोऽस्ति वेतालस्तस्या देव्यास्तु नैर्ऋते।
ददाति वाञ्छितां सिद्धिं सोऽर्चितो भौमवासरे॥ ७३॥
वेतालकुण्डं तत्रास्ति सर्वव्याधिविघातकृत्।
तत्कुण्डोदकसंस्पर्शाद्व्रणविस्फोटरुग्व्रजेत्॥ ७४॥
वेतालकुण्डे सुस्नातावेतालंप्रणिपत्यच। लभेतवाञ्छितांसिद्धिं दुर्लभांसर्वदेहिभिः
गणोऽस्ति तत्रद्विभुजश्चतुष्पात्पञ्चशीर्षकः। तस्यसम्वीक्षणादेवपापंयातिसहस्रधा
तदुत्तरे मुनेरुद्रश्चतुःश्रृङ्गोऽस्तिभीषणः। त्रिपादस्तुद्विशीर्षाचहस्ताःस्युःसप्तएवहि
रोरूयते वृषाकारस्त्रिधा बद्धः स कुम्भज!। काशीविघ्नकरायेचये काश्यांपापबुद्धयः
तेषाञ्च संछिदांकर्तुमहं धृतकुठारकः। ये काश्यां विघ्नहर्तारो ये काश्यां धर्मबुद्धयः
सुधाघटकरश्चाहंतद्वंशपरिषेककृत्। तं दृष्ट्वा वृषरुद्रं वै पूजयित्वा तु भक्तितः॥
महामहोपचारैश्च न विघ्नैरभिभूयते। मणिप्रदीपोनागोऽस्ति तस्माद्रुद्रादुदग्दिशि
मणिकुण्डं तदग्रे तुविषव्याधिहरं परम्। तस्मिन्कुण्डेकृतस्नानस्तंनागंपरिवीक्ष्यच
मणिमाणिक्यसम्पूर्णगजाश्वरथसङ्कुलम्। स्त्रीरत्नपुत्ररत्नैश्च समृद्धं राज्यमाप्नुयात्
कृत्तिवासेश्वरं लिङ्गं काश्यां यैर्न विलोकितम्।
ते मर्त्यलोके भाराय भुवो भूता न संशयः॥ ८४॥
स्कन्द उवाच
कृत्तिवासःसमुत्पत्तिं ये श्रोष्यन्तीह मानवाः।

तल्लिङ्गदर्शनाच्छ्रेयो लप्स्यन्ते नाऽत्र संशयः॥ ८५॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे [काशीखण्डे कृत्तिवासःसमुद्भवो नामाऽष्टषष्टितमोऽध्यायः॥ ६८॥

एकोनसप्ततितमोऽध्यायः

अष्टषष्ट्यायतनसमागमवर्णनम्

स्कन्द उवाच
श्रृण्वगस्त्य! तपोराशे! काश्यां लिङ्गानि यानि वै।
सेवितानि नृणां मुक्त्यै भवेयुर्भावितात्मनाम्॥ १॥
कृत्तिप्रावरणं यत्र कृतन्देवेन लीलया। रुद्रावास इति ख्यातंतत्स्थानंसर्वसिद्धिदम्
स्थिते तत्रोमया सार्धं स्वेच्छया कृत्तिवाससि।
आगत्य नन्दीविज्ञप्तिञ्चक्रे प्रणतिपूर्वकम्॥ ३॥
देवदेवेशविश्वेश प्रासादाः सुमनोहराः। सर्वरत्नमया रम्याःसाष्टाषष्टिरभूदिह॥ ४॥
भूर्भुवः स्वस्तलेयानि शुभान्यायतनानिह। मुक्तिदान्यपि तानीहमयानीतानिसर्वतः
यतो यच्च समानीतं यत्र यच्च कृतास्पदम्। कथयिष्याम्यहं नाथक्षणंतदवधार्यताम्
स्थाणुर्नाममहालिङ्गं देवदेवस्यमोक्षदम्। कुरुक्षेत्रादिहोद्भूतंकलाशेषोऽस्तितत्रवै
तदग्रेसन्निहत्याख्या महापुष्करिणीशुभा। लोलार्कपश्चिमे भागे कुरुक्षेत्रस्थलीतुसा
तत्र स्नातं हुतं जप्तंतत्तं दत्तंशुभार्थिभिः। कुरुक्षेत्राद्भवेत्सत्यंकोटिकोटिगुणाधिकम्
नैमिषाद्देवदेवोऽत्र ब्रह्मावर्तेन संयुतः। तत्रांशमात्रं संस्थाप्य काश्यामाविरभूद्विभो!
ढुण्ढिराजोत्तरे भागे सिद्धिदं साधकस्य वै।
लिङ्गं वै देवदेवाख्यं तदग्रे कूपउत्तमः॥ ११॥
ब्रह्मावर्त इति ख्यातः पुनरावृत्तिहृन्नृणाम्। तत्कूपाद्भिः कृतस्नानोदेवदेवंसमर्चयन्

तत्पुण्यं नैमिषारण्यात्कोटिकोटिगुणं स्मृतम् ।
गोकर्णायतनादत्र स्वयमाविरभून्महत् ॥ १३ ॥

लिङ्गं महाबलंनामसाम्बादित्यसमीपतः । दर्शनात्स्पर्शानाद्यस्य क्षणादेनोमहाबलम्
वाताहतस्तूलराशिरिव विद्रातिदूरतः । कपालमोचनपुरो दृष्ट्वा लिङ्गं महाबलम्

महाबलमवाप्नोति निर्वाणनगरं व्रजेत् ।
ऋणमोचनतः प्राच्यां प्रभासात्क्षेत्रसत्तमात् ॥ १६ ॥

शशिभूषणसञ्ज्ञन्तु लिङ्गमत्र प्रतिष्ठितम् । तल्लिङ्गसेवनान्मर्त्यः शशिभूषणतां व्रजेत्

प्रभासक्षेत्रयात्रायाः पुण्यं प्राप्नोति कोटिकृत् ।
उज्जयिन्या महाकालः स्वयमत्रागतो विभुः ॥ १८ ॥
यन्नामस्मरणादेव न भयं कलिकालतः ।
प्रणवाख्यान्महालिङ्गात्प्राच्यां कल्मषनाशनम् ॥ १६ ॥

महाकालाभिधंलिङ्गंदर्शनान्मोक्षदम्परम् । अयोगन्धेश्वरंलिङ्गंपुष्करात्तीर्थसत्तमात्
आविरासीदिह महत्पुष्करेण सहैव तु । मत्स्योदर्युत्तरे भागेदृष्ट्वाऽयोगन्धमीश्वरम्

स्नात्वा ऽयोगन्धकुण्डे तु भवात्तारयतेपितॄन् ।
महानादेश्वरंलिङ्गमट्टहासादिहागतम् ॥ २२ ॥

त्रिलोचनादुदीच्यान्तु तद्दृष्टंमुक्तयेमतम् । महोत्कटेश्वरंलिङ्गं मरुत्कोटादिहागतम्

कामेश्वरोत्तरे भागे दृष्टं विमलसिद्धिदम् ॥ २३ ॥
विश्वस्थानादिहायातं लिङ्गं वै विमलेश्वरम् ।
स्वर्लीनात्पश्चिमे भागे दृष्टं विमलसिद्धिदम् ॥ २४ ॥

महाव्रतं महालिङ्गं महेन्द्रादिहसंस्थितम् । स्कन्देश्वरसमीपे तु महाव्रतफलप्रदम्
वृन्दारकर्षिवृन्दानां स्तुवतां प्रथमेयुगे । उत्पन्नंयन्महालिङ्गं भूमिंभित्त्वासुदुर्भिदाम्
महादेवेति तैरुक्तं यन्मनोरथपूरणात् । वाराणस्यां महादेवस्तदारभ्याभवच्चयत्
मुक्तिक्षेत्रं कृतं येन महालिङ्गेन काशिका । अविमुक्ते महादेवं यो द्रक्ष्यत्यत्र मानवः
शम्भुलोके गमस्तस्य यत्र तत्र मृतस्यहि । अविमुक्ते प्रयत्नेनतत्संसेव्यंमुमुक्षुभिः

कल्पान्तरेऽपि न त्यक्तं कदाप्यानन्दकाननम् । येन लिङ्गस्वरूपेण महादेवेन सर्वथा
तत्प्रासादोऽयमतुलः सर्वरत्नमयः शुभः । हिरण्यगर्भतीर्थाच्च प्रतीच्यांक्षेत्ररक्षकम्
वाराणस्यामधिष्ठात्री देवताभिलाषदा । महादेवेतिसञ्ज्ञा वैसर्वलिङ्गस्वरूपिणी
वाराणस्यांमहादेवो दृष्टोयैर्लिङ्गरूपधृक् । तेनत्रैलोक्यलिङ्गानि दृष्टानीह न संशयः
वाराणस्यांमहादेवं समभ्यर्च्य सकृन्नरः । आभूतसम्प्लवंयावच्छिवलोके वसेन्मुदा
पवित्रपर्वणि सदा श्रावणे मासि यत्नतः । लिङ्गे पवित्रमारोप्य महादेवेन गर्भभाक्

पितामहेश्वरं लिङ्गं गयातीर्थादिहागतम् ।
फल्गुप्रभृतिभिस्तीर्थैः सार्धकोट्यष्टसंमितैः ॥ ३६ ॥

धर्मेण यत्र वै तप्तं युगानामयुतं शतम् । साक्षीकृत्य महालिङ्गं श्रीमद्धर्मेश्वराभिधम्
पितामहेश्वरं लिङ्गं तत्राभ्यर्च्य नरो मुदा । त्रिःसप्तकुलसंयुक्तो मुच्यते नात्र संशयः
प्रयागात्तीर्थराजाच्च शूलटङ्को महेश्वरः । तीर्थराजेन सहितःस्थित आगत्यवैस्वयम्

निर्वाणमण्डपाद्रम्यादवाच्यामतिनिर्मलः ।
प्रासादो मेरुणा यस्य स्पर्धते काञ्चनोज्ज्वलः ॥ ४० ॥

देवेनैव वरो दत्तो यत्र पूर्वं युगान्तरे । पूज्यो महेश्वरः काश्यां प्रथमं कलुषापहः
यःप्रयागइहस्नातो नमस्यति महेश्वरम् । समभ्यर्च्य विधानेन महासम्भारविस्तरैः

प्रयागस्नानजातपुण्याच्छूलटङ्कविलोकनात् ।
सप्राप्नुयान्न सन्देहः पुण्यं कोटिगुणोत्तरम् ॥ ४३ ॥

शङ्कुकर्णान्महाक्षेत्रान्महातेज इतीरितम् । लिङ्गमाविरभूदत्र महातेजोविवृद्धिदम्

महातेजोनिधिस्तस्य प्रासादोऽतीवनिर्मलः ।
ज्वालाजटिलिताकाशो माणिक्यैरेव निर्मितः ॥ ४५ ॥

तल्लिङ्गदर्शनात्स्पर्शात्स्तवनाच्च समर्चनात् । प्राप्यते तत्परं धामयत्र गत्वान शोचते
विनायकेश्वरात्पूर्वं महातेजसमर्चनात् । तेजोमयेन यानेन याति माहेश्वरम्पदम् ॥
रुद्रकोटिसमाख्याताात्तीर्थात्परमपावनात् । महायोगीश्वरंलिङ्गमाविश्चक्रेस्वयम्परम्
पार्वतीश्वरलिङ्गस्यसमीपे सर्वसिद्धिकृत् । तल्लिङ्गदर्शनात्पुंसां कोटिलिङ्गफलंभवेत्

तत्प्रासादस्य परितो रुद्राणां कोटिसम्मिताः ।
प्रासादा रम्यसंस्थाना निर्मिता रुद्रमूर्तिभिः ॥ ५० ॥
काश्यांरुद्रस्थलीसा तुपठ्यतेवेदवादिभिः । रुद्रस्थल्यांमृतायेवै कृमिकीटपतङ्गकाः पशुपक्षिमृगा मर्त्याम्लेच्छा वाऽप्यथ दीक्षिताः । तेषान्तुरुद्रीभूतानांपुनरावृत्तिरत्र न जन्मान्तरसहस्रेषु यत्पापं समुपार्जितम् । रुद्रस्थलीम्प्रविष्टस्यतत्सर्वंव्रजतिक्षयम्
अकामो वा सकामो वा तिर्यग्योनिगतोऽपि वा ।
रुद्रस्थल्यां त्यजन्प्राणान्परं निर्वाणमाप्नुयात् ॥ ५४ ॥
स्वयमेकाम्बरात्क्षेत्रात्कृत्तिवासाइहागतः । कृत्तिवाससिलिङ्गेत्रस्वयमेवव्यवस्थितः
अस्मिन्स्थाने स्वभक्तानां साम्बः सर्षिगणो विभुः ।
स्वयं चोपदिशेद्ब्रह्म श्रुतौ श्रुतिभिरीडितम् ॥ ५६ ॥
क्षेत्रेऽत्रसिद्धिदेप्राप्तश्चण्डीशोमरुजाङ्गलात् । प्रचण्डपापसङ्घातंखण्डयेच्छतधेक्षणात् पाशपाणिगणाध्यक्षसमीपे यः प्रपश्यति । चण्डीश्वरंमहालिङ्गंसयातिपरमांगतिम् कालञ्जरान्नीलकण्ठस्तिष्ठेदत्र स्वयं विभुः । गणेशाद्दन्तकूटाख्यात्समीपे भवनाशनः
नीलकण्ठेश्वरं लिङ्गं काश्यां यैः परिपूजितम् ।
नीलकण्ठास्त एव स्युस्तएव शशिभूषणाः ॥ ६० ॥
काश्मीरादिह सम्प्राप्तं लिङ्गं विजयसञ्ज्ञितम् ।
सदा विजयदम्पुसाम्प्राच्यां शालकटङ्कटात् ॥ ६१ ॥
रणे राजकुले द्यूते विवादे सर्वदैव हि । विजयो जायते पुंसां विजयेशसमर्चनात्
ऊर्ध्वरेतास्त्रिदण्डायाः सम्प्राप्तोऽत्र स्वयं विभुः ।
कूश्माण्डकं गणाध्यक्षं पुरस्कृत्य व्यवस्थितः ॥ ६३ ॥
ऊर्ध्वांगतिमवाप्नोति वीक्षणादूर्ध्वरेतसः । ऊर्ध्वरेतसि ये भक्तानहितेषामधोगतिः
मण्डलेश्वरतः क्षेत्राल्लिङ्गं श्रीकण्ठसञ्ज्ञितम् ।
विनायकान्मण्डसञ्ज्ञादुत्तरस्यां व्यवस्थितम् ॥ ६५ ॥
श्रीकण्ठस्य च येभक्ताः श्रीकण्ठाएवतेनराः । नेह श्रियावियुज्यन्ते न परत्र कदाचन

छागलाण्डान्महातीर्थात्कपर्दीश्वरसञ्ज्ञितः । पिशाचमोचनेतीर्थेस्वयमाविरभूद्विभुः कपर्दीशंसमभ्यर्च्य न नरोनिरयंव्रजेत् । न पिशाचत्वमाप्नोतिकृत्वात्राप्यघमुत्तमम् आम्रातकेश्वरात्क्षेत्राल्लिङ्गं सूक्ष्मेशसञ्ज्ञितम् । स्वयमभ्यागतश्चात्रक्षेत्रे वैश्रेयसाम्पदे विकटद्विजसञ्ज्ञस्य गणेशस्यसमीपतः । दृष्ट्वा सूक्ष्मेश्वरंलिङ्गंगतिंसूक्ष्मामवाप्नुयात् सम्प्राप्तमिह देवेशं जयन्तं मधुकेश्वरात् । लम्बोदराद्गणपतेः पुरस्तात्तदवस्थितम्
जयन्तेश्वरमालोक्य स्नात्वा गङ्गाजले शुभे ।
प्राप्नुयाद्वाञ्छितां सिद्धिं सर्वत्र विजयी भवेत् ॥ ७२ ॥
प्रादुश्चकार देवेशः श्रीशैलात्त्रिपुरान्तकः । श्रीशैलशिखरंदृष्ट्वा यत्फलं समुदीरितम् त्रिपुरान्तकमालोक्य तत्फलं हेलयाप्यते । विश्वेशात्पश्चिमेभागेत्रिपुरान्तकमीश्वरम्
सम्पूज्य परया भक्त्या न नरो गर्भमाविशेत् ।
सौम्यस्थानादिहायातो भगवान्कुक्कुटेश्वरः ॥ ७५ ॥
वक्रतुण्डगणाध्यक्षसमीपे सोपतिष्ठते । तद्दर्शनादर्चनाच्चकरस्थाः सर्वसिद्धयः ॥ जालेश्वरात्त्रिशूलीच स्वयमीशः समागतः । कूटदन्ताद्गणपतेःपुरस्तात्सर्वसिद्धिदः रामेश्वरान्महाक्षेत्राज्जटीदेवः समागतः । एकदन्तोत्तरे भागे सोऽर्चितः सर्वकामदः
त्रिसन्ध्यात्क्षेत्रतो देवस्त्र्यम्बकोऽस्ति समागतः ।
त्रिमुखात्पूर्वदिग्भागे पूजितस्त्र्यम्बकत्वकृत् ॥ ७६ ॥
हरेश्वरो हरिश्चन्द्रात्क्षेत्रादत्र समागतः । हरिश्चन्द्रेश्वरपुरः पूजितो जयदः सदा ॥ इहशर्वःसमायातः स्थानान्मध्यमकेश्वरात् । चतुर्वेदेश्वरंलिङ्गं पुरोधायव्यवस्थितम् शर्वंलिङ्गंसमभ्यर्च्य काश्यांपरमसिद्धिकृत् । नजातुजन्तुपदवींप्राप्नुयात्कापिमानवः स्थलेश्वरान्महालिङ्गं प्रादुर्भूतं परं त्विह । यत्रयज्ञेश्वरं लिङ्गं सर्वलिङ्गफलप्रदम् महालिङ्गंसमभ्यर्च्य महाश्रद्धासमन्वितः । महतींश्रियमाप्नोति लोकेऽत्र च परत्रच इहलिङ्गंसहस्राक्षं सुवर्णाख्यात्समागतम् । यस्यसंदर्शनात्पुंसांज्ञानचक्षुः प्रजायते शैलेश्वरादवाच्यांतु सहस्राक्षेश्वरं विभुम् । दृष्ट्वाजन्मसहस्राणांशतानांपातकंत्यजेत् हर्षितात्द्धर्षितं चात्र प्रादुरासीत्तमोहरम् । लिङ्गं हर्षप्रदं पुंसां दर्शनात्स्पर्शनादपि

मन्त्रेश्वरसमीपे तुप्रासादो हर्षितेशितुः । तद्विलोकनतः पुंसां नित्यं हर्षपरम्परा
इहस्वयं समायातो रुद्रो रुद्रमहालयात् । यस्य दर्शनतोयान्तिरुद्रलोकेनराःस्फुटम्
यैस्तु रुद्रेश्वरं लिङ्गं काश्यामत्र समर्चितम् । तेरुद्ररूपिणोमर्त्याविज्ञेयानात्रसंशयः
त्रिपुरेशसमीपेतु दृष्ट्वा रुद्रेश्वरं विभुम् । रुद्रास्तइवविज्ञेया जीवन्तोऽपि मृता अपि
आगादिह महादेवोवृषेशो वृषभध्वजात् । बाणेश्वरस्य लिङ्गस्य समीपे वृषदःसदा
इहागतन्तु केदारादीशानेश्वरसञ्ज्ञितम् । तद्द्रष्टव्यंप्रतीच्याञ्च लिङ्गं प्रह्लादकेशवात्
ईशानेशं समभ्यर्च्य स्नात्वोत्तरवहाम्भसि । वसेदीशाननगरे ईशानसदृशप्रभः ॥
भैरवाद्भैरवीमूर्तिरत्रायाता मनोहरा । संहारभैरवो नाम द्रष्टव्यः सप्रयत्नतः ॥
पूजनात्सर्वसिद्ध्यै सप्राच्यांखर्वविनायकात् । संहारभैरवःकाश्यांसंहरेदघसन्ततिम्
उग्रः कनखलात्तीर्थादाविरासेह सिद्धिदः । तद्विलोकनतो नृणामुग्रं पापं प्रणश्यति
उग्रंलिङ्गं सदासेव्यंप्राच्यामर्कविनायकात् । अत्युग्राअपिनश्येयुरुपसर्गास्तदर्चनात्
वस्त्रापथान्महाक्षेत्राद्भवो नाम स्वयंविभुः । भीमचण्डीसमीपेतुप्रादुरासीदिह प्रभो!
भवेश्वरं समभ्यर्च्य भवेनाविर्भवेन्नरः । प्रभुर्भवति सर्वेषां राज्ञामाज्ञाकृतामिह ॥

देवदारुवनाद्दण्डी दण्डयन्पातकावलीः ।
वाराणस्यां समागत्य स्थितो लिङ्गाकृतिर्विभुः ॥ १०१ ॥

प्राच्यांदण्डीश्वरः पूज्यःसदेहलिविनायकात् । तस्याऽर्चनेनमर्त्यानांनपुनर्भवईक्ष्यते
भद्रकर्णह्रदादत्र भद्रकर्णह्रदान्वितः । शिवः साक्षादिहायातः सर्वेषां शिवदोऽर्चितः

उद्दण्डाख्याद्गणपतेः प्राच्यां तत्तीर्थमुत्तमम् ।
भद्रकर्णह्रदे स्नात्वाऽभ्यर्च्य लिङ्गं शिवाह्वयम् ॥ १०४ ॥

सर्वत्र शिवमाप्नोति भद्रकर्णेशपूजनात् । शृणुयात्सर्वभूतानांभद्रं पश्यतिचाक्षभिः
शङ्करश्चहरिश्चन्द्रात्त्वत्पुरः प्रतिभासते । तत्पूजनाज्जनानां न जननीजठरेजनिः ॥

यमलिङ्गान्महातीर्थात्काललिङ्गमिहस्थितम् ।
कलशेश इतिख्यातं चन्द्रेशात्पश्चिमेन च ॥ १०७ ॥

यमतीर्थेनरः स्नात्वा मित्रावरुणदक्षिणे । काललिङ्गं समालोक्यकलिकालभयंकुतः

तत्रभौमचतुर्दश्यां यस्तुयात्रां करिष्यति । अपि पातकयुक्तःसयमयात्रांनयास्यति
नैपालाच्च महाक्षेत्रादायात्पशुपतिस्त्विह । यत्र पाशुपतो योग उपदिष्टः पिनाकिना
भवता देवदेवेन ब्रह्मादिभ्यो विमुक्तये । तस्य सन्दर्शनादेव पशुपाशैर्वियुज्यते ॥
करवीरकतीर्थाच्च कपालीश इहागतः । कपालमोचने तीर्थे द्रष्टव्यः सप्रयत्नतः ॥
तद्विलोकनमात्रेण ब्रह्महत्या विलीयते । उमापतिर्देविकाया इहागत्यव्यवस्थितः
दृष्टः पशुपतिः प्राच्यांहरेत्पापंचिरार्जितम् । लिङ्गं महेश्वरक्षेत्रादिहदीप्तेशसञ्ज्ञितम्
उपोमापतितिष्ठेत दीप्त्यै चेहपरत्रच । भुक्तिमुक्तिप्रदंलिङ्गं दीप्तेशं काशिमध्यगम्

कायारोहणतः क्षेत्रादाचार्यो नकुलीश्वरः ।
शिष्यैः परिवृतस्तिष्ठेन्महापाशुपतव्रतैः ॥ ११६ ॥

दक्षिणेहि महादेवाद्दृष्टो ज्ञानं प्रयच्छति । अज्ञानं नाशयेत्क्षिप्रं गर्भसंसृतिहेतुकम् ॥
गङ्गासागरतश्चायादमरेश इतीरितम् । लिङ्गं यद्दर्शनादेव नामरत्वं हि दुर्लभम् ॥
सप्तगोदावरीतीर्थाद्देवो भीमेश्वरः प्रभुः । प्रकाशते लिङ्गरूपीभुक्त्यैमुक्त्यैनृणामिह

नकुलीशात्पुरो भागे दृष्ट्वा भीमेश्वरं प्रभुम् ।
महाभीमानि पापानि प्रणश्यन्ति हि तत्क्षणात् ॥ १२० ॥

भूतेश्वराद्भस्म गात्रं प्रादुरासीदिहस्वयम् । भीमेशाद्दक्षिणे भागेतदभ्यर्च्य प्रयत्नतः

सम्यक्पाशुपताद्योगादभ्यस्ताच्च समाः शतम् ।
यत्प्राप्यते फलं तत्स्याद्भस्मगात्रविलोकनात् ॥ १२२ ॥

नकुलीश्वरतो देवः स्वयम्भूरितिविश्रुतः । आत्मना प्रकटीभूतःकाश्यांलिङ्गाकृतिर्हरः

स्वयम्भुलिङ्गं सम्पूज्य स्नात्वा सिद्धिह्रदे नरः ।
महालक्ष्मीश्वरपुरो न भूयो जन्मभाग्भवेत् ॥ १२४ ॥

प्रयागतीर्थनिकषाप्रासादो विद्रुमप्रभः । वाराहस्य महानेष धरणीनाम्न एव हि ॥
विन्ध्यपर्वततः प्राप्तोदेवं श्रुत्वासमागतम् । सगणं सर्षिदेवं च मन्दराद्रत्नकन्दरात्
काश्यां धरणिवाराहो द्रष्टव्यःसप्रयत्नतः । आपत्समुद्रसंमग्नमुद्धरेच्छरणागतम् ॥
कर्णिकाराद्गणाध्यक्षः कर्णिकारप्रसूनरुक् । समर्च्योऽयं गदाहस्त उपसर्गसहस्रहृत्

तस्माद्धरणिवाराहात्प्रतीच्यां दिशि संस्थितम् ।
पूजयित्वा गणाध्यक्षं गाणपत्यपदं लभेत् ॥ १२६ ॥

हेमकूटाद्विरूपाक्षं लिङ्गमत्राविरासह । महेश्वराद्वाच्यां च दृष्टं संसारतारकम् ॥

गङ्गाद्वाराद्धिमस्थेशं लिङ्गं हिमसमप्रभम् ।
ब्रह्मनालात्प्रतीच्यां च द्रष्टव्यमिह सिद्धिदम् ॥ १३१ ॥
गणाधिपश्च कैलासाद्गणा अन्ये महाबलाः ।
कैलासाद्रेः समायाताः सप्तकोटिमिताः प्रभो !॥ १३२ ॥

दुर्गाणितैः कृतानीह सप्तस्वर्गसमानि च । सद्वाराणि सयन्त्राणिकपाटविकटानिच

कोटिकोटिभटाख्यानि सर्वर्द्धिसहितान्यपि ।
सुवर्णरूप्यताम्रैश्च कांस्यरीतिकसीसकैः ॥ १३४ ॥

अयस्कान्तेनकान्तानिदृढान्यभ्रंलिहान्यपि । ततःशैलं महादुर्गंतैःकाशीपरितःकृतम्

परिखाऽपि कृता निम्ना मत्स्योदर्या जलाविला ।
मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः ॥ १३६ ॥

तच्च तीर्थं महत्ख्यातं मिलितं गाङ्गवारिभिः । यदासंहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरी तीर्थंलभ्यतेपुण्यगौरवात् । सूर्याचन्द्रमसोःपर्वतदाकोटिगुणंशतम्
सर्वपर्वाणि तत्रैवसर्वतीर्थानि तत्र वै । तत्रैवसर्वलिङ्गानिगङ्गामतत्स्योदरीयतः ॥
मत्स्योदर्यांहि येस्नाता यत्रकुत्रापिमानवाः । कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः
अविमुक्तमिदंक्षेत्रंमत्स्याकारत्वमाप्नुयात् । परितःस्वर्धुनीवारिसंसारिपरिवीक्ष्यते
मत्स्योदर्यांकृतस्नानायेनरास्तेनरोत्तमाः । कृत्वापिबहुपापानिनेक्षन्तेभास्करेःपुरीम्
किंस्नात्वाबहुतीर्थेषुकिंतप्त्वादुष्करंतपः । यदिमत्स्योदरीस्नाताकुतोगर्भभयंततः
यत्रयत्रहिलिङ्गानि नृदेवर्षिकृतान्यपि । तत्रमत्स्योदरीं प्राप्य सुस्नातोमोक्षभाजनम्

सन्ति तीर्थान्यनेकानि भूर्भुवः स्वर्गतान्यपि ।
न समानि परं तानि कोट्यंशेनापि निश्चितम् ॥ १४५ ॥

इत्थंतीर्थंकृतं तेनविभो कैलासवासिना । गणाधिपेन सुमहत्सुमहोदारकर्मणा ॥

भूर्भुवः सञ्ज्ञकं लिङ्गं पर्वताद्गन्धमादनात् ।
स्वयमाविरभूदत्र तस्मात्प्राच्यां गणाधिपात् ॥ १४७ ॥
विलोक्य भूर्भुवं लिङ्गं भूर्भुवः स्वर्महः परे ।
निवसन्ति जनाः पुण्याः सुचिरं दिव्यभोगिनः ॥ १४८ ॥

हाटकेशं महालिङ्गंभोगवत्या समायुतम् । सप्तपातालतलत इहायातं स्वयं विभो !
शेषवासुकिमुख्यैश्च तत्प्रासादो महानिह । मणिमाणिक्यरत्नौघैर्निरमायि प्रयत्नतः
तल्लिङ्गं हाटकमयं रत्नमालाभिरर्चितम् । ईशानेश्वरतः प्राच्यां पूजनीयं प्रयत्नतः ॥

भक्तितोऽऽभ्यर्च्य तल्लिङ्गं नरः सर्वसमृद्धिमान् ।
भुक्त्वा भोगानसङ्ख्यातानन्ते निर्वाणमृच्छति ॥ १५२ ॥

आकाशात्तारकाल्लिङ्गंज्योतीरूपमिहागतम् । ज्ञानवाप्याःपुरोभागेतल्लिङ्गंतारकेश्वरम्
तारकं ज्ञानमाप्येततल्लिङ्गस्य समर्चनात् । ज्ञानवाप्यांनरःस्नात्वातारकेशंविलोक्यच
कृतसन्ध्यादिनियमः परितर्प्यपितामहान् । धृतमौनव्रतोधीमान्यावल्लिङ्गविलोकनम्

मुच्यते सर्वपापेभ्यः पुण्यं प्राप्नोति शाश्वतम् ।
प्रान्ते च तारकं ज्ञानं यस्माज्ज्ञानाद्विमुच्यते ॥ १५६ ॥

किराताच्चकिरातेश इह चाविर्बभूवह । किरातरूपो भगवान्यत्र देवोऽभवत्पुरा ॥
तत्किरातेश्वरं लिङ्गं भारभूतेश्वरादनु । नमस्कृत्य नरो जातु न मातुरुदरेशयः ॥

लङ्कापुर्याः समागच्छन्मरुकेश्वरसञ्ज्ञकम् ।
लिङ्गं यदर्चनात्पुंसां न भयं रक्षसाम्भवेत् ॥ १५९ ॥
नैर्ऋत्यां दिशि तल्लिङ्गं नैर्ऋतेश्वरसञ्ज्ञकम् ।
पौलस्त्यराघवात्पश्चात्पूजितं सर्वदुष्टहृत् ॥ १६० ॥
पुण्यं जलप्रियं लिङ्गं जललिङ्गं स्थलादपि ।
आयातं तच्च गङ्गाया जलमध्ये व्यवस्थितम् ॥ १६१ ॥

तत्प्रासादोऽद्भुततरो मध्येगङ्गं निरीक्ष्यते । सर्वधातुमयः श्रेष्ठः सर्वरत्नमयः शुभः

अद्यापि दृश्यते कैश्चित्पुण्यसम्भारगौरवात् ।

श्रेष्ठं लिङ्गमिहायातं तीर्थात्कोटीश्वरादपि ॥ १६३ ॥
कोटिलिङ्गेक्षणे पुण्यं तल्लिङ्गस्य निरीक्षणात् ।
श्रेष्ठं ज्येष्ठेश्वरात्पश्चाच्छ्रेष्ठसिद्धिप्रदायकम् ॥ १६४ ॥

वडवास्यात्समुद्भूतं लिङ्गमत्रानलेश्वरम् । नलेश्वरपुरो भागे पूजितंसर्वसिद्धिदम् आगत्य विरजस्तीर्थाद्देवदेवस्त्रिलोचनः । लिङ्गे त्वनादिसंसिद्धे ह्यवतस्थेत्रिविष्टपे पुण्ये पिलिपिलातीर्थे सर्वेषांतारकप्रदे । आविश्चक्रेस्वयन्देवॐकारोऽमरकण्टकात् तदाद्यन्तारकक्षेत्रं यदागङ्गा न चागता । यदैवाविरभूत्काशी त्रैलोक्योद्धरणाय वै तदाकृतिमहल्लिङ्गं स्वयमाविरभूत्ततः । महिमानं न तस्यान्यः परिवेत्तिविभोर्ऋते एतान्यायतनानीश आनिनाय महान्ति च । शेषयित्वांशमात्रश्चतस्मिन्क्षेत्रेनिजेनिजे इहायातानि पुण्यानिसर्वभावेनानान्यथा । प्रासादाः सर्वतश्चैषां रम्याअभ्रंलिहाविभो बहुधातुमयाश्चित्राः सर्वरत्नसमुज्ज्वलाः । येषां कलशमात्रस्यदर्शनान्मुक्तिराप्यते श्रुत्वापिनामचैतेषां लिङ्गानां सुरसत्तम !। अपि जन्मसहस्रोत्थाःक्षीयन्तेपापराशयः इदानीं कोनिदेशोऽत्र मयानुष्ठेयईशितः । प्रसादीक्रियतांसोऽपिसिद्धोमन्तव्यएवहि

स्कन्द उवाच

श्रुत्वेति नन्दिनो वाक्यं देवदेवेश्वरोहरः । श्रद्धाप्रसाद्यशैलादिमिदम्प्रोवाच कुम्भज!

श्रीदेवदेव उवाच

साधूकृतं त्वया नन्दिन्सदानन्दविधायक !। विधेहि मेनिदेशश्चचण्डीर्व्यापारयाधुना नवकोट्यस्तु चामुण्डा या यत्रनिवसन्तिहि । स्वदेवताभिःसहिताभूतवेतालभैरवैः ताः पुरीरक्षणार्थाय सवाहनबलायुधाः । प्रतिदुर्गं दुर्गरूपाः परितः परिवासय ॥

स्कन्द उवाच

नन्दिनं संनिदेश्यैति मृडान्या सहितो मृडः । ययौत्रैविष्टपंक्षेत्रंमुक्तिबीजप्ररोहणाम् शिलादतनयोऽप्यैशींमूर्द्धन्याज्ञां विधायच । आहूय सर्वतो दुर्गाःप्रतिदुर्गंन्यवेशयत्

निशम्याऽध्यायमेतश्च पुण्यायतनगर्भिणम् ।
नरः स्वर्गापवर्गौ च प्राप्नुयाच्छ्रद्धया क्रमात् ॥ १८१ ॥

श्रुत्वाष्टषष्टिमेतां वै महायतनसंश्रयाम् । न जातुप्रविशेन्मर्त्यो जनन्याजाठरीं दरीम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये काशीखण्डे उत्तरार्द्धे अष्टषष्ट्यायतनसमागमो नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

देवताधिष्ठानवर्णनम्

अगस्त्य उवाच

कात्यायनेय! कथय नन्दिना विश्वनन्दिना । यथाव्यापारिता देव्यो देवदेवनिदेशतः अविमुक्तस्य रक्षार्थं यत्र यादेवताः स्थिताः । प्रसादं कुरुमेदेवताःसमाचक्ष्वतत्त्वतः इत्यगस्त्युदितं श्रुत्वा महादेवतनूद्भवः । कथयामास यायत्रस्थिताऽऽनन्दवनेमुदा

स्कन्द उवाच

वाराणस्यां विशालाक्षीक्षेत्रस्य परमेष्टदा ।
विशालतीर्थं गङ्गायां कृत्वा पृष्ठे व्यवस्थिता ॥ ४ ॥
स्नात्वा विशालतीर्थे वै विशालाक्षीम्प्रणम्य च ।
विशालां लभते लक्ष्मीम्परत्रेह च शर्मदाम् ॥ ५ ॥

भाद्रकृष्णतृतीयायामुपोषणपरैर्नृभिः । कृत्वा जागरणं रात्रौ विशालाक्षीसमीपतः प्रातर्भोज्याःप्रयत्नेनचतुर्दशकुमारिकाः । अलङ्कृता यथा शक्त्या स्रगम्बरविभूषणैः विधाय पारणम्पश्चात्पुत्रभृत्यसमन्वितैः । सम्यग्वाराणसीवासफलंलभ्येत कुम्भज!

तस्यां तिथौ महायात्रा कार्या क्षेत्रनिवासिभिः ।
उपसर्गप्रशान्त्यर्थं निर्वाणकमलाप्तये ॥ ६ ॥

वाराणस्यां विशालाक्षी पूजनीया प्रयत्नतः । धूपैर्दीपैः शुभैर्माल्यैरुपहारैर्मनोहरैः मणिमुक्ताद्यलङ्कारैर्विचित्रोल्लोचचामरैः । शुभैरनुपभुक्तैश्च दुकूलैर्गन्धवासितैः ॥

मोक्षलक्ष्मीसमृद्ध्यर्थं यत्रकुत्रनिवासिभिः । अप्यल्पमपियद्दत्तंविशालाक्ष्यैनरोत्तमैः
तदानन्त्याय जायेत मुने लोकद्वयेऽपि हि । विशालाक्षीमहापीठे दत्तंजप्तं हुतंस्तुतम्
मोक्षस्तस्य परीपाको नात्र कार्याविचारणा ।
विशालाक्षीसमर्चातो रूपसम्पत्तियुक्पतिः ॥ १४ ॥
प्राप्यतेऽत्रकुमारीभिर्गुणशीलाद्यलंकृतः । गुर्विणीभिःसुतनयोवन्ध्याभिर्गर्भसम्भवः
असौभाग्यवतीभिश्च सौभाग्यं महदाप्यते । विधवाभिर्नवैधव्यंपुनर्जन्मान्तरेक्वचित्
सीमन्तिनीभिः पुम्भिर्वापरंनिर्वाणमिच्छुभिः ।
श्रुताद्दृष्टार्चिता काश्यां विशालाक्ष्यभिलाषदा ॥ १७ ॥
ततोऽन्यल्ललितातीर्थंगङ्गाकेशवसन्निधौ । तत्राऽस्तिललितादेवीक्षेत्ररक्षाकरी परा
सा च पूज्या प्रयत्नेन सर्वसम्पत्समृद्धये । ललितापूजकानाञ्च जातुविघ्नो न जायते
इषे कृष्णद्वितीयायां ललिताम्परिपूज्यवै । नारीवापुरुषोवापिलभतेवाञ्छितम्पदम्
स्नात्वा च ललितातीर्थे ललिताम्प्रणिपत्य वै ।
लभेत्सर्वत्र लालित्यं यद्वा तद्वाऽनुलप्य च ॥ २१ ॥
मुने विश्वभुजा गौरीविशालाक्षीपुरःस्थिता । संहरन्तीमहाविघ्नं क्षेत्रभक्तिजुषांसदा
शारदंनवरात्रञ्च कार्या यात्रा प्रयत्नतः । देव्या विश्वभुजा या वै सर्वकामसमृद्धये
यो न विश्वभुजां देवींवारणस्यांनमेन्नरः । कुतोमहोपसर्गेभ्यस्तस्यशान्तिर्दुरात्मनः
यैस्तु विश्वभुजा देवी वाराणस्यां स्तुतार्चिता ।
नहि तान्विघ्नसङ्घातो बाधते सुकृतात्मनः ॥ २५ ॥
अन्यास्ति काश्यां वाराही क्रतुवाराहसन्निधौ ।
ताम्प्रणम्य नरो भक्त्या विपदब्धौ न मज्जति ॥ २६ ॥
शिवदूती तु तत्रैव द्रष्टव्याऽऽपद्विनाशिनी । आनन्दवनरक्षार्थमुद्यच्छूलारितर्जनी ॥
वज्रहस्तातथाचैन्द्रीगजराजरथास्थिता । इन्द्रेशाद्दक्षिणे भागेऽर्चितासम्पत्करीसदा
स्कन्देश्वरसमीपे तु कौमारी बर्हियानगा । प्रेक्षणीया प्रयत्नेन महाफलसमृद्धये ॥
महेश्वराद्दक्षिणतो देवी माहेश्वरीनरैः । वृषयानवती पूज्या महावृषसमृद्धिदा ॥

निर्वाणनरसिंहस्य समीपे मोक्षकाङ्क्षिभिः । नारसिंहीसमर्च्याचसमुद्यच्चक्ररम्यदोः
हंसयानवतीब्राह्मीब्रह्मेशात्पश्चिमेस्थिता । गलत्कमण्डलुजलचुलकाताडिताहिता ॥
ब्रह्मविद्याप्रबोधार्थं काश्याम्पूज्या दिने दिने ।
ब्राह्मणैर्यतिभिर्नित्यं निजतत्त्वावबोधिभिः ॥ ३३ ॥
शार्ङ्गचापविनिर्मुक्तमहेषुभिरितस्ततः ।
उत्सादयन्तीम्प्रत्यूहान्काश्यां नारायणीं श्रयेत् ॥ ३४ ॥
प्रतीच्यांगोपिगोविन्दाद् भ्रामयच्चक्रोच्चतर्जनीम् ।
नारायणीं यः प्रणमेत्तस्य काश्यां महोदयः ॥ ३५ ॥
ततो गौरीं विरूपाक्षीं देवयान्या उदग्दिशि ।
पूजयित्वा नरो भक्त्या वाञ्छितां लभते श्रियम् ॥ ३६ ॥
शैलेश्वरी समभ्यर्च्या शैलेश्वरसमीपगा । तर्जयन्ती च तर्जन्या संसर्गमुपसर्गजम्
चित्रकूपेनरः स्नात्वाविचित्रफलदेनृणाम् । चित्रगुप्तेश्वरंवीक्ष्यचित्रघण्टाम्प्रपूज्यच
बहुपातकयुक्तोऽपि त्यक्तधर्मपथोऽपिवा । नचित्रगुप्तलेख्यःस्याच्चित्रघण्टार्चकोनरः
योषिद्वा पुरुषो वापि चित्रघण्टांनयोऽर्चयेत् । काश्यांविघ्नसहस्राणितंसेवन्तेपदेपदे
चैत्रशुक्लतृतीयायां कार्यायात्राप्रयत्नतः । महामहोत्सवः कार्यो निशिजागरणं तथा
महापूजोपकरणैश्चित्रघण्टां समर्चयेत् । शृणोतिनान्तकस्येह घण्टांमहिषकण्ठगाम्
चित्राङ्गदेश्वरप्राच्यां चित्रग्रीवाम्प्रणम्य च । नजातुजन्तुर्वीक्षेतविचित्रांयमयातनाम्
भद्रकालींनरोदृष्ट्वा नाभद्रम्पश्यति क्वचित् । भद्रनागस्य पुरतोभद्रवाप्यां कृतोदकः ॥
हरसिद्धिं प्रयत्नेन पूजयित्वा नरोत्तमः ।
महासिद्धिमवाप्नोति प्राच्यां सिद्धिविनायकात् ॥ ४५ ॥
विधिसम्पूज्यविधिवद्विविधैरुपहारकैः । विविधांलभतेसिद्धिंविधीश्वरसमीपगाम्
प्रयागतीर्थेसुस्नातोजनो निगडभञ्जनीम् । सभाजयित्वानोजातुनिगडैःपरिबाध्यते
भौमवारे सदापूज्यादेवी निगडभञ्जनी । कृत्वैकभुक्तंभवत्याऽत्रबन्दीमोक्षणकाम्यया
संसारबन्धविच्छित्तिमपि यच्छति सार्चिता ।

गणना शृङ्खलादीनां का च तस्याः समर्चनात् ॥ ४९ ॥

दूरस्थोऽपिहियोबन्धुःसोऽपिक्षिप्रंसमेष्यति । बन्दीपदजुषांपुंसांश्रद्धयानात्रसंशयः
किञ्चिन्नियममालम्ब्ययदिसापरिषेविता । कामान्पूरयतिक्षिप्रं काशीसन्देहहारिणी
घनटङ्ककरा देवी भक्तबन्धनभेदिनी । कंकं न पूरयेत्कामं तीर्थराजसमीपगा ॥ ५२॥
देवीपशुपतेः पश्चादमृतेश्वरसन्निधौ । स्नात्वा चैवामृते कूपे नमनीया प्रयत्नतः
पूजयित्वा नरो भक्त्या देवताममृतेश्वरीम् । अमृतत्वंभजेदेव तत्पादाम्बुजसेवनात्

धारयन्तीं महामायाममृतस्य कमण्डलुम् ।
दक्षिणेऽभयदां वामे ध्यात्वा को नाऽमृतत्वभाक् ॥ ५५ ॥

सिद्धलक्ष्मीजगद्धात्रीप्रताच्याममृतेश्वरात् । प्रपितामहलिङ्गस्यपुरतःसिद्धिदार्चिता

प्रासादं सिद्धलक्ष्म्याश्च विलोक्य कमलाकृतिम् ।
लक्ष्मीविलाससज्ज्ञश्च को न लक्ष्मीं समाप्नुयात् ॥ ५७ ॥

ततः कुब्जा जगन्मातानलकूबरलिङ्गतः । पूजनीया पुरोभागे प्रपितामहपश्चिमे ॥

उपसर्गानशेषांश्च कुब्जा हरति पूजिता ।
तस्मात्कुब्जा प्रयत्नेन पूज्या काश्यां शुभार्थिभिः ॥ ५९ ॥

कुब्जाम्बरेश्वरं लिङ्गं नलकूबरपश्चिमे । त्रिलोकसुन्दरी गौरी तत्राच्याभीष्टदायिनी

त्रिलोकसुन्दरीसिद्धिं दद्यात्त्रैलोक्यसुन्दरीम् ।
वैधव्यं नाऽप्यते क्वाऽपि तस्या देव्याः समर्चनात् ॥ ६१ ॥
दीप्ता नाम महाशक्तिः साम्बादित्यसमीपगा ।
देदीप्यमानलक्ष्मीका जायन्ते तत्समर्चनात् ॥ ६२ ॥
श्रीकण्ठसन्निधौ देवी महालक्ष्मीर्जगज्जनिः ।
स्नात्वा श्रीकुण्डतीर्थे तु समर्च्या जगदम्बिका ॥ ६३ ॥
पितृन्सन्तर्प्य विधिवत्तीर्थे श्रीकुण्डसञ्ज्ञिते ।
दत्त्वा दानानि विधिवन्न लक्ष्म्या परिमुच्यते ॥ ६४ ॥
लक्ष्मीक्षेत्रं महापीठं साधकस्यैव सिद्धिदम् ।

साधकस्तत्र मन्त्रांश्च नरः सिद्धिमवाप्नुयात् ॥ ६५ ॥
सन्ति पीठान्यनेकानि काश्यां सिद्धिकराण्यपि ।
महालक्ष्मीपीठसमं नान्यल्लक्ष्मीकरं परम् ॥ ६६ ॥

महालक्ष्म्यष्टमीं प्राप्य तत्रयात्राकृतांनृणाम् । सम्पूजितेहविधिवत्पद्मा सद्मनमुञ्चति
उत्तरेतु महालक्ष्म्याहयकण्ठीकुठारधृक् । काशीविघ्नमहावृक्षांश्छिनत्तिप्रतिवासरम्

कौमींशक्तिर्महालक्ष्मीर्दक्षिणे पाशपाणिका ।
बध्नाति विघ्नसङ्घातं क्षेत्रस्याऽस्य प्रतिक्षणम् ॥ ६९ ॥
सा पूजिता स्तुता मर्त्यैः क्षेत्रसिद्धिं प्रयच्छति ।
वायव्यां च शिखी चण्डी क्षेत्ररक्षाकरी परा ॥ ७० ॥
खादन्ती विघ्नसङ्घातं शिखीशब्दं करोति च ।
तस्याः सन्दर्शनात्पुंसां नश्यन्ति व्याधयोऽखिलाः ॥ ७१ ॥

भीमचण्ड्युत्तरद्वारं सदा रक्षेदतन्द्रिता । भीमेश्वरस्य पुरतः पाशमुद्गरधारिणीम्
भीमचण्डींनरोदृष्ट्वाभीमकुण्डेकृतोदकः । भीमाकृतीन्नवै पश्येद्याम्यान्दूतान्कचित्कृती
छागवक्त्रेश्वरी देवीदक्षिणे वृषभध्वजात् । अहर्निशम्भक्षयति विघ्नौघतरुपल्लवान् ॥
तस्यादेव्याः प्रासादेन काशीवासःप्रलभ्यते । अतश्छागेश्वरींदेवींमहाष्टम्यांप्रपूजयेत्
तालजङ्घेश्वरे देवी तालवृक्षकृतायुधा । उत्सादयति विघ्नौघानानन्दवनमध्यगान्
सङ्गमेश्वरलिङ्गस्य दक्षिणे विकटाननाम् । तालजङ्घेश्वरीं नत्वा न विघ्नैरभिभूयते
उद्दालकेश्वराल्लिङ्गात्तीर्थउद्दालकाभिधे । याम्यां च यमदंष्ट्राख्या चर्वयेद्विघ्नसंहतिम्
प्रणता यमदंष्ट्रा यैस्तीर्थे चोद्दालकाभिधे । कृत्वाऽपि पापसङ्घातंनयमाद्बिभ्यतीहते
दारुकेश्वरतीर्थे तु दारुकेशसमीपतः । पातालतालुवदनामाकाशोष्ठीं धराधराम् ॥

कपालकर्त्रींहस्तां च ब्रह्माण्डकवलप्रियाम् ।
शुष्कोदरीं स्नायुबद्धां चर्ममुण्डेति विश्रुताम् ॥ ८१ ॥

क्षेत्रस्य पूर्वदिग्भागं रक्षन्तीविघ्नसङ्घतः । लसत्सहस्रदोर्दण्डांज्वलत्केकरवीक्षणाम्
पारावारप्रसृमरहस्तन्यस्तारिमोदकाम् । द्वीपिकृत्तिपरीधानां कटुकाट्टाट्टहासिनीम्

मृणालनालवत्तीव्रं चर्वन्तीमस्थिपापिनः । शूलाग्रप्रोतदुर्वृत्तक्षेत्रद्रोहिकलेवराम् ॥

कपालमालाभरणां महाभीषणरूपिणीम् ।
चर्ममुण्डां नरो नत्वा क्षेत्रविघ्नैर्न बाध्यते ॥ ८५ ॥

यथैव चर्ममुण्डैषा महारुण्डाऽपि तादृशी । एतावानेवभेदोऽस्यारुण्डस्रग्भूषणात्वियम् क्षेत्ररक्षां प्रकुरुत उभे देव्यौ महाबले । हसन्त्यौ करतालीभिरन्योन्यंदोःप्रसारणात् हयग्रीवेश्वरे तीर्थे लोलार्कादुत्तरे सदा । महारुण्डा प्रचण्डास्यातिष्ठते भक्तविघ्नहृत् चर्ममुण्डा महारुण्डा कथितेयेतु देवते । तयोरन्तरतस्तिष्ठेच्चामुण्डामुण्डरूपिणी एतास्तिस्रः प्रयत्नेनपूज्याःक्षेत्रनिवासिभिः । धनधान्यप्रदाश्चैताःपुत्रपौत्रप्रदा इमाः उपसर्गान मूर्ध्नन्तिदद्युर्नैश्रेयसीं श्रियम् । स्मृतादृष्टानताःस्पृष्टाःपूजिताःश्रद्धयानरैः

महारुण्डा प्रतीच्यां च देवी स्वप्नेश्वरी शुभा ।
भविष्यं कथयेत्स्वप्ने भक्तस्याऽग्रे शुभाशुभम् ॥ ६२ ॥
तत्र स्वप्नेश्वरं लिङ्गं देवीं स्वप्नेश्वरीं तथा ।
स्नात्वासिसङ्गमेपुण्येयस्मिन्कस्मिंस्तिथावपि ॥ ६३ ॥
उपोषणपरो धीमान्नारी वा पुरुषोऽपि वा ।
सम्पूज्य स्थण्डिलशयः स्वप्ने भावि विलोकयेत् ॥ ६४ ॥

अद्यापि प्रत्ययस्तत्र कार्यएष विजानता । भूतं भावि भवत्सर्वंवदेत्स्वप्नेश्वरीनिशि अष्टम्यांचचतुर्दश्यांनवम्यांनिशिवादिवा । प्रयत्नतःसमर्च्यासाकाश्यांज्ञानार्थिभिर्नरैः

स्वप्नेश्वर्याश्च वारुण्यां दुर्गादेवी व्यवस्थिता ।
क्षेत्रस्य दक्षिणं भागं सा सदैवाऽभिरक्षति ॥ ६७ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्डे उत्तरार्धेदेवताधिष्ठानं नाम सप्ततितमोऽध्यायः ॥ ७० ॥

——:*:——

एकसप्ततितमोऽध्यायः

दुर्गपराक्रमवर्णनम्

अगस्त्य उवाच

कथं दुर्गेतिवैनामदेव्याजातमुमासुत ! । कथंच काश्यांसा सेव्यासमाचक्ष्वेतिमामिह

स्कन्द उवाच

कथयामिमहाबुद्धे यथा कलशसम्भव ! । दुर्गानामाऽभवद्देव्या यथासेव्याच साधकैः दुर्गोनाममहादैत्योरुरुदैत्याङ्गजोऽभवत् । यश्चतप्त्वातपस्तीव्रं पुम्भ्योजेयत्वमाप्तवान्

ततस्तेनाऽखिला लोका भूर्भुवःस्वर्मुखा अपि ।
स्ववसात्कृताविनिर्जित्य रणे स्वभुजसारतः ॥ ४ ॥
स्वयमिन्द्रः स्वयं वायुः स्वयं चन्द्रः स्वयं यमः ।
स्वयमग्निः स्वयं पाशी धनदोऽभूत्स्वयं बली ॥ ५ ॥

स्वयमीशानरुद्रार्कवसूनां पदमाददे । तत्साध्वसाद्विमुक्तानि तपांस्यतितपस्विभिः न वेदाध्ययनं चक्रुर्ब्राह्मणास्तद्भयार्दिताः । यज्ञवाटाविनिर्ध्वस्तास्तद्भटैरतिदुःसहैः विध्वस्ताबहुशः साध्व्यस्तैरमार्गकृतास्पदैः । प्रसभञ्चपरस्वानि अपहृत्य दुरासदाः अभोक्षिपुर्दुराचाराः क्रूरकर्मपरिग्रहाः । नद्यो विमार्गगाआसञ्ज्वलन्तिन तथाऽग्नयः

ज्योतींषि न प्रदीप्यन्ति तद्भयाकुलितान्यहो ।
दिग्वधूवसनान्यासन्विच्छायानि समन्ततः ॥ १० ॥

धर्मक्रियाविलुप्ताश्च प्रवृत्ताः सुकृतेतराः । तएव जलदीभूयववृषुर्निजलीलया ॥ ११ ॥ सस्यानि तद्भयात्सूतेत्वकृष्टापि वसुन्धरा । सदैवफलिनोजातास्तरवोऽप्यवकेशिनः

वन्दीकृताः सुरर्षीणां पत्न्यस्तेनाऽतिदर्पिणा ।
दिवौकसः कृतास्तेन समस्ताः काननौकसः ॥ १३ ॥
मर्त्या अमर्त्यान्स्वगृहं प्राप्तानपि भयार्दिताः ।

अपिसम्भाषमात्रेण नाऽर्च्चयन्ति विपज्जुषः ॥ १४ ॥

स्कन्द उवाच

नकौलीन्यं न सद्वृत्तं महत्त्वाय प्रकल्पते । एकमेवपदं श्रेयः पदभ्रंशो हिलाघवम् ॥
विपद्यपिहिते धन्या नयेदैन्यप्रणोदिताः । धनैर्मलिनचित्तानामालभन्तेऽङ्गणंक्वचित्
पञ्चत्वमेव हि वरं लोके लाघववर्ज्जितम् । नामरत्वमपि श्रेयो लाघवेनसमन्वितम्
तएवलोकेजीवन्तिपुण्यभाजस्त एववै । विपद्यपिनगाम्भीर्यंयच्चेतोब्धिःपरित्यजेत्
कदाचित्सम्पदुदयः कदाचिद्विपदुद्गमः । दैवाद्द्वयमपिप्राप्य धीरोधैर्यं न हापयेत्
उदयानुदयौ प्राज्ञैर्द्रष्टव्यौ पुष्पवन्तयोः । सदैकरूपताऽत्याज्या हर्षाहर्षौ ततोऽध्रुवौ
यस्त्वापदं समासाद्यदैन्यग्रस्तोऽविपद्यते । तस्यलोकद्वयंनष्टं तस्माद्दैन्यं विवर्जयेत्
आपाद्यपिहिये धीरा इहलोके परत्र च । नतान्पुनः स्पृशेदापत्तद्धैर्येणावधीरिता ॥
भ्रष्टराज्याश्च विबुधा महेशं शरणं गताः । सर्वज्ञेन ततो देवी प्रेरिताऽसुरमर्दने ॥
माहेश्वरीं समासाद्य भवान्याज्ञां प्रहृष्टवत् । अमर्त्यायाऽभयं दत्त्वा समरायोपचक्रमे॥
कालरात्रीं समाहूय कान्त्यात्रैलोक्यसुन्दरीम् । प्रेषयामास रुद्राणीतमाह्वातुंसुरद्रुहम्
कालरात्री समासाद्य तंदैत्यं दुष्टचेष्टितम् । उवाचदैत्याधिपतेत्यजत्रैलोक्यसम्पदम्

त्रिलोकीं लभतामिन्द्रस्त्वन्तु याहि रसातलम् ।
प्रवर्तन्तां क्रियाः सर्वा वेदोक्ता वेदवादिनाम् ॥ २७ ॥

अथचेद्गर्वलेशोऽस्ति तदा याहिसमाजये । अथवा जिविताकाङ्क्षीतदिन्द्रं शरणं व्रज
इति वक्तुं महादेव्या महामङ्गलरूपया । त्वदन्तिकं प्रेषिताऽहं मृत्युस्ते तदुपेक्षया
अतो यदुचितं कर्तुं तद्विधेहि महासुर !। परंहितं चेच्छृणुयाज्जीवग्राहन्ततो व्रज

इत्याकर्ण्य वचो देव्या महाकाल्याः स दैत्यराट् ।
प्रजज्वाल तदाक्रोधाद् गृह्यतां गृह्यतामियम् ॥ ३१ ॥
त्रैलोक्यमोहिनी ह्येषा प्राप्तामद्भाग्यगौरवैः ।
त्रैलोक्यराज्यसम्पत्तिवल्ल्याःफलमिदं महत् ॥ ३२ ॥

एतदर्थं हि देवर्षिनृपा बन्दीकृता मया । अनायासेन मे प्राप्तागृहमेषा शुभोदयात् ॥

अवश्यं यस्य योग्यंयत्तत्तस्येहोपतिष्ठते । अरण्येवागृहेवाऽपियतोभागस्यगौरवात्
अन्तः पुरचराएतां नयन्त्वन्तःपुरं महत् । अनया सदलङ्कृत्याममराष्ट्रमलङ्कृतम् ॥
अहोमहोदयश्चाद्य जातो मम महामतेः । केवलं न ममैकस्य सर्वदैत्यान्वयस्य च

नृत्यन्तु पितरश्चाऽद्य मोदन्तां बान्धवाःसुखम् ।
मृत्युः कालोऽन्तको देवाः प्राप्नुवन्त्वद्य मे भयम् ॥ ३७ ॥

इति यावत्समायातास्तांनेतुंसौविदल्लकाः । तावत्तयाकालरात्र्याप्रत्युक्तोदैत्यपुङ्गवः

कालरात्र्युवाच

दैत्यराज महाप्राज्ञ! नैतद्युक्तं भवादृशाम् । वयं दूत्यः परवशा राजनीतिविदुत्तम !॥
अल्पोऽपिदूतसम्बाधांनविदध्यात्कदाचन । किंपुनर्येभवादृक्षामहान्तोबलिनोऽधिपाः

दूतीषु कोऽनुरागोऽयं महाराजाऽल्पिकास्विह ।
अनायासेन च वयमायास्यामस्तदागमात् ॥ ४१ ॥

विजित्यसमरेतां तुस्वामिनींममदैत्यप !। मादृशीनांसहस्राणिपरिभुङ्क्ष्वयथेच्छया

अद्यैव ते महासौख्यं भावि तस्या विलोकनात् ।
बान्धवानां सुखं तेऽद्य भविता सह पूर्वजैः ॥ ४३ ॥
सम्पत्स्यन्तेऽद्यते कामाः सर्वे ये चिरचिन्तिताः ।
अबला सा च मुग्धा च तस्यास्त्राता न कश्चन ॥ ४४ ॥

सर्वरूपमयी चैव तां भवान्द्रष्टुमर्हति । अहंहिदर्शयिष्यामियत्रसाऽस्तिजगत्खनिः

धृतायामपि चैकस्यां कस्ते कामो भविष्यति ।
अहन्ते सन्निधिं नैव त्यक्षाम्यद्य दिनावधि ॥ ४६ ॥
ततो निवारयैतान्मामादित्सून् सौविदल्लकान् ।
इति श्रुत्वा वचस्तस्याः सकामक्रोधमोहितः ॥ ४७ ॥

तामेवबद्धमँस्तैकांदूतींमृत्योरिवाऽसुरः । शुद्धान्तरक्षिणश्चैतां शुद्धान्तंप्रापयन्त्वरम्
इति तेन समादिष्टाः सर्वेवर्षवरा मुने । तां धर्तुमुद्यमञ्चक्रुर्बलेन बलवत्तराः ॥ ४९ ॥

सा तान् भस्मीचकाराऽऽशु हुङ्कारजनिताग्निना ।

ततो दैत्यपतिः क्रुद्धो दृष्ट्वा तान् भस्मसात्कृतान् ॥ ५० ॥

क्षणेनैव तयादूत्यादैत्यांस्त्र्ययुतसम्मितान् । दृशा व्यापारयामास दुर्धरंदुर्मुखं खरम्
सीरपाणिम्पाशपाणिं सुरेन्द्रदमनं हनुम् । यज्ञारिखड्गलोमानमुग्रास्यं देवकम्पनम्

बद्ध्वा पाशैरिमान्दुष्टामानयन्त्वाशु दानवाः ।
विध्वस्तकेशवेशाञ्च विस्रस्ताम्बरभूषणाम् ॥ ५३ ॥

इति दैत्याधिपादेशाद् दुर्धरप्रमुखास्ततः । पाशासिमुद्गरधरास्तामादातुं कृतोद्यमाः

गिरीन्द्रगुरुवर्ष्माणः शस्त्रास्त्रोद्यतपाणयः ।
दिगन्तं ते परिप्राप्तास्तदुच्छ्वासानिलाहताः ॥ ५५ ॥

तेषूड्डीनेषु दैत्येषुशतकोटिमितेषु च । निर्जगाम ततः सा तु कालरात्रिर्नभोऽध्वगा
ततस्तान्तु विनिर्यान्तीमनुजग्मुर्महासुराः । कोटिकोटिसहस्राणिपूरयित्वातुरोदसी
दुर्गो नाम महादैत्यः शतकोटिरथावृतः । गजानामर्बुदशतद्वयेन परिवारितः ॥ ५८॥

कोट्यर्बुदेन सहितो हयानां वातरंहसाम् ।
पदातिभिरसङ्ख्यातैः पच्चूर्णितशिलोच्चयैः ॥ ५९ ॥

उदायुधैर्महाभीमैः कृतत्रिजगतीभयैः । समेतः समहादैत्यो दुर्गः क्रुद्धोविनिर्ययौ ॥

अथ दृष्ट्वा महादेवीं विन्ध्याचलकृतालयाम् ।
आगत्य कालरात्र्या च निवेदिततदागसम् ॥ ६१ ॥

महाभुजसहस्राढ्यां महातेजोभिबृंहिताम् । तत्तद्घोरप्रहरणां रणकौतुकसादराम्

प्रोद्यच्चन्द्रसहस्रांशुनिर्माजितशुभाननाम् ।
लावण्यवार्धिनिर्गच्छच्चञ्चच्चन्द्रैकचन्द्रिकाम् ॥ ६३ ॥

महामाणिक्यनिचयरोचिःखचितविग्रहाम् । त्रैलोक्यरम्यनगरीसुप्रकाशप्रदीपिकाम्
हरनेत्राग्निनिर्दग्धकामजीवातुवीरुधम् । लसत्सौन्दर्यसम्भारजगन्मोहमहौषधिम्
विषमेषुशरैर्भिन्नहृदयो दैत्यपुङ्गवः । आदिष्टवान्महासैन्यनायकानुग्रशासनः ॥ ६६ ॥
अयि जम्भ महाजम्भ! कुजम्भविकटानन! । लम्बोदर महाकाय महादंष्ट्र! महाहनो !
पिङ्गाक्ष! महिषग्रीव महोग्रात्युग्रविग्रह !। क्रूराक्ष! क्रोधनाक्रन्द! संक्रन्दन! महाभय

जितान्तक! महाबाहो! महावक्त्र! महीधर !। दुन्दुभे! दुन्दुभिरव! महादुन्दुभिनासिक!
उग्रास्य! दीर्घदशन! मेघकेशत्र्कानन ! । सिंहास्य सूकरमुख! शिवारावमहोत्कट !॥
शुकतुण्ड! प्रचण्डास्य भीमाक्ष! क्षुद्रमानस !। उलूकनेत्रकङ्कास्य! काकतुण्डकरालवाक्
दीर्घग्रीव! महाजङ्घ! क्रमेलकशिरोधर !। रक्तबिन्दो! जपानेत्र! विद्युज्जिह्वाग्नितापन !

धूम्राक्ष! धूमनिःश्वास! चण्डचण्डांशुतापन !।
महाभीषणमुख्याश्च शृण्वन्त्वाज्ञां ममाऽऽदरात् ॥ ७३ ॥
भवत्स्वेतेषु चाऽन्येषु एतां विन्ध्य (नि) वासिनीम् ।
धृत्या नेष्यति बुद्ध्या वा बलेनाऽपि छलेन वा ॥ ७४ ॥

तस्याहमिन्द्रपदवीमद्य दास्याम्यसंशयम् । दृष्ट्वैतां सुन्दरीमद्य मनोमेव्याकुलम्भवेत्
यान्तु क्षिप्रं न यावन्मे पञ्चेषुशरपीडितम् । मनोविह्वलतां गच्छेदेतत्प्राप्तेरभावतः
इत्याकर्ण्य वचस्तस्य दुर्गस्यदनुजेशितुः । प्रोचुः सर्वे तदा दैत्याःप्रबद्धकरसम्पुटाः
अवधेहि महाराज! किमेतत्कर्म दुष्करम् । अनाथायास्तथैकस्याअबलाया विशेषतः

अस्या आनयने कोऽयं महायत्नविधिः प्रभो !।
कोऽस्मान्प्रलयकालाग्निमहाज्वालावलीसमान् ॥ ७६ ॥

सहेत त्रिषु लोकेषु त्वत्प्रसादात्कृतोद्यमान् । यद्यादेशो भवेदद्यतदेन्द्रं समरुद्गणम्

सान्तःपुरं समानीय क्षिप्तुमस्त्वत्पदाग्रतः ।
भूर्भुवःस्वरिदं सर्वं त्वदाज्ञावशवर्तितम् ॥ ८१ ॥
महर्जनस्तपः सत्यलोकास्त्वदधिकारिणः ।
तत्राप्यसाद्ध्यं नाऽस्माकं त्वन्निदेशान्महासुर ॥ ८२ ॥

वैकुण्ठनायको नित्यंत्वदाज्ञापरिपालकः । यानिरम्याणिरत्नानि तानिसम्प्रेषयन्मुदा

अस्माभिरेव सन्त्यक्तः कैलासाधिपतिः सवै ।
विषाशी चातिनिःस्वत्वाद्भस्मकृत्त्यहिभूषणः ॥ ८४ ॥

अर्धाङ्गे नास्मद्भयतोयोषिदेका निगूहिता । तस्य ग्रामेऽपिसकलेद्वितीयोनचतुष्पदः
एकोजरद्गवःसोऽपिनान्यस्मातपरिजीवति । श्मशानवासिनःसर्वेसर्वेकौपीनवाससः

सर्वे विभूतिधवलाः सर्वेऽप्येककपर्द्दिनः । समस्ते नगरे तस्य वसन्त्येवंविधागणाः
तेषांगणानां किं कुर्मोदरिद्राणां वयंविभो । समुद्रारत्नसम्भारं प्रत्यहम्प्रेषयन्तिच
नागा वराकाश्चाऽस्माकं सायं सायं स्वयम्प्रभो !।
प्रदीपयन्ति सततं फणारत्नप्रदीपकान् ॥ ८६ ॥
कल्पद्रुमः कामगवीचिन्तामणिगणाबहु । तव प्रसादादस्माकमपि तिष्ठन्तिवेश्मसु
वायुर्व्यजनतां यातस्त्वां सेवेतप्रयत्नतः । स्वच्छान्यम्बूनिवरुणःप्रत्यहम्पूरयत्यहो
वासांसि क्षालयेदग्निश्चन्द्रश्छत्रधरः स्वयम् ।
सूर्यः प्रकाशयेन्नित्यं क्रीडावाप्यम्बुजानि च ॥ ६२ ॥
कस्त्वत्प्रसादं नेक्षेत मर्त्यामर्त्योरगेषुच । सर्वे त्वामुपजीवन्तिसुराऽसुरखगादयः
पश्यनः पौरुषंराजन्नानयामोबलादिमाम् । इत्युक्तवायुगपत्सर्वे क्षुब्धास्तोयधयोयथा
संवर्तकालमासाद्य प्लावितुञ्जगतीमिमाम् । रणतूर्यनिनादश्च समुत्तस्थौ समन्ततः
रोमाञ्चिता यच्छ्रवणात्कातरा अप्यकातराः । ततोदेवाभयत्रस्ताश्चकम्पेचवसुन्धरा
क्षुब्धा अम्बुधयः सर्वेपेतुर्नक्षत्रमालिकाः । रोदसी मण्डलं व्याप्तं तेन तूर्यरवेणवै
ततो भगवती देवी स्वशरीरसमुद्भवाः । शक्तीरुत्पादयामास शतशोऽथ सहस्रशः
ताभिः शक्तिभिरेतेषां बलिनां दितिजन्मनाम् ।
प्रत्येकम्परितो रुद्धउद्वेलः सैन्यसागरः ॥ ६६ ॥
शस्त्रास्त्राणि महादैत्यैर्यान्युत्सृष्टानि सङ्गरे ।
ताभिः शक्तिभिरुग्राणि तृणीकृत्योज्झितान्यरम् ॥ १०० ॥
ततोऽतिकोपपूर्णास्तेजम्भमुख्याः सुरारयः । असिचक्रभुशुण्डीभिर्गदामुद्गरतोमरैः
भिण्डिपालैश्चपरिघैःकुन्तैःशल्यैश्चशक्तिभिः । अर्धचन्द्रैःक्षुरप्रैश्चनाराचैश्चशिलीमुखैः
महाभल्लैः परशुभिर्भिदुरैर्मर्मभेदिभिः । वृक्षोपलमहावर्षैर्ववृषुर्जलदा इव ॥ १०३ ॥
अथ साविन्ध्यनिलया महामायामहेश्वरी । आदायोद्दण्डकोदण्डंवायव्यास्त्रेणहेलया
दैत्यास्त्रशस्त्रजालानि परिचिक्षेप दूरतः । ततो महासुरोदुर्गोऽवीक्ष्यसैन्यंनिरायुधम्
ज्वलन्तीं शक्तिमादाय तां देवीं प्रति सोऽक्षिपत् ।

तां तु शक्तिं समायान्तीं महावेगवतीं रणे ॥ १०६ ॥
निजचापविनिर्मुक्तैर्बाणैश्चूर्णीचकार सा । भग्नांशक्तिसमालोक्यततो दुर्गोमहासुरः
चक्रंच प्रेषयामास दैत्यचक्रातिहर्षदम् । तच्च देव्या शरशतैरन्तरैवाणुवत्कृतम् ॥
ततःशार्ङ्गं समादाय धनुः शक्रधनुर्यथा । हृदि विव्याध बाणेन तां देवीममरार्दनः
सच बाणस्तया देव्यानिजबाणैर्महाजवैः ।
निवारितोपि वेगेन तां देवीमभ्यगान्मुने ॥ ११० ॥
ततः कोदण्डदण्डेन आशुगेन तमाशुगम् । हत्वा निवारयामास कालदण्डमिवापरम्
तस्मिन् विमुखतांयाते मार्गणेदुर्गमासुरः । क्रुद्धःशूलं समादाय संवर्तानलसुप्रभम् ॥
महावेगेन चिक्षेप तां देवीमभिदैत्यपः । परापतच्चतच्छूलं निजशूलेन चण्डिका ॥
अन्तरैव प्रचिच्छेद सह दैत्यजयाशया । तस्मिन्नपि महाशूलेदेवीशूलावहेलिते ॥
गदामादाय दैत्येन्द्रः सहसाऽभिपपातह । आजघान च तां देवीं भुजमूले महाबलः
सापि देवी भुजं प्राप्यगिरीन्द्रशिखराकृतिः । गदाशुपरिपुस्फोटशतधा च सहस्रधा
तदा देव्या सदैत्येन्द्रो वामपादतलेन हि । आताडितः पपातोर्व्यांहृदिगाढं प्रपीडितः
तत्क्षणादेव दैत्येन्द्रः पतित्वा पुनरुत्थितः । बभूव सहसादृश्योदीपोवातहतो यथा
तावज्जगज्जनन्याताः प्रेरितानिजशक्तयः । विचेरुर्दैत्यसैन्येषु सम्वर्ते मृत्युसैन्यवत् ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
उत्तरार्धेदुर्गपराक्रमो नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः

दुर्गवधमनुदेवःवज्रपञ्जरस्तुतिवर्णनम्

अगस्त्य उवाच

पार्वतीहृदयानन्द! स्कन्दसर्वज्ञनन्दन । काःकास्तु शक्तयस्तावै तासां नामानि मे वद ।

स्कन्द उवाच

तासां परमशक्तीनामुमावयवसम्भुवाम् ।
आख्याम्याख्यां शृणु मुने! कुम्भसम्भव! तत्त्वतः ॥ २ ॥

त्रैलोक्यविजयातारा क्षमा त्रैलोक्यसुन्दरी । त्रिपुरा त्रिजगन्माताभीमात्रिपुरभैरवी
कामाख्या कमलाक्षी च धृतिस्त्रिपुरतापनी । जयाजयन्तीविजयाजलेशीचापराजिता
शङ्खिनी गजवक्त्राचमहिषघ्नी रणप्रिया । शुभानन्दाकोटराक्षी विद्युज्जिह्वा शिवारवा
त्रिनेत्रा चत्रिवक्त्राच त्रिपदा सर्वमङ्गला । हुङ्कारहेतिस्तालेशी सर्पास्यासर्वसुन्दरी
सिद्धिर्बुद्धिः स्वधास्वाहा महानिद्राशराशना । पाशपाणिःखरमुखीवज्रताराषडानना
मयूरवदना काकी शुकी भासी गरुत्मती । पद्मावती पद्मकेशी पद्मास्या पद्मवासिनी
अक्षरात्र्यक्षरा तन्तुः प्रणवेशीस्वरात्मिका । त्रिवर्गागर्वरहिता अजपा जपहारिणी,

जपसिद्धिस्तपःसिद्धिर्योगसिद्धिः पराऽमृता ।
मैत्रीकृन्मित्रनेत्रा च रक्षोघ्नी दैत्यतापनी ॥ १० ॥

स्तम्भनी मोहनी माया बहुमायाबलोत्कटा । उच्चाटनीमहोल्कास्यामनुजेन्द्रक्षयङ्करी
क्षेमंकरीसिद्धिकरी छिन्नमस्ताशुभानना । शाकम्भरीमोक्षलक्ष्मीस्त्रिवर्गफलदायिनी
वार्तालीजम्भलीक्लिन्नाअश्वारूढा सुरेश्वरी । ज्वालामुखीप्रभृतयोनवकोट्योमहाबला
बलानिबलिनां ताभिर्दानवानां स्वलीलया । संक्षिप्तानिजगन्तीवप्रलयानलहेतिभिः
तावत्स दुर्गो दैत्येन्द्रः पयोदान्तरतो बली । चकार करकावृष्टिं वात्यावेगवतीं बहु
ततोभगवती देवी शोषणास्त्रप्रयोगतः । वृष्टिं निवारयामास वर्षोपलमयीं क्षणात्

योषिन्मनोरथवती षण्ढंप्राप्ययथाऽफला । सादैत्यकरकावृष्टिर्देवीं प्राप्यवृथाभवत्
अथदैतेयराजेन बाहुसङ्घर्षकोपतः । उत्पाट्यशैलशिखरं परिक्षिप्तं नभोङ्गणात् ॥

अद्रेः शृङ्गंसुविस्तीर्ण मापतत्परिवीक्ष्य सा ।
शतकोटिप्रहारेण कोटिशः शकलं व्यधात् ॥ १६ ॥
आन्दोल्य मौलिमसकृत्कुण्डलाभ्यां विराजितम् ।
गजीभूयाशु दुद्राव तां देवीं समरेऽसुरः ॥ २० ॥

शैलाकारं तमायान्तं दृष्ट्वाभगवतीगजम् । बद्ध्वापाशेनजवतः खड्गेन करमच्छिनत्
ततोऽत्यन्तं स चीत्कृत्यदेव्याकृतकरःकरी । अकिञ्चित्करतांप्राप्य माहिषंवपुराददे
अचलां सचलां सर्वांसचक्रेखुरघाततः । शिलोच्चयांश्चबहुशःशृङ्गाभ्यांसोपितद्बली
निश्वासवातनिहता पेतुरुर्व्यां महाद्रुमाः । उद्वेलिताः समभवन्सप्तापिजलराशयः
महामहिषरूपेण तेनत्रैलोक्यमण्डपः । आन्दोलितोतिबलिना युगान्तेवात्ययायथा
ब्रह्माण्डमप्यकाण्डेन तद्भयेनसमाकुलम् । दृष्ट्वा भगवती क्रुद्धा त्रिशूलेन जघान तम्
त्रिशूलघातविभ्रान्तः पतित्वापुनरुत्थितः । तं त्यक्त्वामाहिषंवेषमभूद्बाहुसहस्रभृत्

स दुर्गो नितरां दुर्गो विबभौ समराजिरे ।
आयुधानां सहस्राणि बिभ्रत्कालान्तकोपमः ॥ २८ ॥

अथतूर्णं सदैत्येन्द्रस्तांदेवींरणकोविदाम् । महाबलःप्रगृह्याऽऽशुनीतवान्गगनाङ्गणम्

ततो नभोऽङ्गणाद् दूरात्क्षिप्त्वा स जगदम्बिकाम् ।
क्षणात्कलम्बजालेन च्छादयामास वेगवान् ॥ ३० ॥

अथाऽन्तरिक्षगादेवी तस्यमार्गणमध्यगा । विद्युन्मालेव विबभौ महाभ्रपटलीधृता
तं विधूय शरव्रातं निजेषु निकरैरलम् । महेषुणाथविव्याध सा तं दैत्यजनेश्वरम् ॥
हृदिविद्धस्तयादेव्या स च तेन महेषुणा । व्याघूर्णमाननयनःक्षितिमापातिविह्वलः
महारुधिरधाराभिः स्रवन्तीं च प्रवर्तयन् । तस्मिन्निपतिते दुर्गे महादुर्गपराक्रमे ॥
देवदुन्दुभयो नेदुःप्रहृष्टानि जगन्ति च । सूर्याचन्द्रमसौ साग्नीतेजोनिजमवापतुः
पुष्पवृष्टिं प्रकुर्वन्तः प्राप्तादेवा महर्षिभिः । तुष्टुवुश्च महादेवीं महास्तुतिभिरादरात्

देवा ऊचुः

नमोदेवि! जगद्धात्रि ! जगत्त्रयमहारणे ! । महेश्वर महाशक्ते ! दैत्यद्रुमकुठारके ! ॥

त्रैलोक्यव्यापिनि! शिवे! शङ्खचक्रगदाधरि !।
स्वशार्ङ्गव्यग्रहस्ताग्रे! नमो विष्णुस्वरूपिणि !॥ ३८ ॥

हंसयाने! नमस्तुभ्यं सर्वसृष्टिविधायिनि !। प्राचांवाचां जन्मभूमेचतुराननरूपिणि त्वमैन्द्रीत्वंचकौबेरीवायवीत्वंत्वमम्बुपा । त्वंयामीनैर्ऋतीत्वंचत्वमैशीत्वंचपावकी शशाङ्ककौमुदी त्वंच सौरी शक्तिस्त्वमेव च । सर्वदेवमयी शक्तिस्त्वमेव परमेश्वरी

त्वं गौरी त्वं च सावित्री त्वं गायत्री सरस्वती ।
प्रकृतिस्त्वं मतिस्त्वं च त्वमहं कृतिरूपिणी ॥ ४२ ॥

चेतःस्वरूपिणीत्वंवैत्वंसर्वेन्द्रियरूपिणी । पञ्चतन्मात्ररूपात्वंमहाभूतात्मिकेऽम्बिके शब्दादिरूपिणीत्वंवै करणानुग्रहात्वमु । ब्रह्माण्डकर्त्रीत्वंदेवीब्रह्माण्डान्तस्त्वमेवहि त्वं पराऽसि महादेवि त्वं च देविपरापरा । परापराणां परमा परमात्मस्वरूपिणी

सर्वरूपात्वमीशानि त्वमरूपाऽसि सर्वगे !।
त्वं चिच्छक्तिर्महामाये त्वंस्वाहा त्वं स्वधामृते ॥ ४६ ॥

वषड्वौषट्स्वरूपासित्वमेवप्रणवात्मिका । सर्वमन्त्रमयीत्वंवैब्रह्माद्यास्वत्समुद्भवाः चतुर्वर्गात्मिका त्वं वै चतुर्वर्गफलोदये । त्वत्तः सर्वमिदंविश्वं त्वयि सर्वं जगन्निधे यद्दृश्यं यददृश्यं च स्थूलसूक्ष्मस्वरूपतः । तत्रत्वंशक्तिरूपेण किंचिन्नत्वदृतेक्वचित्

मातस्त्वयाद्य विनिहत्य महासुरेन्द्रं दुर्गंनिसर्गविबुधार्पितदैत्यसैन्यम् ।
त्राताःस्म देवि! सततं नमतां शरण्ये त्वत्तोऽपरःकइह यं शरणं व्रजामः ॥ ५०
लोके त एव धनधान्यसमृद्धिभाजस्ते पुत्रपौत्रसुकलत्रसुमित्रवन्तः ।
तेषां यशःप्रसरचन्द्रकरावदातं विश्वं भवेद्भवसि येषु सुदृक्त्वमीशे ॥ ५१ ॥
त्वद्भक्तिचेतसि जनेन विपत्तिलेशः क्लेशः क्वा नु भवतीनतिकृत्सु पुंसु ।
त्वन्नामसंसृतिजुषां सकलायुषां क भूयः पुनर्जननिरिह त्रिपुरारिपत्नि !॥ ५२ ॥
चित्रं यदत्र समरे स हि दुर्गदैत्यस्त्वद्दृष्टिपातमधिगम्य सुधानिधानम् ।

मृत्योर्वशत्वमगमद्विदितं भवानि! दुष्टोऽपि ते दृशिगतः कुगतिंनयाति ॥ ५३॥
त्वच्छस्त्रवह्निशलभत्वमिता अपीह दैत्याः पतङ्गरुचिमाप्य दिवं व्रजन्ति ।
सन्तः खलेष्वपि न दुष्टधियो यतः स्युः साधुष्विवप्रणयिनः स्वपथं दिशन्ति
प्राच्यां मृडानि! परिपाहिसदा सदा नतान्नोयाम्यामवप्रतिपदं विपदो भवानि!
प्रत्यग्दिशित्रिपुरतापनपत्नि ! रक्ष त्वं पाह्युदीचि निजभक्तजनान्महेशि !॥ ५५॥
ब्रह्माणि! रक्ष सततं नतमौलिदेशं त्वं वैष्णवि! प्रतिकुलम्परिपालयाऽधः।
रुद्राग्निनैर्ऋतिसदागतिदिक्षुपान्तु मृत्युञ्जयात्रिनयनात्रिपुरात्रिशक्त्यः ॥ ५६ ॥
पातु त्रिशूलममले तव मौलिजान्नो भालस्थलं शशिकलाभृदुमाभ्रुवौ च ।
नेत्रे त्रिलोचनवधूर्गिरिजा च नासामोष्ठं जया च विजया त्वधरप्रदेशम् ॥
श्रोत्रद्वयं श्रुतिरवादशनावलिं श्रीश्चण्डी कपोलयुगलं रसनाञ्च वाणी ।
पायात्सदैव चिबुकं जयमङ्गला नः कात्यायनी वदनमण्डलमेव सर्वम् ॥ ५८ ॥
कण्ठप्रदेशमवतादिह नीलकण्ठी भूदारशक्तिरनिशञ्च कृकाटिकायाम् ।
कौर्म्यं सदेशमनिशं भुजदण्डमैन्द्री पद्मा च पाणिफलकं नतिकारिणां नः ॥५६
हस्ताङ्गुलीः कमलजाविरजा नखांश्च कक्षान्तरन्तरणिमण्डलगा तमोघ्नी ।
वक्षःस्थलं स्थलचरी हृदयन्धरित्री कुक्षिद्वयन्त्ववतु नः क्षणदाचरघ्नी ॥ ६० ॥
अव्यात्सदोदरदरीजगदीश्वरीनो नाभिंनभोगतिरजा त्वथ पृष्ठदेशम् ।
पायात्कटिञ्च विकटा परमा स्फिचौ नो गुह्यं गुहारणिरपानमपायहन्त्री ॥
ऊरुद्वयञ्च विपुला ललिता च जानू जङ्घे जवाऽवतुकठोरतराऽत्रगुल्फौ ।
पादौ रसातलचराङ्गुलिदेशमुग्रा चान्द्रीनखान्पदतलं तलवासिनी च ॥ ६२ ॥

गृहंरक्षतु नो लक्ष्मीः क्षेत्रं क्षेमकरी सदा । पातुपुत्रान्प्रियकरी पायादायुः सनातनी यशःपातु महादेवी धर्मम्पातु धनुर्धरी । कुलदेवी कुलम्पातु सद्गतिं सद्गतिप्रदा ॥ रणे राजकुले द्यूते सङ्ग्रामे शत्रुसङ्कटे । गृहेवने जलादौ च शर्वाणी सर्वतोऽवतु ॥ इति स्तुत्वाजगद्धात्रीम्प्रणेमुश्च पुनः पुनः । सर्वेसवासवा देवाः सर्षिगन्धर्वचारणाः ततस्तुष्टाजगन्मातातानाहसुरसत्तमान् । स्वाधिकारान्सुराःसर्वेशासन्तुप्राग्यथायथा

तुष्टाऽहमनयास्तुत्यानितरान्तु यथार्थया। वरमन्यम्प्रदास्यामि तच्छृणुध्वंसुरोत्तमाः

दुर्गोवाच

यः स्तोष्यति तु मां भक्त्या नरः स्तुत्याऽनया शुचिः।
तस्याऽहं नाशयिष्यामि विपदश्च पदे पदे॥ ५६॥

एतत्स्तोत्रस्य कवचंपरिधास्यतियो नरः। तस्य क्वचिद्भयं नास्तिवज्रपञ्जरगस्यहि अद्यप्रभृतिमे नाम दुर्गेति ख्यातिमेष्यति। दुर्गदैत्यस्य समरे पातनादतिदुर्गमात् ये मां दुर्गां शरणगानतेषांदुर्गतिःक्वचित्। दुर्गास्तुतिरियंपुण्यावज्रपञ्जरसञ्ज्ञिका अनयाकवचं कृत्वा मा बिभेतु यमादपि। भूतप्रेतपिशाचाश्च शाकिनीडाकिनीगणाः झोण्टिङ्गाराक्षसाः क्रूराविषसर्पाग्निदस्यवः। वेतालाश्चापिकङ्कालग्रहाबालग्रहाअपि

वातपित्तादिजनितास्तथा च विषमज्वराः।
दूरादेव पलायन्ते श्रुत्वा स्तुतिमिमां शुभाम्॥ ७५॥

वज्रपञ्जरनामैतत्स्तोत्रंदुर्गाप्रशंसनम्। एतत्स्तोत्रकृतत्राणे वज्रादपि भयं नहि॥ अष्टजप्तेनचानेनयोऽभिमन्त्र्यजलं पिबेत्। तस्योदरगतापीडाक्वाऽपिनोसम्भविष्यति

गर्भपीडा तु नो जातु भविष्यत्यभिमन्त्रणात्।
बालानामपरमा शान्तिरेतत्स्तोत्राम्बुपानतः॥ ७८॥

यत्रसान्निध्यमेतस्य स्तवस्येह भविष्यति। एतास्तु शक्तयःसर्वाःसर्वत्रसहितामया रक्षाम्परिकरिष्यन्ति मद्भक्तानांममाज्ञया। इति दत्त्वावरान्देवीदेवेभ्योऽन्तर्हितातदा

तेऽपि स्वर्गौकसः सर्वे स्वं स्वं स्वर्गं ययुर्मुदा।

स्कन्द उवाच

इत्थंदुर्गाभवन्नामतस्यादेव्या महामुने!। काश्यांसेव्यायथा साचतच्छृणुष्ववदामिते अष्टम्याश्चचतुर्दश्याम्भौमवारेविशेषतः। सम्पूज्यासततंकाश्यां दुर्गादुर्गतिनाशिनी नवरात्रं प्रयत्नेन प्रत्यहं सासमर्चिता। नाशयिष्यति विघ्नौघान्सुमतिञ्च प्रदास्यति महापूजोपहारैश्च महाबलिनिवेदनैः। दास्यत्यभाष्टदासिद्धि दुर्गा काश्यां न संशयः प्रतिसंवत्सरंतस्याः कार्या यात्रा प्रयत्नतः। शारदं नवरात्रश्च सकुटुम्बैःशुभार्थिभिः

यो न सांवत्सरीं यात्रां दुर्गायाः कुरुते कुधीः।
काश्यां विघ्नसहस्राणि तस्य स्युश्च पदे पदे॥ ८६॥
दुर्गाकुण्डे नरः स्नात्वा सर्वदुर्गार्तिहारिणीम्।
दुर्गां सम्पूज्य विधिवन्नवजन्माघमुत्सृजेत्॥ ८७॥
सा दुर्गाशक्तिभिः सार्धं काशीं रक्षति सर्वतः।
ताः प्रयत्नेन सम्पूज्याः कालरात्रिमुखा नरैः॥ ८८॥

रक्षन्ति क्षेत्रमेतद्वै तथान्या नव शक्तयः। उपसर्गसहस्रेभ्यस्ता वै दिग्देवताःक्रमात् शतनेत्रा सहस्रास्या तथाऽयुतभुजा परा। अश्वारूढागजास्याचत्वरिताशववाहिनी

विश्वा सौभाग्यगौरी च सृष्टाः प्राच्यादिमध्यतः।
एता यत्नेन सम्पूज्याः क्षेत्ररक्षणदेवताः॥ ९१॥

तथैव भैरवाश्चाऽष्टौ दिक्ष्वष्टासुप्रतिष्ठिताः। रक्षन्तिसततंकाशींनिर्वाणश्रीनिकेतनम् रुरुश्चण्डोऽसिताङ्गश्च कपाली क्रोधनस्तथा। उन्मत्तभैरवस्तद्वत्क्रमात्संहारभीषणौ चतुःषष्टिस्तु वेताला महाभीषणमूर्तयः। रुण्डमुण्डस्रजः सर्वे कर्त्रीखर्परपाणयः श्ववाहनारक्तमुखा महादंष्ट्रा महाभुजाः। नग्ना विमुक्तकेशाश्च प्रमत्ता रुधिरासवैः॥ नानारूपधराः सर्वे नानाशस्त्रास्त्रपाणयः। तदाकारैश्च तद्भृत्यैःकोटिशःपरिवारिताः विद्युज्जिह्वोललज्जिह्वः क्रूरास्यः क्रूरलोचनः। उग्रोविकटदंष्ट्रश्च वक्रास्योवक्रनासिकः

जम्भको जृम्भणमुखो ज्वालानेत्रो वृकोदरः।
गर्तनेत्रो महानेत्रस्तुच्छनेत्रोऽन्त्रमण्डनः॥ ९७॥

ज्वलत्केशः कम्बुशिराः खर्व्वग्रीवो महाहनुः। महानासोलम्बकर्णःकर्णप्रावरणोनसः इत्याद्यो मुने! क्षेत्रं दुष्ट्रैस्तरुधिरप्रियाः। त्रासयन्तो दुराचारान् रक्षन्तिपरितःसदा

त्रलोक्यविजयाद्याश्च ज्वालामुख्यन्तगाश्च याः।
शक्तयोऽत्र मयाख्याता मुने! कलशसम्भव!॥ १०१॥

ताः काशीं परिरक्षन्ति चतुर्दिक्षूद्यतायुधाः। ताः समर्च्याःप्रयत्नेनमहाविघ्नप्रशान्तये भैरवा रुरुमुख्याश्च महाभयनिवारकाः। संपूज्याः सर्वदा काश्यां सर्वसम्पत्तिहेतवः

विद्युज्जिह्वप्रभृतयो वेताला उग्ररूपिणः ।
अत्युग्रानपि विघ्नौघान्हरिष्यन्त्यर्चिता इह ॥ १०४ ॥
तथाभूतावलीचात्र नानाभीषणरूपिणी । उदायुधाऽवति पुरीं शतकोटिमिता मुने!
निर्वाणलक्ष्मीक्षेत्रस्य पालयित्री पदे पदे ।
एता वै देवताः पूज्याः काश्यां निर्वाणकाङ्क्षिभिः ॥ १०६ ॥
श्रुत्वोऽध्यायमिमं पुण्यं नरो दुर्गजयाभिधम् ।
नानाशक्तिसमायुक्तं दुर्गमाशु तरिष्यति ॥ ७ ॥
य एते भैरवाः प्रोक्ता ये वेताला उदाहृताः । तेषां नामानिचाकर्ण्यनरो विघ्नैर्नदूयते
अदृष्टा अपि ते भूता एतदाख्यानपाठकम् ।
रक्षिष्यन्ति प्रयत्नेन सह श्रोतृजनेन च ॥ ६ ॥
तस्मात्सर्वप्रयत्नेन काशीभक्तिपरैर्नरैः । श्रोतव्यमिदमाख्यानंमहाविघ्ननिवारणम्
गृहेऽपि यस्य लिखितमेतत्स्थास्यति पूजितम् ।
तस्याऽऽपदां सहस्राणि नाशयिष्यन्ति देवताः ॥ ११ ॥
काश्यां यस्याऽस्ति वै प्रेम तेन कृत्वाऽऽदरं गुरुम् ।
श्रोतव्यमिदमाख्यानं वज्रपञ्जरसन्निभम् ॥ ११२ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे उत्तरार्धेवज्रपञ्जराख्यानवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः

सक्षेत्रलिङ्गमहिमंॐकारमहिमवर्णनम्

अगस्त्य उवाच

त्रिलोचनं समासाद्य देवदेवः षडानन !। जगदम्बिकया युक्तः किंचकाराऽऽशु तद्वद

स्कन्द उवाच

मुने कलशजाख्यामि यत्पृष्टन्तन्निशामय । विरजःसञ्ज्ञकं पीठंयत्प्रोक्तंसर्वसिद्धिदम्
तत्पीठदर्शनादेव विरजाजायते नरः । यत्रास्ति तन्महालिङ्गंवाराणस्यांत्रिलोचनम्
तीर्थं पिलिपिलाख्यंतद्द्युनद्यम्भसि विश्रुतम् ।
सर्वतीर्थमयं तीर्थं तत्काश्यां परिगीयते ॥ ४ ॥
विष्टपत्रितयान्तर्ये देवर्षिमनुजोरगाः । ससरित्पर्वतारण्याः सन्ति ते तत्र यन्मुने ॥
तदारभ्य च तत्तीर्थं तच्च लिङ्गं त्रिलोचनम् । त्रिविष्टपमितिख्यातमतोहेतोर्महत्तरम्
त्रिविष्टपस्य लिङ्गस्य महिमोक्तःपिनाकिना । जगज्जनन्याःपुरतोयथावच्मितथामुने

देव्युवाच

देवदेवजगन्नाथ शर्व सर्वद सर्वग !। सर्वदृक् सर्वजनक!किञ्चित्पृच्छामि तद्वद ॥
इदंतवप्रियं क्षेत्रं कर्मबीजमहौषधम् । नैःश्रेयस्याः श्रियोगेहम्ममापिप्रीतिदम्महत्
यत्क्षेत्ररजसोप्यग्रेत्रिलोक्यपितृणायते । तस्याखिलस्यमहिमाविष्वक्केनावगम्यते
यानीह सन्ति लिङ्गानि तानि सर्वाण्यसंशयम् ।
निर्वाणकारणान्येव स्वयम्भून्यपि तान्यपि ॥ ११ ॥
यद्यप्येवन्तथापीश विशेषं वक्तुमर्हसि । काश्यामनादिसिद्धानिकानिलिङ्गानिशङ्कर!
यत्र देवः सदातिष्ठेत्सम्वर्तेऽपि सवल्लभः । यैरियंप्रथिर्ति प्राप्ताकाशीमुक्तिपुरीतिच
येषांस्मरणतोऽप्यत्रभवेत्पापस्यसंक्षयः । दर्शनस्पर्शनाभ्याञ्चस्यातांस्वर्गापवर्गकौ
येषां समर्चनादेव मध्ये जन्मसकृद्विभो !।

लिङ्गानि पूजितानि स्युः काश्यां सर्वाणि निश्चितम् ॥ १५ ॥
विधायमय्यनुक्रोशं कारुण्यामृतसागर । एतदाचक्ष्वमेशम्भोपादयोःप्रणताऽस्म्यहम्
इत्याकर्ण्य महेशानस्तस्या देव्याः सुभाषितम् ।
कथयामास विन्ध्यारे महालिङ्गानि सत्तम !॥ १७ ॥
यन्नामाकर्णनादेव क्षीयन्ते पापराशयः । प्राप्यतेपुण्यसम्भारःकाश्यांनिर्वाणकारणम्

देवदेव उवाच

शृणु देवि! परं गुह्यं क्षेत्रेऽस्मिन्मुक्तिकारणम् । इदंविदन्तिनैवापिब्रह्मनारायणादयः
असङ्ख्यातानि लिङ्गानि पार्वत्यानन्दकानने ।
स्थूलान्यपि च सूक्ष्माणि नानारत्नमयानि च ॥ २० ॥
नानाधातुमयानीशे दार्षदान्यप्यनेकशः । स्वयम्भून्यप्यनेकानिदेवर्षिस्थापितान्यहो
सिद्धचारणगन्धर्वयक्षरक्षोऽर्चितान्यपि । असुरोरगमर्त्यैश्च दानवैरप्सरोगणैः॥
दिग्गजैर्गिरिभिस्तीर्थैर्ऋक्षवानरकिन्नरैः । पतत्रिप्रमुखैर्देवि! स्वस्वनामाङ्कितानिवै
प्रतिष्ठितानि यानीहमुक्तिहेतूनि तान्यपि । अदृश्यान्यपिदृश्यानिदुरवस्थान्यपिप्रिये
भग्नान्यपि च कालेन तानिपूज्यानिसुन्दरि । परार्धशतसंख्यानिगणितान्येकदामया
गङ्गाम्भस्यपि तिष्ठन्ति षष्टिकोटिमितानिहि ।
सिद्धलिङ्गानि तानीशे तिष्येऽदृश्यत्वमाययुः ॥ २६ ॥
गणनादिवसादर्वाङ्मम भक्तजनैः प्रिये । प्रतिष्ठितानि यानीह तेषांसङ्ख्यानविद्यते
त्वया तु यानि पृष्टानियैरिदंक्षेत्रमुत्तमम् । तानिलिङ्गानिवक्ष्यामिमुक्तिहेतूनिसुन्दरि
कलावतीव गोप्यानि भविष्यन्ति गिरीन्द्रजे !।
परं तेषां प्रभावो यः स्वं स्वं स्थानं न हास्यति ॥ २९ ॥
कलिकल्मषपुष्टा ये ये दुष्टा नास्तिकाः शठाः ।
एतेषांसिद्धलिङ्गानां ज्ञास्यन्त्याख्यामपीह न ॥ ३० ॥
नामश्रवणतोऽपीह यल्लिङ्गानां शुभानने । वृजिनानिक्षयंयान्ति वर्धन्ते पुण्यराशयः॥
ॐकारः प्रथमं लिङ्गं द्वितीयश्च त्रिलोचनम् ।

तृतीयश्च महादेवः कृत्तिवासाश्चतुर्थकम् ॥ ३२ ॥
रत्नेशः पञ्चमं लिङ्गं षष्ठश्चन्द्रेश्वराभिधम् । केदारः सप्तमं लिङ्गं धर्मेशश्चाष्टमं प्रिये!
वीरेश्वराश्च नवमं कामेशं दशमं विदुः । विश्वकर्मेश्वरं लिङ्गं शुभमेकादशम्परम्
द्वादशम्मणिकर्णीशमविमुक्तं त्रयोदशम् । चतुर्दशम्महालिङ्गम्मम विश्वेश्वराभिधम्
प्रिये! चतुर्दशैतानि श्रियोहेतूनि सुन्दरि !। एतेषांसमवायोऽयम्मुक्तिक्षेत्रमिहेरितम्
देवताः समधिष्ठात्र्यः क्षेत्रस्याऽस्य परा इमाः ।
आराधिताः प्रयच्छन्ति नृभ्यो नैःश्रेयसीं श्रियम् ॥ ३७ ॥
आनन्दकानने मुक्त्यैप्रोक्तान्येतानि सुन्दरि । प्रियेचतुर्दशेज्यानिमहालिङ्गानिदेहिनाम्
प्रतिमासं समारभ्यतिथिं प्रतिपदंशुभाम् । एतेषांलिङ्गमुख्यानांकार्यायात्राप्रयत्नतः
अनाराध्य महादेवमेषुलिङ्गेषु कुम्भज !। कःकाश्यांमोक्षमाप्नोतिसत्यंसत्यंपुनःपुनः
तस्मात्सर्वप्रयत्नेनकाशीफलमभीप्सुभिः । पूज्यान्येतानिलिङ्गानिभक्त्यापरमयामुने

अगस्त्य उवाच

एतान्येव किमन्यानि महालिङ्गानिषण्मुख !। निर्वाणकारणानीह यदिसन्तितदावद

स्कन्द उवाच

अन्यान्यपि च सन्तीह महालिङ्गानि सुव्रत !।
कलिप्रभावाद्गुप्तानि भविष्यन्त्येव तानि वै ॥ ४३ ॥
यस्येश्वरे सदाभक्तिर्यःकाशीतत्त्ववित्तमः । सएवैतानिलिङ्गानिवेत्स्यत्यन्योनकश्चन
येषां नामग्रहेणापि कलिकल्मषसंक्षयः । अमृतेशस्तारकेशो ज्ञानेशः करुणेश्वरः
मोक्षद्वारेश्वरश्चैव स्वर्गद्वारेश्वरस्तथा । ब्रह्मेशो लाङ्गलश्चैव वृद्धकालेश्वरस्तथा
वृषेशश्चैव चण्डीशो नन्दिकेशो महेश्वरः । ज्योतीरूपेश्वरं लिङ्गं ख्यातमत्रचतुर्दशम्
काश्याञ्चतुर्दशैतानि महालिङ्गानि सुन्दरि । इमानि मुक्तिहेतूनिलिङ्गान्यानन्दकानने
कलिकल्मषबुद्धीनांनाख्येयानि कदाचन । एतान्याराधयेद्यस्तु लिङ्गानीहचतुर्दश
न तस्य पुनरावृत्तिः संसाराध्वनि कर्हिचित् ।
काशी कोशोयमतुलो न प्रकाश्यो यतस्ततः ॥ ५० ॥

एतल्लिङ्गाभिधा देवि! महापद्यपि दुःखहृत्। रहस्यं परमञ्चैतत्क्षेत्रस्यास्य वरानने
चतुर्दशापि लिङ्गानि मत्सान्निध्यकराणि हि। अविमुक्तस्य हृदयमेतदेव गिरीन्द्रजे
इमानि यानि लिङ्गानि सर्वेषां मुक्तिदानि हि। एकैकभुवनस्येह सारमादायसर्वतः
मयैतानि कृतान्येव महाभक्तिकृपावशात्।
अस्मिन्क्षेत्रे ध्रुवम्मुक्तिरितियाप्रथितिःप्रिये!। कारणंतत्रलिङ्गानि ममैतानि चतुर्दश
त एव व्रतिनः कान्ते! त एवचतपस्विनः। ध्यातान्येतानियैर्भक्तैर्लिङ्गान्यानन्दकानने
त एवाभ्यस्तसद्योगा दत्तदानास्त एव हि।
काश्यामिमानि लिङ्गानि यैर्दृष्टान्यपिदूरतः॥ ५६॥
इष्टापूर्ताश्च ये धर्माः प्रणीता मुनिसत्तमैः। तेसर्वे तेन विहिता यावज्जीवञ्चिरेनसा
येनाऽविमुक्तमासाद्यमहालिङ्गानि पार्वति!। सकृदभ्यर्चितानीह समुक्तोनाऽत्रसंशयः

स्कन्द उवाच

अन्यान्यपि च विन्ध्यारे! देव्यै प्रोक्तानि शम्भुना।
स्वभक्तानां हितार्थाय तान्यथाऽऽकर्णयाऽग्रज॥ ५९॥
शैलेशः सङ्गमेशश्च स्वर्लीनो मध्यमेश्वरः। हिरण्यगर्भ ईशानो गोप्रेक्षो वृषभध्वजः
उपशान्तशिवो ज्येष्ठो निवासेश्वर एव च। शुक्रेशो व्याघ्रलिङ्गश्चजम्बुकेशश्चतुर्दशम्
मुने! चतुर्दशैतानि महान्त्यायतनानि वै। एतेषामपि सेवातो नरो मोक्षमवाप्नुयात्
चैत्रकृष्णप्रतिपदं समारभ्य प्रयत्नतः। आचतुर्दशि पूज्यानि लिङ्गान्येतानि सत्तमैः
एतेषां वार्षिकी यात्रा सुमहोत्सवपूर्वकम्।
कार्या मुमुक्षुभिः सम्यक् क्षेत्रसंसिद्धिदायिनी॥ ६४॥
मुने चतुर्दशैतानि महालिङ्गानि यत्नतः। दृष्ट्वा न जायते जन्तुः संसारे दुःखसागरे
क्षेत्रस्य परमं तत्त्वमेतदेव प्रिये! ध्रुवम्। संसाररोगग्रस्तानामिदमेव महौषधम्
क्षेत्रस्योपनिषच्चैषा मुक्तिबीजमिदं परम्। कर्मकाननदावाग्निरेषा लिङ्गावलिः प्रिये
एकैकस्याऽस्यलिङ्गस्यमहिमाद्यन्तवर्जितः। मयैवज्ञायतेदेविसम्यङ्नान्येनकेनचित्
इति श्रुत्वा मुने! प्राह देवी हृष्टतनूरुहा। प्रणम्य देवमीशानं सर्वज्ञं सर्वदं शिवम्

देव्युवाच

रहस्यं परमं काश्यां यदेतत्समुदीरितम्। तच्छ्रुत्वोत्सुकतां प्राप्तःमनोमेऽतीववल्लभ
यदुक्तं लिङ्गमेकैकं महासारतरं परम्। काश्यां परमनिर्वाणकारणंकारणेश्वर!॥ ७१॥
प्रत्येकं महिमानं मे ब्रूह्येषां भुवनेश्वर!। चतुर्दशानां लिङ्गानां श्रवणादघहारिणाम्
ॐकारेशस्य लिङ्गस्यकथमत्रसमागमः। अतिपुण्यतमात्तस्मात्क्षेत्रादमरकण्टकात्
किमात्मकोऽयमोङ्कारोमहिमास्यचकोहर!। केनाराधि पुराचैषद्दावाराधितश्चकिम्
मृडानीवाक्सुधामेतां विधाय श्रुतिगोचराम्।
कथामकथयद्देवॐकारस्य महाद्भुताम्॥ ७५॥

देवदेव उवाच

कथामाकर्णयाऽपर्णे वर्णयामितवाऽग्रतः। यथोङ्कारस्यलिङ्गस्यप्रादुर्भावइहाऽभवत्
पुराऽऽनन्दवने चात्र ब्रह्मणा विश्वयोनिना। तपस्तप्तं महादेवि समाधिंदधतापरम्
पूर्णे युगसहस्रेऽथभित्त्वापातालसप्तकम्। उदतिष्ठत्पुरोज्योतिर्विद्योतितहरिन्मुखम्
यदन्तराविरभवन्निर्व्याजेन समाधिना। तदेव परमंधामबहिराविरभूद्विधेः॥ ७६॥
योभूच्चटचटाशब्दःस्फुटतोभूमिभागतः। तच्छब्दाद्व्यसृजद्धे धाःसमाधिंक्रमतोवशी
स्रष्टा विसृष्टतद्ध्यानो यावदुन्मील्य लोचने। पुरःपश्येद्ददर्शाऽग्रे तावदक्षरमादिमम्
अकारं सत्त्वसम्पन्नमृक्क्षेत्रं सृष्टिपालकम्।
नारायणात्मकं साक्षात्तमःपारे प्रतिष्ठितम्॥ ८२॥
उकारमथ तस्याऽग्रे रजोरूपं यजुर्जनिम्।
विधातारं समस्तस्य स्वाकारमिव बिम्बितम्॥ ८३॥
नीरवध्वान्तसङ्केतसदनाभं तदग्रतः। मकारंस ददर्शाथ तमोरूपंविशेषतः॥ ८४॥
साम्नोयोनिं लये हेतुं साक्षाद्रुद्रस्वरूपिणम्।
अथ तत्पुरतो ध्याता व्यधात्स्वनयनातिथिम्॥ ८५॥
विश्वरूपमयाकारं सगुणंवापिनिर्गुणम्। अनाख्यनादसदनम्परमानन्दविग्रहम्॥
शब्दब्रह्मेतियत्ख्यातंसर्ववाङ्मयकारणम्। अथोपरिष्टान्नादस्यबिन्दुरूपपम्परात्परम्

कारणंकारणानाञ्च जगद्योनिचतम्परम् । विधिर्विलोकयाञ्चक्रेतम्सागोचरीकृतम्
अवनादोमिति ख्यातं सर्वस्याऽस्य प्रभावतः ।
भक्तमुन्नयते यस्मात्तदोमिति यईरितः ॥ ८६ ॥
अरूपोऽपि सरूपाढ्यःसधात्रा नेत्रगीकृतः । तारयेद्यद्भवाम्भोधेःस्वजपासक्तमानसम्
ततस्तार इतिख्यातो यस्तं ब्रह्मा व्यलोकयत् ॥ ६० ॥
प्रणूयतेयतःसर्वैः परनिर्वाणकामुकैः । सर्वेभ्योऽभ्यधिकस्तस्मात्प्रणवोयःप्रकीर्तितः
स्वसेवितारम्पुरुषं प्रणयेद्यः परम्पदम् । अतस्तम्प्रणवं शान्तं प्रत्यक्षीकृतवान्विधिः
त्रयीमयस्तुरीयो यस्तुर्यातीतोऽखिलात्मकः ।
नादबिन्दुस्वरूपो यः स प्रैक्षि द्विजगामिना ॥ ६३ ॥
प्रावर्तन्त यतोवेदाः साङ्गाः सर्वस्ययोनयः । सवेदादिः पद्मभुवा पुरस्तादवलोकितः
वृषभो यस्त्रिधाबद्धो रोरवीति महोमयः । स नेत्रविषयीचक्रे परमः परमेष्ठिना ॥
शृङ्गाश्चत्वारियस्याऽऽसन्हस्तासःसप्तएवच । द्वेशीर्षेचत्रयःपादा सदेवोविधिनैक्षत
यदन्तर्लीनमखिलं भूतम्भाविभवत्पुनः । तद्बीजम्बीजरहितं द्रुहिणेन विलोकितम्
लीनं मृग्येत यत्रैतदाब्रह्मस्तम्बभाजनम् । अतःसभाज्यतेसद्भिर्यल्लिङ्गं तद्विलोकितम्
पञ्चार्था यत्रभासन्ते पञ्चब्रह्ममयं हियत् । आदिपञ्चस्वरूपंयन्निरैक्षि ब्रह्मणा हि तत्
तमालोक्य ततो वेधालिङ्गरूपिणमीश्वरम् । पञ्चाक्षरम्प्रपञ्चाच्च भिन्नं तुष्टाव शङ्करम्

ब्रह्मोवाच

नम ॐकाररूपाय नमोऽक्षरवपुर्धृते । नमोऽकारादिवर्णानांप्रभवाय सदाशिव !॥
अकारस्त्वमुकारस्त्वं मकारस्त्वमनाकृते । ऋग्यजुः सामरूपाय रूपातीताय ते नमः
नमो नादात्मने तुभ्यं नमोबिन्दुकलात्मने । अलिङ्गलिङ्गरूपाय सर्वरूपस्वरूपिणे
नमस्ते धामनिधये निधनादिविवर्जित! । नमो भवाय रुद्राय शर्वाय च नमोऽस्तुते
नम उग्राय भीमाय पशूनाम्पतये नमः । नमस्तारस्वरूपाय सम्भवाय नमोऽस्तुते
अमायाय नमस्तुभ्यं नमः शिवतराय ते । कपर्दिनेनमस्तुभ्यं शितिकण्ठनमोऽस्तुते
मीढुष्टमाय गिरिश! शिपिविष्टाय तेनमः । नमोऽह्रस्वाय खर्वायवृद्धते वृद्धरूपिणे॥

कुमारगुरवे तुभ्यं कुमारवपुषे नमः । नमः श्वेताय कृष्णाय पीतायारुणमूर्तये ॥
धूम्रवर्णाय पिङ्गाय नमः किर्मीरवर्चसे । नमः पाटलवर्णाय नमो हरिततेजसे ॥
नानावर्णस्वरूपाय वर्णानाम्पतये नमः । नमस्ते स्वररूपाय नमोव्यञ्जनरूपिणे ॥
उदात्तायानुदात्ताय स्वरिताय नमो नमः । ह्रस्वदीर्घप्लुतेशाय सविसर्गाय ते नमः ॥
अनुस्वारस्वरूपाय नमस्ते सानुनासिक !। नमो निरनुनासाय दन्त्यतालव्यरूपिणे
ओष्ठ्योरस्यस्वरूपायनमऊष्मस्वरूपिणे । अन्तस्थाय नमस्तुभ्यंपञ्चमायपिनाकिने
निषादाय नमस्तुभ्यं निषादपतये नमः । वीणावेणुमृदङ्गादिवाद्यरूपाय ते नमः ॥
नमस्ताराय मन्द्राय घोरायाघोरमूर्तये । नमस्तानस्वरूपाय मूर्च्छनापतये नमः ॥
स्थायिसंचारिभेदेन नमोभावस्वरूपिणे । तालप्रियाय तालायलास्यताण्डवजन्मने
तौर्यत्रिकस्वरूपाय तौर्यत्रिकमहाप्रिय !। तौर्यत्रिककृताम्भक्त्यानिर्वाणश्रीप्रदायक
स्थूलसूक्ष्मस्वरूपाय दृश्यादृश्यस्वरूपिणे । अर्वाचीनाय चनमः पराचीनाय ते नमः
वाक्प्रपञ्चस्वरूपाय वाक्प्रपञ्चपराय च । एकायानेकभेदाय सदसत्पतयेनमः॥ ११६
शब्दब्रह्म!नमस्तुभ्यं परब्रह्म! नमोऽस्तुते । नमो वेदान्तवेद्याय वेदानाम्पतये नमः ॥
नमोवेदस्वरूपाय वेदगोचरमूर्तये । पार्वतीश! नमस्तुभ्यं जगदीश! नमोऽस्तुते
नमस्ते देवदेवेश! देवदिव्यपदप्रद । शङ्कराय नमस्तुभ्यं नमस्तुभ्यं महेश्वर !॥ १२२
नमस्ते जगदानन्द नमस्ते शशिशेखर । मृत्युञ्जय नमस्तुभ्यं नमस्ते त्र्यम्बकायच
नमः पिनाकहस्ताय त्रिशूलायुधधारिणे । नमस्त्रिपुरहन्त्रे च नमोऽन्धकनिषूदन ॥
कन्दर्पदर्पदलन नमोजालन्धरारये । कालाय कालकालाय कालकूटविषादिने ॥ १२५
विषादहन्त्रे भक्तानामभक्तैकविषादद !। ज्ञानायज्ञानरूपाय सर्वज्ञाय नमोऽस्तुते ॥
योगसिद्धिप्रदोऽसि त्वं योगिनां योगसत्तम !।
तपसां फलदोऽसि त्वं तपस्विभ्यस्तपोधन !॥ १२७ ॥
त्वमेवमन्त्ररूपोऽसिमन्त्राणांफलदोभवान् । महादानफलं त्वं वै महादानप्रदोभवान्
महायज्ञस्त्वमेवेश महायज्ञफलप्रद !। त्वं सर्वः सर्वगस्त्वं वै सर्वदः सर्वदृग्भवान् ॥
सर्वभुक्सर्वकर्ता त्वं सर्वसंहारकारक !। योगिनां हृदयाकाशकृतालय! नमोऽस्तुते

त्वमेव विष्णुरूपेण शङ्खचक्रगदाधर !। त्रिलोकींत्रायसे त्रातःसत्त्वमूर्ते!नमोऽस्तु ते
त्वमेव विद्धास्येतद्विधिर्भूत्वाविधानवित्। रजोरू समालम्ब्य नीरजस्कपदप्रद
त्वमेव हि महारुद्रस्त्वम्महोग्रोभुजङ्गभृत्। त्वमेव हि महाभीमो महापितृवनेचर
तामसीं तनुमाश्रित्य त्वं कृतान्तकृतान्तकः। कालाग्निरुद्रोभूत्वान्तेत्वंसंवर्तप्रवर्तकः
त्वं पुम्प्रकृतिरूपाभ्यां महदाद्यखिलञ्जगत्। अक्षिपक्ष्मसमुत्क्षेपात्पुनराविःकरोष्यज
उन्मेषविनिमेषौ ते सर्गासर्गैककारणम्। कपालमालाखेलोयं भवतः स्वैरचारिणः
त्वत्कण्ठे नृकरोटीयं धूर्जटे!याविभासते। सर्वेषामन्तदग्धानांसास्फुटंबीजमालिका

त्वत्तः सर्वमिदं शम्भो त्वयि सर्वं चराचरम्।
कस्त्वां स्तोतुं विजानाति पुरा वाचामगोचरम्॥ १३८॥
स्तोता त्वं हि स्तुतिस्त्वं हि नित्यं स्तुत्यस्त्वमेव च।
वेद्मयों नमः शिवायेति नान्यद्वेद्म्यहं च किञ्चन॥ १३९॥

त्वमेवहि शरण्यंमे त्वमेवहि गतिः परा। त्वामेव प्रणमामीश नमस्तुभ्यं नमो नमः
इत्युदीर्यासकृद्वेधाः प्रणनाम महेश्वरम्। प्रणवाख्यं महालिङ्गरूपिणं दण्डवत्क्षितौ

ईश्वर उवाच

ततो गिरीन्द्रतनये! श्रुत्वा ब्रह्मस्तुतिम्पराम्। परमैश्वर्यसम्पत्तिहेतुंतुष्टोऽहमद्भुताम्

अमूर्तोऽहं ततो लिङ्गान्मूर्तिमास्थाय शाङ्करीम्।
प्रसन्नोऽस्मि वरं ब्रूहीत्युवाच चतुराननम्॥ १४३॥

चतुर्वक्त्रः समुत्थाय प्रत्यक्षंवीक्ष्यमामथ। पुनर्जजयजयेत्युक्त्वा प्रणनामकृताञ्जलिः
आनन्दबाष्पसलिलनेत्रोद्धृष्टतनूरुहः। गद्गदेन स्वरेणाथ प्रोवाच जलजासनः॥ १४५

ब्रह्मोवाच

यदिप्रसन्नो देवेश यदिदेयो वरो मम। तदेतस्मिन्महालिङ्गेसान्निध्यं तेऽस्तु शङ्कर!
अयमेव वरो देयो नान्यं वरमहं वृणे। ओंकारेश्वरनामैतदस्तु भक्तैकमुक्तिदम्॥

स्कन्द उवाच

विध्युक्तमिति विप्रर्षे !समाकर्ण्य तदेशिता। उवाच वचनं चैतत्तथास्तु चतुराननम्

वरानन्यानपि विभुःप्रसन्नस्तत्क्षणाद्ददौ। विधये दीर्घतपसे तयास्तुत्याऽतितोषितः

ईश्वर उवाच

सुरश्रेष्ठ तपःश्रेष्ठ! सर्वाम्नायनिधिर्भव। सृष्टेःकरणसामर्थ्यं तवास्तु मदनुग्रहात्॥
पितामहस्त्वं सर्वेषां सर्वेषांमान्यभूर्भवान्। त्वत्तपःफलदानार्थंयदेतल्लिङ्गमुत्थितम्
परमोङ्काररूपं च शब्दब्रह्ममयं विधे!। अस्याराधनतः पुंसां न दूरं ब्रह्मणः पदम्॥
अकाराख्यमिदंलिङ्गमुकाराख्यमिदंपरम्। मकाराह्वयमेतच्च नादाख्यं बिन्दुसञ्ज्ञकम्
पञ्चायतनमीशानमित्थमेतदुदीरितम्। मोक्षाय सर्वजन्तूनामस्मिन्नानन्दकानने॥

स्नात्वा मत्स्योदरीतीर्थे विलोक्योङ्कारमीश्वरम्।
न जातु जायते जन्तुर्जननीजठरे क्वचित्॥ १५५॥

एतन्नादेश्वरंलिङ्गमेतल्लिङ्गं सुदुर्लभम्। रम्येमत्स्योदरीतीरे दृष्टं स्पृष्टं विमुक्तिदम्
यदेतत्कापिलं ज्योतिरेतल्लिङ्गेविलोक्यते। अतस्तु कपिलेशाख्यमेतल्लिङ्गं सुदुर्लभम्
मत्स्योदरी यदागङ्गाकपिलेश्वरसन्निधौ। तदा तत्र नरःस्नात्वाब्रह्महत्यांव्यपोहति
वरणोत्सिक्तपानीये द्युनदीतोयमिश्रिते। स्नात्वानादेश्वरं दृष्ट्वा नरः किमनुशोचति

अष्टम्यां च चतुर्दश्यां तीर्थानि सह सागरैः।
षष्टिकोटिसहस्राणि मत्स्योदर्यां विशन्ति हि॥ १६०॥

प्रणवेशसमीपेतु यदा गङ्गासमेष्यति। तदा पुण्यतमः कालो देवर्षिपितृवल्लभः
तत्रस्नानं जपोदानं हवनं देवतार्चनम्। मत्स्योदर्यामक्षयं स्यादोङ्कारेश्वरसन्निधौ
ओङ्कारदर्शनादेव वाजिमेधफलंलभेत्। तस्मात्काश्यां प्रयत्नेन दृश्यओङ्कार ईश्वरः
दुर्लभं मानवं जन्म चतुर्वर्गैकसाधनम्। जलबुद्बुदवत्तस्यान्नादेशो येन नेक्षितः

निरीक्ष्य कपिलेशानं स्नात्वा मत्स्योदरीजले।
कृत्वा पिण्डप्रदानानि पितॄणामनृणो भवेत्॥ १६५॥
कृत्वाऽपि मोहात्पापानि भूरीण्येव महान्त्यपि।
काश्यामोङ्कारमालोक्य कुतस्त्रस्यति वै यमात्॥ १६६॥

ओङ्कारयात्राभिमुखंनरंवीक्ष्य पितामहाः। परिनृत्यन्तिमुदिताःस्वसन्तानसमुद्भवम्

यस्य यस्य च वै नाम स्मृत्वा स्मृत्वा नमस्यति ।
तन्तमुन्नयते प्राज्ञः पितरं ब्रह्मणः पदम् ॥ १६८ ॥
रुद्राणां नियुतं जप्त्वा यत्फलं सम्यगाप्यते ।
तत्फलं लभते नूनं भक्त्योङ्कारविलोकनात् ॥ १६६ ॥

केवलं भूमिभाराय जन्मिनो जन्मतस्य वै । येनाऽऽनन्दवनेदृष्टोनोङ्कारः सर्वकामदः एकमोङ्कारमालोक्यसमस्तेक्षोणिमण्डले । लिङ्गजातानिसर्वाणिदृष्टानिस्युर्नसंशयः प्रणवेशं प्रणम्याथ यद्यन्यत्र विपद्यते । स्वर्गलोकमवाप्याथकाश्यांमुक्तिमवाप्नुयात्

अस्मिँल्लिङ्गे सदा ब्रह्मन्स्थास्यामीति विनिश्चितम् ।
दास्यामि च सदा मोक्षमेतल्लिङ्गार्चकाय वै ॥ १७२ ॥

ओङ्कारंसकृदप्यत्र नरो नत्वाप्रयत्नतः । कृतकृत्यो भवेन्नूनं परमान्मदनुग्रहात् ॥ ओङ्कारपश्चिमे भागे तारतीर्थमनुत्तमम् । कृतोदकक्रियस्तत्र नरस्तरति दुर्गतिम् ओङ्कारेशस्य ये भक्ता ज्ञेयास्ते नैवमानवाः । मनुष्यचर्मणानद्धास्तेरुद्रामोक्षगामिनः अस्यलिङ्गस्यमहिमानान्यैरत्रावगम्यते । त्वत्पुण्योदयतोयस्माद्विधेत्राविरभूदिदम् एतल्लिङ्गप्रभावाच्च सर्वंज्ञास्यसि तत्त्वतः । विधेविधेहि तस्मात्त्वं सर्वमेतच्चराचरम् इति दत्वा वरं तस्मै ब्रह्मणे पद्मसम्भवे । तस्मिन्नेवमहालिङ्गे शम्भुर्लीनो बभूव ह

स्कन्द उवाच

ब्रह्मापिभजतेद्यापि तल्लिङ्गं कलशोद्भव !। स्तुवन्ब्रह्मस्तवेनैव स्वात्मनाविहितेन हि ब्रह्मस्तवं जपन्मर्त्यः सर्वैंपापैः प्रमुच्यते । पूर्यते च महापुण्यैर्ज्ञानं प्राप्नोतिसत्तमम् ब्रह्मस्तवमिमं जप्त्वा त्रिकालं परिवत्सरम् । अन्तकालेभवेज्ज्ञानंयेनबन्धात्प्रमुच्यते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे उत्तरार्धेओङ्कारमहिमवर्णनंनामत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

——:*:——

चतुःसप्ततितमोऽध्यायः

ॐकारमाहात्म्यवर्णनम्

स्कन्द उवाच

शृणुवातापिसंहर्तः! काश्यांपातकतङ्किनी । पद्मकल्पेतु या वृत्ता दमनस्य द्विजन्मनः भारद्वाजस्य तनयो दमनोनाम नामतः । कृतमौञ्जीविधिःसोथ विद्याजातं प्रगृह्य च संसारं दुःखबहुलं जीवितं चापिचञ्चलम् । विज्ञायदमनोविद्वान्निर्जगामगृहान्निजात् कांचिद्दिशं समालम्ब्य निर्वेदं परमंगतः । प्रत्याश्रमं प्रतिनगंप्रत्यब्धि प्रतिकाननम् प्रतितीर्थं प्रतिनदि स बभ्राम तपोयुतः । यावन्त्यायतनानीह तिष्ठन्तिपरितोभुवम्

अध्युवास स तावन्ति संयतेन्द्रियमानसः ।
परं न मनसःस्थैर्यं क्वापि प्रापि च तेन वै ॥ ६ ॥

मनोरथोपदेष्ट्रा च कुत्रचित्कापिनेक्षितः । कदाचिद्दैवयोगात्स दमनोनाम तापसः रेवातटेनिरैक्षिष्ट तीर्थंचामरकण्टकम् । महदायतनं पुण्यमोङ्कारस्यापि तत्र वै ॥ दृष्ट्वा हृष्टमना आसीच्चेतः स्थैर्यमवापह । अथपाशुपतांस्तत्र स निरीक्ष्यतपोधनान् विभूतिभूषिततनूनकृतलिङ्गसमर्चनान् । विहितप्राणयात्रांश्च कृतागमविचारणान्

स्वस्थोपविष्टान्स्वगुरोरग्रतोऽचलमानसान् ।
प्रणम्योपाविशत्तत्र तदाचार्यस्य सन्निधौ ॥ ११ ॥

प्रबद्धहस्तयुगलः प्रणमत्तरकन्धरः । अथपाशुपताचार्यो गर्गो नाम महामुनिः ॥ वार्धकेन समाक्रान्तस्तपसा कृशविग्रहः । शम्भोराराधने निष्ठः श्रेष्ठः सर्वतपस्विषु पप्रच्छ दमनं चेतिकस्त्वंकस्मादिहागतः । तरुणोऽपिविरक्तोऽसिकुतस्तद्वदसत्तम इतिप्रणयपूर्वं स निशम्य दमनोऽब्रवीत् । भगोः पाशुपताचार्य!सर्वज्ञाराधनप्रिय कथयामि यथार्थं ते निजचेतोविचेष्टितम् । अहं ब्राह्मणदायादो :वेदशास्त्रकृतश्रमः संसारासारतां ज्ञात्वा वानप्रस्थमशिश्रियम् । अनेनैवशरीरेणमहासिद्धिमभीप्सता

स्नातं बहुषु तीर्थेषु मन्त्राजप्तास्तु कोटिशः। देवताः सेविताबह्व्योहवनंचकृतं बहु शुश्रूषिताश्च गुरवो बहवो बह्वनेहसम्। महाश्मशानेषु निशाभूयस्योऽप्यतिवाहिताः

शिखराणि गिरीन्द्राणां मया चाध्युषितान्यहो।

दिव्यौषधिसहस्राणि मया संसाधितान्यपि ॥ २० ॥

रसायनानि बहुशः सेवितानि मया पुनः। महासाहसमालम्ब्य सिद्धाध्युषितकन्दराः मया प्रविष्टा बहुशः कृतान्तवदनोपमाः। तपश्चापि महत्तप्तं बहुभिर्नियमैर्यमैः॥ परं किञ्चित्कचिन्नैक्षि सिद्ध्यङ्कुरमपिप्रभो। इदानीं त्वामनुप्राप्यमहींपर्यटता मया

मनसः स्थैर्यमापन्नमिव सम्प्राप्तसिद्धिना।

अवश्यं त्वन्मुखाम्भोजाद्यद्वचो निःसरिष्यति ॥ २४ ॥

तेनैव महती सिद्धिर्भवित्रीममनान्यथा। तद्ब्रूहि सूपदेशं च कथं सिद्धिर्भवेन्मम अनेनैव शरीरेण पार्थिवेन प्रथीयसी। दमनस्य निशम्येति गर्गाचार्यो वचस्तदा प्रत्यक्षदृष्टं प्रोवाचमहदाश्चर्यमुत्तमम्। सर्वेषांशृण्वतांतत्र शिष्याणांस्थिरचेतसाम्

मुमुक्षूणां धृतवतां महापाशुपतं व्रतम् ॥ २७ ॥

गर्ग उवाच

अनेनैवेह देहेन यदि त्वं सिद्धिकामुकः। शृणुष्वावहितो भूत्वातदाते कथयाम्यहम् अविमुक्ते महाक्षेत्रे सर्वसिद्धिप्रदे सताम्। धर्मार्थकाममोक्षाख्यरत्नानां परमाकरे समाश्रितानां जन्तूनांसर्वेषां सर्वकर्मणाम्। शलभानांप्रदीपा ये तमस्तोममहाद्विषि

कर्मभूरुहदावाग्नौ संसाराब्ध्यौर्वशोचिषि।

निर्वाणलक्ष्मी क्षीराब्धौ सुखसङ्केतसद्मनि ॥ ३१ ॥

दीर्घनिद्राप्रसुप्तानां परमोद्बोधदायिनि। यातायातश्रमापन्नप्राणिमार्गमहीरुहि॥ अनेकजन्मजनितमहापापाद्रिवज्रिणि। नामोच्चारकृतां पुंसां महाश्रेयोविधायिनि

विश्वेशितुः परे धाम्नि सीम्नि स्वर्गापवर्गयोः।

स्वर्धुनीलोलकल्लोलनित्यक्षालितभूतले ॥ ३४ ॥

एवं विधे महाक्षेत्रे सर्वदुःखौघहारिणि। प्रत्यक्षं मम यद्वृत्तं तद्ब्रवीमि महामते

यत्र कालभयं नास्तियत्र नास्त्येनसोभयम्। तत्क्षेत्रमहिमानंकः सम्यग्वर्णयितुंक्षमः

तीर्थानि यानि लोकेऽस्मिञ्जन्तूनामघहान्यहो।

तानि सर्वाणि शुद्ध्यर्थं काशीमायान्ति नित्यशः ॥ ३७ ॥

अपिकाश्यांवसेद्यस्तु सर्वाशीसर्वविक्रयी। सयांगतिलभेन्मर्त्योयज्ञैर्दानैर्नसाऽन्यतः रागबीजसमुद्भूतः संसारविटपोमहान्। दीर्घस्वापकुठारेण च्छिन्नःकाश्यांनवर्धते सर्वेषामूषराणां तु काशी परमऊषरः। वप्तुर्बीजमिदं तस्मिन्नुप्तं नैव प्ररोहति॥

स्मरिष्यन्तीह ये काशीमवश्यं तेऽपि साधवः।

तेऽप्यघौघविनिर्मुक्ता यास्यन्ति गतिमुत्तमाम ॥ ४१ ॥

विभूतिःसर्वलोकानांसत्यादीनांसुभंगुरा। अभंगुराविमुक्तस्य सातुलभ्याशिवाज्ञया कृमिकीटपतङ्गानामविमुक्तेतनुत्यजाम्। विभूतिर्द्दश्यतेयासाक्वास्तिब्रह्माण्डमण्डले

वाराणसी यदा प्राप्ता कदाचित्कालपर्ययात्।

स उपायो विधातव्यो येन नो निष्क्रमो बहिः ॥ ४४ ॥

पूर्वतो मणिकर्णीशो ब्रह्मेशो दक्षिणेस्थितः। पश्चिमेचैव गोकर्णोभारभूतस्तथोत्तरे इत्येतदुत्तमं क्षेत्रमविमुक्ते महाफलम्। मणिकर्णीह्रदे स्नात्वादृष्ट्वाविश्वेश्वरंविभुम् क्षेत्रं प्रदक्षिणीकृत्य राजसूयफलंलभेत्। तत्र श्राद्धप्रदातुश्च मुच्यन्तेप्रपितामहाः॥ अविमुक्तसमं क्षेत्रमपि ब्रह्माण्डगोलके। नविद्यते क्वचित्सत्यंसत्यंसाधकसिद्धिदम् रक्षन्ति सततंक्षेत्रं यत्रपाशासिपाणयः। महापारिषदाउग्राः क्रूरेभ्योऽक्रूरबुद्धयः॥ प्राग्द्वारमट्टहासश्च गणकोटिपरीवृतः। रक्षेदहर्निशं क्षेत्रं दुर्वृत्तेभ्यो विभीषणः॥ तथैव भूतधात्रीशः क्षेत्रदक्षिणरक्षकः। गोकर्णः पश्चिमद्वारं पाति कोटिगणावृतः उदग्द्वारंतथारक्षेद्घण्टाकर्णोमहागणः। ऐशं कोणं छागवक्त्रोभीषणोवह्निदिग्दलम्

रक्षः काष्ठां शङ्कुकर्णो द्रुमिचण्डो मरुद्दिशम्।

इत्थं क्षेत्रं सदा पान्ति गणा एतेऽतिभास्वराः ॥ ५३ ॥

कालाक्षो रणभद्रस्तु कौलेयःकालकम्पनः। एतेपूर्वेणरक्षन्ति गङ्गापारेस्थितागणाः वीरभद्रो नभश्चैव कर्दमालिप्तविग्रहः। स्थूलकर्णामहाबाहुरसिपारे व्यवस्थिताः

विशालाक्षो महाभीमः कुण्डोदरमहोदरौ । रक्षन्तिपश्चिमद्वारं देहलीदेशसंस्थिताः
नन्दिसेनश्च पञ्चालः खरपादः करण्टकः । आनन्दो गोपको बभ्रूरक्षन्ति वरणातटे ॥
तस्मिनक्षेत्रे महापुण्ये लिङ्गमोङ्कारसञ्ज्ञकम् । तत्रसिद्धिंपरांप्रापादेहेनानेनसाधकाः
कपिलश्चैवसावर्णिःश्रीकण्ठःपिङ्गलोंशुमान् । एतेपाशुपताःसिद्धास्तल्लिङ्गाराधनेनहि
एकदातस्यलिङ्गस्यकृत्वापञ्चापिपूजनम् । नृत्यन्तःसहुडुत्कारं तस्मिँल्लिङ्गेलयंययुः
अन्यच्च तेप्रवक्ष्यामि तत्र यद्वृत्तमद्भुतम् । निशामय महाबुद्धे! दमनद्विजसत्तम !॥
एकाभेकी मुनेतत्रचरन्ती लिङ्गसन्निधौ । प्रदक्षिणं सदा कुर्यान्निर्माल्याक्षतभक्षिणी
सा तत्र मृत्यु'न प्रापशिवनिर्माल्यभक्षणात् । क्षेत्रादन्यत्र मरणं जातंतस्यास्तदेनसः
वरंविषमपि प्राश्यं शिवस्वन्नैवभक्षयेत् । विषमेकाकिनं हन्तिशिवस्वं पुत्रपौत्रकम्
शिवस्वपरिपुष्टाङ्गाः स्पर्शनीया नसाधुभिः । तेन कर्मविपाकेन ततस्ते रौरवौकसः

कश्चित्काकः समालोक्य मण्डूकीं तामितस्ततः ।
पोप्लूयमानामादाय चञ्च्वा क्षेत्राद् बहिर्गतः ॥ ६६ ॥

वर्षाभ्वीतेन साक्षिप्ता काकेनक्षेत्रवाह्यतः । अथ सा कालतो भेकी तत्रैव क्षेत्रसत्तमे
प्रदक्षिणीकरणतो लिङ्गस्य स्पर्शनादपि । पुण्यापुण्यवती जाताकन्यापुष्पवटोगृहे
शुभावयवसंस्थाना शुभलक्षणलक्षिता । परंगृध्रमुखी जाता निर्माल्याक्षतभक्षणात्
सम्यग्गीतरहस्यज्ञा नितरांमधुरस्वरा । सप्तस्वरास्त्रयोग्रामामूर्च्छनास्त्वेकविंशतिः
ताना एकोनपञ्चाशत्ताला एकोत्तरं शतम् । रागाः षडेव तेषां तु पञ्चपञ्चापिचाङ्गनाः
षट्त्रिंशद्रागरागिण्य इति रागिमुदावहाः । देशकालविभेदेन पञ्चषष्टिस्तथापराः
यावन्त एव तालाः स्यूरागास्तावन्तएवहि । इतिगीतोपनिषदा प्रत्यहं साशुभव्रता
माधवी मधुरालापासदोङ्कारंसमर्चयेत् । प्राप्याप्यनर्घ्यतारुण्यंसातु पुष्पवटोःसुता
प्राग्जन्मवासनायोगादोङ्कारंबहुमंस्तवै । स्वभावचञ्चलंचेतस्तस्यास्तल्लिङ्गसेवनात्
दमनस्थैर्यमगमद्योगेनेव महात्मनः । नदिवा बाधयाञ्चक्रे क्षुत्तृण्निद्राक्षपासु ताम्

अतन्द्रितमना आसीत्सा तल्लिङ्गनिरीक्षणे ।
अक्ष्णोर्निमेषा यावन्तस्तस्या आसन् दिवानिशम् ॥ ७७ ॥

तावत्कालस्तया साध्व्या महान् विघ्नोऽनुमीयते ।
निमेषान्तरितः कालो यो यो व्यर्थो गतो मम ।
लिङ्गानवेक्षणात्तत्र प्रायश्चित्तं कथं भवेत् ॥ ७८ ॥
इति सञ्चिन्तयन्त्येवसेवांतत्याजनोङ्कृतेः ।
जलाभिलाषिणी सा तु लिङ्गनामामृतंपिबेत् ॥ ७९ ॥
नान्यद्दिदृक्षिणी तस्या अक्षिणी श्रुतिगे अपि ।
विहाय लिङ्गमोङ्कारं हृद्विहायःस्थितं मताम् ॥ ८० ॥

तस्याः शब्दग्रहौ नान्यशब्दग्रहणतत्परौ । अतीवनिपुणौजातौतत्सन्माल्यकरौकरौ

नान्यत्र चरणौ तस्याश्चरतः सुखवाञ्छया ।
त्यक्त्वोङ्काराजिरक्षोणीं क्षुण्णां निर्वाणपञ्चया ॥ ८२ ॥

ओङ्कारं प्रणवंसारं परं ब्रह्मप्रकाशकम् । शब्दब्रह्मत्रयीरूपं नादबिन्दुकलालयम् ॥
सदक्षरं चादिरूपं विश्वरूपं परावरम् । वरं वरेण्यं वरदं शाश्वतं शान्तमीश्वरम्
सर्वलोकैकजनकं सर्वलोकैकरक्षकम् । सर्वलोकैकसंहर्तृ सर्वलोकैकवन्दितम् ॥
आद्यन्तरहितं नित्यं शिवं शङ्करमव्ययम् । एकंगुणत्रयातीतं भक्तस्वान्तकृतास्पदम्
निरुपाधिनिराकारं निर्विकारं निरञ्जनम् । निर्मलं निरहङ्कारं निष्प्रञ्चं निजोदयम्
स्वात्मारामममनन्तं च सर्वगं सर्वदर्शिनम् । सर्वदं सर्वभोक्तारं सर्वं सर्वसुखास्पदम्

वागिन्द्रियं तदीयं च प्रोच्चरत्तदहर्निशम् ।
नामान्तरं न गृह्णाति क्वचिदन्यस्य कस्यचित् ॥ ८६ ॥

एतन्नामाक्षररसं रसयन्ती दिवानिशम् । रसना नैव जानाति तस्याअन्यद्रसान्तरम्
सम्मार्जनं रङ्गमालाः प्रासादं परितःसदा । विदध्यान्माधवीतत्रतथार्चापात्रशोधनम्
तत्र पाशुपता येवै प्रणवेशार्चने रताः । तांश्च शुश्रूषयेन्नित्यं पितृबुद्ध्यातिभक्तितः
वैशाखस्य चतुर्दश्यामेकदा सातु माधवी । रात्रौजागरणंकृत्वादिवोपवसनान्विता
यात्रामिलितभक्तेषु प्रातर्यातेषु सर्वतः । सम्मार्जनादिकं कृत्वा लिङ्गमभ्यर्च्यहर्षतः
गायन्ती मधुरं गीतं नृत्यन्तीनिजलीलया । ध्यायन्तीलिङ्गमोङ्कारंतत्रलिङ्गेलयंययौ

अनेनैव शरीरेण पार्थिवेन महामतिः । अस्मदाचार्यमुख्यानां पश्यतांचतपस्विनाम्

प्रादुर्बभूव यल्लिङ्गाज्ज्योतिर्जटिलिताम्बरम् ।

तत्र ज्योतिषि सा बाला ज्योतिर्मय्यपि साऽप्यभूत् ॥ ९७ ॥

राधशुक्लचतुर्दश्यामद्यापि क्षेत्रवासिनः । तत्र यात्रां प्रकुर्वन्ति महोत्सवपुरःसराः

तत्र जागरणं कृत्वा चतुर्दश्यामुपोषिताः ।

प्राप्नुवन्ति परं ज्ञानं यत्र कुत्रापि वै मृताः ॥ ९९ ॥

ब्रह्माण्डोदरमध्ये तुयानितीर्थानिसर्वतः । तानिवैशाखभूतायामायान्त्योङ्कृतिदर्शने

लिङ्गाग्रे श्रीमुखी नाम्नी गुहाऽस्ति परमोत्तमा ।

पातालस्य च तद् द्वारं तत्र सिद्धा वसन्ति हि ॥ १०१ ॥

तिष्ठेयुः पञ्चरात्रंये गुहायां तत्रसुव्रताः । तेनागकन्याःपश्यन्तिब्रूयुस्ताश्च शुभाशुभम्

कन्दरोत्तरदिग्भागे तत्र कूपोरसोदकः ।

आषण्मासं च तत्पीत्वा पिबेद् ब्रह्मरसायनम् ॥ १०३ ॥

तत्र नादेश्वरं लिङ्गं दृष्ट्वा नादनिदानभूः । सर्वनादात्मकं विश्वं तच्छ्रवोगोचरीभवेत्

तत्र मत्स्योदरीं स्नात्वा स्वर्धुनीं वरुणाप्लुताम् ।

कृतकृत्यो भवेज्जन्तुर्नैव शोचति कुत्रचित् ॥ १०५ ॥

असङ्ख्याता गताः सिद्धिमोङ्कारेश्वरसेवकाः । पार्थिवेनैवदेहेनदिव्यभूतेनतत्क्षणात्

अविमुक्तं परं क्षेत्रं ब्रह्माण्डादपि सर्वतः ।

ततोऽपि पर ओङ्कार उक्तो मत्स्योदरीतटे ॥ १०७ ॥

प्रणवेशोऽङ्ग! यैःकाश्यांननतोनापिचार्चितः । किमर्थंतेसमुत्पन्नामातृतारुण्यहारिणः

यदा प्रभृति विश्वेशो मन्दरादागतोऽभवत् । तस्मिन्नानन्दगहनेतदाप्रभृति सत्तम!

सर्वाण्यायतनान्याशु साब्धीनि सगिरीण्यपि ।

सनदीनि सतीर्थानि सद्वीपानि ययुस्ततः ॥ ११० ॥

इदानीं ममभाग्येन स्मारितोऽहंत्वयामुने । अहमप्यागमिष्यामियामःकाशींशनैःशनैः

एतेऽपि ममशिष्या ये महापाशुपतव्रताः । काशीं यियासवस्तेपि यतःसर्वेमुमुक्षवः

अपि वार्धकमासाद्य यैः काशी नैव शीलिता ।

मानुषे दुर्लभे नष्टे कुतस्तेषां महासुखम् ॥ ११३ ॥

यावन्नेन्द्रियवैकल्यं यावन्नैवायुषः क्षयः । तावत्सेव्यं प्रयत्नेन शम्भोरानन्दकाननम्

य आनन्दवनं शम्भोः शिश्रियुः श्रीनिकेतनम् ।

अचला श्रीर्नमुञ्चेत्तान्महासौख्यैकशेवधीन् ॥ ११५ ॥

इत्याख्याय कथांरम्यां गर्गः पाशुपतोत्तमः । भारद्वाजेनसहितःप्रापवाराणसींपुरीम्

दमनोऽपि हि धर्मात्मा गर्गाचार्येण संयुतः ।

आराध्य श्रीमदोङ्कारं तस्मिँल्लिङ्गे लयं गतः ॥ ११७ ॥

स्कन्द उवाच

इल्वलारे परं स्थानमोङ्कारमविमुक्तके । तत्र सिद्धिं परांजग्मुः साधका बहुशो मुने

कलौ कलुषचित्तानांपुरोनाऽऽख्येयमेवहि । प्रणवेश्वरमाहात्म्यंनास्तिकानांविशेषतः

ये निन्दन्ति महादेवं क्षेत्रं निन्दन्ति येऽधियः ।

पुराणं ये च निन्दन्ति ते सम्भाष्या न कुत्रचित् ॥ १२० ॥

ॐङ्कारसदृशं लिङ्गं न क्वचिज्जगतीतले । इतिगौर्यैसमाख्यातं देवदेवेन निश्चितम्

इममध्यायमाकर्ण्य नरस्तद्गतमानसः । विमुक्तः सर्वपापेभ्यः शिवलोकमवाप्नुयात्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये काशीखण्डे

उत्तरार्धेॐङ्कारमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः

त्रिलोचनाविर्भाववर्णनम्

अगस्त्य उवाच

श्रुत्वोङ्कारकथामेतांमहापातकनाशिनीम् ।नतृप्तोस्तिविशाखाथत्र् हित्रैविष्टपींकथाम्
कथं च कथिता देव्यै देवदेवेन षण्मुख !। आविर्भूतिर्महाबुद्धे! पुण्यात्रैलोचनीपरा

स्कन्द उवाच

आकर्णय मुने! वच्मि कथां श्रमनिवारिणीम् ।
यथा देवेन कथितां त्रिविष्टपसमुद्भवाम् ॥ ३ ॥
विरजाख्यं हि तत्पीठं तत्र लिङ्गं त्रिविष्टपम् ।
तत्पीठदर्शनादेव विरजा जायते नरः ॥ ४ ॥
तिस्रस्तु सङ्गतास्तत्र स्रोतस्विन्यो घटोद्भव !।
तिस्रः कल्मषहारिण्यो दक्षिणे हि त्रिलोचनात् ॥ ५ ॥

स्रोतोमूर्तिधराः साक्षाल्लिङ्गस्नपनहेतवे । सरस्वत्यथ कालिन्दीनर्मदाचातिशर्मदा
तिस्रोपि हि त्रिसन्ध्यन्ताः सरितः कुम्भपाणयः।
स्नपयन्ति महाधाम लिङ्गं त्रैविष्टपम्महत् ॥ ७ ॥
लिङ्गानि परितस्ताभिः स्वनाम्ना स्थापितान्यपि ।
तेषां सन्दर्शनात्पुंसां तासां स्नानफलं भवेत् ॥ ८ ॥

सरस्वतीश्वरं लिङ्गं दक्षिणेनत्रिविष्टपात् । सारस्वतंपदंदद्याद्दृष्टंस्पृष्टञ्च जाड्यहृत्
यमुनेशम्प्रतीच्याञ्च नरैर्भक्तयासमर्चितम् । अपिकिल्बिषवह्निश्चयमलोकनिवारणम्
दृष्टंत्रिलोचनात्प्राच्यां नर्मदेशं सुशर्मदम् । तल्लिङ्गार्चनतो नृणांगर्भवासोनिषिध्यते
स्नात्वा पिलिपिलातीर्थे त्रिविष्टपसमापतः ।
दृष्ट्वा त्रिलोचनं लिङ्गं किं भूयः परिशोचति ॥ १२ ॥

त्रिविष्टपस्य लिङ्गस्य स्मरणादपिमानवः । त्रिविष्टपपतिर्भूयान्नात्रकार्याविचारणा
त्रिविष्टपस्य द्रष्टारः स्रष्टारः स्युर्नसंशयः । कृतकृत्याएत एवात्र त एवात्रमहाधियः
आनन्दकानने लिङ्गं प्रणतंयैस्त्रिविष्टपम् । त्रिलोचनस्य नामापियैः श्रुतंशुद्धबुद्धिभिः
सप्तजन्मार्जितात्पापात्ते पूता नात्र संशयः । पृथिव्यांयानिलिङ्गानितेषुदृष्टेषुयत्फलम्
तत्स्यात्त्रिविष्टपेदृष्टेकाश्यांमन्येततोधिकम्। काश्यांत्रिविष्टपेदृष्टेदृष्टंसर्वंत्रिविष्टपम्
क्षणान्निर्धूतपापोसौ नपुनर्गर्भभाग्भवेत् । सस्नातः सर्वतीर्थेषुसर्वावभृथवान्सच
योवैपिलिपिलातीर्थे स्नात्वोत्तरवहाम्भसि । सरित्त्रयंमहापुण्यंयत्रसाक्षाद्वसेत्सदा
तत्र श्राद्धादिकं कृत्वा गयायां किं करिष्यति ।
स्नात्वा पिलिपिलातीर्थे कृत्वा वै पिण्डपातनम् ॥ २० ॥

दृष्ट्वात्रिविष्टपं लिङ्गं कोटितीर्थफलं लभेत् । यदन्यत्रार्जितंपापंतत्काशीदर्शनाद्व्रजेत्
काश्यां तु यत्कृतं पापं तत्पैशाचपदप्रदम् । प्रमादात्पातकं कृत्वाशम्भोरानन्दकानने
दृष्ट्वात्रिविष्टपं लिङ्गं तत्पापमपि हास्यति । सर्वस्मिन्नपि भूपृष्ठेश्रेष्ठमानन्दकाननम्
तत्राऽपि सर्वतीर्थानि ततोऽप्योङ्कारभूमिका ।
ॐकारादपि सल्लिङ्गान्मोक्षवर्त्मप्रकाशकात् ॥ २४ ॥

अतिश्रेष्ठतरंलिङ्गं श्रेयोरूपंत्रिलोचनम् । तेजस्विषुयथा भानुर्दृश्येषु च यथा शशी
तथा लिङ्गेषु सर्वेषु परं लिङ्गं त्रिलोचनम् । २६ ॥

त्रिलोचनार्चकानां सापदवी न दवीयसी । परं निर्वाणपद्माया महासौख्यैकशेवधेः
सकृत्त्रिलोचनार्चातो यच्छ्रेयः समुपार्ज्यते ।
न तदाजन्म सम्पूज्य लिङ्गान्यन्यानि लभ्यते ॥ २८ ॥
काश्यां त्रिलोचनं लिङ्गं येऽर्चयन्ति महाधियः ।
तेऽर्च्यास्त्रिभुवनोकोभिर्ममप्रीतिमभीप्सुभिः ॥ २९ ॥
कृत्वाऽपि सर्वसंन्यासं कृत्वा पाशुपतव्रतम् ।
नियमेभ्यः स्खलित्वाऽपि कुतो बिभ्यति मानवाः ॥ ३० ॥

विद्यमाने महालिङ्गे महापापौघहारिणि । त्रिविष्टपे पुण्यराशौ मोक्षनिक्षेपसद्मनि

समभ्यर्च्य महालिङ्गं सकृदेवत्रिलोचनम् । मुच्यते कलुषैः सर्वैरपि जन्मशतार्जितैः
ब्रह्महापिसुरापोवास्तेयी वागुरुतल्पगः । तत्संयोग्यपि वावर्षं महापापीप्रकीर्तितः
परदाररतश्चापि परहिंसारतोपि वा । परापवादशीलोपि तथा विस्रम्भघातकः ॥
कृतघ्नोऽपि भ्रूणहाऽपि वृषलीपतिरेव वा । मातापितृगुरुत्यागी वह्निदोगरदोऽपिवा
गोघ्नः स्त्रीघ्नोऽपिशूद्रघ्नःकन्यादूषयितापि च । क्रूरोवापिशुनोवापिनिजधर्मपराङ्मुखः

निन्दको नास्तिको वाऽपि कूटसाक्ष्यप्रवादकः ।
अभक्ष्यभक्षको वाऽपि यथाऽविक्रेयविक्रयी ॥ ३७ ॥
इत्यादिपापशीलोऽपि मुक्त्वैकं शिवनिन्दकम् ।
पापान्निष्कृतिमाप्नोति नत्वा लिङ्गं त्रिलोचनम् ॥ ३८ ॥
शिवनिन्दारतो मूढः शिवशास्त्रविनिन्दकः ।
तस्य नो निष्कृतिर्दृष्टा क्वापि शास्त्रेऽपि केनचित् ॥ ३९ ॥
आत्मघाती स विज्ञेयः सदा त्रैलोक्यघातकः ।
शिवनिन्दां विधत्ते यः सोऽनाभाष्योऽधमाधमः ॥ ४० ॥

शिवनिन्दारता ये च शिवभक्तजनेष्वपि । ते यान्ति नरके घोरे यावच्चन्द्रदिवाकरौ

शैवाः पूज्याः प्रयत्नेन काश्यां मोक्षमभीप्सुभिः ।
तेष्वर्चितेऽष्वपि शिवः प्रीतो भवत्यसंशयः ॥ ४२ ॥

सर्वेषामिह पापानां प्रायश्चित्तचिकीर्षया । निःशङ्कैरेव वक्तव्यं प्रमाणज्ञैरिदं वचः
पुरश्चरणकामश्चेद्भीतोऽसि यदि पापतः । मन्यसे यदिनःसत्यंवाक्यं शास्त्रप्रमाणतः
ततःसर्वंपरित्यज्यकृत्वामनसिनिश्चयम् । आनन्दकाननंयाहियत्र विश्वेश्वरःस्वयम्
यत्र क्षेत्रप्रविष्टानां नराणांनिश्चितात्मनाम् । नबाधतेऽघनिचयः प्राप्यतेच परो वृषः
तत्राद्यापिमहातीर्थेत्रिस्रोतस्यतिनिर्मले । पुण्येपिलिपिलानाम्नित्रिसरित्परिसेविते
त्रिलोचनाक्षिविक्षेपपरिक्षितमहैनसि । स्नात्वागृह्योक्तविधिना तर्पणीयान्प्रतर्प्य च
दत्त्वादेयंयथाशक्तिवित्तशाठ्यविवर्जितः । दृष्ट्वा त्रिविष्टपंलिङ्गं समभ्यर्च्यातिभक्तितः
गन्धाद्यैर्विविधैर्माल्यैः पञ्चामृतपुरःसरैः । धूपैर्दीपैः सनैवेद्यैर्वासोभिर्बहुभूषणैः ॥

पूजोपकरणैर्द्रव्यैर्घण्टादर्पणचामरैः । चित्रध्वजपताकाभिर्नृत्यवाद्यसुगायनैः ॥ ५१
जपैः प्रदक्षिणाभिश्च नमस्कारैर्मुदायुतैः । परिचारकसन्तोषैः कृत्वेति परिपूजनम्

ब्राह्मणान्वाचयेत्पश्चान्निष्पापोऽहमिति ब्रुवन् ।
एवं कुर्वन्नरः प्राज्ञो निरेना जायते क्षणात् ॥ ५३ ॥

ततः पञ्चनदेस्नात्वा मणिकर्णीह्रदे ततः । ततो विश्वेशमभ्यर्च्यप्राप्नोतिसुकृतंमहत्
प्रायश्चित्तमिदं प्रोक्तंमहापापविशोधनम् । नास्तिकेनप्रवक्तव्यंकाशीमाहात्म्यनिन्दके
दद्याच्च द्रव्यलोभेन प्रायश्चित्तमिदं शुभम् । दातानरकमाप्नोति सत्यं सत्यं घटोद्भव !
क्ष्मां प्रदक्षिणीकृत्य यत्फलंसम्यगाप्यते । प्रदोपेतत्फलंकाश्यांसकृत्वस्त्रिलोचने
भुजङ्गमेखलं लिङ्गंकाश्यां दृष्ट्वात्रिविष्टपम् । जन्मान्तरेऽपिमुक्तः स्यादन्यत्रमरणेसति
अन्यत्रसर्वलिङ्गेषु पुण्यकालोविशिष्यते । त्रिविष्टपेपुण्यकालःसदारात्रिन्दिवंनृणाम्

लिङ्गान्योङ्कारमुख्यानि सर्वपापप्रकृन्त्यलम् ।
परं त्रैलोचनी शक्तिः काचिदन्यैव पार्वति ! ॥ ६० ॥

यतः सर्वेषु लिङ्गेषु लिङ्गमेतदनुत्तमम् । तत्कारणं शृणवपर्णे! कर्णे कुरु वदाम्यहम्
पुरा मेयोगयुक्तस्य लिङ्गमेतद्भुवस्तलात् । उद्भिद्यसप्त पातालं निरगात्पुरतोमहत्
अस्मिँल्लिङ्गे पुरागौरिसुगुप्तं तिष्ठतामया । तुभ्यन्नेत्रत्रयंदत्तं निरैक्षिष्टास्तथोत्तमम्
तदाप्रभृति देवेशि! लिङ्गमेतत्त्रिलोचनम् । विष्टपत्रितयान्तस्थैर्गीयते ज्ञानदृष्टिदम्
त्रिलोचनस्ययेभक्तास्तेऽपिसर्वेत्त्रिलोचनाः । ममपारिषदास्तेतुजीवन्मुक्तास्तएवहि
त्रिलोचनस्यलिङ्गस्यमहिमानं न कश्चन । सम्यग्वेत्तिमहेशानि! मयैवपरिगोपितम्
शुक्लराधतृतीयायां स्नात्वापैलिपिले ह्रदे । उपोषणपरा भक्त्यारात्रौजागरणान्विताः
त्रिलोचनं पूजयित्वाप्रातः स्नात्वापितत्रवै । पुनर्लिङ्गं समभ्यर्च्य दत्त्वा धर्मघटानपि
सान्नान्सदक्षिणान्देवि! पितॄनुद्दिश्यहर्षिताः । विधायपारणंपश्चाच्छिवभक्तजनैःसह
विसृज्य पार्थिवं देहं तेन पुण्येन नोदिताः । भवन्ति देवि! नियतंगणा ममपुरोगमाः

तावद् भ्रमन्ति संसारे देवा मर्त्या महोरगाः ।
गौरि! यावन्न पश्यन्ति काश्यां लिङ्गं त्रिलोचनम् ॥ ७१ ॥

सकृत्त्रिविष्टपंदृष्ट्वा स्नात्वा पैलिपिलेह्रदे । न जातुमातुः स्तनपो जायते जन्तुरत्रहि

प्रतिमासं सदाऽष्टम्यां चतुर्दश्यां च भामिनि !।
आयान्ति सर्वतीर्थानि द्रष्टुं देवं त्रिविष्टपम् ॥ ७३ ॥
त्रिविष्टपाद्दक्षिणतः स्नातः पैलिपिलेऽम्भसि ।
तत्र सन्ध्यामुपास्यैकां राजसूयफलं लभेत् ॥ ७४ ॥

पादोदकाख्यस्तत्रैव कूपः पापविनाशकः । प्राप्यतस्योदकं मर्त्योनमर्त्योजायते पुनः
तस्यलिङ्गस्यपार्श्वे तुसन्तिलिङ्गान्यनेकशः। कैवल्यदानितान्यत्रदर्शनात्स्पर्शनादपि

तत्र शान्तनवं लिङ्गं गङ्गातीरे प्रतिष्ठितम् ।
तद् दृष्ट्वा शान्तिमाप्नोति नरः संसारतापितः ॥ ७७ ॥

तद्दक्षिणे महालिङ्गंमुनेभीष्मेशसञ्ज्ञितम् । कलिःकालश्चकामश्चबाधतेनतदीक्षणात्

तत्प्रतीच्याम्महालिङ्गं द्रोणेश इति कीर्तितम् ।
यल्लिङ्गपूजनाद् द्रोणो ज्योतीरूपम्पुनर्दधौ ॥ ७६ ॥

अश्वत्थामेश्वरं लिङ्गंतदग्रेचातिपुण्यदम् । यदर्चनवशाद् द्रौणिर्नबिभेत्यपि कालतः
द्रोणेशाद्वायुदिग्भागे बालखिल्येश्वरम्परम् । तल्लिङ्गंश्रद्धयादृष्ट्वा सर्वक्रतुफलं लभेत्
तद्वामेलिङ्गमालोक्य वाल्मीकेश्वरसञ्ज्ञितम् । तस्यसन्दर्शनादेव विशोकोजायतेनरः
अन्यच्चात्रैव यद्वृत्तंतद्ब्रवीमिघटोद्भव !। त्रिविष्टपस्यमाहात्म्यं देव्यैदेवेनभाषितम्

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
उत्तरार्धेत्रिलोचनाविर्भावो नामपञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः

त्रिलोचनप्रभाववर्णनम्

स्कन्द उवाच

शृणुष्व मैत्रावरुणे! पुराकल्पे रथन्तरे । इतिहासइहासीद्यः पीठे विरजसञ्ज्ञिते॥
त्रिलोचनस्यप्रासादेमणिमाणिक्यनिर्मिते । नानाभङ्गिगवाक्षाढ्ये रत्नसानाविवायते
कदाचिदपिकल्पान्ते द्योलोकेभ्रंशतिक्षये । प्रोत्तम्भनस्तम्भइवदत्तोविश्वकृतास्वयम्
मरुत्तरङ्गिताग्राभिः पताकाभिरितस्ततः । सन्निवारयतीवेत्थमघौघान्विशतो मुने!
देदीप्यमानसौवर्णकलशेन विराजिते । पार्वगेन शशाङ्केन खेदादिव समाश्रिते ॥ ५॥

तत्र पारावतद्वन्द्वं वसेत्स्वैरं कृतालयम् ।
प्रातः सायञ्च मध्याह्ने कुर्वन्नित्यम्प्रदक्षिणम् ॥ ६ ॥

उड्डायमानम्परितः पक्षवातैरितस्ततः । रजः प्रासादसँल्लग्नं दूरीकुर्वद्दिने दिने ॥
त्रिलोचनेति सततं नामभक्तैरुदाहृतम् । त्रिविष्टपेति च तथा तयोःकर्णातिथाभवेत्

चतुर्विधानि वाद्यानि शम्भुप्रीतिकराण्यलम् ।
तयोः कर्णगुहाम्प्राप्य प्रतिशब्दम्प्रतन्वते ॥ ९ ॥
मङ्गलारार्तिकज्योतिस्त्रिसन्ध्यम्पक्षिणोस्तयोः ।
नेत्रान्तर्निविशन्नित्यं भक्तचेष्टाम्प्रदर्शयेत् ॥ १० ॥
प्राणयात्रां विहायाऽपि कदाचित्स्थिरमानसौ ।
नोड्डीय वाञ्छितं यातः पश्यन्तौ कौतुकं खगौ ॥ ११ ॥

तत्र भक्तजनाकीर्णं प्रासादम्परिता मुने !। तण्डुलादिचरन्तौतौ कुर्वातेचप्रदक्षिणम्
देवदक्षिणदिग्भागेचतुःस्रोतस्विनीजलम् ।तृषार्तौधयतोविप्रस्नातौजातुचिदण्डजौ
तयोरित्थं विचरतोस्त्रिलोचनसमीपतः । अगाद्बहुतिथःकालोद्विजयोःसाधुचेष्टयोः
अथदेवालयस्कन्धे गवाक्षान्तर्गतौ च तौ । श्येनेनकेनचिद्दृष्टौक्रूरदृष्ट्यासुखस्थितौ

तच्च पारावतद्वन्द्वं श्येनः परिजिघृक्षुकः । अवतीर्याम्बरादाशु प्रविष्टोऽन्यशिवालये
ततो विलोकयामास तदागमविनिर्गमौ । केन मार्गेण विशतो दुर्गमेतौ पतत्रिणौ
केनाऽध्वना च निर्यातःक्वकालेकुरुतश्चकिम् । कथंयुगपदेतौमेग्राह्यौस्वैरम्भविष्यतः

मध्ये दुर्गम्प्रविष्टौ च ममवश्याविमौ न यत् ।
एकदृष्टिः क्षणं तस्थौ श्येन इत्थं विचिन्तयन् ॥ १६ ॥

अहोदुर्गबलम्प्राज्ञाः शंसन्त्येवेति हेतुतः । दुर्बलोऽप्याकलयितुं सहसारिर्नशक्यते ॥
करिणां तु सहस्रेण वराश्वानां नलक्षतः । तत्कर्मसिद्धिर्नृपतेर्दुर्गेणैकेन यद्भवेत् ॥
दुर्गस्थो नाभिभूयेतविपक्षःकेनचित्क्वचित् । स्वतन्त्रंयदिदुर्गंस्यादमर्मज्ञप्रकाशितम्
इति दुर्गबलंशंसञ्श्येनोरोषारुणेक्षणः । असाध्वसौकलरवौवीक्ष्ययातोनभोऽङ्गणम्
अथ पारावती दक्षा विपक्षम्प्रेक्ष्य पक्षिणम् । महाबलं दुर्गबलाप्राहपारावतम्पतिम्

कलरव्युवाच

प्रिय पारावत प्राज्ञ! सर्वकामिसुखारव !। तव दृग्विषयम्प्राप्तः श्येनोऽयम्प्रबलो रिपुः

सावज्ञं वाक्यमाकर्ण्य पारावत्याः स तत्पतिः ।
पारावतीमुवाचेदं का चिन्तेति तव प्रिये !॥ २६ ॥

पारावत उवाच

कतिनाम नसन्तीह सुभगेव्योमचारिणः । कतिदेवालयेष्वेषु खगा नोपविशन्तिहि

कति चैव न पश्यन्ति नौ सुखस्थाविह प्रिये !।
तेभ्यो यदि हि भेतव्यं कुतो नौ तत्सुखम्प्रिये !॥ २८ ॥

रमस्व त्वम्मयासार्धं त्यजचिन्तामिमांशुभे । अस्यश्येनवराकस्यगणनापिनमे हृदि
इत्थंपारावतवचः श्रुत्वापारावतीततः । मौनमालम्ब्यसन्तस्थेपत्युः पादार्पितेक्षणा

हितवर्त्मोपदिश्याऽपि प्रियप्रियचिकीर्षया ।
साध्व्या जोषं समास्थेयं कार्यं पत्युर्वचःसदा ॥ ३१ ॥

अन्येद्युरप्यथायातःश्येनोपश्यत्सदम्पती । अपरिच्छिन्नयादृष्ट्यायथामृत्युर्गतायुषम्
अथमण्डलगत्या स प्रासादम्परितोभ्रमन् । निरीक्ष्यतद्गतायातौ यातो गमनमार्गतः

गतेऽथनभसिश्येने पुनःपारावताङ्गना । प्रोवाच प्रेयसी नाथ! दृष्टो दुष्टस्त्वयाऽहितः

तस्या वाक्यं समाकर्ण्य पुनः कलरवोऽब्रवीत् ।
किंकरिष्यत्यसौ मुग्धे! मम व्योमविहारिणः ॥ ३५ ॥

दुर्गश्च स्वर्गतुल्यं मे यत्र नास्त्यरितो भयम् । अयंनतागतीर्वेत्तियावेदाहं नभोङ्गणे
प्रडीनोड्डीनसण्डीनकाण्डव्याडकपाटिकाः । स्रंसनीमण्डलवतीगतयोऽष्टावुदाहृताः
यथैतास्विह कौशल्यं मयिपारावतिप्रिये । गतिषुक्वापिकस्यापिपक्षिणोन तथाम्बरे
सुखेन तिष्ठकाचिन्ता मयिजीवतिते प्रिये । इतितद्वचनंश्रुत्वासास्थितामूकवत्सती
अपरेद्युरपिश्येनस्तत्रभारशिलातले । कियदन्तरमासाद्योपविष्टोऽतिप्रहृष्टवत् ॥ ४०

आयामं तत्र संस्थित्वा तत्कुलायं विलोक्य च ।
पुनर्विनिर्गतःश्येनः साऽपि भीताऽब्रवीत्पुनः ॥ ४१ ॥

प्रियस्थानमिदंत्याज्यंदुष्टदृष्टिविदूषितम् । असौक्रूरोऽतिनिकटमुपविष्टोऽतिहृष्टवत्

सावज्ञं स पुनः प्राह किं करिष्यत्यसौ प्रिये ।
मृगाक्षीणां स्वभावोऽयं प्रायशो भीरुवृत्तयः ॥ ४३ ॥

इतरेद्युरपिप्राप्तः सचश्येनो महाबलः । तयोरभिमुखं तत्र स्थितो यामद्वयावधि ॥
पुनर्विलोक्य तद्वर्त्मशीघ्रंयातोयथागतम् । गतेऽथ शकुनौतस्मिन्साबभाषेविहङ्गमी

नाथ! स्थानान्तरं यावो मृत्युर्नौनिकटोऽत्र यत् ।
पुनर्दुष्टे प्रणष्टेऽस्मिन्नावां स्यावः सुखम्प्रिय !॥ ४६ ॥
प्रिययस्य सपक्षस्य गतिःसर्वत्रसिद्धिदा ।
स किं स्वदेशरागेण नाशम्प्राप्नोति बुद्धिमान् ॥ ४७ ॥

सोपसर्गंनिजंदेशं त्यक्त्वा योऽन्यत्र न व्रजेत् । सपङ्गुर्नाशमाप्नोतिकूलस्थितइवद्रुमः
प्रियोदितं निशम्येतिसभवित्री दशार्दितः । सरीढंपुनरप्याहप्रिये! माभैः खगात्ततः ॥
अथापरस्मिन्नहनिसश्येनः प्रातरेव हि । तद्द्वारदेशमासाद्यसायं यावत्स्थितो बलः
अस्ताचलस्य शिखरंयातेभानौगतेखगे । कुलायाद्बाह्यमागत्योवाचपारावतीपतिम्
नाथनिर्गमनस्यायंकालःकालोऽतिदूरतः ।यावत्तावद्विनिर्याहित्यक्त्वामामपिसन्मते

त्वयिजीवतिदुष्प्राप्यं नकिञ्चिज्जगतीतले । पुनर्दाराः पुनर्मित्रं पुनर्वसु पुनर्गृहम् ॥
यद्यात्मारक्षितः पुंसा दारैरपि धनैरपि । तदा सर्वं हरिश्चन्द्रभूपेनेवेह लभ्यते ॥

अयमात्मा प्रियो बन्धुरयमात्मा महद्धनम् ।
धर्मार्थकाममोक्षाणामयमात्मार्जकः परः ॥ ५५ ॥

यावदात्मनि वै क्षेमंतावत्क्षेमं जगत्त्रये । सोऽपि क्षेमः सुमतिनायशसासहवाञ्छ्यते
यशोहीनन्तु यत्क्षेमं तत्क्षेमान्निधनंवरम् । तद्यशः प्राप्यते पुम्भिर्नीतिमार्गप्रवर्तने

अतो नीतिपथं श्रुत्वा नाथ! स्थानादितो व्रज ।
न गमिष्यसि चेत्प्रात स्ततो मे संस्मरिष्यसि ॥ ५८ ॥

इत्युक्तोऽपिसवैपत्न्यापारावत्यासुमेधया । ननिर्ययौप्रतिस्थानाद्भविव्याप्रतिवारितः
अथोषसि समागत्य श्येनेन बलिना तदा । तन्निर्गमाध्वासंरुद्धःकिञ्चिद्भक्ष्यवतामुने

दिनानि कतिचित्तत्र स्थित्वा श्येनो महामतिः ।
पारावतमुवाचेदंधिक्त्वाम्पौरुषवर्जितम् ॥ ६१ ॥
किं वा युध्यस्व दुर्बद्धे! किं वा निर्याहि मे गिरा ।
क्षुधाक्षीणो मृतः पश्चान्निरयं यास्यसि ध्रुवम् ॥ ६२ ॥

द्वौभवन्तावहश्चैकश्चलौ जयपराजयौ । स्थानार्थं युध्यतःसत्त्वात्स्वर्गावादुर्गमेववा
पुरुषार्थं समालम्ब्यये यतन्ते महाधियः । विधिरेवहिसाहाय्यंकुर्यात्तत्सत्त्वचोदितः

इत्थं स श्येनसंप्रोक्तः पत्न्याऽप्युत्साहितः खगः ।
अयुध्यत्तेन श्येनेन स्वदुर्गद्वारमाश्रितः ॥ ६५ ॥

क्षुधितस्तृषितः सोऽथश्येनेन बलिना धृतः । चरणेनदृढेनाशुचञ्च्वासापिधृताखगी

तावादायोड्डुयाञ्चक्रे श्येनो व्योमनि सत्वरम् ।
चिन्तयन्भक्षणस्थानमन्यपक्षिविवर्जितम् ॥ ६७ ॥

अथ पत्न्याकलरवः प्रोक्तस्तत्र सुमेधया । वचोऽवमानितंनाथत्वयामेस्त्रीतिबुद्धितः

अतोऽवस्थामिमाम्प्राप्तः किं कुर्यामबला यतः ।
अधुनाऽपि वचश्चैकं करोषि यदि मे प्रिय !॥ ६६ ॥

तदाहितंतेवक्ष्यामिकुरुचैवाविचारितम् । ममैकवाक्यकरणात्स्त्रीजितोनभविष्यसि

यावदास्यगताऽस्म्यस्य यावत्स्वस्थो न भूमिगः ।
तावदात्मविमुक्त्यै त्वमरेः पादं दृढं दश ॥ ७१ ॥

इतिपत्नीवचः श्रुत्वा तथासकृतवान्खगः । सपीडितोदृढं पादे श्येनश्चीत्कृतवान्बहु
तेनचीत्करणेनाथमुक्तासामुखसम्पुटात् । पादांगुलिश्लथत्वेनसोपिपारावतोऽपतत्

विपद्यपि च न प्राज्ञैः सन्त्याज्यः क्वचिदुद्यमः ।
क्व च चञ्चुपुटस्तस्य क्व च तत्पादपीडनम् ॥ ७४ ॥

क्व च द्वयोस्तथा भूतादरेर्मोक्षणमद्भुतम् । दुर्बलेऽप्युद्यमवति फलं भाग्यं यतोऽर्पयेत्
तस्माद्भाग्यानुसारेण फलत्येत्र सदोद्यमः । प्रशंसन्त्युद्यमंचातो विपद्यपिमनीषिणः
अथ तौ कालयोगेन विपन्नौ सरयूतटे । मुक्तिपुर्यामयोध्यायामेकोविद्याधरोऽभवत्
मृतानां यत्र जन्तूनां काशीप्राप्तिर्भवेद्ध्रुवम् । मन्दारदामतनयो नाम्ना परिमलालयः
अनेकविद्यानिलयः कलाकौशलभाजनम् । कौमारंवय आसाद्यशिवभक्तिपरोऽभवत्
नियमश्चातिजग्राहविजितेन्द्रियमानसः । एकपत्नीव्रतंनित्यञ्चरिष्यामीतिनिश्चितम्

परयोषित्समासक्तिरायुःकीर्तिम्बलं सुखम् ।
हरेत्स्वर्गगतिश्चापितस्मात्तां वर्जयेत्सुधीः ॥ ८१ ॥

अपरश्चापि नियमंसशुचिष्मान्समाददे । गतजन्मान्तराभ्यासात्त्रिलोचनसमाश्रयात्
समस्तपुण्यनिलयं समस्तार्थप्रकाशकम् । समस्तकामजनकं परानन्दैककारणम् ॥

यावच्छरीरमरुजं यावन्नेन्द्रियविप्लवः ।
तावत्त्रिलोचनं काश्यामनर्च्याऽश्नामि नाण्वपि ॥ ८४ ॥
इत्थं मान्दारदामिः स नित्यं परिमलालयः ।
काश्यां त्रिविष्टपं द्रष्टुं समागच्छेत्प्रयत्नवान् ॥ ८५ ॥

पारवत्यपि सा जाता रत्नदीपस्य मन्दिरे । नागराजस्यपाताले नाम्नारत्नावलीतिच
समस्तनागकन्यानां रूपशीलकलागुणैः । एकैव रत्नभूताऽऽसीद्रत्नदीपोरगात्मजा
तस्याः सखीद्वयंचासीदेकानाम्ना प्रभावती । कलावतीतथान्या च नित्यंतदनुगेउभे

स्वदेहादनपायिन्यौ छायाकान्ती यथा तथा ।
ते द्वे सख्यावभूतां हि रत्नावल्या घटोद्भव !॥ ८६ ॥
सातुबाल्ये व्यतिक्रान्ते किञ्चिदुद्भिन्नयौवना । शिवभक्तंस्वपितरंदृष्ट्वानियममग्रहीत्
पितस्त्रिलोचनं काश्यामर्चयित्वा दिने दिने ।
आभ्यां सखीभ्यां सहिता मौनं त्यक्ष्यामि नान्यथा ॥ ६१ ॥
एवं नागकुमारी सा सखीद्वयसमन्विता । त्रिलोचनंसमभ्यर्च्य गृहानहरहो व्रजेत्
दिने दिने सा प्रत्यग्रैः कुसुमैरिष्टगन्धिभिः ।
सुविचित्राणि माल्यानि परिगुम्फ्याऽर्चयेद्विभुम् ॥ ६३ ॥
तिस्रोपि गीतंगायन्तिलसद्गान्धारसुन्दरम् । रासमण्डलभेदेनलास्यंतिस्रोपिकुर्वते
वीणावेणुमृदङ्गांश्च लयतालविचक्षणाः ।
वादयन्ति मुदा युक्तास्तिस्रोऽपीश्वरसन्निधौ ॥ ६५ ॥
इत्थमाराधयन्तीशं तिस्रोनागकुमारिकाः । विचित्रगन्धमालाभिःसम्मार्जनविलेपनैः
एकदा माधवे मासितृतीयायामुपोषिताः । रात्रौजागरणंकृत्वानृत्यगीतकथादिभिः
प्रातश्चतुर्थीं स्नात्वाथ तीर्थे पैलिपिले शुभे । त्रिलोचनंसमर्च्याथ प्रसुप्तारङ्गमण्डपे
सुप्तासु तासु बालासु त्रिनेत्रः शशिभूषणः । शुद्धकर्पूरगौराङ्गो जटामुकुटमण्डलः
तमालनीलसुग्रीवः स्फुरत्फणिविभूषणः । वामार्धविलसच्छक्तिर्नागयज्ञोपवीतवान्
तस्मादेव विनिष्क्रम्य लिङ्गात्पन्नगमेखलात् ।
उवाच च ततो बाला विभुरुत्तिष्ठतेति सः ॥ १०१ ॥
उत्थाय ताविनिर्मार्ज्य लोचने श्रुतिसङ्गते । अङ्गमोटनवत्यश्चजृम्भाभि क्वणिताननाः
यावत्पश्यन्तिपुरतः संभ्रमापन्नमानसाः । अतर्कितागमस्तावत्ताभिर्दृष्टस्त्रिलोचनः
ववन्दुरथ ता बाला ज्ञात्वा लक्ष्मभिरीश्वरम् ।
तुष्टुवुश्च प्रहृष्टास्याः सन्नकण्ठ्योऽतिगद्गदम् ॥ १०४ ॥
जय शम्भो! जयेशान ! जय सर्वग! सर्वद !। जय त्रिपुरसंहर्तर्जयान्धकनिषूदन !॥
जय जालन्धरहर ! जयकन्दर्पदर्पहृत् !। जय त्रैलोक्यजनक ! जयत्रैलोक्यवर्धन !॥

जय त्रैलोक्यनिलय ! जयत्रैलोक्यवन्दित !। जयभक्तजनाधीन! जयप्रमथनायक !॥
जय त्रिपथगापाथः! प्रक्षालितजटातट !। जयचन्द्रकलाज्योतिर्विद्योतितजगत्त्रय!
जय सर्पफणारत्नप्रभाभासितविग्रह !। जयाद्रिराजतनयातपःक्रीतार्धदेहक !॥ ६ ॥
जय श्मशाननिलय! जयवाराणसीप्रिय !। जयानन्दवनाध्यासिप्राणिनिर्वाणदायक!
जय विश्वपते! शर्व! शर्वरीपरिवर्जित !। जननृत्यप्रियेशोग्र! जयगीतविशारद !॥
जयप्रणवसद्वास ! जय धाममहानिधे !। जय शूलिन्विरूपाक्ष! जयप्रणतसर्वद !॥
विधिः सर्वविधिज्ञोऽपि न त्वां स्तोतुं विचक्षणः ।
वाचो वाचस्पतेर्नाथ! त्वत्स्तुतौ परिकुण्ठिताः ॥ ११३ ॥
विदन्ति वेदाः सर्वज्ञ नत्वांनाथयथार्थतः । मनतीह मनो नत्वामनन्तं चादिवर्जितम्
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यंनमोनमः । त्रिलोचननमस्तुभ्यं त्रिविष्टपनमोस्तुते
इत्युक्त्वा दण्डवद्भूमौप्रणिपेतुः कुमारिकाः ।
अथोत्थाप्य कुमारीस्ताः प्रोवाच शशिभूषणः ॥ ११६ ॥
सुतो मन्दारदाम्नश्च नाम्नापरिमलालयः । पतिर्विद्याधरवरो भवतीनां भविष्यति
चिरं विद्याधरे लोके भोगान्भुक्त्वा समन्ततः ।
ततो निर्वेदमापन्नाः काशीं सिद्धिमवाप्स्यथ ॥ ११८ ॥
यूयं तिस्रोऽपि मे भक्ताः स च विद्याधरो युवा ।
चत्वारोऽप्येत एवाऽत्र प्रान्ते मोक्षमवाप्स्यथ ॥ ११६ ॥
जन्मान्तरेऽपिमेसेवा भवतीभिश्च तेन च । विहितातेनवोजन्म निर्मलंभक्तिभावितम्
एतच्चभवतीस्तोत्रं यःपठिष्यतिमेपुरः । तस्यकामं प्रदास्यामि भवतीनामिवस्फुटम्
त्यजेत्क्षपाकृतंपातं शुचिःप्रातःपठन्नरः । दिवाकृतमलं हन्ति सायं पठनतः स्फुटम्
इत्युक्तवतिदेवेशे ताः कन्याहृष्टमानसाः । प्रणम्य प्रोचुरीशानं प्रबद्धकरसम्पुटाः ॥

नागकन्या ऊचुः

पृच्छामो ब्रूहिनो नाथ करुणाकरशङ्कर !। जन्मान्तरे कथं सेवाचतुर्भिर्भवतः कृता
भवप्राग्भववृत्तान्तं तस्यापि सुकृतात्मनः । अस्माकमपिचाख्याहिकृपांकुरुकृपानिधे

इतिश्रुत्वाप्रणयतोबालोदीरितमीशिता। प्रोवाचतासांतस्याऽपिभवान्तरविचेष्टितम्

ईश्वर उवाच

शृणुध्वं नागतनयास्तिस्रोऽपि हि समाहिताः।
प्राग्भवं भवतीनां च तस्याऽपि कथयाम्यहम् ॥ १२७ ॥

एषा रत्नावलीपूर्वमासीत्पारावती खगी। सचविद्याधरवरः पतिरस्याः खगोऽभवत् प्रासादेऽत्रममैताभ्यामुषितंसुचिरं सुखम्। रजः प्रासादसँल्लग्नं नुन्नं पक्षानिलैः पुनः

उपरिष्टादधस्ताच्च कृता बह्वशः प्रदक्षिणाः।
व्योम्ना सञ्चरमाणाभ्यां सञ्चरद्भ्यां ममाऽजिरे ॥ १३० ॥

स्नातं चतुर्नदेतीर्थे पीतंतत्राम्बुचासकृत्। आभ्यांकलरवाभ्यां च कृतः कलरवो मुदे एताभ्यांस्थिरचेतोभ्यांमुदिताभ्यामतीवहि। दृष्टानिकौतुकान्यत्रममभक्तैःकृतानिवै अमूभ्यां बहुशो दृष्टाममङ्गलदीपिकाः। पीतं श्रुतिपुटाभ्यां च ममनामाक्षरामृतम् तिर्यग्योनिप्रभावेण नमृतौममसन्निधौ। मृतंपुर्यांमयोध्यायांकाशीप्राप्तिकृतिध्रुवम् अयोध्यानिधनादेषा रत्नदीपसुताभवत्। पतिःपारावतोऽस्याःसजातोविद्याधराङ्गजः एषा प्रभावती नागीनागराजस्य पद्मिनः। इहजन्मनिकन्यासीत्पूर्वं जन्मब्रवीमि वः त्रिशिखस्योरगेन्द्रस्यसुताचेयं कलावती। एतस्याअपिवृत्तान्तंनिशामयतवच्म्यहम् भवान्तरेतृतीयेऽतः कन्येचारायणस्य ह। आस्तांमहर्षेःशीलाढ्ये प्रेमवत्यौपरस्परम् पित्राचारायणेनापि ताभ्यां सम्प्रेरितेनते। आमुष्यायणपुत्राय दत्ते नारायणाय हि अप्राप्तयौवनः सोऽथ समिदाहरणाय वै। गतो विधिवशाद्दष्टो दन्दशूकेन कानने॥ भवानीगौतमीनाम्न्यौ तेतुचारायणाङ्गजे। वैधव्यदुःखमापन्ने दैन्यग्रस्ते बभूवतुः अतएव प्रयत्नेन परिणेता विवर्जयेत्। देवतासरिदाह्वानां कन्यां पाणिग्रहे सुधीः अथर्षेः कस्यचिद्दैवादाश्रयेपरमाद्भुते। रम्भाफलान्यदत्तानि मोहाज्जगृहतुस्तदा॥

कृत्वा मासोपवासादिव्रतानि ब्राह्मणाङ्गजे।
अवाप्य निधनं कालाच्छाखामृग्यौ बभूवतुः ॥ १४४ ॥

फलचौर्यविपाकेन वानरीत्वं तयोरभूत्। शीलरक्षणधर्मेण काश्यां जनिमवापतुः

सचनारायणो विप्रः पितृशुश्रूषणव्रतः। दष्टोऽपिदन्दशूकेन काश्याम्पारावतोऽभवत् एवम्भवान्तरे चासीदेतयोः पतिरेषकः। तिसृणाम्भवतीनाञ्चभावीभर्ताधुनापिहि

प्रासादस्यास्य पार्श्वे तु न्यग्रोधस्तु महानभूत्।
तस्मिञ्शाखिनिशाखाढ्ये शाखामृग्यौ बभूवतुः ॥ १४८ ॥

चतुःस्रोतस्विनीतीर्थे क्रीडयाचममज्जतुः। पपतुश्चापिपानीयंतस्मिंस्तीर्थे तृषातुरे जातिस्वभावचापल्यात्क्रीडन्त्यौच प्रदक्षिणम्। चक्रतुर्बहुकृत्वश्च लिङ्गं ददृशतुर्बहु विचरन्त्याविति स्वैरं तत्रन्यग्रोधसन्निधौ। केनचिद्योगिवेषेण पाशेनचनियन्त्रिते भिक्षार्थं शिक्षिते तेनतदुत्प्लुत्यादिनर्तनम्। अथ ते क्वापि मर्कट्यौकालधर्मवशंगते काशीवासजपुण्येन त्रैलोचन्यानुसेवया। प्रादक्षिण्यादिरूपिण्याजाते नागसुते इति

अधुना तत्पतिम्प्राप्य विद्याधरकुमारकम्।
निर्विश्य स्वर्गभोगांश्च काश्यां निर्वृतिमेष्यथ ॥ १५४ ॥

यदल्पमपिवैकाश्यां कृतं कर्मशुभावहम्। तस्यमोक्षः परीपाकोनिश्चितं मदनुग्रहात्

त्रिलोक्या अपि सर्वस्याः श्रेष्ठा वाराणसीपुरी।
ततोऽपि लिङ्गमोङ्कारं ततोऽप्यत्र त्रिलोचनम् ॥ १५६ ॥

तिष्ठमानोत्रलिङ्गेऽहंभक्तमुक्तिदिशाम्यहम्। ततःसर्वप्रयत्नेनकाश्याम्पूज्यस्त्रिलोचनः इत्युक्त्वादेवदेवेशः प्रासादान्तरमाविशत्। अवाच्यरूपमासाद्य स्थूलंत्रिभुवनादपि ताश्चस्वंस्वम्पदम्प्राप्यतद्वृत्तान्तमशेषतः। स्वमातृपुरतश्चोक्त्वाकृतकृत्याइवाभवन्

एकदा माधवे मासि महायात्रा समागता।
विद्याधरास्तथा नागा मिलिताः सपरिच्छदाः ॥ १६० ॥

विरजस्के महाक्षेत्रे त्रिलोचनसमीपतः। देवस्य वरदानाच्चपृष्ट्वाऽन्योन्यं कुलावलीम्

विद्याधराय ता नागैः कन्यास्तिस्रोऽपि कल्पिताः॥
मन्दारदामा सन्तुष्टः प्राप्य तच्च स्नुषात्रयम् ॥ १६२ ॥

रत्नदीपश्च नागेन्द्रः पद्मी चभुजगेश्वरः। त्रिशिखोऽपिफणीन्द्रश्च हृष्टाएतेत्रयोऽपिच जामातरंसमासाद्य शुभम्परिमलालयम्। अन्योन्यंस्वजनास्तेतुमुदाविकसितेक्षणाः

विवाहोत्सवमाकल्प्य स्वं स्वम्भुवनमाविशन् ।
त्रिलोचनस्य लिङ्गस्य वर्णयन्तोऽतिगौरवम् ॥ १६५ ॥
स च विद्याधरः श्रीमान्नागीभिर्विपुलं सुखम् ।
भुक्त्वा वाराणसीम्प्राप्य संसेव्याऽथ त्रिलोचनम् ॥ १६६ ॥
गायन्गीतंसुमधुरंनागीभिःसहितःकृती । आत्मानञ्चातिसंस्मृत्यमध्येलिङ्गं लयंगतः

स्कन्द उवाच

त्रिलोचनस्य महिमाकलौदेवेन गोपितः । अतोऽल्पसत्त्वामनुजा न तल्लिङ्गमुपासते
त्रिलोचनकथामेतां श्रुत्वा पापान्वितोऽप्यहो ॥
विपाप्मा जायते मर्त्यो लभते च परां गतिम् ॥ १६९ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे उत्तरार्धेत्रिलोचनप्रभाववर्णनं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः

केदारमहिमाख्यानवर्णनम्

पार्वत्युवाच

नमस्ते देवदेवेश! प्रणमत्करुणानिधे !। वद केदारमाहात्म्यं भक्तानामनुकम्पया ॥ १
तस्मिँल्लिङ्गे महाप्रीतिस्तव काश्यामनुत्तमा ।
तद्भक्ताश्च जना नित्यं देवदेव ! महाधियः ॥ २ ॥

देवदेव उवाच

शृणवपर्णेऽभिधास्यामि केदारेश्वरसंकथाम् ।
समाकर्ण्याऽपि याम्पापोऽप्यपापो जायते क्षणात् ॥ ३ ॥
केदारं यातुकामस्य पुंसोनिश्चितचेतसः । आजन्मसञ्चितम्पापंतत्क्षणादेवनश्यति

गृहाद्विनिर्गते पुंसिकेदारमभिनिश्चितम् । जन्मद्वयार्जितम्पापं शरीरादपिनिर्व्रजेत्
मध्येमार्गम्प्रपन्नस्यत्रिजन्मजनितन्त्वघम् । देहगेहाद्विनिःसृत्यनिराशंयातिनिःश्वसत्
सायंकेदारकेदारकेदारेति त्रिरुच्चरन् । गृहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात् ॥
दृष्ट्वा केदारशिखरं पीत्वा तत्रत्यमम्बुच । सप्तजन्मकृतात्पापान्मुच्यते नाऽत्रसंशयः
हरपापह्रदे स्नात्वा केदारेशम्प्रपूज्यच । कोटिजन्मार्जितैनोभिर्मुच्यते नात्र संशयः
सकृत्प्रणम्य केदारं हरपापकृतोरकः । स्थाप्य लिङ्गं हृदम्भोजे प्रान्तेमोक्षंगमिष्यति
हरपापह्रदे श्राद्धं श्रद्धया यः करिष्यति । उद्धृत्य सप्तपुरुषान्स मे लोकंगमिष्यति
पुरा रथन्तरे कल्पे यदभूदत्रतच्छृणु । अपर्णे! दत्तकर्णात्वं वर्णयामि तवाग्रतः
एको ब्राह्मणदायाद उज्जयिन्या इहागतः । कृतोपनयनः पित्रा ब्रह्मचर्यव्रते स्थितः ॥
स्थलीम्पाशुपतीं काशीं स विलोक्य समन्ततः ।
द्विजैः पाशुपतैः कीर्णां जटामुकुटभूषितैः ॥ १४ ॥
कृतलिङ्गसमर्चश्च भूतिभूषितवर्ष्मभिः । भिक्षाहृतान्नसन्तुष्टैः पुष्टैर्गङ्गामृतोदकैः
बभूवाऽऽनन्दितमनाव्रतंजग्राहचोत्तमम् । हिरण्ययगर्भादाचार्यान्महत्पाशुपताभिधम्
सचशिष्योवशिष्ठोऽभूत्सर्वपाशुपतोत्तमः । स्नात्वाहृदेहरपापेनित्यम्प्रातःसमुत्थितः
विभूत्याहरहः स्नातित्रिकालंलिङ्गमर्चयन् । नान्तरंसविजानातिशिवलिङ्गगुरौतथा
स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह । ययौकेदारयात्रार्थंगिरिंगौरीगुरोर्गुरुम्
यत्र गत्वा न शोचन्ति किञ्चित्संसारिणः क्वचित् ।
प्राश्योदकं लिङ्गरूपं लिङ्गरूपत्वमागताः ॥ २० ॥
असिधारंगिरिम्प्राप्य वशिष्ठस्य तपस्विनः । गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत्तदा
पश्यतांतापसानाञ्च विमाने सार्वकामिके । आरोप्यतम्पारिषदाः कैलासमनयन्मुदा
यस्तु केदारमुद्दिश्यगेहादर्धपथेऽप्यहो । अकातरस्त्यजेत्प्राणान्कैलासेसचिरं वसेत्
तदाश्चर्यं समालोक्य स वशिष्ठस्तपोधनः । केदारमेव लिङ्गेषु बहुमंस्तसुनिश्चितम्
अथ कृत्वा सकैदारीं यात्रांवाराणसीमगात् । अग्रहीन्नियमञ्चापियथार्थञ्चाकरोत्पुनः
प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम् ।

विलोकयिष्ये केदारं वसन्वाराणसीम्पुरीम् ॥ २६ ॥
तेन यात्राः कृताः सम्यक्षष्टिरेकाधिका मुदा ।
आनन्दकानने नित्यं वसता ब्रह्मचारिणा ॥ २७ ॥

पुनर्यात्रां सवै चक्रेमधौ निकटवर्तिनि । परमोत्साहसन्तुष्टःपलिताकलितोऽप्यलम् तपोधनैस्तन्निधनं शङ्कमानैर्निवारितः । कारुण्यपूर्णहृदयैरन्यैरपि च सङ्गिभिः ॥ ततोऽपि नतदुत्साहभङ्गोऽभूद्दृढचेतसः । मध्येमार्गं मृतस्यापि गुरोरिव गतिर्मम इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ । अशूद्रान्नपरीपुष्टे तुष्टोऽहंचण्डिकेऽभवम्

स्वप्ने मया स सम्प्रोक्तो वशिष्ठस्तापसोत्तमः ।
दृढव्रत! प्रसन्नोऽस्मि केदारं विद्धि मामिह ॥ ३२ ॥
अभीष्टञ्च वरं मत्तः प्रार्थयस्वाऽविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्नोमिथ्येति सोऽब्रवीत् ॥ ३३ ॥
ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्याऽशुचिष्मताम् ।
भवादृशाममिथ्यैव स्वाख्या सुदृशवर्तिनाम् ॥ ३४ ॥

वरम्ब्रूहि प्रसन्नोस्मिस्वप्न शंकान्त्यजद्विज । तवसत्त्ववतःकिञ्चिन्मयादेयंनकिञ्चिन इत्युक्तं मे समाकर्ण्य वरयामास मामिति । शिष्योहिरण्यगर्भस्यतपस्विजनसत्तमः यदि प्रसन्नो देवेश तदा मे सानुगा इमे । सर्वे शूलिन्ननुग्राह्या एष एव वरोमम ॥ देवि! तस्येदमाकर्ण्य परोपकृतिशालिनः । वचनं नितरां प्रीतस्तथेति तमुवाचह ॥ पुनः परोपकरणात्तत्तपोद्विगुणीकृतम् । तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु स वशिष्ठो महाप्राज्ञो दृढपाशुपतव्रतः । देवि! मे प्रार्थयामासहिमशैलादिहस्थितिम् ततस्तत्तपसा कृष्टः कलामात्रेण तत्रहि । हिमशैले ततश्चात्र सर्वभावेन संस्थितः

ततः प्रभाते संजाते सर्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ॥ ४२ ॥

वशिष्ठं पुरतः कृत्वा सर्वसार्थसमायुतम् । हरपापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् मत्परिग्रहतः सर्वे हरपापेकृतोदकाः । आराध्यमामनेनैव वपुषा सिद्धिमागताः ॥

तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
अविमुक्ते परेक्षेत्रे कलिकाले विशेषतः ॥ ४५ ॥

तुषाराद्रिं समारुह्य केदारं वीक्ष्ययत्फलम् । तत्फलं सप्तगुणितं काश्यां केदारदर्शने

गौरीकुण्डं यथा तत्र हंसतीर्थं च निर्मलम् ।
यथा मधुस्रवा गङ्गा काश्यां तदखिलं तथा ॥ ४७ ॥

इदं तीर्थं हरपापं सप्तजन्माघनाशनम् । गङ्गायां मिलितं पश्चाज्जन्मकोटिकृताघहम्

अत्र पूर्वं तु काकोलौ युध्यन्तौ खान्निपेततुः ।
पश्यतां तत्र संस्थानां हंसौ भूत्वा विनिर्गतौ ॥ ४९ ॥

गौरि!त्वया कृतं पूर्वं स्नानमात्रं महाह्रदे । गौरीतीर्थं ततःख्यातंसर्वतीर्थोत्तमोत्तमम् अत्रामृतस्रवागङ्गा महामोहान्धकारहृत् । अनेकजन्मजनितजाड्यध्वंसविधायिनी सरसामानसेनाऽत्र पूर्वं तप्तं महातपः । अतस्तु मानसं तीर्थं जने ख्यातिमिदंगतम् अत्र पूर्वं जनः स्नानमात्रेणैवप्रमुच्यते । पश्चात्प्रसादितश्चाहं त्रिदशैर्मुक्तिदुर्दशैः ॥

सर्वे मुक्तिं गमिष्यन्ति यदि देवेह मानवाः ।
केदारकुण्डे सुस्नातास्तदोच्छित्तिर्भविष्यति ॥ ५४ ॥
सर्वेषामेव वर्णानामाश्रमाणां च धर्मिणाम् ।
तस्मात्तनुविसर्गेऽत्र मोक्षं दास्यति नान्यथा ॥ ५५ ॥

ततस्तदुपरोधेन तथेति च मयोदितम् । तदारभ्य महादेवि! स्नानात्केदारकुण्डतः

समर्चनाच्च भक्त्या वै मम नामजपादपि ।
नैःश्रेयसीं श्रियं दद्यामन्यत्रापि तनुत्यजाम् ॥ ५७ ॥
केदारतीर्थे यः स्नात्वा पिण्डान्दास्यति चात्वरः ।
एकोत्तरशतं वंश्यास्तस्य तीर्णाभवाम्बुधिम् ॥ ५८ ॥

भौमवारेयदा दर्शस्तदायः श्राद्धदो नरः । केदारकुण्डमासाद्य गयाश्राद्धेन किं ततः

केदारं गन्तुकामस्य बुद्धिर्देयानरैरियम् ।
काश्यां स्पृशंस्त्वं केदारं कृतकृत्यो भविष्यसि ॥ ६० ॥

चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च । त्रिगण्डूषान्पिबन्प्रातर्ह्लिङ्गमधितिष्ठति
केदारोदकपानेन यथा तत्र फलं भवेत् । तथाऽत्र जायतेपुंसांस्त्रीणांचापिन संशयः
केदारभक्तं सम्पूज्य वासोन्नद्रविणादिभिः ।
आजन्मजनितं पापं त्यक्त्वा याति ममालयम् ॥ ६३ ॥
आषण्मासं त्रिकालंयः केदारेशं नमस्यति । तन्नमस्यन्ति सततं लोकपालायमादयः
कलौ केदारमाहात्म्यं योऽपि कोऽपिनवेत्स्यति ।
यो वेत्स्यति सपुण्यात्मा सर्वं वेत्स्यति सध्रुवम् ॥ ६५ ॥
केदारेशं सकृद् दृष्ट्वा देविमेऽनुचरोभवेत् । तस्मात्काश्यां प्रयत्नेनकेदारेशंविलोकयेत्
चित्राङ्गदेश्वरं लिङ्गं केदारादुत्तरेशुभम् । तस्यार्चनान्नरो नित्यं स्वर्गभोगानुपाश्नुते
केदाराद्दक्षिणेभागे नीलकण्ठविलोकनगत् ।
संसारोरगदष्टस्य तस्य नास्ति विषाद्भयम् ॥ ६८ ॥
तद्वायव्येऽम्बरीषेशो नरस्तदवलोकनात् । गर्भवासं न चाप्नोति संसारे दुःखसङ्कुले
इन्द्रद्युम्नेश्वरं लिङ्गं तत्समीपे समर्च्यच । तेजोमयेन यानेन स स्वर्गभुवि मोदते
तद्दक्षिणे नरो दृष्ट्वा लिङ्गं कालञ्जरेश्वरम् । जरां कालं विनिर्जित्यममलोकेवसेच्चिरम्
दृष्ट्वा क्षेमेश्वरं लिङ्गमुदक्चित्राङ्गदेश्वरात् । सर्वत्र क्षेममाप्नोति लोकेऽत्र च परत्र च

स्कन्द उवाच

देवदेवेन विन्ध्यारे!केदारमहिमामहान् । इत्याख्यायिपुराऽम्बायैमयातेऽपिनिरूपितः
केदारेश्वरलिङ्गस्य श्रुत्वोत्पत्तिं कृती नरः ।
शिवलोकमवाप्नोति निष्पापो जायते क्षणात् ॥ ७४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
उत्तरार्धेकेदारमहिमाख्यानंनाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः

धर्मेशमहिमाख्यानवर्णनम्

पार्वत्युवाच

आनन्दकानने शम्भो! यल्लिङ्गं पुण्यवर्धनम् । यन्नामस्मरणादेव महापातकसंक्षयः ॥
यत्सेव्यं साधकैर्नित्यं यत्रप्रीतिरनुत्तमा । यत्रदत्तं हुतं जप्तं ध्यातं भवति चाक्षयम्
यस्य संस्मरणादेव यल्लिङ्गस्य विलोकनात् ।
यल्लिङ्गप्रणतेश्चाऽपि यस्य संस्पर्शनादपि ॥ ३ ॥
पञ्चामृतादिस्नपनपूर्वाद्यस्यार्चनादपि । तल्लिङ्गं कथयेशान भवेच्छ्रेयः परम्परा ॥

स्कन्द उवाच

इति देवीसमुदितं समाकर्ण्यघटोद्भव !। सर्वज्ञेन यदाख्यातं तदाख्यास्यामितेशृणु

देवदेव उवाच

उमेभवत्या यत्पृष्टंभवबन्धविमोक्षकृत् । ततोऽहं कथयिष्यामि लिङ्गंस्थिरमनाभव
आनन्दकानने चात्र रहस्यं परमं मम । नमया कस्यचित्ख्यातं न प्रष्टुं वेत्ति कश्चन
सन्तिलिङ्गान्यनेकानि ममानन्दवने प्रिये ! । परंत्वया यथापृष्टं यथावत्तद्ब्रवीमि ते
यत्रमुक्तिस्वरूपात्वं स्वयंतिष्ठसिविश्वगे । यत्र तेनन्दनश्चास्तिक्षेत्रविघ्नविघातकृत्
ममापि येन त्रिपुरसमरे जयकाङ्क्षिणः । जयाशापूरितास्तुत्या बहुमोदकदानतः
यत्राऽस्ति तीर्थमवहृत्पितृप्रीतिविवर्धनम् ।
यत्स्नानाद् वृत्रहा वृत्रवधपापाद्विमुक्तवान् ॥ ११ ॥
धर्माधिकरणं यत्र धर्मराजोऽप्यवाप्तवान् । सुदुष्करं तपस्तप्त्वा परमेण समाधिना
पक्षिणोऽपिहियत्रापुर्ज्ञानं संसारमोचनम् । रम्यो हिरण्मयोयत्र बभूव बहुपाद्द्रुमः
यल्लिङ्गदर्शनादेवदुर्दमोनामपार्थिवः । उद्वेजकोऽपि लोकानां क्षणाद्धर्ममतिस्त्वभूत्
तस्य लिङ्गस्य माहात्म्यमाविर्भावं च सुन्दरि !।

निशामयाऽभिधास्यामि महापातकनाशनम् ॥ १५ ॥
धर्मपीठं तदुद्दिष्टमत्रानन्दवने मम । तत्पीठदर्शनादेव नरः पापैः प्रमुच्यते ॥ १६ ॥
पुरा विवस्वतः पुत्रोयमः परमसंयमी । तपस्तताप विपुलं विशालाक्षि ! तवाग्रतः
शिशिरेजलमध्यस्थोवर्षास्वभ्रावकाशकः । तपर्तौपञ्चवह्निस्थःकदाचिदिदितिततवान्
पादाग्राङ्गुष्ठभूस्पर्शी बहुकालं स तस्थिवान् ।
एकपादस्थितः सोऽपि कदाचिद् वह्वनेहसम् ॥ १६ ॥
समीराभ्यवहर्तासीद्बहुदिष्टं सदिष्टवान् । पपौ स तुपिपासुः सन्कुशाग्रजलविप्रुषः
दिव्यां चतुर्युगीमित्थं सनिनायतपश्चरन् । चतुर्गुणंदिद्रुक्षुर्मां परमेण समाधिना ॥
ततोऽहं तस्य तपसा सन्तुष्टः स्थितचेतसः । ययौतस्मैवरान्दातुं शमनायमहात्मने
वटःकाञ्चनशाखाख्यो यस्तपस्तापसन्ततिम् ।
दूरीचकार सुच्छायो बहुद्विजसमाश्रयः ॥ २३ ॥
मन्दमन्दमरुल्लोलपल्लवैः करपल्लवैः । योऽध्वगानध्वसन्तप्तानाह्वयेदिवतापहृत् ॥
स्वानुरागैः सुरभिभिःस्वादुभिश्च पचेलिमैः । प्रीणयेदर्थिसार्थंयो वृत्तैर्निजफलैरलम्
तदधस्तात्परंवीक्ष्यतमहंतपनाङ्गजम् । स्थाणुनिश्चलवर्ष्माणं नासाग्रन्यस्तलोचनम्
तपस्तेजोभिरुद्यद्भिःपरितः परिध्रीकृतम् । भानुमन्तमिवाकाशे सुनीलेस्वेनतेजसा
स्वाख्याङ्कितं महालिङ्गं प्रतिष्ठाप्याऽतिभक्तितः ।
स्वच्छसूर्योपलमयं तेजःपुञ्जैरिवार्चितम् ॥ २८ ॥
साक्षीकृत्यैव तल्लिङ्गं तप्यमानंमहत्तपः । प्रत्यवोचं धर्मराजं वरंब्रूहीति भास्करे
अलंतप्त्वा महाभाग! प्रसन्नोऽस्मिशुभव्रतः । निशम्य शमनश्चेति दृष्ट्वामां प्रणनाम ह
चकारस्तवनं चापि परिहृष्टेन्द्रियेश्वरः । निर्व्याजंससमाधिं च विसृज्य ब्रध्ननन्दनः

धर्म उवाच

नमो नमःकारणकारणानां नमो नमः कारणवर्जिताय ।
नमो नमः कार्यमयाय तुभ्यं नमो नमः कार्यविभिन्नरूप !॥ ३२ ॥
अरूपरूपाय समस्तरूपिणे पराणुरूपाय परापराय ।

अपारपाराय पराब्धिपारप्रदाय तुभ्यं शशिमौलये नमः ॥ ३३ ॥
अनीश्वरस्त्वं जगदीश्वरस्त्वं गुणात्मकस्त्वं गुणवर्जितस्त्वम् ।
कालात्परस्त्वं प्रकृतेः परस्त्वं कालाय कालात्प्रकृते नमस्ते ॥ ३४ ॥
त्वमेव निर्वाणपदप्रदोऽसि त्वमेव निर्वाणमनन्तशक्ते !।
त्वमात्मरूपः परमात्मरूपस्त्वमन्तरात्माऽसि चराचरस्य ॥ ३५ ॥
त्वत्तो जगत्वं जगदेवसाक्षाज्जगत्त्वदीयं जगदेकबन्धो !।
हर्ताऽविता त्वं प्रथमो विधाता विधातृविष्ण्वीश नमोनमः ॥ ३६ ॥
मृडस्त्वमेव श्रुतिवर्त्मगेषु त्वमेव भीमोऽश्रुतिवर्त्मगेषु ।
त्वं शङ्करःसोमसुभक्तिभाजामुग्रोऽसि रुद्रत्वमभक्तिभाजाम् ॥ ३७ ॥
त्वमेव शूली द्विषतां त्वमेव विनम्रचेतो वचसां शिवोऽसि ।
श्रीकण्ठ एकः स्वपदश्रितानां दुरात्मनां हालहलोग्रकण्ठः ॥ ३८ ॥
नमोऽस्तु ते शङ्कर! शान्त! शम्भो! नमोऽस्तु ते चन्द्रकलावतंस !।
नमोऽस्तु तुभ्यं फणिभूषणाय पिनाकपाणेऽन्धकवैरिणे नमः ॥ ३९ ॥
स एव धन्यस्तव भक्तिभाग्यस्तवाऽर्चको यः सुकृती स एव ।
तव स्तुतिं यः कुरुते सदैव स स्तूयते दुश्च्यवनादिदेवैः ॥ ४० ॥
कस्त्वामिह स्तोतुमनन्तशक्ते! शक्नोति माद्दृग्लघुबुद्धिवैभवः ।
प्राचां न वाचामिहगोचरो यः स्तुतिस्त्वयीयं नतिरेव यावत् ॥ ४१ ॥

स्कन्द उवाच

उदीर्यसूर्यस्य सुतोऽतिभक्त्या नमः शिवायेति समुच्चरन्सः ।
इलाभिलन्मौलिरतीव हृष्टः सहस्रकृत्वः प्रणनाम शम्भुम् ॥ ४२ ॥
ततः शिवस्तं तपसाऽतिखिन्नं निवार्य ताभ्यः प्रणतिभ्य ईश्वरः ।
वरान्ददौ सप्त तुरङ्गसूनवे त्वं धर्म्मराजो भव नामतोऽपि ॥ ४३ ॥
त्वमेव धर्माधिकृतौ समस्तशरीरिणां स्थावरजङ्गमानाम् ।
मया नियुक्तोऽद्यदिनादिकृत्यः प्रशाधि सर्वान्मम शासनेन ॥ ४४ ॥

त्वं दक्षिणायाश्च दिशोऽधिनाथस्त्वं कर्मसाक्षी भवसर्वजन्तोः ।
त्वद्दर्शिताध्वान इतो व्रजन्तु स्वकर्मयोग्यां गतिमुत्तमाधमाः ॥ ४५ ॥
त्वया यदेतन्ममभक्तिभाजा लिङ्गं समाराधितमत्र धर्म !।
तद्दर्शनात्स्पर्शनतोऽर्चनाच्च सिद्धिर्भविष्यत्यचिरेण पुंसाम् ॥ ४६ ॥
धर्मेश्वरं यः सकृदेवमर्त्यो विलोकयिष्यत्यवदातबुद्धिः ।
स्नात्वा पुरस्तेऽत्र च धर्मतीर्थे न तस्य दूरे पुरुषार्थसिद्धिः ॥ ४७ ॥
कृत्वाऽप्यघानामिहयः सहस्रं धर्मेश्वरं पश्यति दैवयोगात् ।
सहेत नो जातु स नारकीं व्यथां कथां तदीयां दिवि कुर्वतेऽमराः ॥ ४८ ॥
यो धर्मपाठं प्रतिलभ्य काश्यां स्वश्रेयसेनो यततेऽत्र मर्त्यः ।
कथं स धर्मत्वमिवातितेजाः करिष्यति स्वं कृतकृत्यमेव ॥ ४९ ॥
त्वया यथाप्ता इह धर्मराज मनोरथास्ते गुरुभिस्तपोभिः ।
तथैवधर्मेश्वरभक्तिभाजां कामाः फलिष्यन्ति न संशयोऽत्र ॥ ५० ॥
कृत्वाऽप्यघान्येवमहान्त्यपीह धर्मेश्वरार्चां सकृदेव कुर्वन् ।
कुतोबिभेति प्रियबन्धुरेव तव त्वदीयार्चितलिङ्गभक्तः ॥ ५१ ॥
पत्रेण पुष्पेण जलेन दूर्वया यो धर्म! धर्मेश्वरमर्चयिष्यति ।
समर्चयिष्यन्त्यमृतान्धसस्तंमन्दारमालाभिरतिप्रहृष्टाः ॥ ५२ ॥
त्वत्तो बिभेष्यन्ति कृतैनसो ये भयं न तेषां भविता कदाचित् ।
धर्मेश्वरार्चारचनां करिष्यतां हरिष्यतां बन्धुतया मनस्ते ॥ ५३ ॥
यदत्र दास्यन्ति हि धर्मपीठे नरा द्युनद्यां कृतमज्जनाश्च ।
तदक्षयं भावि युगान्तरेऽपि कृतप्रणामास्तव धर्मलिङ्गे ॥ ५४ ॥
ये कार्त्तिके मासि सिताष्टमीतिथौ यात्रां करिष्यन्ति नरा उपोषिताः ।
रात्रौ च वै जागरणं महोत्सवैर्धर्मेश्वरे ते न पुनर्भवा भुवि ॥ ५५ ॥
स्तुतिं च ये वै त्वदुदीरितामिमां नराः पठिष्यन्ति तवाऽग्रतः क्वचित् ।
निरेनसस्ते मम लोकगामिनः प्राप्स्यन्ति ते वै भवतः सखित्वम् ॥ ५६ ॥

पुनर्वरं ब्रूहि यथेप्सितं ददे तेजोनिधेर्नन्दन ! धर्मराज ! ।
अदेयमत्राऽस्ति न किञ्चिदेव ते विधेहि वागुद्यममात्रमेव ॥ ५७ ॥
प्रसन्नमूर्तिं स विलोक्य शङ्करं कारुण्यपूर्णं स्वमनोरथाभिदम् ।
आनन्दसन्दोहसरोनिमग्नो वक्तुं क्षणंनैव शशाक किञ्चित् ॥ ५८ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्डे
उत्तरार्धे धर्मेशमहिमाख्यानंनामाऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

एकोनाशीतितमोऽध्यायः

धर्मेशाख्यानवर्णनम्

स्कन्द उवाच

आनन्दबाष्पसलिलरुद्धकण्ठं विलोक्य तम् ।
मृडः पस्पर्श पाणिभ्यां सौधाम्यान्तु सुधाम्बुधिः ॥ १ ॥
अथ तत्स्पर्शसौख्येन धर्मराजो महातपाः । पुनरङ्कुरयामास तपोग्निज्वलितांतनुम्
ततः प्रोवाच सब्राध्निर्देवदेवमुमापतिम् । प्रसन्नवदनं शान्तं शान्तपारिषदावृतम् ॥
प्रसन्नोऽसि यदीशानसर्वज्ञकरुणानिधे !। किमन्येन वरेणाऽत्रयत्त्वंसाक्षात्कृतो मया
यन्नवेदाविदुः सम्यङ्नचतौवेदपूरुषौ । ततोऽपिवरयोग्योऽस्मितन्नाथप्रार्थयाम्यहम्
श्रीकण्ठाण्डजडिम्भानाममीषां मधुरब्रुवाम् ।
मत्तपश्चिरसाक्षीणां मत्पुरः प्राप्तजन्मनाम् ॥ ६ ॥
पितृभ्यांपरिहीनानामितिहासकथाविदाम् । त्यक्ताहारविहाराणांकीराणांवरदोभव
एतत्प्रसूतिसमये आमयेन प्रपीडिता । शुकी पञ्चत्वमापन्ना शुकः श्येनेन भक्षितः ॥
रक्षितानामनाथानां सदामन्मुखदर्शिनाम् । अनाथनाथभवता ह्यायुः शेषस्वरूपिणा
इति धर्मवचः श्रुत्वा परोपकृतिनिर्म्मलम् । तानाहूय मुने शम्भुर्विनयावनतानना

उवाच धर्मेतिप्रीतः शुकशावानिदं वचः । अयि पत्ररथाब्रूतसाधवो धर्म्मसङ्गताः
कोवरो भवतां देयो धर्मेशपरिचारिणाम् । साधुसंसर्गसंक्षीणजन्मान्तरमहैनसाम्
इति श्रुत्वा महेशस्य वचनन्तेपतत्त्रिणः । प्रोचुः प्रणम्य देवेशं नमस्ते भवनाशन!॥

पक्षिण ऊचुः

अनाथनाथ सर्वज्ञ को वरो नः समीहितः ।
इतोऽपि त्र्यक्ष! यत्साक्षात्तिर्यक्त्वेऽपि समीक्षिताः ॥ १४ ॥

लाभाः सन्तूद्यमवतांगिरिशेहपरःशताः । परम्परोऽयंलाभोऽत्र यत्त्वंदृग्गोचरीभवेः
यदेतद् दृश्यते नाथ! तत्सर्वं क्षणभङ्गुरम् । अभङ्गुरो भवानेकस्त्वत्सपर्याप्यभङ्गुरा॥

विचित्रजन्मकोटीनां स्मृतिर्नोऽत्रपरिस्फुरेत् ।
एतत्तपस्विरचितलिङ्गपूजाविलोकनात् ॥ १७ ॥

देवयोनिरपिप्राप्ताचिरमस्माभिरीशितः । दिव्याङ्गनाःसहस्राणितत्रभुक्ताःस्वलीलया
आसुरीदानवी नागीनैर्ऋतीचापिकैन्नरी । विद्याधरीचगान्धर्वीयोनिरस्माभिरर्जिता
नरत्वे भूपतित्वञ्चपरिप्राप्तमनेकशः । जले जलचरत्वञ्च स्थले च स्थलचारिता॥
वने वनौकसो जाताग्रामेषु ग्रामवासिनः । दातारो याचितारश्चरक्षितारश्च घातुकाः
सुखिनोऽपि वयञ्जाता दुःखिनोवयमास्मच । जेतारश्चवयञ्जाताः पराजेतार एवच ॥
अधीतिनोपि मूर्खाश्च स्वामिनः सेवका अपि । चतुर्षु भूतग्रामेषु उत्तमाधममध्यमाः
अभूमभूरिशःशम्भोनक्वापिस्थैर्यमागताः । इतोयोनेस्ततोयोनौततोयोनेस्ततोन्यतः
पिनाकिन्क्वापिनप्रापि सुखलेशो मनागपि । इदानींपुण्यसम्भारैर्धर्मेश्वरविलोकनात्
तापनेःसुतपोवह्निज्वालाप्रज्वलितैनसः । सम्वीक्ष्यत्र्यक्षसाक्षात्त्वांकृतकृत्याबभूविम

तथापि चेद्वरो देयस्तिर्यक्ष्वस्मासु धूर्जटे !।
कृपणेष्वपि शोच्येषु ज्ञानं सर्वज्ञ! देहि तत् ॥ २७ ॥

येनज्ञानेनमुक्ताःस्मोऽमुष्मात्संसारबन्धनात् । यन्त्रिताःप्राकृतैःपाशैरदुर्भेद्यैश्च मादृशैः

ऐन्द्रं पदं न वाञ्छामो न चान्द्रन्नान्यदेवहि ।
वाञ्छामः केवलं मृत्युं काश्यां शम्भोऽपुनर्भवम् ॥ २९ ॥

त्वत्सान्निध्याद्विजानीमः सर्वज्ञ! सकलं वयम् ।
यथा चन्दनसंसर्गात्सर्वे सुरभयो द्रुमाः ॥ ३० ॥

एतदेव परं ज्ञानं संसोरोच्छित्तिकारणम् । वपुर्विसर्जनं काले यत्तवानन्दकानने
निर्मथ्यविष्वग्वाग्जालंसारभूतमिदंपरम् ।ब्रह्मणोदीरितंपूर्वंकाश्यांमुक्तिस्तनुत्यजाम्
यद्वाच्यं बहुभिर्ग्रन्थैस्तदष्टाभिरिहाक्षरैः । हरिणोक्तंरविपुरःकैवल्यंकाशिसंस्थितौ
याज्ञवल्क्यो मुनिवरः प्रोक्तवान्मुनिसंसदि । रवेरधीत्यनिगमान्काश्यामन्तेपरम्पदम्
स्वामिनापि जगद्धात्री पुरतो मन्दराचले । इदमेव परा प्रोक्तं काशीनिर्वाणजन्मभूः

कृष्णद्वैपायनोऽप्येवं शम्भो! वक्ष्यति नान्यथा ।
यत्र विश्वेश्वरः साक्षान्मुक्तिस्तत्र पदे पदे ॥ ३६ ॥
वदन्त्यन्येऽपि मुनयस्तीर्थसंन्यासकारिणः ।
चिरन्तनालोमशाद्याः काशिका मुक्तिकाशिका ॥ ३७ ॥

वयमप्येवं जानीमो यत्र स्वर्गतरङ्गिणी । आनन्दकानने शम्भोर्मोक्षस्तत्रैवनिश्चितम्
भूतं भावि भविष्यंयत्स्वर्गे मर्त्ये रसातले । तत्सर्वमेवजानामोधर्म्मेशानुग्रहात्परात्
अतोहिरण्यगर्भोक्तं हरिप्रोक्तं मुनीरितम् । भवतोक्तं च निखिलंशम्भोजानामहेवयम्
करामलकवत्सर्वमेतद्ब्रह्माण्डगोलकम् । अस्मद्वाग्गोचरेऽस्त्येव धर्मपीठनिषेवणात्

धर्मराजस्य तपसा तिर्यञ्चोऽपि वयं विभो !।
जाताः स्म निर्विकल्पं हि सर्वज्ञानस्य भाजनम् ॥ ४२॥

मधुरम्मृदुलं सत्यं स्वप्रमाणं सुसंस्कृतम् । हितंमितं सदृष्टान्तंश्रुत्वापक्षिसुभाषितम्
देवोऽतिविस्मयापन्नोऽवर्णयत्पीठगौरवम् । त्रैलोक्यनगरे चात्र काशीराजगृहम्मम
तत्रापिभोगभवनमनर्घ्यमणिनिर्मितम् । मोक्षलक्ष्मीविलासाख्यःप्रासादोमेतिशर्मभूः
पतत्त्रिणोपिमुच्यन्तेयंकुर्वाणाःप्रदक्षिणम् ।स्वेच्छयाविचरन्तःखेखेचराअपिदेवताः

मोक्षलक्ष्मीविलासाख्यप्रासादस्य विलोकनात् ।
शरीराद् दूरतो याति ब्रह्महत्याऽपि नान्यथा ॥ ४७ ॥
मोक्षलक्ष्मीविलासस्य कलशो यैर्निरीक्षितः ।

निधानकलशास्तांस्तु न मुञ्चन्ति पदे पदे ॥ ४८ ॥

दूरतोऽपि पताकापि ममप्रासादमूर्धगा । नेत्रातिथीकृता यैस्तुनित्यन्तेऽतिथयोमम

भूमिं भित्त्वा स्वयं जातस्तत्प्रासादमिषेण हि ।

आनन्दाख्यस्य कन्दस्य कोऽप्येष परमोऽङ्कुरः ॥ ५० ॥

ब्रह्मादिस्थावरान्तानि यत्र रूपाण्यनेकशः । मामेवोपासतेनित्यंचित्रंचित्रगतान्यपि

ससौधो मेऽखिलेलोकेस्थानम्परमनिर्वृतेः । रतिशालासमेरम्यासमेविश्वासभूमिका

मम सर्वगतस्यापि प्रासादोऽयम्परास्पदम् । परम्ब्रह्मयदाम्नातम्परमोपनिषद्गिरा ॥

अमूर्तं तदहम्मूर्तो भूयां भक्तकृपावशात् ॥ ५३ ॥

नैःश्रेयस्याः श्रियो धाम तद्याम्यां मण्डपोऽस्ति मे ।

तत्राऽहं सततन्तिष्ठेत्तत्सदो मण्डपम्मम ॥ ५४ ॥

निमेषार्धप्रमाणञ्च कालंतिष्ठति निश्चलः । तत्र यस्तेनवैयोगःसमभ्यस्तःसमाःशतम्

निर्वाणमण्डपंनाम तत्स्थानञ्जगतीतले । तत्रचँ सञ्जपन्नेकां लभेत्सर्वश्रुतेः फलम्

प्राणायामन्तु यः कुर्यादप्येकम्मुक्तिमण्डपे ।

तेनाऽष्टाङ्गः समभ्यस्तो योगोऽन्यत्रायुतंसमाः ॥ ५७ ॥

निर्वाणमण्डपे यस्तु जपेदेकं षडक्षरम् । कोटिरुद्रेण जप्तेन यत्फलं तस्य तद्भवेत्

शुचिर्गङ्गाम्भसि स्नातो यो जपेच्छतरुद्रियम् ।

निर्वाणमण्डपे ज्ञेयः सरुद्रो द्विजवेषभृत् ॥ ५९ ॥

ब्रह्मयज्ञं सकृत्कृत्वा मम दक्षिणमण्डपे । ब्रह्मलोकमवाऽप्याथ परं ब्रह्माऽधिगच्छति

धर्मशास्त्रं पुराणानि सेतिहासानि तत्र यः । पठेन्निरभिलाषुः सन्सवसेन्ममवेश्मनि

तिष्ठेदिन्द्रियचापल्यं योनिवार्यक्षणंकृती । निर्वाणमण्डपेऽन्यत्र तेन तप्तम्महत्तपः

वायुभक्षणतोऽन्यत्र यत्पुण्यं शरदां शतम् । तत्पुण्यं घटिकार्धेनमौनं दक्षिणमण्डपे

मितं कृष्णलकेनापि यो दद्यान्मुक्तिमण्डपे। स्वर्णं सौवर्णयानेन स तुसञ्चरतेदिवि

तत्रैकं जागरं कुर्याद्यस्मिन्कस्मिन् दिनेऽपि यः ।

उपोषितोऽर्चयेल्लिङ्गं स सर्वव्रतपुण्यभाक् ॥ ६५ ॥

तत्र दत्त्वा महादानन्तत्र कृत्वा महाव्रतम् । तत्राधीत्याखिलंवेदंच्यवते न नरोदिवः

प्रयाणं कुर्वते यस्य प्राणा मे मुक्तिमण्डपे । समामनुप्रविष्टोऽत्र तिष्ठेद्यावदहं खलु

जलक्रीडां सदा कुर्यां ज्ञानवाप्यां सहोमया । यदम्बुपानमात्रेण ज्ञानंजायेतनिर्मलम्

तज्जलक्रीडनस्थानं मम प्रीतिकरम्महत् । अमुष्मिन्राजसदने जाड्यहृज्जलपूरितम्

तत्प्रासादपुरो भागे मम शृङ्गारमण्डपः । श्रीपीठं तद्धिविज्ञेयं निःश्रीकश्रीसमर्पणम्

मदर्थं तत्रयो दद्याद्दुकूलानि शुचीन्यहो । माल्यानिसुविचित्राणियक्षकर्दमवन्तिच

नानानेपथ्यवस्तूनि पूजोपकरणान्यपि ।

स श्रियालङ्कृतस्तिष्ठेद्यत्र कुत्राऽपि सत्तमः ॥ ७२ ॥

निर्वाणलक्ष्मीर्वृणुते तन्निर्वाणपदाप्तये । यत्र कुत्रापि निधनं प्राप्नुयादपिसद्ध्रुवम्

मोक्षलक्ष्मीविलासाख्यप्रासादस्योत्तरे मम । ऐश्वर्यमण्डपं रम्यं तत्रैश्वर्यंददाम्यहम्

मत्प्रासादैन्द्रदिग्भागे ज्ञानमण्डपमस्ति यत् ।

ज्ञानं दिशामि सततं तत्र मां ध्यायतां सताम् ॥ ७५ ॥

भवानि राजसदने ममास्तिहिमहानसम् । यत्तत्रोपहृतम्पुण्यं निर्विशामि मुदैव तत्

विशालाक्ष्या महासौधे मम विश्रामभूमिका ।

तत्र संसृतिखिन्नानां विश्रामं श्राणयाम्यहम् ॥ ७७ ॥

नियमस्नानतीर्थञ्च चक्रपुष्करिणी मम । तत्र स्नानवतांपुंसांतन्नैर्मल्यं दिशाम्यहम्

यदाहुः परमन्तत्त्वं यदाहुर्ब्रह्मसत्तमम् । स्वसंवेद्यं यदाहुश्चतत्तत्रान्ते दिशाम्यहम्

यदाहुस्तारकं ज्ञानं यदाहुरतिनिर्मलम् । स्वात्मारामंयदाहुश्च तत्तत्रान्तेदिशाम्यहम्

जगन्मङ्गलभूर्यात्र परमामणिकर्णिका । विपाशयामि तत्राहं कर्मभिः पाशितान्पशून्

निर्वाणश्राणने यत्र पात्रापात्रं न चिन्तये ।

आनन्दकानने तन्मे दानस्थानं दिवानिशम् ॥ ८२ ॥

भवाम्बुधौ महागाधे प्राणिनः परिमज्जतः ।

भूत्वैव कर्णधारोऽन्ते यत्र सन्तारयाम्यहम् ॥ ८३ ॥

सौभाग्यभाग्यभूर्या वै विख्याता मणिकर्णिका ।

ददामि तस्यां सर्वस्वमग्रजायाऽन्त्यजाय वा ॥ ८४ ॥

महासमाधिसम्पन्नैर्वेदान्तार्थनिषेविभिः। दुष्प्रापोन्यत्रयोमोक्षःशोच्यैरपिसलभ्यते

दीक्षितो वा दिवाकीर्तिः पण्डितो वाऽप्यपण्डितः।

तुल्यो मे मोक्षदीक्षायां सम्प्राप्य मणिकर्णिकाम् ॥ ८६ ॥

यस्यागेऽन्यत्रकृपणस्तत्प्राप्यमणिकर्णिकाम्।

ददामि जन्तुमात्राय सर्वस्वञ्चिरसञ्चितम् ॥ ८७ ॥

यदिदैवादिह प्राप्तस्त्रिसंयोगोऽतिदुर्घटः। अविचारन्तदा देयं सर्वस्वञ्चिरसञ्चितम्

शरीरमथ सम्पत्तिरथसा मणिकर्णिका। त्रिसंयोगोऽयमप्राप्यो देवैरिन्द्रादिकैरपि

पुनः पुनर्विचार्यैतिजन्तुमात्रेभ्यएव च। निर्वाणलक्ष्मींयच्छामिसदोपमणिकर्णिकम्

मुक्तिदानमही सा मे वाराणस्यां महीयसी।

तन्महीरजसा साम्यं त्रिलोक्यपि न चोद्वहेत् ॥ ६१ ॥

परंलिङ्गार्चनस्थानमविमुक्तेश्वरेश्वरम्। तत्र पूजां सकृत्कृत्वा कृतकृत्यो नरो भवेत्

सायम्पाशुपतीं सन्ध्यां कुर्यां पशुपतीश्वरे।

विभूतिधारणात्तत्र पशुपाशैर्न बध्यते ॥ ६३ ॥

प्रातः सन्ध्यां करोम्येव सदोङ्कारनिकेतने। तत्रैकापिकृतासन्ध्यासर्वपातककृन्तनी

वसामि कृत्तिवासेऽहं सदा प्रतिचतुर्दशि। अत्र जागरणं कृत्वाचतुर्दश्यांनगर्भभाक्

रत्नेश्वरोऽर्चितो दद्यान्महारत्नानि भक्तितः।

रत्नैःसमर्च्य तल्लिङ्गंस्त्रीरत्नादिलभेन्नरः ॥ ६६ ॥

विष्टपत्रितयान्तस्थोऽप्यहं लिङ्गेत्रिविष्टपे। तिष्ठामि सततम्भक्तमनोरथसमृद्धये ॥

विरजस्कं महापीठंतत्र संसेव्य मानवः। विरजा जायते नूनं चतुर्नदकृतोदकः ॥

महादेवे महापीठं मम साधकसिद्धिदम्।

तत्पीठदर्शनादेव महापापैः प्रमुच्यते ॥ ६६ ॥

पितृप्रीतिप्रदम्पीठं वृषभध्वजसञ्ज्ञकम्। पितृतर्पणकृत्तत्रपितृंस्तारयति क्षणात्

आदिकेशवपीठेऽहमादिकेशवरूपधृक्। श्वेतद्वीपंनयेभक्तान्वैष्णवानतिवल्लभान् ॥

तत्रैव मङ्गलापीठे सर्वमङ्गलदायिनि। उपपञ्चनदे तीर्थे भक्तान्सन्तारयाम्यहम् ॥

बिन्दुमाधवरूपेण यत्राऽहं वैष्णवाञ्जनान्। नयेपञ्चनदस्नातांस्तद्विष्णोःपरमम्पदम्

पञ्चमुद्रे महापीठे ये वीरेश्वरसेवकाः। तेषां परमनिर्वाणंकालेनाऽल्पेन जायते १०४

तत्रसिद्धेश्वरीपीठे चन्द्रेश्वरसमीपतः। तत्रसन्निधिकर्तृणांसिद्धिःषण्मासतो भवेत्

काश्याञ्च योगिनीपीठे योगसिद्धिविधायिनि।

सिद्धीरुच्चाटनाद्याश्च कैर्न लब्धाः सुसाधकैः ॥ १०६ ॥

अनेकानीह पीठानि सन्ति काश्याम्पदे पदे। परं धर्मेशपीठस्यकाचिच्छक्तिरनुत्तमा

यत्राऽमी बालकीराश्च निर्मलज्ञानभाजनम्।

आसुः सदुपदेशान्मे त्रातत्रातेतिभाषिणः ॥ १०८ ॥

एतद्धर्मेश्वरं पीठन्त्यजाम्यद्य दिनावधि। न कदाचित्तरणिज त्वत्तपोवनमुत्तमम् ॥

ममानुग्रहतः कीरानेतान्पश्य रवेःसुत ! दिव्यं विमानमारुह्य गन्तारो मत्पुरम्महत्

तत्र भुक्त्वा चिरम्भोगाञ्ज्ञानम्प्राप्य मयेरितम्।

इह मुक्तिमवाप्स्यन्ति त्वत्संसर्गातिनिर्मलाः ॥ १०११ ॥

इत्युक्तवतिदेवेशे कैलासशिखरोपमम्। दिव्यं विमानमापन्नं रुद्रकन्यापरिष्कृतम् ॥

आरुह्य तेन यानेन दिव्यरूपधराः खगाः। कैलासमभिसञ्जग्मुर्धर्ममापृच्छ्यतेऽमलाः

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे

उत्तरार्धे धर्मेशाख्यानं नामैकोनाशीतितमोऽध्यायः ॥ ७६ ॥

———

अशीतितमोऽध्यायः

विश्वभुजाशाविनायकप्रशंसनेमनोरथतृतीयाव्रताख्यानवर्णनम्

स्कन्द उवाच

कुम्भोद्भूत! तदाश्चर्यं विलोक्य जगदम्बिका।
उवाच शम्भुं प्रणता प्रणतार्तिहरं परम्॥ १॥

अम्बिकोवाच

अस्य पीठस्य माहात्म्यं महादेव महेश्वर!। तिरश्चामपि यज्ज्ञातंज्ञानं संसारमोचनम्
अतः प्रभावंविज्ञाय धर्मपीठस्य धूर्जटे!। धर्मेश्वरसमीपेऽहं स्थास्याम्यद्यदिनावधि
अत्रलिङ्गेतुयेभक्ताःस्त्रियोवापुरुषास्तुवा। तेषामभीष्टांसंसिद्धिंसाधयिष्याम्यहंसदा

ईश्वर उवाच

साधुकृतंत्वया देवि! कृतवत्या परिग्रहम्। अस्येहधर्मपीठस्य मनोरथकृतः सताम्
त एव विश्वभोक्तारो विश्वमान्यास्त एव हि।
ये त्वां विश्वभुजामत्र पूजयिष्यन्ति मानवाः॥ ६॥
विश्वे विश्वभुजे विश्वस्थित्युत्पत्तिलयप्रदे।
नरास्त्वदर्चकाश्चाऽत्र भविष्यन्त्यमलात्मकाः॥ ७॥

मनोरथतृतीयायां यस्ते भक्तिं विधास्यति। तन्मनोरथसंसिद्धिर्भवित्रीमदनुग्रहात्
नारीवा पुरुषोवाऽथ त्वद्व्रताचरणात्प्रिये। मनोरथानिह प्राप्य ज्ञानमन्तेचलप्स्यते

देव्युवाच

मनोरथतृतीयायां व्रतं कीदृक्कथाकथम्। किंफलंकैः कृतंनाथ!कथयैतत्कृपां कुरु॥

ईश्वर उवाच

शृणुदेवि यथापृष्टं भवत्या भवतारिणि!। मनोरथव्रतं चैतद् गुह्याद्गुह्यतरम्परम्॥
पुलोमतनया पूर्वं ततापपरमंतपः। किञ्चिन्मनोरथं प्राप्तुं नचाऽऽप तपसः फलम्॥

अपूपुजत्ततो मां सा भक्त्या परमया मुदा।
गीतेन सरहस्येन कलकण्ठीकलेनहि॥ १३॥

तद्गानेनातिसन्तुष्टो मृदुना मधुरेण च। सुतालेन सुरङ्गेण धातुमात्रा कलावता॥
प्रोवाच त्वं वरं ब्रूहि प्रसन्नोऽस्मि पुलोमजे। अनेन व सुगीतेन त्वनयालिङ्गपूजया

पुलोमजोवाच

यदि प्रसन्नो देवेश तदा यो मे मनोरथः। तं पूरय महादेव महादेवीमहाप्रिय॥
सर्वदेवेषु यो मान्यः सर्वदेवेषु सुन्दरः। यायजूकेषु सर्वेषु यः श्रेष्ठः सोऽस्तुमेपतिः
यथाऽभिलषितं रूपं यथाऽभिलषितं सुखम्। यथाऽभिलषितंचायुःप्रसन्नोदेहिमेभव
यदा यदा च पत्या मे सङ्गः स्याद्भूतसुखेच्छया।
तदा तदा च तं देहं त्यक्त्वाऽन्यं देहमाप्नुयाम्॥ १६॥

सदा च लिङ्गपूजायां मम भक्तिरनुत्तमा। भव भूयाद्भवहर जरामरणहारिणी॥
भर्तुर्व्ययेऽपि वैधव्यं क्षणमात्रमपीह न। मम भावि महादेव पातिव्रत्यं च यातु मा

स्कन्द उवाच

इमं मनोरथं तस्याः पौलोम्याः पुरसूदनः।
समाकर्ण्य क्षणं स्मित्वा प्राहेशो विस्मयान्वितः॥ २२॥

ईश्वर उवाच

पुलोमकन्ये! यश्चैव त्वयाऽकारिमनोरथः। लप्स्यसेव्रतचर्यातस्तत्कुरुष्वजितेन्द्रिये
मनोरथतृतीयायाश्चरणेनभविष्यति। तत्प्राप्तये व्रतं वक्ष्ये तद्विधेहियथोदितम्॥
तेन व्रतेन चीर्णेन महासौभाग्यदेन तु। अवश्यं भविता बाले तव चैवं मनोरथः॥

पुलोमकन्योवाच

कारुण्यवारिधे!शम्भोप्रणतप्राणिसर्वद!। किमात्मिकाथकाशक्तिःकापूज्यातत्रदेवता;
कदाचतद्विधातव्यमितिकर्तव्यता च का। इत्याकर्ण्यशिवोवाक्यंतां तुप्रणिजगादह

ईश्वर उवाच

मनोरथतृतीयायां व्रतं पौलोमि! तच्छुभम्।

पूज्या विश्वभुजा गौरी भुजर्विशतिशालिनी ॥ २८ ॥
वरदोऽभयहस्तश्च साक्षसूत्रः समोदकः ।
देव्याः पुरस्ताद् व्रतिना पूज्य आशाविनायकः ॥ २९ ॥
चैत्रशुक्लद्वितीयायांकृत्वावैदन्तधावनम् ।सायन्तनींचनिर्वर्त्यनातितृप्त्याभुजिक्रियाम्
नियमं चेति गृह्णीयाज्जितक्रोधो जितेन्द्रियः ।
सन्त्यक्तास्पृश्यसंस्पर्शः शुचिस्तद्गतमानसः ॥ ३१ ॥
प्रातर्व्रतं चरिष्यामि मातर्विश्वभुजेऽनघे । विधेहि तत्रसान्निध्यं मन्मनोरथसिद्धये
नियमं चेतिसंगृह्यस्वपेद्रात्रौ शुभंस्मरन् । प्रातरुत्थायमेधावीविधायावश्यकंविधिम्
शौचमाचमनं कृत्वा दन्तकाष्ठं समाददे । अशोकवृक्षस्य शुभं सर्वशोकनिशातनम्
नित्यन्तनं च निष्पाद्य विधिं विधिविदाम्वरः ।
स्नात्वा शुद्धाम्बरः सायं गौरीपूजां समाचरेत् ॥ ३५ ॥
आदौ विनायकं पूज्य घृतपूरान्निवेद्यच । ततोऽर्चयेद्विश्वभुजामशोककुसुमैःशुभैः ३६
अशोकवर्तिनैवेद्यैर्धूपैश्चागुरुसम्भवैः ।
कुङ्कुमेनानुलिप्यादावेकभक्तं ततश्चरेत् ॥ ३७ ॥
अशोकवर्तिसहितैर्घृतपूरैर्मनोहरैः । एवं चैत्रतृतीयायां व्यतीतायां पुलोमजे !॥
राधादिफाल्गुनान्तासु तृतीयासु व्रतं चरेत् ।
क्रमेण दन्तकाष्ठानि कथयामि तवाऽनघे ॥ ३९ ॥
अनुलेपनवस्तूनि कुसुमानि तथैव च । नैवेद्यानिगजास्यस्य देव्याश्चाऽपि शुभव्रते
अन्नानि चैकभक्तस्य शृणु तानि फलाप्तये । जम्ब्वपामार्गखदिरजातीचूतकदम्बकम्
प्लक्षोदुम्बरखर्जूरीबीजपूरीसदाडिमी । दन्तकाष्ठद्रुमा एते व्रतिनः समुदाहृताः
सिन्दूरागुरुकस्तूरीचन्दनं रक्तचन्दनम् । गोरोचनादेवदारुपद्माक्षं च निशाद्वयम्
प्रीत्यानुलेपनं बाले! यक्षकर्दमसम्भवम् । सर्वेषामप्यलाभेच प्रशस्तो यक्षकर्दमः
कस्तूरिकाया द्वौभागौ द्वौ भागौ कुङ्कुमस्यच ।
चन्दनस्य त्रयो भागाः शशिनस्त्वेक एव हि ॥ ४५ ॥

यक्षकर्दम इत्येष समस्तसुरवल्लभः । अनुलिप्याथकुसुमैरर्चयेद्वच्मि तान्यपि ॥
पाटलामल्लिकापद्मकेतकीकरवीरकैः । उत्पलैराजचम्पैश्च नन्द्यावर्तैश्च जातिभिः ॥
कुमारीभिः कर्णिकारैरलाभेतच्छदैः सह । सुगन्धिभिःप्रसूनौघैःसर्वालाभेपिपूजयेत्
करम्भोदधिभक्तं च सघृतरसमण्डकाः । फेणिका वटकाश्चैवपायसं च सशर्करम्
समुद्गं सघृतं भक्तं कार्त्तिके विनिवेदयेत् ।
इण्डेरिकाश्च लड्डूका माघे लम्पसिका शुभा ॥ ५० ॥
मुष्टिकाः शर्करागर्भाः सर्पिषापरिसाधिताः ।
निवेद्याः फाल्गुनेदेव्यै सार्धं विघ्नजिता मुदा ॥ ५१ ॥
निवेदयेद्यदन्नंहिएकभक्तेऽपि तत्स्मृतम् । अन्यंनिवेद्य सम्मूढोभुञ्जानोऽन्यत्पतेदधः
प्रतिमासं तृतीयायामेवमाराध्यवत्सरम् । व्रतसम्पूर्तयेकुर्यात्स्थण्डिलेऽग्निसमर्चनम्
जातवेदसमन्त्रेण तिलाज्यद्रविणेनच । शतमष्टाधिकं होमं कारयेद्विधिना व्रती ॥
सदैव नक्ते पूजोक्ता सदा नक्ते तुभोजनम् । नक्त एव हिहोमोऽयं नक्त एवक्षमापनम्
गृहाण पूजां मे भक्त्या मातर्विघ्नजिता सह ।
नमोऽस्तु ते विश्वभुजे ! पूरयाऽऽशु मनोरथम् ॥५६ ॥
नमोविघ्नकृते तुभ्यं नम आशाविनायक !। त्वं विश्वभुजया सार्धं ममदेहिमनोरथम्
एतौ मन्त्रौ समुच्चार्य पूज्यौ गौरीविनायकौ ।
व्रतक्षमापने देयः पर्यङ्कस्तूलिकान्वितः ॥ ५८ ॥
उपधान्यासमायुक्तो दीपीदर्पणसंयुतः । आचार्यं च सपत्नीकं पर्यङ्क उपवेश्यच ॥
व्रतीसमर्चयेद्वस्त्रैः करकर्णविभूषणैः । सुगन्धचन्दनैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥
दद्यात्पयस्विनीं गां च व्रतस्य परिपूर्तये ।
तथोपभोगवस्तूनि च्छत्रोपानत्कमण्डलुम् ॥ ६१ ॥
मनोरथतृतीयाया व्रतमेतन्मयाकृतम् । न्यूनातिरिक्तं सम्पूर्णमेतदस्तु भवद्गिरा ॥
इत्याचार्यं समापृच्छ्य तथेत्युक्तश्च तेन वै ।
आसीमान्तमनुव्रज्य दत्त्वाऽन्येभ्योऽपि शक्तितः ॥ ६३ ॥

नक्तंसमाचरेत्पोष्यैः सार्धंसुप्रीतमानसः । प्रातश्चतुर्थ्यांसम्भोज्य चतुश्च कुमारकान्
अभ्यर्च्यगन्धमाल्याद्यैर्द्वादशापिकुमारिकाः । एवंसम्पूर्णतांयातिव्रतमेतत्सुनिर्मलम्
कार्यंमनोरथावाप्त्यै सर्वैरेतद्व्रतं शुभम् । पत्नींकनोरमांकुल्यांमनोवृत्त्यनुसारिणीम्
तारिणींदुःसंसारसागरस्यपतिव्रताम् । कुर्वन्नेतद् व्रतंवर्षं कुमारः प्राप्नुयात्स्फुटम्

कुमारी पतिमाप्नोति स्वाढ्यं सर्वगुणाधिकम् ।
सुवासिनी लभेत्पुत्रान्पत्युः सौख्यमखण्डितम् ॥ ६८ ॥

दुर्भगासुभगास्याच्चधनाढ्यास्याद्दरिद्रिणी । विधवापिनवैधव्यंपुनराप्नोतिकुत्रचित्
गुर्विणीचशुभंपुत्रं लभते शुचिरायुषम् । ब्राह्मणोलभतेविद्यां सर्वसौभाग्यदायिनीम्

राज्यभ्रष्टो लभेद्राज्यं वैश्यो लाभं च विन्दति ।
चिन्तितं लभते शूद्रो व्रतस्यास्य निषेवणात् ॥ ७१ ॥
धर्मार्थी धर्ममाप्नोति धनार्थी धनमप्नुयात् ।
कामी कामानवाप्नोति मोक्षार्थीमोक्षमाप्नुयात् ॥ ७२ ॥

योयो मनोरथो यस्य सततंविन्दते ध्रुवम् । मनोरथतृतीयाया व्रतस्य चरणाद्व्रती

स्कन्द उवाच

इत्थं निशम्यशिवतः शिवा सन्तुष्टमानसा । पुनः पप्रच्छविश्वेशं प्रबद्धकरसम्पुटा
अन्यत्र येव्रतं चैतत्करिष्यन्तिसदाशिव !। तेकथंपूजयिष्यन्तिमाञ्चआशाविनायकम्

शिव उवाच

साधु पृष्टं त्वया देवि! सर्वसन्देहभेदिनि !।
वाराणस्यां समर्च्या त्वं विश्वे प्रत्यक्षरूपिणी ॥ ७६ ॥

आशाविघ्नजिता सार्धंसर्वाशापूर्तिकारिणा । हारिणानन्तविघ्नानांममक्षेत्रशुभार्थिना
क्षिप्रमागमयित्वा चनत्वा दूरं गतानपि । कृतकृत्यान्विधायाऽथचिन्तितैःसुमनोरथैः
अन्यत्र व्रतिभिर्विश्वे काञ्चनीप्रतिमातव । पञ्चकृष्णलकादूर्ध्वंकार्याविघ्नहृतोऽपिच

आचार्याय व्रती दद्याद् व्रतान्ते प्रतिमाद्वयम् ।
सकृत्कृते व्रते चाऽस्मिन्कृतकृत्यो व्रती भवेत् ॥ ८० ॥

ततः पुलोमजा देवि! श्रुत्वैतद्व्रतमुत्तमम् । कृत्वामनोरथं प्रापयथाभिवाञ्छितंहृदि

अरुन्धत्या वसिष्ठोऽपि लब्धोऽत्रिरनसूयया ।
सुनीत्योत्तानपादाच्च ध्रुवः प्राप्तोऽङ्गजोत्तमः ॥ ८२ ॥

सुनीतेर्दुर्भगत्वञ्च पुनरस्माद्व्रताद्गतम् । चतुर्भुजः पतिः प्राप्तः क्षीरनीरधिजन्मना
किं बहूक्तेन सुश्रोणि! कृतं येनव्रतं त्विदम् । व्रतानितेनसर्वाणिकृतानिव्रतिनाध्रुवम्

श्रुत्वा धीमान्कथाम्पुण्यां पुनस्तद्गतमानसः ।
शुभबुद्धिमवाप्नोति पापैरपि विमुच्यते ॥ ८५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे उत्तरार्धे धर्मेश्वराख्यानेविश्वभुजाशाविनायकप्रशंसने मनोरथतृतीयाव्रताख्यानं नामाऽशीतितमोऽध्यायः ॥ ८० ॥

एकाशीतितमोऽध्यायः

धर्मेशाख्यानवर्णनम्

अगस्त्य उवाच

धर्मतीर्थस्यमाहात्म्यंकीदृग्देवेनशम्भुना । स्कन्द!देव्यैसमाख्यातंतदाख्याहिकृपांकुरु

स्कन्द उवाच

विन्ध्योन्नतिहृदाख्यामिधर्मतीर्थसमुद्भवम् । आकर्णय महाप्राज्ञ! यथादेवेनभाषितम्
पुरं निहत्यवृत्रारिर्ब्रह्महत्यामवाप्तवान् । अनुतप्तोऽथ पप्रच्छ प्रायश्चित्तं पुरोहितम्

बृहस्पतिरुवाच

यदि त्वं देवराजेमां ब्रह्महत्यां सुदुस्त्यजाम् ।
अपानुनुत्सुस्तद्याहि काशीं विश्वेशपालिताम् ॥ ४ ॥

नान्यत्किञ्चित्क्वचिद् दृष्टं ब्रह्महत्या महौषधम् ।
राजधानीं परित्यज्य शक्र! विश्वेशितुःपराम् ॥ ५ ॥

भैरवस्यापिहस्ताग्रादपतद्वैधसंशिरः । यत्रानन्दवने तत्र वृत्रशत्रोव्रजद्रुतम् ॥ सीमानमपि सम्प्राप्य शक्रानन्दवनस्यहि । प्रह्महत्या पलायेत वेपमाना निराश्रयाः अन्येषामपिपापानां महापापजुषामपि । नाशयित्री पराकाशी विश्वेशसमधिष्ठिता महापातकतोमुक्तिः काश्यामेव शतक्रतो !। महासंसारतोमुक्तिःकाश्यामेवनचान्यतः

निर्वाणनगरीकाशी काशीसर्वाघसङ्कहृत् ।
विश्वेशितुःप्रिया काशी द्यौः काशी सदृशी नहि ॥ १० ॥
ब्रह्महत्याभयं यस्य यस्य संसारतो भयम् ।
जातुचित्तेन न त्याज्या काशिका मुक्तिकाशिका ॥ ११ ॥

जन्तूनांकर्मबीजानां यत्रदेहविसर्जने । न जातुचित्प्ररोहोऽस्तिहरदृष्ट्याप्तशुष्मणाम् तां काशीं प्राप्यवृत्रारे! वृत्रहत्यापनुत्तये । समाराधय विश्वेशं विश्वमुक्तिप्रदायकम् बृहस्पतेरितिवचो निशम्य ससहस्रदृक् । आयाद्द्रुततरंकाशींमहापातकघातुकाम् स्नात्वोत्तरवहायांच धर्मेशं परितःस्थितः । आराधयन् महादेवं ब्रह्महत्यापनुत्तये महारुद्रजपासक्तःसुत्रामाऽथत्रिलोचनम् । ददर्शलिङ्गमध्यस्थंस्वभासादीपिताम्बरम् पुनस्तुष्टाव वेदोक्तै रुद्रसूक्तैरनेकधा । विनिष्क्रम्य ततो लिङ्गादाविर्भूय भवोऽवदत् शचीपते! प्रसन्नोऽस्मि वरं वरयसुव्रत । किं देयं द्रुतमाख्याहि धर्मपीठकृतास्पद !॥ श्रुत्वेति देवदेवस्य स प्रेमवचनं हरिः । सर्वज्ञकिन्तेऽविदितं तमुवाचेति वृत्रहा

ततस्तत्कृपया नुन्नो धर्मपीठनिषेवणात् ।
निष्पाद्य तीर्थं तत्रेशोऽत्र स्नाहीन्द्रेतिचाऽब्रवीत् ॥ २० ॥
तत्रेन्द्रः स्नानमात्रेण दिव्यगन्धोऽभवत्क्षणात् ।
अवाप च रुचिश्चारुं प्राक्तनीं शातयाज्ञिकीम् ॥ २१ ॥

तदाश्चर्यमथोदृष्ट्वा मुनयोनारदादयः । परिसस्नुर्मुदायुक्ता धर्मतीर्थेऽघहारिणि ॥ अतर्पयन्पितृन्दिव्यान्व्यधुःश्राद्धानिश्रद्धया । धर्मेशंस्नापयामासुस्तत्तीर्थाम्बुभृतैर्घटैः

तदाप्रभृतितत्तीर्थं धर्मान्धुरितिविश्रुतम् । ब्रह्महत्यादि पापानामक्लेशं क्षालनं परम् यत्फलं तीर्थराजस्य स्नानेनपरिकीर्त्यते । सहस्रगुणितंतत्स्याद्धर्मान्धुस्नानमात्रतः गङ्गाद्वारे कुरुक्षेत्रे गङ्गासागरसङ्गमे । यत्फलं लभते मर्त्यो धर्मतीर्थे तदाप्नुयात् नर्मदायां सरस्वत्यांगौतम्यांलिहगेगुरौ । स्नात्वायत्फलमाप्येतधर्मकूपेतदाप्नुयात् मानसे पुष्करे चैव द्वारिकेसागरेतथा । तीर्थेस्नात्वाफलंयत्स्यात्तत्स्याद्धर्मजलाशये कार्त्तिक्यां सूकरक्षेत्रे चैत्र्यांगौरीमहाह्रदे । शङ्खोद्धारेहरिदिनेयत्फलंतत्फलंत्विह तीर्थद्वये प्रतीक्षन्ते सिस्नासून्पितरो नरान् । गङ्गायांधर्मकूपेच पिण्डनिर्वपणाशया पितामहसमीपेवा धर्मेशस्याग्रतोऽथवा । फल्गौच धर्मकूपे च माद्यन्ति प्रपितामहाः धर्मकूपे नरः स्नात्वापरितर्प्यपितामहान् । गयांगत्वाकिमधिकंकर्तापितृमुदावहम्

यथा गयायां तृप्ताःस्युः पिण्डदाने पितामहाः ।
धर्मतीर्थे तथैव स्युर्न न्यूनं नैव चाधिकम् ॥ ३३ ॥
ते धन्याः पितृभक्तास्तु प्रीणितास्तैः पितामहाः ।
पैत्राद्दणाद्धर्मतीर्थे निष्कृतिर्यैः कृता सुतैः ॥ ३४ ॥

तत्तीर्थस्यप्रभावेण निष्पापोऽभूत्क्षणेन च । प्रणम्यदेवदेवशमिन्द्रोऽगादमरावतीम् अपारो महिमा तस्यधर्मतीर्थस्यकुम्भज !। तत्कूपेस्वन्निरीक्ष्यापिश्राद्धदानफलंलभेत् तत्रापि काकिणीमात्रं यच्छेत्पितृमुदेनरः । अक्षयम्फलमाप्नोति धर्मपीठप्रभावतः

तत्र यो भोजयेद्विप्रान्यतिनोऽथ तपस्विनः ।
सिक्थे सिक्थे लभेत्सोऽथ वाजपेयफलं स्फुटम् ॥ ३८ ॥

प्राप्यामरावतीं शक्रस्ततोदिविषदांपुरः । धर्मपीठस्यमाहात्म्यंमहत्काश्यामवर्णयत् आगत्यपुनरप्यत्र शम्भोरानन्दकानने । मुनिवृन्दारकैः सार्द्धं लिङ्गमस्थापयद्धरिः तारकेशात्पश्चिमत इन्द्रेश्वरमितीरितम् । तस्य सन्दर्शनात्पुंसामैन्द्रलोकोन दूरतः

तद्दक्षिणे शचीशश्च स्वयं शच्या प्रतिष्ठितः ।
शचीशार्चनतः स्त्रीणां सौभाग्यमतुलंभवेत् ॥ ४२ ॥

तत्समीपेऽस्तिरम्भेशो बहुसौख्यसमृद्धिदः । इन्द्रेश्वरस्य परितोलोकपालेश्वरोपरः

तदर्चनात्प्रसीदन्तिलोकपालाःसमृद्धिदाः ।धर्मेशात्पश्चिमाशायांधरिणीशःप्रकीर्तितः

तद्दर्शनेन धैर्यं स्याद्राज्ये राजकुलादिषु ॥ ४४ ॥

धर्मेशाद्दक्षिणे पूज्यं तत्त्वेशाख्यम्परंनरैः । तत्त्वज्ञानम्प्रवर्तेत तल्लिङ्गस्य समर्चनात्

धर्मेशात्पूर्वदिग्भागे वैराग्येशं समर्चयेत् । निवृत्तिश्चेतसस्तस्य लिङ्गस्यस्पर्शनादपि

ज्ञानेश्वरं तथैशान्यां ज्ञानदंसर्वदेहिनाम् । ऐश्वर्येशमुदीच्याञ्चलिङ्गाद्धर्मेश्वराच्छुभात्

तद्दर्शनाद्भवेन्नृणामैश्वर्यं मनसेप्सितम् । पञ्चवक्त्रस्यरूपाणि लिङ्गान्येतानिकुम्भज!

एतान्यवश्यं संसेव्य नरः प्राप्नोति शाश्वतम् ।

अन्य त्तत्रैव यद्वृत्तं तदाख्यामि मुने! शृणु ॥ ४६ ॥

यच्छ्रुत्वापि नरो घोरे संसाराब्धौनमज्जति । कदम्बशिखरोनामविन्ध्यपादोमहानिह

दमस्य पुत्रस्तत्रासीद्दुर्दमोनामपार्थिवः । पितर्युपरतेराज्यंसम्प्राप्याविजितेन्द्रियः

हरेत्पुरन्ध्रीःप्रसभम्पौराणां काममोहितः ।

असाधवः प्रियास्तस्य साधवोऽप्रियतां ययुः ॥ ५२ ॥

अदण्ड्यान्दण्डयाञ्चक्रे दण्ड्येष्वासीत्पराङ्मुखः ।

सदैव मृगयाशीलः सोऽभून्मृगयुसङ्गतः ॥ ५३ ॥

विवासिताः स्वविषयात्तेन सन्मतिदायिनः ।

धर्माधिकारिणः शूद्रा ब्राह्मणाः करदीकृताः ॥ ५४ ॥

परदारेषु सन्तुष्टः स्वदारेषु पराङ्मुखः । आनर्चजातुचिन्नैवदेवौ दुःखान्तकारिणौ

हारिणौ सर्वपापानांसर्ववाञ्छितदायिनौ । सर्वेषांजगतीसारौश्रीकण्ठश्रीपतीपती

स्वप्रजास्वेक उदितो धूमकेतुरिवाऽपरः । दुर्दमोनामभूपालः क्षयायाकाण्ड एव हि

स कदाचिन्मृगयुभिः पापर्धिव्यसनातुरः ।

सार्धं विवेशारण्यानि गृष्टिपृष्ठानुगो हयी ॥ ५८ ॥

एकाकी दैवयोगेन दुर्दमः सोऽवनीपतिः । धन्वीतुरङ्गमारूढोऽविशदानन्दकननम्

सविलोक्याथ सर्वत्र पादपानवकेशिनः । सुच्छायांश्च सुविस्तारान्गतश्रमइवाभवत्

सुगन्धेन सुशीतेन सुमन्देन सुवायुना । क्षणंसंवीजितो राजा पल्लवव्यजनैःकुजैः

केवलम्मृगयाजातस्तत्खेदो न व्यपाव्रजत् ।

आजन्म जनितः खेदो निरगात्तद्वनेक्षणात्॥ ६२ ॥

मध्येवनं सचापश्यत्प्रासादंचुम्बिताम्बरम् । महारत्नशलाकानां रम्यमेकमिवाकरम्

अथावरुह्य तुरगात्सभूपालोऽतिविस्मितः । धर्मेशमण्डपम्प्राप्यस्वात्मानंप्रशशंसह

धन्योऽस्म्यहम्प्रसन्नोऽस्मि धन्ये मेऽद्यविलोचने ।

धन्यमद्यतनञ्चाहर्यदपश्यमिमां भुवम् ॥ ६५ ॥

पुनर्निनिन्द चात्मानं धर्मपीठप्रभावतः । धिङ्मां दुर्जनसंसर्गंत्यक्तसज्जनसङ्गमम्

जन्तूद्वेगकरं मूढम्प्रजापीडनपण्डितम् । परदारपरद्रव्यापहृत्यासुखमानिनम् ॥

अयावन्ममगतं वृथाजन्मालपमेधसः । धर्मस्थानानीदृशानि यद्दृष्टानिनकुत्रचित्

एवं बहु विनिन्द्य स्वं नत्वा धर्मेश्वरं विभुम् ।

आरुह्याऽश्वं ययौ राजा दुर्दमो विषयं स्वकम् ॥ ६६ ॥

ततोऽमात्यान्समाहूय क्रमायातांश्चिरन्तनान् ।

नवीनान्परिनिर्वास्यपौरांश्चाऽपि समाह्वयत् ॥ ७० ॥

ब्राह्मणांश्च नमस्कृत्य तेभ्यो वृत्तीः प्रदायच । पुत्रेराज्यंसमारोप्यप्रजाधर्मेनिवेश्यच

परिदण्ड्य च दण्डार्हान्साधूंश्चपरितोष्य च । दारानपिपरित्यज्यविषयेषुपराङ्मुखः

समागच्छदथैकाकी काशीं श्रेयोविकासिनीम् ।

धर्मेश्वरं समाराध्य कालान्निर्वाणमाप्तवान् ॥ ७३ ॥

धर्मेशदर्शनान्नित्यं तथाभूतः स दुर्दमः । बभूव दमिनां श्रेष्ठः प्रान्तेमोक्षञ्चलब्धवान्

इत्थं धर्मेशमाहात्म्यं मया स्वल्पं निरूपितम् ।

धर्मपीठस्य माहात्म्यं सम्यक्को वेद कुम्भज !॥ ७५ ॥

इदं धर्मेश्वराख्यानं यः श्रोष्यति नरोत्तमः ।

आजन्मसञ्चितात्पापात्स मुक्तो भवति क्षणात् ॥ ७६ ॥

श्राद्धकाले विशेषेणधर्मेशाख्यानमुत्तमम् ।

श्रावयेद्ब्राह्मणान्धीमान्पितॄणां तृप्तिकारणम् ॥ ७७ ॥

धर्माख्यानमिदंश्रृण्वन्नपिदूरस्थितःसुधीः । सर्वपापैर्विनिर्मुक्तोगन्तान्तेशिवमन्दिरम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे उत्तरार्धे धर्मेश्वराख्यानन्नामैकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः

वीरेश्वरप्रादुर्भावेऽमित्रजित्पराक्रमवर्णनम्

पार्वत्युवाच

वीरेशस्य महेशान! श्रूयते महिमा महान् । परांसिद्धिं परापेतुस्तत्रसिद्धाःपरःशताः

कथमाविर्भवस्तस्य काश्यां लिङ्गवरस्यतु । आशुसिद्धिप्रदस्येह तन्मेब्रूहि जगत्पते

महेश्वर उवाच

निशामय महादेवि वीरेशाविर्भवम्परम् । यंश्रुत्वापिनरः पुण्यम्प्राप्नोतिविपुलंशिवे

आसीदमित्रजिन्नामराजा परपुरञ्जयः । धार्मिकःसत्त्वसम्पन्नः प्रजारञ्जनतत्परः ॥ ४॥

यशोधनो वदान्यश्च सुधीर्ब्राह्मणदैवतः । सदैवावभृथस्नानपरिक्लिन्नशिरोरुहः ॥

विनीतो नीतिसम्पन्नःकुशलःसर्वकर्मसु । विद्याब्धिपारदृश्वाचगुणवान्गुणिवत्सल

कृतज्ञोमधुरालापःपापकर्मपराङ्मुखः। सत्यवाक्शौचनिलयःस्वल्पवाग्विजितेन्द्रियः

रणाङ्गणे कृतान्ताभः संख्यावांश्च सदोजिरे ।
कामिनीकामकेलिज्ञो युवापि स्थविरप्रियः ॥ ८ ॥

धर्मार्थैधितकोशश्च समृद्धबलवाहनः। सुभगश्चसुरूपश्चसुमेधाः सुप्रजाश्रयः ॥ ९ ॥

स्थैर्यधैर्यसमापन्नोदेशकालविचक्षणः । मान्यमानप्रदोनित्यंसर्वदूषणवर्जितः ॥ १०॥

वासुदेवाङ्घ्रियुगलेचेतोवृत्तिंनिधायसः । चकारराज्यंनिर्द्वन्द्वंविष्वगीतिविवर्जितम्

अलङ्घ्यशासनः श्रीमान्विष्णुभक्तिपरायणः ।
अभुनक्प्रचुरान्भोगान्समन्ताद्विष्णुसात्कृतान् ॥ १२ ॥

हरेरायतनान्युच्चैः प्रतिसौधम्पदेपदे । तस्य राज्येसमभवन्महाभाग्यनिधेः शिवे ॥

गोविन्द! गोपगोपल! गोपीजनमनोहर! । गदापाणे! गुणातीतगुणाढ्यगरुडध्वज!

केशिहृत्कैटभाराते! कंसारे! कमलापते !। कृष्ण! केशव! कञ्जाक्ष! कीनाशभयनाशन!

पुरुषोत्तम ! पापारे ! पुण्डरीकविलोचन !। पीतकौशेयवसन ! पद्मनाभ ! परात्पर!

जनार्दन! जगन्नाथ ! जाह्नवीजलजन्मभूः । जन्मिनां जन्महरणजञ्जपूकाघनाशन !॥

श्रीवत्सवक्षः! श्राकान्त! श्रीकरश्रेयसान्निधे !।
श्रीरङ्ग ! शार्ङ्गकोदण्ड ! शौरे! शीतांशुलोचन !॥ १८ ॥

दैत्यारे! दानवाराते! दामोदर! दुरन्तक !। देवकीहृदयानन्द! दन्दशूकेश्वरेशय !॥ १९

विष्णो!वैकुण्ठनिलय!बाणारेविष्टर! श्रवः !। विष्वक्सेनविराधारेवनमालिन्वनप्रिय

त्रिविक्रमत्रिलोकीशचक्रपाणेचतुर्भुज । इत्यादीनिपवित्राणिनामानिप्रतिमन्दिरम्

स्त्रीवृद्धबालगोपालवदनोदीरितानितु । श्रूयन्तेयत्रकुत्रापिरम्याणिमधुविद्विषः ॥

सुरसाकाननान्येवविलोक्यन्तेगृहेगृहे । चरित्राणिविचित्राणिपवित्राण्यब्धिजापतेः

सौधभित्तिषुदृश्यन्तेचित्रकृन्निर्मितानितु । ऋतेहरिकथायास्तुनान्यावार्तानिशम्यते

हरिणानैव विध्यन्ते हरिनामांशधारिणः । तस्यराज्ञोभयाद्व्याधैररण्यसुखचारिणः

नमत्स्यानैव कमठानवराहाश्चकेनचित् । हन्यन्तेकापितद्भीत्यामत्स्यमांसाशिनापिवै

अप्युत्तानशयास्तस्यराष्ट्रे मित्रजितःक्वचित् । स्तनपानंनकुर्वन्तिसम्प्राप्यहरिवासरम्

पशवोऽपि तृणाहारम्परित्यज्यहरेर्दिने । उपोषणपराजाताअन्येषांकाकथानृणाम् !

महामहोत्सवः सर्वैः पुरौकोभिर्वितन्यते । तस्मिन्प्रशासतिभुवंसम्प्राप्तेहरिवासरे ॥

स एव दण्ड्योऽभूत्तस्य राज्ञो मित्रजितःक्षितौ ।
यो विष्णुभक्तिरहितः प्राणैरपि धनैरपि ॥ ३० ॥
अन्त्यजा अपि तद्राष्ट्रे शङ्खचक्राङ्कधारिणः ।
सम्प्राप्य वैष्णवीं दीक्षां दीक्षिता इव सम्बभुः ॥ ३१ ॥

शुभानियानिकर्माणि क्रियन्तेऽनुदिनंजनैः । वासुदेवेसमर्प्यन्तेतानितैरफलेप्सुभिः

विना मुकुन्दंगोविन्दं परमानन्दमच्युतम् । नान्योजप्येत मन्त्येतनमज्येतजनैःक्वचित्

कृष्ण एव परोदेवः कृष्णएव परागतिः । कृष्णएवपरोबन्धुस्तस्यासीदवनीपते

एवं तस्मिन्महीपाले राज्यं सम्यक्प्रशासति ।

एकदा नारदः श्रीमांस्तं दिदृक्षुः समाययौ ॥ ३५ ॥

राज्ञा समर्चितः सोऽथ मधुपर्कविधानतः ।

नारदो वर्णयामास तममित्रजितं नृपम् ॥ ३६ ॥

नारद उवाच

धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम् ।

सर्वभूतेषु गोविन्दम्परिपश्यन्विशाम्पते !॥ ३७ ॥

योवेदपुरुषोविष्णुर्योयज्ञपुरुषोहरिः । योऽन्तरात्माऽस्यजगतःकर्ताहर्ताऽविताविभुः तन्मयम्पश्यतोविश्वं तव भूपालसत्तम !। दर्शनम्प्राप्यशुभदं शुचित्वमगमम्परम् ॥ एक एव हि सारोऽत्र संसारेक्षणभङ्गुरे । कमलाकान्तपादाब्जभक्तिभावोऽखिलप्रदः परित्यज्य हि यः सर्वं विष्णुमेकं सदाभजेत् । सुमेधसम्भजन्तेतंपदार्थाःसर्वएवहि हृषीकेशेहृषीकाणियस्यस्थैर्यंगतान्यहो । स एवस्थैर्यमाप्नोति ब्रह्माण्डेऽतीवचञ्चले यौवनं धनमायुष्यं पद्मिनीजलबिन्दुवत् । अतीवचपलंज्ञात्वाऽच्युतमेकं समाश्रयेत् याचि चेतसिसर्वत्र यस्य देवो जनार्दनः । स एव सर्वदा वन्द्यो नररूपी जनार्दनः निर्व्याजप्रणिधानेन शीलयित्वा श्रियःपतिम् । पुरुषोत्तमतांकोनप्राप्तवानिह भूतले अनयाविष्णुभक्त्या ते सन्तुष्टेन्द्रियमानसः । उपकर्तुमना ब्रूयां तन्निशामय भूपते !॥ बालाविद्याधरसुता नाम्ना मलयगन्धिनी । क्रीडन्तीपितुराक्रीडे हृताकङ्कालकेतुना कपालकेतुपुत्रेण दानवेन बलायसा । आगामिन्यां तृतीयायां तस्याःपाणिग्रहःकिल

पाताले चम्पकावत्यां नगर्यां साऽस्ति साम्प्रतम् ।

हाटकेशात्समागच्छंस्तयाऽहं साश्रुनेत्रया ॥ ४६ ॥

दृष्टःप्रणम्यविज्ञप्तो यथा तच्च निशामय । ब्रह्मचारिमुनिश्रेष्ठ! गन्धमादनशैलतः ॥ बालक्रीडनकासक्तां मोहयित्वा निनायसः । कङ्कालकेतुर्दुर्वृत्तोदुर्जयोऽन्यास्त्रघाततः स्वस्य त्रिशूलघातेन म्रियतेनान्यथारणे । जगत्पर्याकुलीकृत्य निद्रात्यत्रविनिर्भयः

यदिकोपिकृतज्ञो मां हत्वेमं दुष्टदानवम् । मद्दत्तेन त्रिशूलेन नयेद्वद्रं भवेन्नरः ॥ यदत्रोपचिकीर्षुस्त्वं रक्ष मां दुष्टदानवात् । ममापिहिवरोदत्तो भगवत्या महामुने

विष्णुभक्तो युवा धीमान्पुत्रि! त्वां परिणेष्यति ।

आतृतीयातिथियथा तद्वाक्यं तथ्यतां व्रजेत् ॥ ५५ ॥

तथानिमित्तमात्रं त्वं भव यत्नं समाचर । इति तद्वचनाद्राजन्विष्णुभक्तिपरायणम्

युवानञ्चापि धीमन्तं त्वामनुप्राप्तवाहनम् ॥ ५६ ॥

तद्गच्छ कार्यसिद्ध्यै त्वं हत्वा तं दुष्टदानवम् ।

आनयाऽऽशु महाबाहो ! शुभां मलयगन्धिनीम् ॥ ५७ ॥

सातुविद्याधरी जीवेद्विलोक्य त्वांनरेश्वर । पार्वतीवचनाद्दुष्टं घातयिष्यत्ययत्नतः इतिनारदवाक्यंसनिशम्यामित्रजिन्नृपः । अनल्पोत्कलिकोजातोविद्याधरसुतांप्रति उपायञ्चापि पप्रच्छ गन्तुं तां चम्पकावतीम् । नारदेनपुनःप्रोक्तः सराजागिरिराजजे तूर्णमर्णवमासाद्यपूर्णिमादिवसेनृप । भवान् द्रक्ष्यतिपोतस्थःकल्पवृक्षंरथस्थितम्

तत्रदिव्याङ्गना काचिद्दिव्यपर्यङ्कसंस्थिता ।

वीणामादाय गायन्ती गाथां गास्यति सुस्वरम् ॥ ६२ ॥

यत्कर्म विहितंयेन शुभंवाथशुभेतरम् । स एवभुङ्क्ते तत्तथ्यं विधिसूत्रनियन्त्रितः गाथामिमां सा सङ्गीयसरथासमहीरुहा । सपर्यङ्काक्षणादेवमध्येसिन्धुं प्रवेक्ष्यति भवानप्यविशङ्कञ्च ततः पोतान्महार्णवे । तामनुव्रजतु क्षिप्रं यज्ञवाराहमास्तुवन् ततोद्रक्ष्यसि पाताले नगरीं चम्पकावतीम् । महामनोहरां राजन्सहितांबालयानया इत्युक्त्वाऽन्तर्हितो देवि!सचतुर्मुखनन्दनः । राजाप्यर्णवमासाद्ययथोक्तंपरिलक्ष्यच विवेशाऽन्तःसमुद्रञ्च नगरीमाससादताम् । साऽथविद्याधरीबाला नेत्रप्राघुणकीकृता तेन राज्ञात्रिजगतीसौन्दर्यश्रीरिवैकिका । पातालदेवतेयं वा ममनेत्रोत्सवायकिम् निरणायि मधुद्रेष्ट्रास्त्रष्टुःसृष्टिविलक्षणा । कुहूराहुभयाद्देषाकान्तिश्चान्द्रमसीकिमु

योषिद्रूपं समाश्रित्य तिष्ठतेऽत्राऽकुतोभया ।

इत्थं क्षणं तां निर्वर्ण्य स राजाऽगात्तदन्तिकम् ॥ ७१ ॥

सा विलोक्याऽथ तं बाला नितराम्मधुराकृतिम् ।
विशालोरस्थलतलं प्रलम्बतुलसीस्रजम् ॥ ७२ ॥

शङ्खचक्राङ्कसुभगभुजद्वयविराजितम् । हरिनामाक्षरसुधासुधौतरदनावलिम् ॥ ७३॥ भवानीभक्तिबीजोत्थं भूरुहम्पुरुषाकृतिम् । मनोरथफलैः पूर्णमासीद् धृष्टतनूरुहा ॥ दोलापर्यङ्कमुत्सृज्य ह्रीभरा नम्रकन्धरा । वेपथुश्च परिष्वज्य बाला प्रोवाच भूपतिम् कस्त्वमत्रकृतान्तस्य भवनम्मधुराकृते । प्राप्तोमे मन्दभाग्यायाश्चेतोवृत्ति निरुन्धयन् यावन्नायाति सुभग! सकठोरतराकृतिः । अतिपर्याकुलीकृत्यत्रिलोकींदानवो मुहुः कङ्कालकेतुर्दुर्वृत्तस्त्वमवध्यःपरहेतिभिः । तावद्गुप्तं समातिष्ठ शस्त्रागारेऽतिगह्वरः

न मे कन्याव्रतं भङ्क्तुं स समर्थ उमावरात् ।
आगामिन्यां तृतीयायां परश्वः पाणिपीडनम् ॥ ७६ ॥

सञ्चिकीर्षति दुष्टात्मा गतायुर्ममशापतः । मातङ्गीतिकुरुयुवस्तत्कार्यंभविताचिरम् विद्याधर्येति चोक्तः सशस्त्रागारे निगूढवत् । स्थितोवीरोमहाबाहुर्दानवागमनेक्षणः अथ सायं समायातोदानवोभीषणाकृतिः । त्रिशूलंकलयन्पाणौमृत्योरपिभयावहम् आगत्यदानवोरौद्रः प्रलयाम्बुदनिःस्वनः । विद्याधरींजगादेति मदाघूर्णितलोचनः गृहाणेमानि रत्नानि दिव्यानिवरवर्णिनि !। कन्यात्वंचपरश्वस्तेपाणिग्राहाद्भविष्यति दासीनामयुतं प्रातर्दास्यामितव सुन्दरि !। आसुरींणासुरीणांचदानवीनांमनोहरम्

गन्धर्वीणां नरीणां च किन्नरीणां शतं शतम् ।
विद्याधरीणां नागीनां यक्षिणीनां शतानि षट् ॥ ८६ ॥
राक्षसीनां शतान्यष्टौ शतमप्सरसां वरम् ।
एतास्ते परिचारिण्यो भविष्यन्त्यमलाशये ॥ ८७ ॥
यावत्सम्पत्तिसम्भारो दिक्पालानां गृहेषु वै ।
मत्परिग्रहतां प्राप्य तावतस्त्वमिहेश्वरी ॥ ८८ ॥
दिव्यान्भोगान्मया सार्धं भोक्ष्यसे मत्परिग्रहात् ।
कदा परश्वो भविता यस्मिन्वैवाहिको विधिः ॥ ८९ ॥

त्वदङ्गसङ्गसंस्पर्शसुखसन्दोहमेदुरः । परां निर्वृतिमाप्स्यामि परश्वो निकटं यदि मनोरथाश्चिरंयावद्येमे हृदिसमेधिताः । तान्कृतार्थी करिष्यामिपरश्वस्तवसङ्गमात्

जित्वा देवान् रणे सर्वानिन्द्रादीन्मृगलोचने !।
त्रैलोक्यैश्वर्यसम्पत्तेस्त्वां करिष्यामि चेश्वरीम् ॥ ९२ ॥
आधायाऽङ्के त्रिशूलं स्वे सुष्वापेति प्रलप्य सः।
नरमांसवसास्वादप्रमत्तो वीतसाध्वसः ॥ ९३ ॥

वरं स्मरन्ती सा गौर्या विद्याधरकुमारिका । विज्ञायतंप्रमत्तं चसुसुप्तंचातिनिर्भयम् आहूय तं नरवरं वरंसर्वाङ्गसुन्दरम् । विष्णुभक्तिकृतत्राणं प्राणनाथेतिजल्प्य च ॥ शूलं तदङ्कादादाय गृहाणेमंजहिद्रुतम् । इति त्रिशूलं बालातो बालार्कसदृशद्युतिः ॥ समादाय महाबाहुः सतदामित्रजिन्नृपः । जहर्ष च जगादोच्चैर्बालायाश्चाभयंदिशन् वामपादप्रहारेण तमाताड्यसनिर्भयः । संस्मरंश्चक्रिणं चित्ते जगद्रक्षामणिंहरिम् ॥ जगादोत्तिष्ठरेदुष्ट! कन्याधर्षणलालस !। युध्यस्वाऽत्रमया सार्धं नसुप्तंहन्म्यहंरिपुम् इति संश्रुत्यसम्भ्रान्त उत्थायसदनोः सुतः । त्रिशूलंदेहिमेकान्ते प्रोवाचेतिमुहुर्मुहुः

कोऽयं मृत्युगृहं प्राप्तः कस्य रुष्टोऽद्य चाऽन्तकः ।
क आयुषाऽद्य सन्त्यक्तोऽयः प्राप्तो मम गोचरम् ॥ १०१ ॥

मम प्रचण्डदोर्दण्डकण्डूकण्डूयनक्षमः । नाल्पो नरोऽयंभविताकिंत्रिशूलेनसुन्दरि

माभैर्मे कौतुकम्पश्य रक्ष्योऽयं मम साम्प्रतम् ।
कालेन मत्तो भीतेन स्वयमेवोपढौकितः ॥ १०३ ॥

इत्युक्त्वा मुष्टिघातेन तेनोच्चैर्दनुसूनुना । हृदये निहतो राजा शिलातिकठिनेद्रुतम् सचक्रिणा कृतत्राणः पीडामल्पीयसीमपि । नोवेदकठिनोरस्कस्तत्करंप्रत्युतानुदत् अथ कोपवता राज्ञा हतो वक्त्रेचपेटया । आघूर्णितशिरा भूमौपतित्वापुनरुत्थितः

उवाच च वचोधैर्यमवष्टभ्य महाबली ।

दानव उवाच

ज्ञातं न त्वं मनुष्योऽसि नृरूपेण चतुर्भुजः ॥ १०७ ॥

आयातश्छिद्रमासाद्य हन्तुं मां दानवान्तकः ॥ १०८ ॥
एकंविधेहिमधुभिद्यदित्वंबलवानसि । विहायैतन्महच्छूलं युध्यस्व स्वायुधैर्मया
त्वया कपटरूपेण बलिनः कैटभादयः । नबलेनहताःसंख्ये हताएवच्छलेनहि ॥ ११०
बलिं पातालमनयस्त्वं नृवामनतां दधत् ।
नृमृगत्वेन भवता हिरण्यकशिपुर्हतः ॥ १११ ॥
त्वया जटिलरूपेण लङ्केशो विनिपातितः ।
गोपालवेषमासाद्य कंसाद्या घातितास्त्वया ॥ ११२ ॥
स्त्रीरूपेणाहरस्त्वन्तु विप्रलाप्याऽसुरान्सुधाम् । यादोरूपेणभवताशङ्खाद्यानिहताबहु
मायावीनामग्रगण्यसर्वमर्मज्ञसाधक !। न त्वत्तोऽहंबिभेम्यद्य यदिशूलंविहास्यसि ॥
अथवा दैन्यवचनैः किमेभिः कातरोचितैः ।
न त्यक्ष्यसि त्रिशूलं त्वं नत्वां जेष्याम्यहं रणे ॥ ११५ ॥
अवश्यमेव मर्तव्यमद्य प्रातः शरीरिणा । त्वत्करेण वरं मृत्युर्बलेनाऽपि च्छलेनवा
इयं विद्याधरी कन्या न मया दूषिता सती ।
साक्षाच्छ्रीरेव मन्तव्या तवाऽर्थं रक्षिता मया ॥ ११७ ॥
इत्युक्त्वा वामदोर्दण्डप्रहारेणातिनिष्ठुरम् । निजघानदनोःसूनुस्तंशिलोच्चयकम्पिना
नृपोवक्षःप्रहारं तं विषह्य रणमूर्द्धनि । लक्षीचकार तद्वक्षस्त्रिशूलं तोलयन्करे ॥११९
निजघान महाबाहुः स च प्राणाञ्जहौ क्षणात् । इत्थंकङ्कालकेतुं सनिहत्यसुरकम्पनम्
विद्याधरीं प्रपश्यन्तींप्राहहृष्टतनूरुहाम् । नारदस्यमुनेर्वाक्यात्ततसुश्रोणिवाञ्छितम्
कृतं मया कृतज्ञे किं करवाण्यधुना वद । श्रुत्वेति तस्यसावाक्यं प्राहगम्भीरचेतसः

मलयगन्धिन्युवाच

अथोदारमते! वीर! निजप्राणैः पणीकृतान् ।
किं माम्पृच्छसि जीवातो ! कुलकन्यामदूषिताम् ॥ १२३ ॥
इति ब्रुवत्यां कन्यायांपुनःस्वैरचरो मुनिः । अतर्किताग़मःप्राप्तो नारदो देवलोकतः
ततस्तुतुषतुस्तौतु दृष्ट्वातम्मुनिसत्तमम् । कृतप्रणामौमुनिनापरिविश्राणिताशिषौ

पाणिग्रहेणविधिनाभिषिक्तौ नारदेन तु । जग्मतुर्नारदादिष्टवर्त्मनाकृतमङ्गलौ ॥१२६
तयामलयगन्धिन्यायुतःसोऽमित्रजिन्नृपः । पुरींवाराणसींप्राप्यपौरैर्विहितमङ्गलाम्
यद्वीक्षणादपि नरो नारकींनैव जातुचित् । गतिमाप्नोतिमेधावीतामपुरीमविशन्नृपः
यस्यां पुर्यां प्रवेशं न लभन्तेवासवादयः । कैवल्यजनयित्र्यां हि तांपुरीमविशन्नृपः
अपि स्मृत्वा पुरीं यां वै काशीं त्रैलोक्यकाङ्क्षिताम् ।
न नरो लिप्यते पापैस्तां विवेश स भूपतिः ॥ १३० ॥
यस्यांपुर्यांप्रविष्टोना महद्भिरपिपातकैः । नाभिभूयेत तांकाशींप्राविशत्सविशांपतिः
सापि विद्याधरीकाशीसमृद्धिंवीक्ष्यदूरतः । निनिन्दस्वर्गलोकञ्चपातालनगरीमपि
प्राप्याऽमित्रजितं कान्तंतथाहृष्टा न सावधूः । यथादृष्ट्वाप्यहोकाशींपरमानन्दकेतनम्
साकृतार्थमिवात्मानं मन्यमानामनस्विनी । तेनपत्याचकाश्याचपरांनिर्वृतिमाययौ
सोऽप्यमित्रजिदासाद्य पत्नींमलयगन्धिनीम् । धर्मप्रधानंसंसेव्यकामंप्रापोत्तमंसुखम्
सैकदा तं पतिं राज्ञीविष्णुभक्तिपरायणम् । रहोविज्ञापयाञ्चक्रेपतिभक्तासुतार्थिनी

राज्ञ्युवाच

भूपाभीष्टतृतीयायाश्चरिष्यामि महाव्रतम् । यद्यनुज्ञा भवेद्भर्तुः पुत्रकामार्थितप्रदम्

राजोवाच

देव्यभीष्टतृतीयायां व्रतं कीदृग्भवेद्वद । कादेवता तत्र पूज्याविधानञ्चापिकिंफलम्
नारीपत्यननुज्ञातायाव्रतादिसमाचरेत् ।जीवन्तीदुःखिनीसास्यान्मृतानिरयमृच्छति
इति राज्ञोदिता राज्ञी प्रवक्तुमुपचक्रमे । इतिकर्तव्यतांतस्य व्रतस्य सरहस्यकाम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्डे
उत्तरार्धे वीरेश्वराविर्भावेऽमित्रजित्पराक्रमोनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

त्र्यशीतितमोऽध्यायः

अभीष्टतृतीयायाव्रतविधानपुरःसरंवीरेश्वराविर्भाववर्णनम्

राज्ञ्युवाच

अवधेहिधरानाथ! कथयामि यथातथम् । व्रतस्यास्यविधानञ्च फलञ्चाभीष्टदेवताम्

पुरा पुरः श्रीदपत्न्याः श्रीमुख्या ब्रह्मसूनुना ।
नारदेन सुतार्थिन्या व्रतमेतदुदीरितम् ॥ २ ॥

चीर्णञ्चाऽथतया देव्यापुत्रोऽभून्नलकूबरः । अन्याभिरपिवह्वीभिःपुत्राःप्राप्ताव्रतादितः

विधिनाऽप्यत्र सम्पूज्या गौरी सर्वविधानवित् ।
स्तनन्धयेन सहिता धयता स्तनमुन्मुखम् ॥ ४ ॥

मार्गशीर्षतृतीयायां शुक्लायांकलशोपरि । ताम्रपात्रंनिधायैकं तण्डुलैःपरिपूरितम्
अविच्छिन्नं नवीनञ्चरजनीरागरञ्जितम् । वासःपात्रोपरिन्यस्यसूक्ष्मात्सूक्ष्मतरंपरम्

तस्योपरि शुभं पद्मं रविरश्मिविकासितम् ।
तत्कर्णिकाया उपरि चतुःस्वर्णविनिर्मितम् ॥ ७ ॥

विधिसम्पूजयेद्भक्त्या रत्नपट्टाम्बरादिभिः । पुष्पैर्नानाविधैः रम्यैः फलैर्नारङ्गमुख्यकैः
सुगन्धैश्चन्दनाद्यैश्चकर्पूरमृगनाभिभिः । परमान्नादिनैवेद्यैःपक्वान्नैर्बहुभङ्गिभिः ॥ ६ ॥
धूपैरगुरुमुख्यैश्च रम्ये कुसुममण्डपे । रात्रौ जागरणं कार्यं विनिद्रैःपरमोत्सवैः ॥

हस्तमात्रमिते कुण्डे जातवेदस इत्यृचा ।
घृतेन मधुनाऽऽप्लुत्य जुहुयान्मन्त्रविद्द्विजः ॥ ११ ॥

सहस्रं कमलानाञ्च स्मेराणां स्वयमेवहि । नवप्रसूतांकपिलांसुशीलाञ्चपयस्विनीम्
दद्यादाचार्यवर्यायसालङ्कारांसलक्षणाम् । उपोष्यदम्पतीभक्त्यानवाम्बरविभूषितौ

प्रातः स्नात्वा चतुर्थ्यांश्च सम्पूज्याऽऽचार्यमादृतः ।
वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितौ ॥ १४ ॥

सोपस्कराञ्च ताम्मूर्तिमाचार्यायनिवेदयेत् । समुच्चरन्निमं मन्त्रं व्रतकृन्मिथुनं मुदा
नमो विश्वविधानज्ञेविधेविविधकारिणि !। सुतंवंशकरंदेहितुष्टामुष्माद्व्रताच्छुभात्
सहस्रं भोजयित्वाथद्विजानां भक्तिपूर्वकम् । भुक्तशेषेणचान्नेन कुर्याद्वै पारणं ततः
इत्थमेतद्व्रतं राजंश्चिकीर्षामि त्वयासह । कुरुचैतत्प्रियंमह्यमभीष्टफललब्धये ॥
इति भूपालवर्येण श्रुत्वा संहृष्टचेतसा । मुने व्रतं समाचीर्णं सान्तर्वत्नी बभूव ह ॥

तयाऽथ प्रार्थिता गौरी गर्भिण्या भक्तितोषिता ।
पुत्रं देहि महामाये! साक्षाद्विष्णवंशसम्भवम् ॥ २० ॥

जातमात्रो व्रजेत्स्वर्गं पुनरायाति चात्रवै । भक्तः सदाशिवेऽत्यर्थंप्रसिद्धःसर्वभूतले
विनैव स्तन्यपानेनषोडशाब्दाकृतिःक्षणात् । एवंभूतःसुतोगौरियथामेस्यात्तथाकुरु

मृडान्याऽपि तथेत्युक्ता राज्ञीभक्त्याऽतितुष्टया ।
अथ कालेन तनयं मूलर्क्षे साप्यजीजनत् ॥ २३ ॥

हितैरमात्यैरथ साविज्ञप्तारिष्टसंस्थिता । देवि राजार्थिनीचेत्त्वंत्यजदुष्टर्क्षजंसुतम् ॥
सामन्त्रिवाक्यमाकर्ण्य केवलं पतिदेवता । अत्याक्षीत्तं तथा प्राप्तंतनयंनयकोविदा
धात्रेयिकां समाकार्य प्राहेदं सानृपाङ्गना । पञ्चमुद्रे महापीठे विकटानाममातृका
तदग्रे स्थापयित्वाऽमुम्बालंधात्रेयिकेवद । गौर्यादत्तःशिशुरसौतवाग्रे विनिवेदितः

राज्ञ्या पत्युः प्रियैषिण्या मन्त्रिविज्ञप्तिनुन्नया ।
साऽपिराज्ञ्युदितं श्रुत्वा शिशुं लास्यशशिप्रभम् ॥ २८ ॥
विकटायाः पुरः स्थाप्य गृहं धात्रेयिका गता ।
अथसाविकटा देवी समाहूय च योगिनीः ॥ २९ ॥

उवाच नयत क्षिप्रं शिशुं मातृगणाग्रतः । तासामाज्ञां च कुरुत रक्षताऽमुं प्रयत्नतः

योगिन्यो विकटावाक्यात्खेचर्यस्ताः क्षणेन तम् ।
निन्युर्गगनमार्गेण ब्राह्म्याद्या यत्र मातरः ॥ ३१ ॥

प्रणम्य योगिनीवृन्दं तंशिशुंसूर्यवर्चसम् । पुरोनिधायमातॄणांप्रोवाचविकटोदितम्

ब्रह्माणी वैष्णवी रौद्री वाराही नारसिंहिका ।

कौमारी चापि माहेन्द्री चामुण्डा चैव चण्डिका ॥ ३३ ॥
दृष्ट्वा तं बालकं रम्यं विकटाप्रेषितं ततः । पप्रच्छुर्युगपड्डिम्भकस्तेतातः प्रसूश्च का ॥
मातृभिश्चेति पृष्टः स यदाकिञ्चिन्न वक्ति च ।
तदा तद्योगिनीचक्रं प्राह मातृगणस्त्विति ॥ ३५ ॥
राजयोग्योभवत्येषमहालक्षणलक्षितः । पुनस्तत्रैवनेतव्योयोगिन्यस्त्वविलम्बितम्
पञ्चमुद्रामहादेवी तिष्ठते यत्र काम्यदा । यस्याः संसेवनान्नृणां निर्वाणश्रीरदूरतः
सर्वत्र शुभजन्मिन्यां काश्यां मुक्तिःपदेपदे ।
तथापि सविशेषं हि तत्पीठं सर्वसिद्धिकृत् ॥ ३८ ॥
तत्पीठसेवनादस्यषोडशाब्दाकृतेःशिशोः । सिद्धिर्भवित्रीपरमाविश्वेशानुग्रहात्परात्
एवं मातृगणाशीर्भिर्योगिनीभिः क्षणेनहि । प्रापितोमातृवाक्येन पञ्चमुद्राङ्कितंपुनः
सम्प्राप्य तन्महापीठं स्वर्गलोकादिहागतः । आनन्दकानने दिव्यं ततापविपुलं तपः
तपसाऽतीवतीव्रेणनिश्चलेन्द्रियचेतसः । तस्यराजकुमारस्य प्रसन्नोऽभूदुमाधवः ॥
आविर्बभूव पुरतो लिङ्गरूपेण शङ्करः । प्रोवाच च प्रसन्नोऽस्मिवरं ब्रूहि नृपाङ्गज !

स्कन्द उवाच

सर्वज्योतिर्मयं लिङ्गं पुरतो वीक्ष्य वाङ्मयम् ।
सप्तपातालमुद्भिद्य स्थितं बृहदनुग्रहात् ॥ ४४ ॥
प्रणम्य दण्डवद्भूमौ परितुष्टाव धूर्जटिम् । सूक्तैर्जन्मान्तराभ्यस्तैः सुहृष्टोरुद्रदैवतैः
ततः प्रसन्नो भगवान्देवदेवो महेश्वरः । सन्तुष्टस्तपसा तस्य प्रोवाच वृषभध्वजः

देवदेव उवाच

वरं वरय संतप्ततपसाक्लेशितं वपुः । त्वयेदं बालवपुषा वशीकृतं मनो मम ॥ ४७ ॥
शिवोक्तं च समाकर्ण्य वरदानं पुनः पुनः । वरं च प्रार्थयाञ्चक्रे परिहृष्टतनूरुहः ॥४८

कुमार उवाच

देवदेवमहादेव! यदि देयो वरो मम । तदत्र भवता स्थेयं भवतापहृता सदा ॥ ४९॥
अस्मिँल्लिङ्गे स्थितः शम्भो! कुरु भक्तसमीहितम् ।

विना मुद्रादिकरणं मन्त्रेणाऽपि विना विभो !॥ ५० ॥
दिश सिद्धिं परामत्र दर्शनात्स्पर्शनान्नतेः । अस्यलिङ्गस्ययेये भक्तामनोवाक्कायकर्मभिः
सदैवानुग्रहस्तेषु कर्तव्यो वरएष मे । इति तद्वरमाकर्ण्य लिङ्गरूपोऽवदत्प्रभुः ॥ ५२
एवमस्तु यदुक्तं ते वीरवैष्णवसूनुना । जनेतुर्विष्णुभक्ताच्च राज्ञो ऽमित्रजितोभवान्
विष्णवंश एवमुत्पन्नो मम भक्तिपराङ्गज !। वीर ! वीरेश्वरंनामलिङ्गमेतत्त्वदाख्यया
काश्यां दास्यत्यभीष्टानि भक्तानां चिन्तितान्यहो ।
अस्मिँल्लिङ्गे सदा वीर! स्थास्याम्यद्यदिनावधि ॥ ५५ ॥
दास्यामि च परां सिद्धिमाश्रितेभ्यो न संशयः ।
परं न महिमानं मे कलौ कश्चिच्च वेत्स्यति ॥ ५६ ॥
यस्तु वेत्स्यति भाग्येन सपरां सिद्धिमाप्स्यति । अत्रजप्तंहुतंदत्तंस्तुतमर्चितमेववा
जीर्णोद्धारादिकरणमक्षयफलहेतुकम् । त्वंतुराज्यंपरंप्राप्य सर्वभूपालदुर्लभम् ॥
भुक्त्वा भोगांश्च विपुलानन्ते सिद्धिमवाप्स्यसि ।
पुरी वाराणसी रम्या सर्वस्मिञ्जगतीतले ॥ ५९ ॥
पुण्यस्तत्रापि सम्भेदःसरितोरसिगङ्गयोः । ततोऽपिचहयग्रीवंतीर्थञ्चैवातिपुण्यदम्
यत्र विष्णुर्हयग्रीवो भक्तचिन्तितमर्पयेत् । हयग्रीवाच्चवैतीर्थाद्गजतीर्थंविशिष्यते
यत्र वै स्नानमात्रेण गजदानफलं लभेत् । कोकावराहतीर्थञ्च पुण्यदं गजतीर्थतः
कोकावराहमभ्यर्च्य तत्र नो जन्मभाग्जनः । अपिकोकावराहाच्चदिलीपेश्वरसन्निधौ
दिलीपतीर्थं सुश्रेष्ठं सद्यःपापहरंपरम् । ततः सगरतीर्थञ्च सगरेशसमीपतः ॥ ६४
यत्र मज्जन्नरोमज्जेन्नभूयोदुःखसागरे । सप्तसागरतीर्थञ्चशुभंसगरतीर्थतः ॥ ६५ ॥
सप्ताब्धिस्नानजं पुण्यं यत्र स्नात्वा नरो लभेत् ।
महोदधीतिविख्यातं तीर्थं सप्ताब्धितीर्थता ॥ ६६ ॥
सकृद्यत्राऽऽप्लुतो धीमान्दहेदेवमहोदधिम् । चौरतीर्थं ततःपुण्यंकपिलेश्वरसन्निधौ
पापं सुवर्णचौर्यादि यत्र स्नात्वाऽक्षयं व्रजेत् ।
हंसतीर्थं ततोपीड्यं केदारेश्वरसन्निधौ ॥ ६८ ॥

हंसस्वरूपी यत्राऽहं नयामि ब्रह्मदेहिनः ॥ ६९ ॥
ततस्त्रिभुवनाख्यस्य केशवस्याऽतिपुण्यदम् ।
तीर्थं यत्राऽऽप्लुता मर्त्या मर्त्यलोकं विशन्ति न ॥ ७० ॥

गोव्याघ्रेश्वरतीर्थं चततोऽप्यधिकमेवहि । स्वभाववैरमुत्सृज्ययत्रोभौसिद्धिमापतुः
ततोऽपि हिवरं वीरतीर्थं मान्धातृसञ्ज्ञितम् । चक्रवर्तिपदंयत्र प्राप्तंतेनमहीभुजा॥
ततोऽपिमुचुकुन्दाख्यंतीर्थंचातीवपुण्यदम् । यत्रस्नातोनरोजातुरिपुभिर्नाऽभिभूयते
पृथुतीर्थं ततोऽप्युच्चैःश्रेयसांसाधनं परम् । पृथ्वीश्वरंयत्रदृष्ट्वानरः पृथ्वीपतिर्भवेत्
ततः परशुरामस्यतीर्थंचातीवसिद्धिदम् । यत्रक्षत्रवधात्पापाज्जामदग्न्योविमुक्तवान्
अद्याऽपि क्षत्रवधजं पापं तत्र प्रणश्यति । एकेन स्नानमात्रेण ज्ञानाज्ञानकृतेन च ॥

ततोऽपि श्रेयसां कर्तृ तीर्थं कृष्णाग्रजस्य हि ।
यत्र सूतवधात्पापाद्बलदेवो विमुक्तवान् ॥ ७७ ॥
दिवोदासस्य वै तीर्थं तत्र राज्ञोऽतिमेधसः ।
तत्र स्नातो नरो जातु न ज्ञानाच्च्यवतेऽन्ततः ॥ ७८ ॥

ततोपि हि महातीर्थं सर्वपापप्रणाशनम् । यत्रभागीरथीसाक्षान्मूर्तिरूपेणतिष्ठति ॥

स्नात्वा भागीरथीतीर्थे कृत्वा श्राद्धं विधानवित् ।
दत्त्वा दानं च पात्रेभ्यो न भूयो गर्भभाग्भवेत् ॥ ८० ॥

हरपापं च भोवीर तीर्थंभागीरथीतटे । तत्र स्नात्वाक्षयं यान्ति महापापकुलान्यपि

यो निष्पापेश्वरं लिङ्गं तत्र पश्यति मानवः ।
निष्पापो जायते वीर! स तल्लिङ्गेक्षणात्क्षणात् ॥ ८२ ॥

दशाश्वमेधतीर्थं च ततोऽपि प्रवरं मतम् । दशानामश्वमेधानांयत्रस्नात्वाफलंलभेत्
ततोऽपि शुभदं वीर! बन्दीतीर्थंप्रचक्षते । यत्रस्नातोनरो मुच्येदपि संसारबन्धनात्
हिरण्याक्षेण दैत्येनबहुशोदेवताः पुरा । बन्दीकृतानिगडितास्तुष्टुवुर्जगदम्बिकाम्

ततो विशृङ्खलीभूतैर्वन्दिता यज्जगज्जनिः ।
तदा प्रभृतिबन्दीति गीयतेऽद्यापि मानवैः ॥ ८६ ॥

बन्दीतीर्थंतु तत्रैव महानिगडखण्डनम् । यत्र स्नातो विमुच्येतसर्वस्मात्कर्मपाशतः

बन्दीतीर्थं महाश्रेष्ठं काशिपुर्यां विशाम्पते !।
तत्र स्नातो नरो यायाद्विमुक्तिं देव्यनुग्रहात् ॥ ८८ ॥

ततोऽपि हिश्रेष्ठतरं प्रयागमितिविश्रुतम् । प्रयागमाधवो यत्र सर्वयागफलप्रदः ॥
क्षोणीवराहतीर्थंचततोऽपिशुभदं परम् । तत्र स्नातो नरो जातुतिर्यग्योनिंनगच्छति
ततः कालेश्वरं तीर्थं वीरश्रेष्ठतरं परम् । कलिकालौ नबाधेते यत्र स्नातं नरोत्तमम्
अशोकतीर्थंतत्रैव ततोऽप्यतितरां शुभम् । यत्रस्नातोनरो जातु नापतेच्छोकसागरे
ततोऽतिनिर्मलतरं शुक्रतीर्थं नृपाङ्गज! । शुक्रद्वारा न जायेत यत्रस्नातो नरोत्तमः
ततोपिपुण्यदं राजन्भवानीतीर्थमुत्तमम् । यत्रस्नात्वा भवानीशौ दृष्ट्वानैव पुनर्भवेत्
प्रभासतीर्थं विख्यातंततोऽपिशुभदंनृणाम् । सोमेश्वरस्यपुरतस्तत्रस्नातोनगर्भभाक्
ततोगरुडतीर्थं च संसारविषनाशनम् । गरुडेशं समभ्यर्च्य तत्रस्नात्वा न शोचति
ब्रह्मतीर्थं ततः पुण्यं वीरब्रह्मेश्वरात्पुरः । ब्रह्मविद्यामवाप्नोति तत्र स्नानेन मानवः
ततो वृद्धार्कतीर्थं च विधितीर्थं ततःपरम् । तत्राप्लुतोनरोयातिरविलोकंसुनिर्मलम्
ततोनृसिंहतीर्थं च महाभयनिवारणम् । कालादपि कुतस्तत्र स्नात्वापरिबिभेतिच

ततोऽपि पुण्यदं नृणां तीर्थं चित्ररथेश्वरम् ।
यत्र स्नात्वा च दत्त्वा च चित्रगुप्तं न पश्यति ॥ १०० ॥

धर्मतीर्थं ततः पुण्यं धर्मेशपुरतःस्थितम् । तत्रश्राद्धादिकंकृत्वापितृणामनृणोभवेत्
विशालतीर्थंविमलं विशालफलदं ततः । तत्रस्नात्वाविशालाक्षींदृष्ट्वा गर्भे न जायते
जरासन्धेशतीर्थं च जरासन्धेशसन्निधौ । संसारज्वरपीडाभिस्तत्रस्नातोन मुह्यति

ततोऽपि ललितातीर्थं महासौभाग्यवर्धनम् ।
स्नात्वाऽर्चयित्वा ललितां न दरिद्रो न दुःखभाक् ॥ १०४ ॥
ततो गौतमतीर्थं च सर्वपापविशोधनम् ।
स्नात्वा पिण्डान्विनिर्वाप्य यत्र शोचति न क्वचित् ॥ १०५ ॥
गङ्गाकेशवतीर्थं च तीर्थं चाऽगस्त्यसञ्ज्ञकम् ।

ततस्तु योगिनीतीर्थं त्रिसन्ध्याख्यं ततः परम् ॥ १०६ ॥

ततस्तुनार्मदंतीर्थं तत आरुन्धतेयकम्। वासिष्ठं च ततस्तीर्थं मार्कण्डेयमनुत्तमम् ज्ञेयान्येतानि तीर्थानि पुण्यदान्युत्तरोत्तरम्। खुरकर्तरिसञ्ज्ञश्च ततस्तीर्थमनुत्तमम् तत्रश्राद्धादिकरणान्नरो मुच्येत किल्बिषैः। ततोभगीरथंतीर्थं राजर्षेरतिपुण्यदम्

तत्राऽल्पमपि यच्छेद्यत्कल्पान्तेऽप्यक्षयं हि तत्।

एतेभ्योपि हि तीर्थेभ्यो लिङ्गकोटित्रयादपि ॥ ११० ॥

वीर! वीरेश्वरं लिङ्गंमहाश्रेष्ठं भविष्यति। वीरतीर्थे नरः स्नात्वावीरेशंपरिपूज्यच तीर्थेष्वेतेषु सर्वेषु स्नातो भवति नान्यथा। यस्तुवीरेश्वरं लिङ्गंनक्तमभ्यर्चयिष्यति

तेन त्रिकोटिसङ्ख्यानि लिङ्गानीहार्चितानि वै ॥ ११२ ॥

यस्तु कामयते लक्ष्मीं मुक्तिदां भुक्तिदामपि। तेनवीरेश्वरंलिङ्गं संसेव्यमतियत्नतः विधायैकं जागरणं नरो वीरेशमर्चयन्। भूतायां नैव गृह्णाति शरीरंपाञ्चभौतिकम्

इदं लिङ्गं सदाभ्यर्च्य सिद्धैः संसिद्धिकामुकैः।

ऐहिकामुष्मिकान्यस्मात्सर्वान्कामान्समर्थयेत् ॥ ११५ ॥

पञ्चामृतेन स्नपनं यः करिष्यति मानवः। पलेपलेफलंतस्यवीरेशेघटकोटिजम् ॥ यदन्यत्रफलं लिङ्गे कोटिपुष्पप्रदानतः। तदेकेनैव पुष्पेण वीरेशे नाऽत्र संशयः ॥ एकामप्याहुतिंदत्त्वावीरेश्वरसमीपतः। कोटिहोमफलंसम्यङ्नात्र कार्याविचारणा

सिक्थे सिक्थे च नैवेद्ये कोटिसिक्थफलं भवेत्।

अत्यल्पमपि वीरेशे कृतमक्षयतां व्रजेत् ॥ ११६ ॥

अप्येकं यो महारुद्रं जपेद्वीरेशसन्निधौ। जापयेद्वा भवेत्तस्य कोटिरुद्रफलं ध्रुवम् ॥ व्रतोत्सर्गादिवीरेशे यत्कृतं व्रतिभिर्नृभिः। तत्कोटिगुणसंख्याकं भवत्येवनसंशयः कृता अष्टौ नमस्कारायेनवीरेश्वराग्रतः। अष्टकोटिनमस्कारफलं तस्य न संशयः ॥

सर्वासां सम्पदां स्थानमिदं लिङ्गंभविष्यति।

वीरेश्वरं न सन्देहो वीर! मे वरदानतः ॥ १२३ ॥

ज्ञानमुत्पत्स्यते पुंसां तारकाख्यं ममाऽऽज्ञया।

जीवतामेव तत्सेव्यमेतल्लिङ्गं शुभार्थिभिः ॥ १२४ ॥

एतच्छ्रुत्वा पुनः प्राह वीरो मित्रजितः सुतः। प्रणम्य देवदेवेशंपरिपूर्णमनोरथः तीर्थान्येतानि देवेश! यान्युक्तानि ममाग्रतः। कृपया पुनरप्येव तदन्यानि वद प्रभो आदिकेशवमारभ्य तत्तीर्थाच्च भगीरथात्। येषां श्रवणमात्रेण निष्पापो जायते नरः

इति श्रुत्वा महेशानो महीपतनयोदितम्।

पुनस्तीर्थानि गङ्गायां वक्तुं समुपचक्रमे ॥ १२८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे उत्तरार्धे वीरेश्वराविर्भावो नाम त्र्यशीतितमोऽध्यायः ॥ ८३॥

चतुरशीतितमोऽध्यायः

वीरेश्वराख्यानवर्णनम्

स्कन्द उवाच

आकर्णय क्षोणिसुर! यथास्थागुरचीकरत्।

गङ्गावरणयोः पुण्यात्सम्भेदात्तीर्थभूमिकाम् ॥ १ ॥

सङ्गमे तत्र निष्णातः सङ्गमेशं समर्च्य च। नरो न जातुजननीगर्भसङ्गमवाप्नुयात् तत्र पादोदकं तीर्थं यत्र देवेन शार्ङ्गिणा। आदौपादौ क्षालितौतुमन्दराच्चागतेनयत्

विष्णुपादोदके तीर्थे वारिकार्यं करोति यः।

व्यतीता तेन नियतं भूयः सांसारिकी गतिः ॥ ४ ॥

कृतपादोदकस्नानः कृतकेशवपूजनः। वीतसंसारवसतिः काश्यामासीन्नरोत्तमः

काश्यां सा भूमिरुद्दिष्टा श्वेतद्वीप इति द्विजैः।

तत्र पुण्यार्जनं कृत्वा श्वेतद्वीपाधिपो भवेत् ॥ ६ ॥

ततः पादोदकात्तीर्थात्तीर्थं क्षीराब्धिसञ्ज्ञकम्।

तत्रार्जितमहापुण्यो वसेत्क्षीराब्धिरोधसि ॥ ७ ॥

क्षीरोदाद्दक्षिणे भागे तीर्थंशङ्खाख्यमुत्तमम् । तत्रस्नातोभवेन्नूनंनाशङ्खादिनिधेःपतिः

अर्वाक्च शङ्खतीर्थाद्वै चक्रतीर्थमनुत्तमम् । संसारचक्रेन पतेत्तत्तीर्थजलमज्जनात्

गदातीर्थं तदग्रे तु संसारगदनाशनम् । तत्र श्राद्धादिकरणात्पश्येद्देवंगदाधरम्

पद्माक्षत्पद्मतीर्थञ्च तदग्रे पितृतृप्तिकृत् । तत्र स्नानादिकरणात्प्राप्नुयादघसंक्षयम्

ततस्तीर्थं महालक्ष्म्या महापुण्यफलप्रदम् ।

तत्राऽभ्यर्च्य महालक्ष्मीं निर्वाणकमलां लभेत् ॥ १२ ॥

ततो गारुत्मतं तीर्थं संसारगरनाशनम् । कृतोदकक्रियस्तत्र वैकुण्ठे वसतिं लभेत्

ततो नारदतीर्थञ्च ब्रह्मविद्यैककारणम् । तत्र स्नानेन मुक्तः स्याद् दृष्ट्वानारदकेशवम्

प्रह्लादतीर्थं तद्याम्ये महाभक्तिफलप्रदम् । तत्रवैस्नानमात्रेण विष्णोः प्रियतरोभवेत्

अम्बरीषं ततस्तीर्थं महापातकनाशनम् । तत्र वै शुभकर्माणो जनानोगर्भभाजनम्

आदित्यकेशवं नाम तदग्रे तीर्थमुत्तमम् । कृताभिषेकस्तत्रापि लभेत्स्वर्गाभिषेचनम्

दत्तात्रेयस्य तत्रास्ति तीर्थं त्रैलोक्यपावनम् ।

योगसिद्धिं लभेत्तत्र स्नानमात्रेण भावतः ॥ १८ ॥

तदग्रे भार्गवं तीर्थं महाज्ञानसमर्पकम् । तत्र स्नानविधानेन भवेद्भार्गवलोकभाक् ॥

ततोवामनतीर्थञ्च विष्णुसान्निध्यहेतुकम् । तत्रश्राद्धविधानेन मुच्यतेपितृजादृणात्

नरनारायणाख्यं हि ततस्तीर्थंशुभप्रदम् । तत्तीर्थमज्जनात्पुंसां गर्भवासः सुदुर्लभः

यज्ञवाराहतीर्थञ्च ततोदक्षिणतः शुभम् । यत्र स्नातस्य वै पुंसां राजसूयफलंध्रुवम्

विदारनारसिंहाख्यं तीर्थं तत्रास्तिपावनम् । यत्रैकस्नानतोनश्येदघंजन्मशतार्जितम्

गोपीगोविन्दतीर्थञ्च ततो वैष्णवलोकदम् ।

यस्मिन्स्नातो नरो विद्वान्न विन्द्याद्गर्भवेदनम् ॥ २४ ॥

लक्ष्मीनृसिंहतीर्थञ्चगोपीगोविन्ददक्षिणे । निर्वाणलक्ष्म्यायत्रत्योव्रियतेतुनरोत्तमः

तद्दक्षिणायां काष्ठायां शेषतीर्थमनुत्तमम् । महापापौघशेषोपिनतिष्ठेद्यन्निमज्जनात्

शङ्खमाधवतीर्थञ्च तद्याम्यांदिशिचोत्तमम् । तत्तीर्थसेवनान्नृणां कुतःपापभयम्महत्

ततोपिपावनतरंतीर्थं तत्क्षणसिद्धिदम् । नीलग्रीवाख्यमतुलंतत्स्नायीसर्वदाशुचिः

तत्रोद्दालकतीर्थञ्च सर्वाघौघविनाशनम् । ददाति महतीमृद्धिं स्नानमात्रेणतन्नृणाम्

ततः साङ्ख्याख्यतीर्थञ्च साङ्ख्येश्वरसमीपतः ।

तत्तीर्थसेवनात्पुंसां साङ्ख्ययोगः प्रसीदति ॥ ३० ॥

स्वर्लोकाद्यत्र संलीनःस्वयंदेव उमापतिः । अतःस्वर्लीनतीर्थञ्चस्वर्लीनेश्वरसन्निधौ

तत्र स्नानेन दानेन श्रद्धया द्विजभोजनैः ।

जपहोमार्चनैः पुंसामक्षयं सर्वमेव हि ॥ ३२ ॥

महिषासुरतीर्थञ्चतत्समीपेतिपावनम् । यत्रतप्त्वासदैत्येन्द्रोविजिग्येसकलान्सुरान्

तत्तीर्थसेवकोऽद्यापि नारिभिः परिभूयते । न पातकैर्महद्भिश्च प्रार्थितञ्च फलंलभेत्

बाणतीर्थञ्च तस्याऽऽरात्तत्सहस्रभुजप्रदम् ।

तत्र स्नातो नरो भक्तिं प्राप्नुयाच्छाम्भवीं स्थिराम् ॥ ३५ ॥

गोप्रतारेश्वरं नाम तदग्रे तीर्थमुत्तमम् । अत्रुत्रोऽपितरेद्यत्र स्नातोवैतरणीं सुखम्

तीर्थं हिरण्यगर्भाख्यं तद्याम्ये सर्वपापहृत् । तत्र स्नातो हिरण्येन मुच्यतेनकदाचन

ततः प्रणवतीर्थञ्च सर्वतीर्थोत्तमोत्तमम् । जीवन्मुक्तोभवेत्तत्र स्नानमात्रेण मानवः

ततः पिशङ्गिलातीर्थं दर्शनादपिपापहृत् । मुने! ममाधिष्ठानंवैतदग्रस्तेऽतिसिद्धिदम्

स्नात्वापिशङ्गिलातीर्थेदत्त्वादानञ्चकिञ्चन ।किंशोचतिकृतात्पापादन्यत्रापिमृतोयदि

योवैपिशङ्गिलातीर्थेस्नात्वामामर्चयिष्यति । भविष्यतिसमेमित्रंमित्रतेजःसमप्रभम्

ततस्त्रैविष्टपी दृष्टिनिर्मलीकृतपुष्कलम् । तीर्थं पिलिपिलाख्यंवै मनोमलविनाशनम्

तत्रश्राद्धादिकरणाद्दीनानाथप्रतर्पणात् । महतींश्रियमाप्नोतिमानवोतीवनिश्चलाम्

ततो नागेश्वरं तीर्थं महाघपरिशोधनम् । तत्तीर्थमज्जनादेव भवेत्सर्वाघसङ्क्षयः ॥

तद्दक्षिणे महापुण्यं कर्णादित्याख्यमुत्तमम् ।

तीर्थं यत्राप्लुतो मर्त्यो भास्करीं श्रियमावहेत् ॥ ४५ ॥

ततो भैरवतीर्थञ्च महाघौघक्षयप्रदम् । चतुर्थोदयकरंसर्वविघ्ननिवारणम् ॥ ४६ ॥

भौमाष्टम्यान्तत्र नरः स्नात्वा सन्तर्पयेत्पितॄन् ।

दृष्ट्वा च भैरवं कालं कलिं कालञ्च सञ्जयेत् ॥ ४७ ॥

तीर्थं खर्वनृसिंहाख्यं तीर्थाद्वैरवतः पुरः । तत्रस्नातस्यवैपुंसःकुतोघजनितम्भयम्
मृकण्डस्य मुनेस्तीर्थंतद्याम्यामतिनिर्मलम् । तत्रस्नानेनमर्त्यानांनापायमरणंक्वचित्
ततः पञ्चनदाख्यंवै सर्वतीर्थनिषेवितम् । तीर्थंयत्र नरः स्नात्वा नसंसारी पुनर्भवेत्
ब्रह्माण्डोदरवर्तीनि यानि तीर्थानि सर्वतः । ऊर्जे यत्रसमायान्तिस्वाघौघपरिनुत्तये
सर्वदा यत्र सर्वाणि दशम्यादिदिनत्रयम् । तिष्ठन्तितीर्थवर्याणि निजनैर्मल्यहेतवे
भूरिशःसर्वतीर्थानि मध्ये काशिपदेपदे । परम्पाञ्चनदः कैश्चिन्महिमानापिकुत्रचित्
अप्येकंकार्त्तिकस्याऽहस्तत्रवै सफलीकृतम् । जपहोमार्चनादानैः कृतकृत्यास्तएवहि

सर्वाण्यपि च तीर्थानि युगपत्तुलितान्यपि ।
नाधिजग्मुः पञ्चनद्याः कला याऽपि तुल्यताम् ॥ ५१ ॥

स्नात्वा पाञ्चनदेतीर्थे दृष्ट्वा वै बिन्दुमाधवम् । नजातुजायते धीमाञ्जननीजठराजिरे॥

ततो ज्ञानह्रदं तीर्थं जडानामपि जाड्यहृत् ।
तत्र स्नातो नरो जातु ज्ञानभ्रंशं न चाऽऽप्नुयात् ॥ ५७ ॥
तत्र ज्ञानह्रदे स्नात्वा दृष्ट्वा ज्ञानेश्वरं नरः ।
ज्ञानं तदधिगच्छेद्वै येन नो बाध्यते पुनः ॥ ५८ ॥

ततोऽस्ति मङ्गलंतीर्थं सर्वामङ्गलनाशनम् । तत्रावगाहनंकृत्वा भवेन्मङ्गलभाजनम्
अमङ्गलानि नश्येयुर्भवेयुर्मङ्गलानिच । स्नातुर्वैमङ्गलेतीर्थेनमस्कर्तुश्चमङ्गलम् ॥ ६० ॥
मयूखमालिनस्तीर्थं तदग्रे मलनाशनम् । तत्राप्लुतोगभस्तीशंविलोक्यविमलोभवेत्
मखतीर्थन्तु तत्रैव मखेश्वरसमीपतः । मखजम्पुण्यमाप्नोति तत्र स्नातोनरोत्तमः
तत्पार्श्वे बिन्दुतीर्थञ्च परमज्ञानकारणम् । तत्र श्राद्धादिकं कृत्वालभेत्सुकृतमुत्तमम्

पिप्पलादस्य च मुनेस्तीर्थं तद्याम्यदिक्स्थितम् ।
स्नात्वा शनेर्दिने तत्र दृष्ट्वा वै पिप्पलेश्वरम् ॥ ६४ ॥
पिप्पलं तत्र सेवित्वा अश्वत्थ इति मन्त्रतः ।
शनिपीडां न लभते दुःस्वप्नञ्चापि नाशयेत् ॥ ६५ ॥

ततस्ताम्रवराहाख्यं तीर्थञ्चैवातिपावनम् । यत्रस्नानेनदानेन नमज्जेदघसागरे ॥

तदग्रे कालगङ्गा च कलिकल्मषनाशिनी ।
तस्यां स्नात्वा नरो धीमांस्तत्क्षणान्निरघो भवेत् ॥ ६७ ॥

इन्द्रद्युम्नं महातीर्थमिन्द्रद्युम्नेश्वराग्रतः । तोयकृत्यन्तत्र कृत्वा लोकमैन्द्रमवाप्नुयात्
ततस्तु रामतीर्थञ्च वीररामेश्वराग्रतः । तत्तीर्थस्नानमात्रेण वैष्णवं लोकमाप्नुयात्
तत ऐक्ष्वाकवं तीर्थं सर्वाघौघविनाशनम् । तत्रस्नानेन पूतात्मा जायतेमनुजोत्तमः
मरुत्ततीर्थं तत्प्रान्ते मरुत्तेश्वरसन्निधौ । तत्र स्नात्वा तमर्च्येशं महदैश्वर्यमाप्नुयात्
मैत्रावरुणतीर्थञ्च ततः पातकनाशनम् । तत्र पिण्डप्रदानेन पितृणाम्भवति प्रियः ॥
ततोऽग्नितीर्थं विमलमग्नीशपुरतोमहत् । अग्निलोकमवाप्नोति तत्तीर्थपरिमज्जनात्
अङ्गारतीर्थं तत्रैव अङ्गारेश्वरसन्निधौ । तत्राङ्गारचतुर्थ्यांतुस्नात्वानिष्पापतामियात्
ततोवैकलतीर्थञ्चकलशेश्वरसन्निधौ । स्नात्वातल्लिङ्गमभ्यर्च्यकलिकालान्नबिभ्यति
चन्द्रतीर्थं च तत्रैवचन्द्रेश्वरसमीपतः । तत्र स्नात्वार्च्यचन्द्रेशंचन्द्रलोकमवाप्नुयात्
तदग्रे वीरतीर्थञ्च वीरेश्वरसमीपतः । यदुक्तम्प्राक् तव पुरस्तीर्थानामुत्तमंपरम् ॥

विघ्नेशतीर्थं च ततः सर्वविघ्नविघातकृत् ।
जातुचित्तत्र संस्नातो नविघ्नैरभिभूयते ॥ ७८ ॥
हरिश्चन्द्रस्य राजर्षेस्ततस्तीर्थमनुत्तमम् ।
यत्र स्नातो नरो जातु न सत्याच्च्यवते क्वचित् ॥ ७९ ॥
हरिश्चन्द्रस्य तीर्थे तु यच्छ्रेयः समुपार्जितम् ।
तदक्षयफलं वीर! इहलोके परत्र च ॥ ८० ॥

ततः पर्वततीर्थञ्च पर्वतेशसमीपतः । सर्वपर्वफलं तस्य स्नात्वा पर्वण्यपर्वणि ॥
कम्बलाश्वतरं तीर्थं तत्र सर्वविषापहम् । तत्र स्नातोभवेन्मर्त्योगीतविद्याविशारदः
ततः सारस्वतन्तीर्थं सर्वविद्योपपादकम् । तिष्ठेयुः पितरस्तत्र सहदेवर्षिमानवैः ॥

उमातीर्थं तु तत्रैव सर्वशक्तिसमन्वितम् ।
औमेयलोकप्राप्त्यै स्यात्स्नानमात्रेण निश्चितम् ॥ ८४ ॥

ततस्त्रिलोकीविख्यातं त्रिलोक्युद्धरणक्षमम् ।
तीर्थं श्रेष्ठतरं वीर! यदाख्या मणिकर्णिका ॥ ८५ ॥
चक्रपुष्करिणीतीर्थं तदादौ विष्णुनाकृतम् । तदाख्याकर्णनादेवसर्वैःपापैःप्रमुच्यते
स्वर्गौकसस्त्रिसन्ध्यंवैजपन्तिमणिकर्णिकाम् । यन्नामग्रहणम्पुंसांश्रेयसेपरमायहि
यैः श्रुतायैः स्मृतावीर! यैर्दृष्टामणिकर्णिका । तएवकृतिनोलोकेकृतकृत्यास्तएवहि
त्रिलोके ये जपन्तीहमानवामणिकर्णिकाम् । जपामितानंहावीरत्रिकालंपुण्यकर्मणः
इष्टंतेन महायज्ञैः सहस्रशतदक्षिणैः । पञ्चाक्षरीमहाविद्यायेनोक्तामणिकर्णिका ॥
महादानानि दत्तानि तेन वैपुण्यकर्मणा । येनाहमर्चितो वीरसम्प्राप्यमणिकर्णिकाम्
मणिकर्ण्यम्बुभिर्येन तर्पिताः प्रपितामहाः ।
तेन श्राद्धानि दत्तानि गयायां मधुपायसैः ॥ ९२ ॥
मणिकर्णीजलं येन सम्पीतं शुद्धबुद्धिना । किन्तस्यसोमपानैस्तैःपुनरावृत्तिलक्षणैः
तेस्नाताः सर्वतोर्थेषुमहापर्वसुभूरिशः । तथा च सर्वावभृथैर्यैःस्नातामणिकर्णिका
तैः सुराः पूजिताः सर्वे ब्रह्मविष्णुमुखा मखैः ।
यैः स्वर्णकुसुमै रत्नैरर्चिता मणिकर्णिका ॥ ९५ ॥
अहं ते नो मया सार्द्धं दीक्षां सम्प्राप्य शाम्भवीम् ।
अर्चितः प्रत्यहं येन पूजिता मणिकर्णिका ॥ ९६ ॥
तपांसितेनतप्तानि शीर्णपर्णादिना चिरम् । सेविताश्रद्धयायेनश्रीमतीमणिकर्णिका
दत्तादानानिभूरीणिमखानिष्टातुभूरिशः ।चिरन्तप्त्वाप्यरण्येषुस्वर्गैश्वर्यान्महीम्पुनः
विपुलेऽत्र महीपृष्ठेपञ्चक्रोश्यां मनोहरा । संश्रितामणिकर्णीयैस्तेयाताश्चानिवर्तकाः
दानानाञ्च व्रतानाञ्च क्रतूनां तपसामपि । इदमेव फलं मन्ये यदाप्यामणिकर्णिका ॥
मोक्षलक्ष्मीरियं साक्षाच्छ्रीमती मणिकर्णिका ।
प्रायोऽस्या महिमानं वै न वेद्म्यहमपि स्फुटम् ॥ १०१ ॥
अवाच्यां मणिकर्ण्याश्च तीर्थम्पाशुपतम्परम् ।
तीर्थं तु रुद्रवासाख्यं विश्वतीर्थमतः परम् ॥ १०२ ॥

मुक्तितीर्थं ततो रम्यमविमुक्तमथोत्तमम् ।
तीर्थं च तारकं स्कान्दं ढुण्ढेस्तीर्थं ततोऽपि च ॥ १०३ ॥
भवानेयमथैशानं ज्ञानतीर्थमथोत्तमम् । नन्दितीर्थं विष्णुतीर्थं तीर्थं पैतामहंततः
नाभितीर्थमिदञ्चैव ब्रह्मनालमतःपरम् । ततोभागीरथन्तीर्थं यत्तवाग्रे पुराऽकथि
तीर्थान्युत्तरवाहिन्यां स्वधुर्न्यां काशिसन्निधौ ।
सन्त्यनेकानि पुण्यानि मयोक्तान्यल्पशः पुनः ॥ १०६ ॥
तत्राऽपिनितरांश्रेष्ठापञ्चतीर्थीनृपाङ्गज !। यस्यांस्नात्वानरोभूयोगर्भवासंनसंस्मरेत
प्रथमञ्चासिसम्भेदं तीर्थानां प्रवरम्परम् । ततोदशाश्वमेधाख्यंसर्वतीर्थनिषेवितम्
ततः पादोदकं तीर्थमादिकेशवसन्निधौ । ततः पञ्चनदम्पुण्यं स्नानमात्रादघौघहृत्
एतेषामपि तीर्थानां चतुर्णामपि सत्तम !। पञ्चमंमणिकर्ण्याख्यंमनोवयवशुद्धिदम्
अहंस्नाम्यत्र सततमुमयासहपर्वसु । ब्रह्मणा विष्णुना सार्द्धं सहेन्द्रादिसुरर्षिभिः ॥
अतएवाऽत्र गीयेतगाथेयंश्रुतिसम्मता । नागलोककृतावासैःस्वर्गौकोभिश्चसन्ततम्
सत्यं सत्यंपुनःसत्यंसत्यपूर्वमिदंवचः । मणिकर्णीसमन्तीर्थं नास्तिब्रह्माण्डगोलके
पञ्चतीर्थ्यां नरः स्नात्वा न देहम्पाञ्चभौतिकम् ।
गृह्णाति जातुचित्काश्यां पञ्चास्यो वाऽथ जायते ॥ ११४ ॥
इति दत्त्वावरान्देवो वीरस्याऽन्तर्दधेहरः । सचवीरोपिवीरेशंप्राच्र्यप्राप्तःसमीहितम

स्कन्द उवाच

तीर्थाध्यायमिमं पुण्यमगस्ते! यो निशामयेत् ।
तस्याऽघं सङ्क्षयं यायादपि जन्मशतार्जितम् ॥ ११६ ॥
इति वीरेश्वराख्यानं तीर्थाख्यानप्रसङ्गतः । कथितं तेपुरागस्त्यकामेशंकथयाम्यतः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्डे
उत्तरार्धेवीरेश्वराख्यानं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥

———

पञ्चाशीतितमोऽध्यायः

कामेशतीर्थवर्णनपुरस्सरंदुर्वाससेवरप्रदानवर्णनम्

स्कन्द उवाच

जगज्जनन्याः पार्वत्याःपुरोऽगस्ते! पुरारिणा ।
यथाऽऽख्यायि कथा पुण्या तथा ते कथयाम्यहम् ॥ १ ॥

पुरा महीमिमांसर्वांससमुद्राद्रिकाननाम् । ससरित्कांसार्णवांचसग्रामपुरपत्तनाम् परिभ्रम्य महातेजा महामर्षीमहातपाः । दुर्वासाः सम्परिप्राप्तः शम्भोरानन्दकाननम्

विलोक्याऽऽक्रीडमखिलं बहुप्रासादमण्डितम् ।
बहुकुण्डतडागञ्च शम्भोस्तोषमुपागमत् ॥ ४ ॥

पदेपदेमुनीनाञ्चजितकालमहाभियाम् । दृष्ट्वोटजानिरम्याणिदुर्वासाविस्मितोऽभवत्

सर्वर्तुकुसुमान्वृक्षान्सुच्छायस्निग्धपल्लवान् ।
सफलान्सुलताश्लिष्टान्दृष्ट्वा प्रीतिमगान्मुनिः ॥ ६ ॥
दुर्वासाश्चातिहृष्टोऽभूद्द दृष्ट्वा पाशुपतोत्तमान् ।
भूतिभूषितसर्वाङ्गा जटाजटितमौलिकान् ॥ ७ ॥

कौपीनमात्रवसनान्स्मरारिध्यानतत्परान् । कक्षीकृतमहालाबून्हुडुत्कारजिताम्बुदान् करण्डदण्डपानीयपात्रमात्रपरिग्रहान् । क्वचित्त्रिदण्डिनोदृष्ट्वानिःसङ्गान्निष्परिग्रहान् कालादपि निरातङ्कान्विश्वेशशरणं गतान् । क्वचिद्वेदरहस्यज्ञानाबाल्यब्रह्मचारिणः

नित्यंभागीरथीस्नानपरिपिङ्गलमूर्धजान् ।
विलोक्य काश्यां दुर्वासा ब्राह्मणान्मुमुदेतराम् ॥ ११ ॥
पशुष्वपि च या तुष्टिर्मृगेष्वपि च या द्युतिः ।
तिर्यक्ष्वपि च या हृष्टिः काश्यां नान्यत्र सा स्फुटम् ॥ १२ ॥

इदंसुश्रेयसो व्युष्टिःकामरेषु त्रिविष्टपे । यत्र तेष्वपि तिर्यक्षु परमानन्दवर्धिनी ॥

वरमेतेऽपि पशवआनन्दवनचारिणः । सदानन्दाः पुनर्देवा न नन्दनवनाश्रिताः ॥१४॥

वरं काशीपुरीवासीम्लेच्छोऽपि हि शुभायतिः ।
नान्यत्रत्यो दीक्षितोऽपि स हि मुक्तेरभाजनम् ॥ १५ ॥

वैश्वेश्वरी पुरीचैषा यथा मे चित्तहारिणी । सर्वापिनतथाक्षोणीनस्वर्गोनैवनागभूः स्थैर्यम्बबन्ध न क्वापिभ्रमतो मे मनोगतिः । सर्वस्मिन्नपिभूभागेयथास्थैर्यमगादिह रम्यापुरी भवेदेषा ब्रह्माण्डादखिलादपि । परिष्टुत्येति दुर्वासाश्चेतोवृत्तिमवापह

तप्यमानोऽपि हि तपः सुचिरं समहातपाः ।
यदा नाऽऽप फलं किञ्चिच्चुकोप च तदा भृशम् ॥ १६ ॥

धिक्चमां तापसं दुष्टं धिक्चमेदुश्चरंतपः । धिक्चक्षेत्रमिदंशम्भोःसर्वेषाञ्चप्रतारकम् यथा न मुक्तिरत्र स्यात्कस्यापिकरवै तथा । इतिशप्तुंयदोद्युक्तः सञ्जहासतदाशिव तत्रलिङ्गमभूदेकं ख्यातंप्रहसितेश्वरम् । तल्लिङ्गदर्शनात्पुंसामानन्दःस्यात्पदे पदे ॥ उवाचविस्मयाविष्टोमनस्येवमहेशिता । ईदृशेभ्यस्तपस्विभ्योनमोस्त्वितिपुनःपुनः यत्रैव हि तपस्यन्तियत्रैवविहिताश्रमाः । लब्धप्रतिष्ठायत्रैव तत्रैववामर्षिणोद्विजाः

मनाक् चिन्तितमात्रं तु चेल्लभन्ते न तापसाः ।
क्रुधा तदैव जीयन्ते हारिण्या तपसां श्रियः ॥ २५ ॥
तथापितापसामान्याः स्वश्रेयोवृद्धिकाङ्क्षिभिः ।
अक्रोधनाः क्रोधना वा का चिन्ता हि तपस्विनाम् ॥ २६ ॥

इतियावन्महेशानोमनस्येवविचिन्तयेत् । तावत्तत्क्रोधजोवह्निर्व्यानशेव्योममण्डलम् तत्क्रोधानलधूमौघैर्व्यापितंयन्नभोऽङ्गणम् । तद्दधाति नभोऽद्यापिनीलिमानंमहत्तरम् ततोगणाः परिक्षुब्धाःप्रलयार्णवनीरवत् । आःकिमेतत्किमेतद्धै भाषमाणाःपरस्परम् गर्जन्तस्तर्जयन्तश्च प्रोद्यतायुधपाणयः । प्रमथाः परितस्थुस्ते परितोधामशाम्भवम्

को यमः कोऽथवा कालः को मृत्युः कस्तथान्तकः ।
को वा विधाता के लेखाः क्रुद्धेष्वस्मासु कः परः ॥ ३१ ॥
अग्निं पिबामो जलवच्चूर्णीकुर्मोऽखिलान्गिरीन् ।

सप्ताऽपि चार्णवांस्तूर्णं करवाम मरुस्थलीम् ॥ ३२ ॥

पातालश्चानयामोर्ध्वमधोदध्मोऽथवा दिवम् । एकमेव हि वा ग्रासं गगनं करवामहे

ब्रह्माण्डभाण्डमथवा स्फोटयामः क्षणेन हि ।

आस्फालयामो वाऽन्योन्यं कालं मृत्युञ्च तालवत् ॥ ३४ ॥

ग्रसामो वाऽथभुवनं मुक्त्वावाराणसींपुरीम् । यत्रमुक्ताभवन्त्येवमृतमात्रेणजन्तवः

कुतोऽयम्भ्रमसम्भारो ज्वालावल्यः कुतस्त्वमूः ।

को वा मृत्युञ्जयं रुद्रं नो विद्यान्मदमोहितः ॥ ३६ ॥

इतिपारिषदाः शम्भोर्महाभयभयप्रदाः । जल्पन्तः कल्पयामासुःप्राकारं गगनस्पृशम्

शकलीकृत्यबहुशः शिलावत्प्रलयानलम् । नन्दी च नन्दिषेणश्च सोमनन्दी महोदरः

महाहनुर्महाग्रीवो महाकालोजितान्तकः । मृत्युप्रकम्पनोभीमोघण्टाकर्णो महाबलः

क्षोभणो द्रावणो जृम्भी पञ्चास्यः पञ्चलोचनः ।

द्विशिरास्त्रिशिराः सोमः पञ्चहस्तो दशाननः ॥ ४० ॥

चण्डो भृङ्गिरिटिस्तण्डी प्रचण्डस्ताण्डवप्रियः ।

पिचिण्डिलः स्थूलशिराः स्थूलकेशो गभस्तिमान् ॥ ४१ ॥

क्षेमकःक्षेमधन्वाचवीरभद्रोरणप्रियः । चण्डपाणिः शूलपाणिः पाशपाणिः कृशोदरः

दीर्घग्रीवोऽथपिङ्गाक्षः पिङ्गलः पिङ्गमूर्धजः । बहुनेत्रोलम्बकर्णः खर्वः पर्वतविग्रहः

गोकर्णोगजकर्णश्च कोकिलाख्यो गजाननः । अहंवैनैगमेयश्चविकटास्योऽट्टहासकः

सीरपाणिः शिवारावो वैणिको वेणुवादनः । दुराधर्षोदुःसहश्च गर्जनोरिपुतर्जनः

इत्यादयो गणेशानाः शतकोटिदुरासदाः ।

काश्यांनिवारयामासुरपि प्राभञ्जनीं गतिम् ॥ ४६ ॥

क्षुब्धेषु तेषुवीरेषु चकम्पेभुवनत्रयम् । दुर्वाससश्चकोपाग्निज्वालाभिर्व्याकुलीकृतम्

तदाविविशतुः काश्यां सूर्याचन्द्रमसावपि । न गणैरकृतानुज्ञौतत्तेजःशमितप्रभौ

निवार्यप्रमथानीकमतिक्षुब्धमुमाधवः । मदंश एव हि मुनिरानसूयेय एष वै ॥ ४६

अथो दुर्वाससो लिङ्गादाविरासीत्कृपानिधिः ।

महातेजोमयः शम्भुर्मुनिशापात्पुरीमवन् ॥ ५० ॥

माभूच्छापोमुनेःकाश्यांनिर्वाणप्रतिबन्धकः । इत्यनुक्रोशतोदेवस्तस्यप्रत्यक्षतांगतः

उवाचच प्रसन्नोऽस्मि महाक्रोधन! तापस! । वरयस्ववरःकस्तेमयादेयोऽविशङ्कितः

ततोविलज्जितोऽगस्त्यशापोद्यतकरोमुनिः । अपराद्धम्बहुमया क्रोधान्धेनेतिदुर्धिया

उवाच चेतिबहुशो धिङ्मांक्रोधवशंगतम् । त्रैलोक्याभयदांकाशींशप्तुमुद्यतचेतसम्

दुःखार्णवनिमग्नानां यातायातेति खेदिनाम् ।

कर्मपाशितकण्ठानां काश्येका मुक्तिसाधनम् ॥ ५५ ॥

सर्वेषां जन्तुजातानां जनन्येकैवकाशिका । महामृतस्तन्यदात्रीनेत्री च परमम्पदम्

जनन्यासहनोकाशी लभेदुपमितिंक्वचित् । धारयेज्जननीगर्भे काशीगर्भाद्विमोचयेत्

एवम्भूतां तु यः काशीमन्योऽपि हि शपिष्यति ।

तस्यैव शापो भविता न तु काश्याः कथञ्चन ॥ ५८ ॥

इतिदुर्वाससोवाक्यंश्रुत्वादेवस्त्रिलोचनः । अतीवतुषितोजातःकाशीस्तवनलब्धमुत्

यः काशीं स्तौति मेधावी यःकाशीं हृदि धारयेत् ।

तेन तप्तं तपस्तीव्रं तेनेष्टं क्रतुकोटिभिः ॥ ६० ॥

जिह्वाग्रे वर्तते यस्य काशीत्यक्षरयुग्मकम् । न तस्यगर्भवासःस्यात्क्वचिदेवसुमेधसः

योमन्त्रंजपतिप्रातः काशीवर्णद्वयात्मकम् । सतुलोकद्वयंजित्वालोकातीतंव्रजेत्पदम्

आनसूयेयतेज्ञानं काशीस्तवनपुण्यतः । यथेदानीं समुत्पन्नं तथा न तपसः पुरा ॥

मुने!न मे प्रियस्तद्वद्दीक्षितो मम पूजकः । यादृक्प्रियतरःसत्यं काशीस्तवनलालसः

तादृक्तुष्टिर्न मे दानैस्तादृक्तुष्टिर्न मे मखैः ।

न तुष्टिस्तपसा तादृग्यादृशी काशिसंस्तवैः ॥ ६५ ॥

आनन्दकाननं येन स्तुतमेतत्सुचेतसा । तेनाहंसंस्तुतः सम्यक् सर्वैःसूक्तैः श्रुतीरितैः

तवकामाः समृद्धाःस्युरानसूयेय तापस! । ज्ञानन्ते परमं भावि महामोहविनाशनम्

अपरञ्चवरम्ब्रूहि किं दातव्यन्तवाऽनघ । त्वादृशाएव मुनयः श्लाघनीयायतः सताम्

यस्यास्त्येव हि सामर्थ्यं तपसः क्रुद्ध्यतीह सः ।

कुपितोऽप्यसमर्थस्तु किं कर्ता क्षीणवृत्तिवत् ॥ ६६ ॥
इति श्रुत्वापरिष्टुत्य दुर्वासाः कृत्तिवाससम् । वरञ्चप्रार्थयामास परिहृष्टतनूरुहः

दुर्वासा उवाच

देवदेवजगन्नाथ! करुणाकर शङ्कर! । महापराधविध्वंसिन्नन्धकारेस्मरान्तक !
मृत्युञ्जयोग्रभूतेश मृडानीश त्रिलोचन! । यदि प्रसन्नो मे नाथ यदि देयो वरो मम
तदिदं कामदं नाम लिङ्गमस्त्विह धूर्जटे! ।
इदं च पल्वलं मेऽत्र कामकुण्डाख्यमस्तु वै ॥ ७३ ॥

देवदेव उवाच

एवमस्तुमहातेजो मुने परमकोपन! । यत्त्वया स्थापितंलिङ्गं दुर्वासेश्वरसञ्ज्ञितम्
तदेव कामकृन्नृणां कामेश्वरमिहास्त्विति । यः प्रदोषेत्रयोदश्यां शनिवासरसंयुजि
संस्नास्यति नरो धीमान्कामकुण्डे त्वदास्पदे ।
त्वत्स्थापितञ्च कामेशं लिङ्गं द्रक्ष्यति मानवः ॥ ७६ ॥
स वैकामकृताद्दोषाद्यामीं नाप्स्यति यातनाम् ।
बहवोऽपि हि पाप्मानो बहुभिर्जन्मभिः कृताः ॥ ७७ ॥
कामतीर्थाम्बुसंस्नानाद्यास्यन्ति विलयं क्षणात् ।
कामाः समृद्धिमाप्स्यन्ति कामेश्वरनिषेवणात् ॥ ७८ ॥
इति दत्वा वराञ्छम्भुस्तल्लिङ्गे लयमाययौ ।

स्कन्द उवाच

तल्लिङ्गाराधनात्कामाः प्राप्ता दुर्वाससा भृशम् ॥ ७९ ॥
तस्मात्सर्वप्रयत्नेन काश्यां कामेश्वरः सदा । पूजनीयःप्रयत्नेन महाकामाभिलाषुकैः
कामकुण्डकृतस्नानैर्महापातकशान्तये । इदं कामेश्वराख्यानं यःपठिष्यतिपुण्यवान्
यः श्रोष्यति च मेधावी तौ निष्पापौ भविष्यतः ॥ ८१ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्डे
उत्तरार्धेदुर्वाससे वरप्रदानवर्णनंनाम पञ्चाशीतितमोऽध्ययायः ॥ ८५ ॥

षडशीतितमोऽध्यायः

सत्वाष्ट्रोपाख्यानंविश्वकर्मेश्वरलिङ्गमाहात्म्यवर्णनम्

पार्वत्युवाच

विश्वकर्मेश्वरंलिङ्गं यत्काश्याम्प्रथितम्परम् । तस्यलिङ्गस्यकथय देवदेव समुद्भवम्

देवदेव उवाच

शृणुदेविप्रवक्ष्यामि कथाम्पातकनाशिनीम् । विश्वकर्मेशलिङ्गस्यप्रादुर्भावंमनोहरम्
विश्वकर्माभवत्पूर्वं ब्रह्मणस्त्वपरातनुः । त्वष्टुः प्रजापतेः पुत्रो निपुणः सर्वकर्मसु
कृतोपनयनः सोऽथ बालोगुरुकुलेवसन् । चकार गुरुशुश्रूषां भिक्षान्नकृतभोजनः
एकदा तद्गुरुः प्राह प्रावृट्काले समागते । कुरूटजं मदर्थं त्वं यथाप्रावृणबाधते
यत्कदाचिन्नभज्येत न पुरातनतांव्रजेत् । गुरुपत्न्यात्वभिहितोरेत्वाष्ट्रकुरुकञ्चुकम्
ममाङ्गयोग्यं नोगाढं न श्लथञ्च प्रयत्नतः । विनैववासःसाचारुवाल्कलञ्चसदोज्वलम्
गुरुपुत्रेणचाज्ञप्तो ममार्थम्पादुकेकुरु । यदारूढस्य मे पादौ न पङ्कः संस्पृशेत्कचित्
चर्मादिबन्धनिर्मुक्ते धावतो मे सुखप्रदे । याभ्याञ्चसञ्चरेवारिस्थलभूमाविवद्रुतम्
गुरुकन्याऽपितम्प्राहत्वाष्ट्र! मे श्रवणोचिते । भूषणे स्वेनहस्तेन कुरुकाञ्चननिर्मिते
कुमारीक्रीडनीयानि कौतुकानि च देहि मे । दन्तिदन्तमयान्यैस्वहस्तरचितानि च
गृहोपकरणं द्रव्यं मुसलोलूखलादिकम् । तथावटयमेधाविन्यथा त्रुट्यति न क्वचित्
अक्षालितान्यपि यथा नित्यं पीठानि सत्तम! ।
उज्ज्वलानि भवन्त्येव स्थालिकाश्च तथा कुरु ॥ १३ ॥
सूपकर्मण्यपि च मां प्रशाधि त्वष्टृनन्दन !।
यथाऽङ्गुल्यो न दह्यन्ते पाकःस्याच्च यथा शुभः ॥ १४ ॥
एकस्तम्भमयंगेहमेकदारुविनिर्मितम् । तथा कुरु वरन्त्वाष्ट्र यत्रेच्छा तत्र धारये
येसहाध्यायिनोऽप्यस्यवयोज्येष्ठाश्चतेऽपिहि । सर्वेसर्वं समीहन्तेकर्मतत्कृतमेवहि

तथेतिसप्रतिज्ञाय सर्वेषाम्पुरतोऽद्रिजे !। मध्येवनम्प्राविशच्च महाचिन्ताभयार्दितः

किञ्चित्कर्तुं न जानाति प्रतिज्ञातश्च तेन वै।

सर्वेषाम्पुरतः सर्वं करिष्यामीतिनिश्चितम् ॥ १८ ॥

किंकरोमि क्व गच्छामि कोमेसाहाय्यमर्पयेत्। बुद्धेरपिवनस्थस्य शरणंकंव्रजामिच

अङ्गीकृत्य गुरोर्वाक्यं गुरुपत्न्या गुरोः शिशोः।

यो न निष्पादयेन्मूढः सभवेन्निरयी नरः ॥ २० ॥

गुरुशुश्रूषणं धर्म एको हिब्रह्मचारिणाम्। अनिष्पाद्यतुतद्वाक्यंकथम्मेनिष्कृतिर्भवेत

गुरूणां वाक्यकरणात्सर्वएवमनोरथाः। सिद्धयन्तीतरथा नैवतस्मात्कार्यंहितद्वचः

कथं तद्वचसः सिद्धिं प्राप्स्याम्यत्र वने स्थितः।

कश्च मेऽत्र सहायी स्याद्धिषणा दुर्बलस्य वै ॥ २३ ॥

आस्तां गुरुकथा दूरं योऽन्यस्यापि लघोरपि।

ओमित्युक्त्वा न कुरुते कार्यं सोऽथ व्रजत्यधः ॥ २४ ॥

कथमेतानि कर्माणि करिष्येऽज्ञोऽसहायवान्।

अङ्गीकृतानि तद्रीत्या नमस्ते भवितव्यते !॥ २५ ॥

यावदित्थं चिन्तयति सत्वाष्ट्रोवनमध्यगः। तावत्तदैवसम्प्राप्तस्तेनैकोऽदर्शितापसः

अथनत्वा स तम्प्राहवने दृष्टं तपस्विनम्। कोभवान्मानसं मे योनितरां सुखयत्यहो

त्वद्दर्शनेन मेगात्रं चिन्तासन्तापतापितम्। हिमानीगाहनेनेव शीतलम्भवतिक्षणम्

किंत्वं मेप्राक्तनंकर्म प्राप्तंतापसरूपधृक्। अथवाकरुणावार्धिराविर्भूतःशिवोभवान्

योऽसि सोऽसि नमस्तुभ्यमुपदेशेन युङ्क्ष्व माम्।

गुरूक्तं गुरुपत्न्युक्तं गुर्वपत्योक्तमेव च ॥ ३० ॥

कथंकर्तुमहं शक्तः कर्मतत्रादिशाद्भुतम्। कुरुमेबुद्धिसाबाय्यंनिर्जनेबन्धुतांगतः॥

इत्युक्तस्तेन सवने तापसो ब्रह्मचारिणा। कारुण्यपूर्णहृदयो यथोक्तमुपदिष्टवान्॥

यआप्तत्वेनसम्पृष्टो दुर्बुद्धिंसम्प्रयच्छति।

सयाति नरकंघोरं यावदाभूतसम्प्लवम् ॥ ३३ ॥

तापस उवाच

ब्रह्मचारिन्! शृणु ब्रूयां किमद्भुततरन्त्विदम्।

विश्वेशानुग्रहाद्ब्रह्माऽप्यभवत्सृष्टिकोविदः ॥ ३५ ॥

यदित्वन्त्वाष्ट्रसर्वज्ञंकाश्यामाराधयिष्यसि।ततस्तेविश्वकर्मेतिनामसत्यम्भविष्यति

विश्वेशानुग्रहात्काश्यामभिलाषा न दुर्लभाः।

सुलभो दुर्लभोऽप्यत्र यत्र मोक्षस्तनुत्यजाम् ॥ ३६ ॥

सृष्टेःकरणसामर्थ्यंसृष्टिरक्षाप्रवीणता। विधिनाविष्णुनाप्रापिविश्वेशानुग्रहात्परात्

याहि वैश्वेश्वरं सद्म पद्मया समधिष्ठितम्।

निर्वाणसञ्ज्ञया बाल! यदीच्छेः स्वान्मनोरथान् ॥ ३८ ॥

सहिसर्वप्रदः शम्भुर्याचितश्चोपमन्युना। पयोमात्रं ददौतस्मै सर्वं क्षीराब्धिमेव च

आनन्दकानने शम्भोः किंकिंकेन न लभ्यते। यत्रवासकृताम्पुंसां धर्मराशिः पदेपदे

स्वर्धुनीस्पर्शमात्रेणमहापातकसन्ततिः। यत्रसंक्षयति क्षिप्रंतांकाशींकोनसंश्रयेत्

न तादृग्धर्मसम्भारो लभ्यते क्रतुकोटिभिः। यादृग्वाराणसीवीथीसञ्चारेण पदेपदे

धर्मार्थकाममोक्षाणांयद्यत्रास्तिमनोरथः। तदावाराणसींयाहियाहित्रैलोक्यपावनीम्

सर्वकामफलप्राप्तिस्तदैवस्याद्ध्रुवंनृणाम्। यदैवसर्वदःसर्वः काम्यांविश्वेश्वरःश्रितः

सतापसोक्तमाकर्ण्य त्वाष्ट्रइत्थं सुहृष्टवान्। काशीसम्प्राप्त्युपायंचतमेव समपृच्छत

त्वाष्ट्र उवाच

तदानन्दवनं शम्भोः क्वास्ति तापससत्तम!।

यत्र नो दुर्लभं किञ्चित्साधकानां त्रयीस्थितम् ॥ ४६ ॥

स्वर्गे वा मर्त्यलोके वा बलिसद्मनि वामुने। क्व तदानन्दगहनं यत्रानन्दपयोब्धिजा

यत्र विश्वेश्वरो देवोविश्वेषांकर्णधारकः। व्याचष्टे तारकं ज्ञानं येन तन्मयतां ययुः

सुलभा यत्र नियतमानन्दवनचारिणः। अपिनैःश्रेयसीलक्ष्मीःकिमन्येऽल्पमनोरथाः

कस्तां मां प्रापयेच्छम्भोः कथं यामि तथा वद।

स तपस्वीति तद्वाक्यमाकर्ण्य श्रद्धयान्वितम् ॥ ५० ॥

प्राहागच्छ नयामित्वांयियासुरहमप्यहो । दुर्लभम्प्राप्यमानुष्यं यदि काशीनसेविता
पुनः क्वनृत्वं श्रेयोभूःक्वकाशीकर्मबन्धहृत् । वृथागतेहिमानुष्येकाशीप्राप्तिविवर्जनात्
आयुष्यञ्चभविष्यञ्च सर्वमेववृथागतम् । अतोऽहं सफलीकर्तुं मानुष्यञ्चातिचञ्चलम्

यास्यामि काशीमायाहि मायां हित्वा त्वमप्यहो ।
इति तेन सह त्वाष्ट्रो मुनिनाऽतिकृपालुना ॥ ५४ ॥
पुरीं वैश्वेश्वरीम्प्राप्तो मनःस्वास्थ्यमवाप च ।
ततः प्रापय्य तांकाशीं तापसः क्वाप्यतर्कितम् ॥ ५५ ॥

जगाम कुम्भसम्भूतसत्वाष्ट्रोऽपीत्यमन्यत । अवश्यंसहिविश्वेशःसर्वेषांचिन्तितप्रदः

सत्पथस्थिरवृत्तीनां दूरस्थोऽपि समीपगः ।
यस्मिन्प्रसन्नदृक् त्र्यक्षस्तं दविष्ठमपि ध्रुवम् ।
सुनेदिष्ठं करोत्येव स्वयं वर्त्मोपदेशयन् ॥ ५७ ॥

क्वाहं तत्र वनेबालश्चिन्ताकुलितमानसः । क्व तापसःसयो मां वै सूपदिश्येहचानयत्
खेलोयमस्यत्र्यक्षस्ययस्यभक्तस्यकुत्रचित् । नदुर्लभतरंकिञ्चिदहो क्वाहंक्वकाशिका
नाऽऽराधितो मयाशम्भुःप्राक्तनेजन्मनिक्वचित् । शरीरित्वानुमानेन ज्ञातमेतदसंशयम्
अस्मिञ्जन्मनि बालत्वान्नचैवाराधितः स्फुटम् ।प्रत्यक्षमेवमेवैतत्कुतोऽनुग्रहधीर्मयि
आज्ञातं गुरुभक्तिर्मेहेतुः शम्भुप्रसादने । ययेहाऽनुगृहीतोऽस्मि विश्वेशेन कृपालुना
अथवा कारणापेक्षस्त्र्यक्षस्त्वितरदेववत् । रङ्कमप्यनुगृह्णाति केवलंकारणं कृपा ॥
यदि नो मय्यनुक्रोशः कथं तापससङ्गतिः । तद्रूपेण स्वयं शम्भुरानिनायेहमां ध्रुवम्
नदानानिनवै यज्ञा न तपांसि व्रतानि च । शम्भोः प्रसादहेतूनि कारणं तत्कृपैवहि॥
दयामपितदाकुर्यादसौविश्वेश्वरःपराम् । यदाश्रुत्युक्तमध्वानंसद्भिःक्षुण्णंनसन्त्यजेत्

अनुक्रोशं समर्थ्येति स त्वाष्ट्रः शाम्भवं शुचिः ।
संस्थाप्य लिङ्गमीशस्याराधयत्स्वस्थमानसः ॥ ६७ ॥

आनीय पुष्पसम्भारमार्तवं काननाद् बहु । स्नात्वाभ्यर्चयतीशानंकन्दमूलफलाशनः
इत्थं त्वष्टृतनूजस्य लिङ्गाराधनचेतसः । त्रिहायनात्प्रसन्नोऽभूत्तस्येशःकरुणानिधिः

तस्मादेवहि लिङ्गाच्चप्रादुर्भूय भवोऽब्रवीत् । वरं वरय रेत्वाष्ट्र दृढभक्त्यानया तव
प्रसन्नोऽस्मि भृशम्बालगुर्वर्थकृतचेतसः । गुरुणा गुरुपत्न्या च गुर्वपत्यद्वयेन च ॥

यथार्थितन्तथा कर्तुं ते सामर्थ्यम्भविष्यति ॥ ७२ ॥
अन्यान्वरांश्च ते दद्यां त्वाष्ट्रतुष्टस्त्वदर्चया ।
ताञ्छृणुष्व महाभाग! लिङ्गऽस्यास्याऽद्भुतश्रियः ॥ ७३ ॥
त्वं सुवर्णादिधातूनां दारूणां दृषदामपि ।
मणीनामपि रत्नानां पुष्पाणामपि वाससाम् ॥ ७४ ॥

कर्पूरादिसुगन्धीनांद्रव्याणामप्यपामपि । कन्दमूलफलानाञ्चद्रव्याणामपिचत्वचाम्
सर्वेषां वस्तुजातानां कर्तुं कर्म प्रवेत्स्यसि । यस्ययस्यरुचिर्यत्रसद्मदेवालयादिषु
तस्यतस्येहतुष्ट्यै त्वंतथा कर्तुंप्रवेत्स्यसि । सर्वनेपथ्यरचनाःसर्वाःसूपस्यसंस्कृतीः
सर्वाणि शिल्पिकार्याणितौर्यत्रिकमथापिच । सर्वंज्ञास्यसिकर्तुंत्वंद्वितीयइवपद्मभूः
नानाविधानि यन्त्राणि नानायुधविधानकम् । जलाशयानां रचनाःसुदुर्गरचनास्तथा

तादृक्कर्तुं पुरा वेत्सि यादृङ्नान्योऽधियास्यसि ।
कलाजातं हिसर्वन्त्वमवयास्यसि मे वरात् ॥ ८० ॥

सर्वैन्द्रजालिकी विद्यात्वदधीनाभविष्यति । सर्वकर्मसुकौशल्यंसर्वबुद्धिवरिष्ठताम्
सर्वेषाञ्च मनोवृत्तिंत्वं ज्ञास्यसि वरान्मम । किम्बहूक्तेन यत्स्वर्गे यत्पातालेयदत्रच

अतिलोकोत्तरं कर्म तत्सर्वं वेत्स्यसि स्वयम् ॥ ८३ ॥

विश्वेषां विश्वकर्माणिविश्वेषुभुवनेषु च । यतोज्ञास्यसितन्नामविश्वकर्मेतितेऽनघ
अपरः कोवरोदेयस्तव तम्प्रार्थयाश्वहो । तवाऽदेयंनमोकिञ्चिल्लिङ्गार्चनरतस्यहि

अन्यत्राऽपि हि यो लिङ्गं समर्चयति सन्मतिः ।
तस्यापि वाञ्छितं देयं किम्पुनर्यो विकाशिकम् ॥ ८६ ॥

येन काश्यांसमभ्यर्चियेनकाश्यांप्रतिष्ठितम् । येनकाश्यांस्तुतंलिङ्गंसमेरूपायदर्पणः
सत्वंस्वच्छोऽसि मुकुरो ममनेत्रत्रयस्यहि । काश्यांलिङ्गार्चनात्त्वाष्ट्रवरंवरयसुव्रत

काश्यां यो राजधान्यां मे हित्वा मामन्यमर्चयेत् ।

स वराकोऽल्पधीर्मुष्टोऽल्पतुष्टिर्मुक्तिवर्जितः ॥ ८६ ॥

तदानन्दवने ह्यत्रसमर्च्योऽहं मुमुक्षुभिः । द्रुहिणोपेन्द्रचन्द्रेन्द्रै रिहान्योनसमर्च्यते

यथानन्दवनम्प्राप्य त्वं मामर्चितवानसि । तथान्येपुण्यकर्माणोमामभ्यर्च्यैवमामितः

अनुग्राह्योऽसि नितरां ततो वरय दुर्लभम् ।

श्राणितं तदवै हि त्वं वद मा चिरयस्व भो !॥ ९२ ॥

विश्वकर्मोवाच

इदं यत्स्थापितं लिङ्गं मयाऽज्ञेनापि शङ्कर !।

तल्लिङ्गमन्येऽप्याराध्य सन्तु सद्बुद्धिभाजनाः ॥ ९३ ॥

अन्यच्च नाथ! प्राथ्र्योऽसि तच्च विश्राणयिष्यसि ।

भवान्मया विनिर्मापयिता स्वम्प्रासादं कदा भव ॥ ९४ ॥

देवदेव उवाच

एवमस्तुयदुक्तन्तेतवलिङ्गसमर्चकाः । सद्बुद्धिभाजनावैस्युःस्युश्चनिर्वाणदीक्षिताः

यदा चराजाभविता दिवोदासोविधेर्वरात् । तदामेवचनात्तातप्रासादम्मेविधास्यति

नवीकृत्य पुनःकाशीनिर्विष्टा तेनभूभुजा । गणेशमायया राज्यात्परिनिर्विण्णचेतसा

विष्णोः सदुपदेशाच्च मामेव शरणं गतः ।

निर्वाणलक्ष्मीः प्राप्तेह हित्वा राज्यश्रियञ्चलाम् ॥ ९८ ॥

विश्वकर्मन्व्रजगुरोः शासनाययतस्त्वच । गुरुभक्तिकृतो यस्मान्मद्भक्ता नात्र संशयः

येगुरुंचावमन्यन्तेतेऽवमान्या मयाप्यहो । तस्माद्गुरूपदिष्टंहिकुरुशिष्यसमीहितम्

तत आगत्य मे पार्श्वं यावन्निर्वाणमेष्यसि ।

तावत्स्थास्यसि शुद्धात्मा देवानां हितमाचरन् ॥ १०१ ॥

तवाऽत्रलिङ्गैः सततंस्थास्याम्यहमभीष्टदः । अस्यलिङ्गस्यभक्तानांनिर्वाणश्रीरदूरतः

अङ्गारेशादुदीच्यां ये त्वल्लिङ्गस्य समर्चकाः । तेषांमनोरथावाप्तिर्भविष्यति पदे पदे

इत्युक्त्वान्तर्दधेदेवस्त्वाष्ट्रोपिगुरुमाप्तवान् । गुरोःसमीहितंभूरिविधायसगृहान्ययौ

गृहेऽपिमातापितरौसन्तोष्यनिजकर्मणा । तदुक्ताज्ञां समाधाय पुनःकाशींसमाययौ

स्वलिङ्गाराधनासक्तोनाद्यापि त्वष्टृनन्दनः । काशीं त्यजतिमेधावीसर्वदेवप्रियश्चरन्

ईश्वर उवाच

पृष्टानि यानि लिङ्गानि त्वया देवि! गिरीन्द्रजे !।

काशीमुक्तौ समर्थानि तान्युक्तानि मया तव ॥ १०७ ॥

लिङ्गमोङ्कारसञ्ज्ञञ्च तथादेवं त्रिविष्टपम् । महादेवः कृत्तिवासा रत्नेशश्चन्द्रसञ्ज्ञकः

केदारश्चापि धर्मेशस्तथावीरेश्वराभिधः । कामेशविश्वकर्मेशौ मणिकर्णीश्वरस्तथा

ममाचर्यमविमुक्ताख्यं ततो देवि! ममाख्यकम् ।

विश्वनाथेति विश्वस्मिन्प्रथितं विश्वसौख्यदम् ॥ ११० ॥

अविमुक्तंसमासाद्ययेनविश्वेश्वरोऽर्चितः । नतस्याऽस्तिपुनर्जन्मकल्पकोटिशतेष्वपि

अष्टौ मासान्विहारःस्याद्यतीनांसंयतात्मनाम् । एकत्रचतुरोमासानब्दंनावासइष्यते

अविमुक्तेप्रविष्टानां विहारो नैव युज्यते ।

मोक्षोऽप्यसंशयश्चाऽत्र तस्मात्त्याज्या न काशिका ॥ ११३ ॥

आनन्दकाननं हित्वानान्यद्गच्छेत्तपोवनम् । तपोयोगश्चमोक्षश्चयतोऽत्रैवमदाश्रयात्

कृपया सर्वजन्तूनां क्षेत्रमेतन्मया कृतम् ।

अवश्यमेव सिद्ध्यन्ति क्षेत्रेऽस्मिन्सिद्धिकाङ्क्षिणः ॥ ११५ ॥

अतीतं वर्तमानं च ज्ञानतोऽज्ञानतः कृतम् । यदेनस्तल्लयं यायादानन्दवनवीक्षणात्

अत्युग्रैश्च तपोभिर्यन्महादानैर्महाव्रतैः । नियमैश्च यमैः सम्यक्स्वयोगेन महामखैः

वेदान्तशास्त्राभ्यसनैः सर्वोपनिषदाश्रयात् । एभिर्वैयदवाप्येत तत्काश्यांहेलयाप्यते

कर्मसूत्रेण बद्धावै भ्राम्यन्ते तावदेव हि । यावद्वैश्वेश्वरे धाम्नि मम नैव तनुत्यजः

काश्यां स्वलीलया देवि! तिर्यग्योनिजुषामपि ।

ददामि चान्ते तत्स्थानं यत्र यान्ति न याज्ञिकाः ॥ १२० ॥

भूतग्रामोऽखिलोप्यत्र मुक्तिक्षेत्रेकृतालयः । कालेननिधनं यातोयात्येव परमांगतिम्

विषयासक्तचित्तोऽपि त्यक्तधर्मरतिस्त्वपि ।

कालेनोज्झितदेहोऽत्र न संसारं पुनर्विशेत् ॥ १२२ ॥

प्रयागे यत्फलं देविमाघेचोषसिमज्जनात् । तत्फलं कोटिगुणितंवाराणश्यांक्षणेक्षणे
अस्यक्षेत्रस्यमहिमाकोऽपिवाचामगोचरः । उद्देशमात्रमाख्यायिमयातेप्रीतिकाम्यया
चतुर्दशानां लिङ्गानां श्रुत्वाऽऽख्यानानि सत्तमः ।
चतुर्दशसु लोकेषु पूजाम्प्राप्स्यत्यनुत्तमाम् ॥ १२५ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्ड
उत्तरार्धे विश्वकर्मेशप्रादुर्भावो नाम षडशीतितमोऽध्यायः ॥ ८६ ॥

सप्ताशीतितमोऽध्यायः

दक्षयज्ञप्रादुर्भाववर्णनम्

अगस्त्य उवाच

सर्वज्ञसूनो! षड्वक्त्रसर्वार्थकुशलप्रभो । प्रादुर्भावंनिशम्यैषांलिङ्गानांमुक्तिदायिनाम्
नितराम्परितृप्तोऽस्मि सुधाम्पीत्वेवनिर्जरः । ॐकारप्रमुखैर्लिङ्गैरिदमानन्दकाननम्
आनन्दमेव जनयेदपि पापजुषामिह । परानन्दमहं प्राप्तः श्रुत्वैतल्लिङ्गकीर्तनम् ॥ ३ ॥
जीवन्मुक्त इवाऽऽसं हिक्षेत्रतत्त्वश्रुतेरहम् । स्कन्द! दक्षेश्वरादीनिलिङ्गानीह चतुर्दश
यान्युक्तानि समाचक्ष्व तत्प्रभावमशेषतः ॥ ४ ॥
योदक्षोगर्हयामास मध्येदेवसभंविभुम् । सकथं लिङ्गमीशस्यप्रत्यस्थापयदद्भुतम्
इति श्रुत्वा शिखिरथःकुम्भयोनेरुदीरितम् । सूत! संकथयामास दक्षेश्वरसमुद्भवम् ॥

स्कन्द उवाच

आकर्णय मुनेवचिमकथां कल्मषहारिणीम् । पुरश्चरणकामोसौदक्षःकाशींसमाययौ
छागवक्त्रो विरूपास्यो दधीचिपरिधिक्कृतः ।
प्रायश्चित्तविधानार्थं सूपदिष्टः स्वयम्भुवा ॥ ८ ॥
एकदादेवदेवस्य सेवार्थं शशिमौलिनः । कैलासमगमद्विष्णुः पद्मयोनिपुरस्कृतः

इन्द्रादयो लोकपाला विश्वेदेवा मरुद्गणाः ।
आदित्या वसवो रुद्राः साध्याविद्याधरोरगाः ॥ १० ॥
ऋषयोऽप्सरसो यक्षागन्धर्वाः सिद्धचारणाः । तैर्नतो देवदेवेशः परिहृष्टतनूरुहैः ॥
स्तुतश्च नानास्तुतिभिश्शम्भुनाऽपि कृतादराः ।
विविशुश्चासनश्रेण्यां तन्मुखासक्तदृष्टयः ॥ १२ ॥
अथ तेषूपविष्टेषु शम्भुना विष्टरश्रवाः । कृतहस्तपरिस्पर्शमानः पृष्टो महादरम् ॥
श्रीवत्सलाञ्छन! हरे! दैत्यवंशदवानल !।
कच्चित्पालयितुं शक्तिस्त्रिलोकीमस्त्यकुण्ठिता ॥ १४ ॥
दितिजान्दनुजान्दुष्टान्कच्चिच्छास्सि रणाङ्गणे ।
अपिक्रुद्धान्महीदेवान्मामिव प्रतिमन्यसे ॥ १५ ॥
बाधया रहिता गावः कच्चित्सन्ति महीतले ।
स्त्रियः सन्ति हि सुश्रीकाः पतिव्रतपरायणाः ॥ १६ ॥
विधियज्ञाः प्रवर्तन्ते पृथिव्यां बहुदक्षिणाः ।
निराबाधं तपः कच्चिदस्ति शश्वत्तपस्विनाम् ॥ १७ ॥
निष्प्रत्यूहं पठन्त्येव साङ्गान्वेदान्द्विजोत्तमाः ।
महीपालाः प्रजाः कच्चित्पान्ति त्वमिव केशव ! ॥ १८ ॥
स्वेषुस्वेषुचधर्मेषुकच्चिद्वर्णाश्रमास्तथा । निष्ठावन्तोहितिष्ठन्तिप्रहृष्टेन्द्रियमानसाः
धूर्जटिःपरिपृच्छयेतिहृष्टंवैकुण्ठनायकम् । ब्रह्माणञ्चापिपप्रच्छ ब्राह्मंतेजः समेधते
सत्यमस्खलितं कच्चिदस्ति त्रैलोक्यमण्डपे ।
तीर्थावरोधो न क्वाऽपि केनचित्क्रियते विधे !॥ २१ ॥
इन्द्रादयः सुराः कच्चित्स्वेषु स्वेषु पुरेष्वहो ।
राज्यं प्रशासति स्वस्थाः कृष्णदोर्दण्डपालिताः ॥ २२ ॥
प्रत्येकम्परिपृच्छयेशः सर्वानित्थं कृतादरान् ।
पृष्ट्वा गमनकार्यञ्च तेषां कृत्वा मनोरथान् ॥ २३ ॥

विससर्जाथतान्सर्वान्देवःसौधंसमाविशत् । गतेष्वथचदेवेषुस्वस्वधिष्ण्येषुहृष्टवत्
मध्येमार्गंसचिन्तोऽभूद्दक्षःसत्याःपितातदा । अन्यदेवसमानं समानंप्रापनचाधिकम्
अतीवक्षुब्धचित्तोभून्मन्दराघाततोऽब्धिवत् । उवाचचमनस्येतन्महाक्रोधरयान्धदृक

अतीव गर्वितो जातः सतीं मे प्राप्य कन्यकाम् ।
कस्यचिन्नाऽप्यसौ प्रायो न कोऽस्यापि क्वचित्पुनः ॥ २७ ॥
किं वंश्यस्त्वेष किंगोत्रः किं देशीयः किमात्मकः ।
किंवृत्तिः किंसमाचारो विषादी वृषवाहनः ।। २८ ॥
न प्रायशस्तपस्व्येष क्व तपः क्वाऽस्त्रधारणम् ।
न गृहस्थेषु गण्योऽसौ श्मशाननिलयो यतः ॥ २९ ॥

असौनब्रह्मचारीस्यात्कृतपाणिग्रहस्थितिः । वानप्रस्थ्यंकुतश्चास्मिन्नैश्वर्यमदमोहिते
नब्राह्मणोभवत्येषयतोवेदोनवेत्त्यमुम् । शस्त्रास्त्रधारणात्प्रायःक्षत्त्रियःस्यान्नसोप्ययम्
क्षतात्सन्त्राणनात्क्षत्रन्तत्क्वास्मिन्प्रलयप्रिये । वैश्योपिनभवेदेषसदानिर्धनचेष्टनः ॥
शूद्रोऽपि नभवेत्प्रायोनागयज्ञोपवीतवान् । एवंवर्णाश्रमातीतःकोसौसम्यङ्नकीर्त्यते
सर्वः प्रकृत्याज्ञायेत स्थाणुः प्रकृतिवर्जितः । प्रायशःपुरुषोनासावर्धनारीवपुर्यतः ॥
योषाऽपि न भवेदेषयतोऽसौश्मश्रुलाननः । नपुंसकोऽपिनभवेल्लिङ्गमस्ययतोऽर्च्यते
बालोऽपि न भवत्येष यतोऽयं बहुवार्षिकः । अनादिवृद्धोलोकेषु गीयतेचोग्रएषयत्
अतोयुवत्वं संभाव्यं नात्र नूनं चिरन्तने । वृद्धोऽपि न भवत्येष जरामरणवर्जितः ॥

ब्रह्मादीन्संहरेत्प्रान्ते तथापि च न पातकी ।
पुण्यलेशोऽपि नास्त्यस्मिन्ब्रह्ममौलिच्छिदि क्रुधा ॥ ३८ ॥
अस्थिनेपथ्यवति च क्वशुचित्वं विवाससि ।
किं बहूक्तेन नोकिञ्चिज्ज्ञायतेऽस्य विचेष्टितम् ॥ ३९ ॥
अहो धाष्ट्र्यं महद्दृष्टं जटिलस्याऽद्य चाऽद्भुतम् ।
यदासनान्नोत्थितोऽसौ दृष्ट्वा मां श्वशुरं गुरुम् ॥ ४० ॥

एवम्भूता भवत्येव मातापितृविवर्जिताः । निर्गुणाअकुलीनाश्चकर्मभ्रष्टानिरङ्कुशाः

स्वच्छन्दचारिणोऽनाथाः सर्वत्र स्वाभिमानिनः ।
अकिञ्चना अपि प्रायस्तथापीश्वरमानिनः ॥ ४२ ॥

जामातृणां स्वभावोऽयंप्रायशोगर्वभाजनम् । किञ्चिदैश्वर्यमासाद्यभवत्येवनसंशयः
द्विजराजः सगर्विष्ठो रोहिणीप्रेमनिर्भरः । कृत्तिकादिषु चास्नेहीमयाशप्तः क्षयीकृतः
अस्याहंगर्वसर्वस्वंहरिष्याम्येवशूलिनः । यथावमानितश्चाहमनेनास्य गृहं गतः ॥
तथास्याहंकरिष्यामिमानहानिश्च सर्वतः । सम्प्रधार्येति बहुशः सतुदक्षःप्रजापतिः
प्राप्य स्वभवनं देवानाजुहाव सवासवान् । अहं यियक्षुर्यूयं मेयज्ञसाहाय्यकारिणः

भवन्तु यज्ञसम्भारानानयन्तु त्वरान्विताः ।
श्वेतद्वीपमथो गत्वा चक्रे चक्रिणमच्युतम् ॥ ४८ ॥

महाक्रतूपद्रष्टारं यज्ञपूरुषमेव च । तस्यर्त्विजोऽभवन्सर्वे ऋषयो ब्रह्मवादिनः ॥ ४९
प्रावर्तत ततस्तस्य दक्षस्य च महाध्वरः । दृष्ट्वा देवनिकायांश्च तस्मिन्दक्षमहाध्वरे

अनीश्वरांस्ततो वेधा व्याजं कृत्वा गृहं ययौ ।
दधीचिरथ सम्वीक्ष्य सर्वांस्त्रैलोक्यवासिनः ॥ ५१ ॥

दक्षयज्ञेसमायातानसतीश्वरविवर्जितान् । प्राप्तसंमानसम्भारान्वासोलङ्कृतिपूर्वकम्

दक्षस्य हि दशुभोदर्कमिच्छन्प्रोवाच चेति वै ।

दधीचिरुवाच

दक्षप्रजापते! दक्ष! साक्षाद्धातृस्वरूपधृक् ॥ ५३ ॥
न चाऽस्ति तव सामर्थ्यं क्वापि कस्यापि निश्चितम् ।
यादृशः क्रतुसम्भारस्तव चेह समीक्ष्यते ॥ ५४ ॥

न तादृङ्नेदसि प्रायः क्वापिज्ञातोमहामते । क्रतुस्तुनैवकर्तव्योनास्तिक्रतुसमोरिपुः

कर्तव्यश्चेत्तदा कार्यः स्याच्चेत्सम्पत्तिरीदृशी ।
साक्षादग्निः स्वयं कुण्डे साक्षादिन्द्रादिदेवताः ॥ ५६ ॥

साक्षाच्च सर्वे मन्त्रा वै साक्षाद्यज्ञपुमानसौ । आचार्यपदवीमेष देवाचार्यःस्वयञ्चरेत्

साक्षाद् ब्रह्मा स्वयञ्चैष भृगुव कर्मकाण्डवित् ॥ ५७ ॥

अयम्पूषा भगस्त्वेष इयंदेवी सरस्वती । एते च सर्वदिक्पालायज्ञरक्षाकृतःस्वयम्
त्वंचदीक्षांशुभाम्प्राप्तोदेव्याचशतरूपया । जामातात्वेषते धर्मः पत्नीभिर्दशभिःसह
स्वयमेव हि कुर्वीतधर्मकार्यम्प्रयत्नतः । ओषधीनामयं नाथस्तवजामातृषूत्तमः ॥
सप्तविंशतिभिःसार्धंपत्नीभिस्तवकार्यकृत् । औषधीःपूरयेत्सर्वाद्विजराजोमहासुधीः
दीक्षितोराजसूयस्य दत्तत्रैलोक्यदक्षिणः । मारीचःकश्यपश्चासौप्रजापतिषुसत्तमः

त्रयोदशमिताभिश्च भार्याभिस्तव कार्यकृत् ॥ ६२ ॥
हविः कामदुघा सूते कल्पवृक्षः समित्कुशान् ।
दारुपात्राणि सर्वाणि शकटं मण्डपादिकम् ॥ ६३ ॥
विश्वकर्माऽप्यलङ्कारान्कुरुतेऽभ्यागतर्त्विजाम् ।
वसूनि चाऽपि वासांसि वसवोऽष्टौ ददत्यपि ॥ ६४ ॥
स्वयं लक्ष्मीरलङ्कुर्याद्या वै चाऽत्र सुवासिनीः ॥ ६५ ॥

सर्वं सुखाय मे दक्ष!वीक्षमाणस्यसर्वतः । एकंदुःखाकरोत्येवयत्त्वंविस्मृतवानसि
जीवहीनो यथा देहो भूषितोऽपिनशोभते । तथेश्वरंविना यज्ञः श्मशानमिवलक्ष्यते
इत्थं दधीचिवचनं श्रुत्वा दक्षः प्रदापतिः । भृशंजज्वालकोपेनहविषाकृष्णवर्त्मवत्

पूर्वं स्तुत्याऽतिसंहृष्टो दृष्टो योऽसौ दधीचिना ।
स एव चापि कोपाग्निमुद्वमन्वीक्षितो मुखात् ॥ ६६ ॥

प्रत्युवाचाथतंविप्रंवेपमानाङ्गयष्टिकः । दक्षः प्रजापती रोषाज्जिघांसुरिवतं द्विजम् ॥

दक्ष उवाच

ब्राह्मणोऽसिदधीचेत्वंकिंकरोमि तवात्रवै । दीक्षामहमहो प्राप्तः कर्तुंनायातिकिञ्चन
भवान्केन समाहूतो यदत्रागान्महाजडः । आगतोऽपि हिकेनत्वंपृष्टइत्थम्ब्रवीषियत्
सर्वमङ्गलमाङ्गल्यो यत्र श्रीमानयं हरिः । स्वयंवै यज्ञपुरुषः समखः किंश्मशानवत्
यत्रवज्रधरः शक्रः शतयज्ञैकदीक्षितः । त्रयस्त्रिंशतिकोटीनाममराणाम्पतिःस्वयम्
तं त्वञ्चोपमिमीषेमुंश्मशानेनमहामखम् । धर्मराट् चस्वयंयत्र धर्माधर्मैककोविदः

श्रीदोऽस्ति यत्र श्रीदाता साक्षाद्यत्राऽऽशुशुक्षणिः ।

तं यज्ञमुपमासि त्वममङ्गलभुवा तया ॥ ७६ ॥
देवाचार्यः स्वयं यत्र क्रतोराचार्यतां गतः ।
अभिमानवशात्तन्त्वमाख्यासि पितृकाननम् ॥ ७७ ॥

यत्रार्त्विज्यम्भजन्तेऽमीवसिष्ठप्रमुखर्षयः । तमध्वरं तमाचक्षे मङ्गलेतरभूमिवत् ॥
निशम्येति मुनिः प्राह दधीचिर्ज्ञानिनांवरः । सर्वमङ्गलमाङ्गल्यो भवेद्यज्ञपुमान्हरिः

तथाऽपि शाम्भवी शक्तिर्वेदे विष्णुः प्रपठ्यते ।
वामाङ्गं स्रष्टुराद्यस्य हरिस्तदितरद्विधिः ॥ ८० ॥
दीक्षितो योऽश्वमेधानां शतस्य कुलिशायुधः ।
दुर्वाससा क्षणेनाऽपि नीतो निःश्रीकतां हि सः ॥ ८१ ॥

पुनराराध्य भूतेशं प्रापैकाममरावतीम् । यस्त्वया धर्मराजोऽत्रकथितःक्रतुरक्षकः ॥

बलं तस्याऽखिलैर्ज्ञातं श्वेतम्पाशयतः पुरा ।
धनदस्त्र्यम्बकसखस्तच्चक्षुश्चाऽऽशुशुक्षणिः ॥ ८३ ॥

पार्ष्णिग्राह्यभवद्रुद्रो देवाचार्यस्यवैतदा । यदातारामधार्षीत्सद्विजराजोऽतिसुन्दरीम्

तं विदन्ति वसिष्ठाद्यास्तवार्त्विज्यम्भजन्ति ये ।
एको रुद्रो न द्वितीयः सम्विदाना अपीति हि ॥ ८५ ॥

प्रावर्तन्तर्षयोन्येऽपि गौरवात्तवते क्रतौ । यदिमेब्राह्मणस्यैकं शृणोषि वचनंहितम्
तदा क्रतुफलाधीशं विश्वेशं त्वं समाह्वय । विना तेन क्रतुरसौ कृतोऽप्यकृतएवहि

सति तस्मिन्महादेवे विश्वकर्मैकसाक्षिणि ।
तवापि चैषां सर्वेषां फलिष्यन्ति मनोरथाः ॥ ८८ ॥

यथा जडानिबीजानिनफलन्तिस्वयं तथा । जडानिसर्वकर्माणिनफलन्तीश्वरंविना
अर्थहीना यथावाणी धर्महीनायथातनुः । पतिहीनायथानारीशिवहीनातथाक्रिया
गङ्गाहीना यथादेशाःपुत्रहीना यथागृहाः । दानहीना यथासम्पच्छिवहीनातथाक्रिया

मन्त्रिहीनं यथा राज्यं श्रुतिहीना यथा द्विजाः ।
योषाहीनं यथा सौख्यं शिवहीना तथाक्रिया ॥ ९२ ॥

दर्भहीना यथासन्ध्यातिलहीनञ्चतर्पणम् । हविर्हीनोयथा होमःशिवहीनातथाक्रिया

इत्थं दधीचिनाऽऽख्यातं जग्राह वचनं न तत् ।

दक्षो दक्षोऽपि तत्रैव शम्भोर्मायाविमोहितः ॥ ९४ ॥

प्रोवाच प्रभृशंक्रुद्धःकाचिन्तातवमेक्रतोः । क्रतुमुख्यानिसर्वाणियानिकर्माणिसर्वतः

तानि सिद्धयन्ति नियतं यथार्थकरणादिह ।

अयथार्थविधानेनसिद्ध्येत्कर्माऽपि नेशितुः ॥ ९६ ॥

स्वकर्मसिद्धयेवाऽथ सर्व एवहिचेश्वरः । ईश्वरःकर्मणांसाक्षीयत्त्वयापीतिभाषितम्

तत्तथाऽस्तु परं साक्षी नार्थं दद्याच्च कुत्रचित् ॥ ९८ ॥

जडानिसर्वकर्माणि नफलन्तीश्वरंविना । यदुक्तंभवतातत्राऽप्यहोदृष्टान्तयाम्यहम्

जडान्यपि च बीजानि कालं सम्प्राप्य चात्मनः ।

अङ्कूरयन्ति कालाच्च पुष्प्यन्ति च फलन्ति च ॥ १०० ॥

विनापीशं तथाकर्मस्वयंकालात्फलत्यहो । किमीश्वरेणतेनात्रमहामङ्गलमूर्तिना ॥

दधीचिरुवाच

यथार्थकरणात्सिद्धमपि कार्यं कदाचन । ईश्वरप्रातिकूल्याच्चसिद्धमेवाशुनश्यति ॥

ईश्वरेच्छा बलात्कर्म कृतमप्यविधानतः । संसिद्ध्येत्तदधीनाश्चकथंसर्वइहेश्वराः ॥

सामान्यसाक्षिवन्नेशः सर्वेषांसर्वकर्मणाम् । साक्षीभवेदसन्दिग्धःफलस्यप्रतिभूरपि

भूजलादिस्वरूपेण बीजमाविश्यसर्वकृत् । स्वयंकालस्वरूपेणविदध्यादङ्कुरोदयम्

यत्त्वयोक्तं विनापीशंकाले कर्मफलेत्स्वयम् । सएवकालोभगवान्सर्वकर्तामहेशिता

अन्यच्च भवता प्रोक्तं तदेकं तथ्यमेव तत् । किमीश्वरेण तेनाऽत्र महामङ्गलमूर्तिना

ये महान्तो भवन्त्येवये च मङ्गलमूर्तयः । ईश्वराख्याच्च येष्वस्तिकिन्तैरत्रतवान्तिके

उत्तरादुत्तरञ्चेति प्रत्युत्तरयति द्विजे । दधीचौचुकुधेऽत्यन्तन्दक्षोगर्वातिसुश्रिया ॥

आदिदेश समीपस्थानालोक्य परितस्त्वति ।

ब्राह्मणापसदश्चामुम्परिदूरयताऽऽशु वै ॥ ११० ॥

अमुष्मादध्वरश्रेष्ठादवरिष्ठमनोगतम् । इत्थं दधीचिराकर्ण्य प्रोवाच प्रहसन्निव ॥

किमां दूरयसे मूढ! दूरीभूतो भवानपि । सर्वेभ्योमङ्गलेभ्यश्च सर्वैरेभिः समं ध्रुवम्

अकाण्डे क्रोधजो दण्डस्तव मूर्ध्नि पतिष्यति ।

महेशितुस्त्रिजगतीपरिशास्तुः प्रजापते !॥ ११३ ॥

इत्युक्त्वा निर्जगामाऽऽशु यज्ञवाटात्ततो द्विजः ।

तस्मिन्निर्यातिनिर्यातो दुर्वासाश्च्यवनो भवान् ॥ ११४ ॥

उत्तङ्क उपमन्युश्च ऋचीकोद्दालकावपि । माण्डव्योवामदेवश्चगालवोगर्गगौतमौ ॥

शिवतत्त्वविदोऽन्येऽपि दक्षयज्ञाद्विनिर्ययुः । गतेदधीचौसानन्दं प्रावर्तत महामखः

ये स्थिता ब्राह्मणास्तत्र तेभ्यो द्विगुणदक्षिणाम् ।

प्रादात्प्रजापतिर्दक्षस्त्वन्येभ्योऽप्यधिकं वसु ॥ ११७ ॥

सर्वेजामातरस्तेनतोषिताभूरिशोधनैः । कन्याश्चालङ्कृतास्सर्वामहाविभवविस्तरैः

ऋषिपत्न्योऽपि बहुशो देवपत्न्योऽप्यनेकशः ।

तथा पुराङ्गनाः सर्वास्तेन मानभुवः कृताः ॥ ११९ ॥

ब्रह्मघोषेण तारेण व्योमशब्दगुणं स्फुटम् । कारितं तेनदक्षेणविप्राणांहृष्टचेतसाम्

अग्निर्मन्दाग्निरभवत्तस्मिन् जुह्वति दीक्षिते । हविः परिमलेनैवपरितृप्तादिगङ्गनाः॥

स्वाहाकारैर्वषट्कारैः सुराजातापिचण्डिलाः । रचितागिरयस्तेन सदन्नानाम्पदेपदे

घृतकुल्याः कृतास्तेन मधुकुल्याःसहस्रशः । महासरांसिपयसांद्रप्सस्यापिमहाह्रदाः

राशयश्च दुकूलानां रत्नानां शिखराणि च । यज्ञवाटस्य वसुधास्वर्णरूप्यमयीकृता

न लभ्यन्ते क्रतौ तस्य मार्गिता अपि मार्गणाः ।

हृष्टाः पुष्टाः समभवन्नपि तत्परिचारकाः ॥ १२५ ॥

ध्वनिर्मङ्गलगीतानां व्यानशे गगनाङ्गणम् । जहृषेचाऽप्सरोवृन्दैर्गन्धर्वैर्मुमुदेतराम्

विद्याधरैर्ननन्दे च वसुधा ववृधे भृशम् । महाविभवसम्भारे तस्मिन्दाक्षेमहाक्रतौ

इत्थम्प्रवृत्तेऽथ मुनिः कैलासं नारदो ययौ ।

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड

उत्तरार्धेदक्षयज्ञप्रादुर्भावो नामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥

अष्टाशीतितमोऽध्यायः

दक्षयज्ञे सतीदेहविसर्जनवर्णनम्

अगस्त्य उवाच

शिवलोकंसमासाद्यमुनिनाब्रह्मसूनुना । किञ्चक्रेब्रूहिषड्वक्त्रकथांकौतुकशालिनीम्

स्कन्द उवाच

शृणु कुम्भज! वक्ष्यामि नारदेनमहात्मना । यत्कृतं तत्र गत्वाशुकैलासंशङ्करालयम्
मुनिर्गगनमार्गेण प्राप्यतद्धामशाम्भवम् । दृष्ट्वा शिवौप्रणम्याथ शिवेनविहितादरः ॥
तदुद्दिष्टासनं भेजेपश्यंस्तत्क्रीडनं परम् । क्रीडन्तौतौतुचाक्षाभ्यांयदानचविरेमतुः
तदौत्सुक्येन स मुनिः प्रेर्यमाण उवाच ह ।

नारद उवाच

देवदेव! तव क्रीडाखिलं ब्रह्माण्डगोलकम् । मासाद्वादशयेनाथतेसारिफलकेगृहाः
कृष्णाः कृष्णेतरा या वै तिथयस्ताश्च सारिकाः ।
द्विपञ्चदशमासेयास्त्वक्षयुग्मन्तथायने ॥ ६ ॥
सृष्टिप्रलयसञ्ज्ञौ द्वौ ग्लहौ जयपराजयौ । देवीजयेभवेत्सृष्टिरसृष्टिर्धूर्जटेर्जये ॥
भवतोः खेलसमयोयः सास्थितिरुदाहृता । इत्थं क्रीडैवसकलमेतद्ब्रह्माण्डमीशयोः
नदेवीजेष्यतिपर्तिनेशःशक्तिंविजेष्यति । किञ्चिद्विज्ञप्तुकामोस्मितन्मातरवधार्यताम्
देवः सर्वज्ञनाथोऽपि न किञ्चिदवबुध्यति ।
मानापमानयोर्यस्मादसौ दूरे व्यवस्थितः ॥ १० ॥
लीलात्मा गुणवानेष विचारादतिनिर्गुणः । कुर्वन्नपिहिकर्माणि बाध्यतेनैवकर्मभिः
मध्यस्थोपिहिसर्वस्य माध्यस्थ्यमवलम्बते । सर्वत्रायंमहेशानोमित्रामित्रसमानदृक्
त्वंशक्तिरस्यदेवस्यसर्वेषांमान्यभूःपरा । दक्षस्यापित्वयामानो दत्तोपत्यनिमित्तकः
परंत्वं सर्वजगतां जनयित्र्येकिका ध्रुवम् । त्वत्त आविर्भवन्त्येव धातृकेशववासवाः

त्वमात्मानंनजानासि त्र्यक्षमायाविमोहिता । अतएवहिमेचित्तंदुनोत्यतितरांसति!
अन्या अपि हि याः सत्यः पातिव्रत्यपरायणाः ।
ता भर्तृचरणौ हित्वा किञ्चिदन्यन्न मन्वते ॥ १६ ॥
अथवास्तामियं वार्ताप्रस्तुतं प्रब्रवीम्यहम् । अद्यनीलगिरेस्तस्माद्धरिद्वारसमीपतः
अपूर्वमिव सम्वीक्ष्य परिप्राप्तस्त्वदन्तिकम् ।
अत्याश्चर्यविषादाभ्यां किञ्चिद्वक्तुमिहोत्सुकः ॥ १८ ॥
आश्चर्यहेतुरेवायं यत्पुञ्जातं त्रयीतले । तद्दृष्टं सकलत्रञ्च दक्षस्याध्वरमण्डपे ॥
सालङ्कारं समानञ्च सानन्दमुखपङ्कजम् । विस्मृताखिलकार्यञ्च दक्षयज्ञप्रवर्तकम् ॥
विषादे कारणञ्चैतद्यतोजातमिदं जगत् । यस्मिन्प्रवर्तते यत्र लयमेष्यति च ध्रुवम्
तदेव तत्र नोदृष्टं भवद्द्वन्द्वम्भवापहम् । प्रायो विषादजनकं भवतोर्यददर्शनम् ॥
तदेव नाभवत्तत्र समभूदन्यदेवहि । तच्च वक्तुं न शक्येत तद्वक्ता दक्ष एव सः ॥
तानि वाक्यानिचाकर्ण्यद्रुहिणेन ययेततः । महर्षिणादधीचेन धिक्कृतोनितरांहिसः
शतश्च वीक्षमाणानां देवर्षीणांप्रजापतिः । मयाचकर्णौपिहितौ श्रुत्वातद्द्रुहणागिरः
दधीचिना समं केचिद्दुर्वासःप्रमुखा द्विजाः ।
भवनिन्दां समाकर्ण्य कियन्तोऽपि विनिर्ययुः ॥ २६ ॥
प्रावर्तत महायागो हृष्टपुष्टमहाजनः । तथा द्रष्टुं न शक्नोमि तत आगतवानिह ॥
भगिन्योऽपिच यादेवि!तवतत्रसभर्तृकाः । तासांगौरवमालोक्यन किञ्चिद्वक्तुमुत्सहे
इतिदेवीसमाकर्ण्यसतीदक्षकुमारिका । करादक्षौ समुत्सृज्यदध्यौकिञ्चित्क्षणंहृदि
उवाच च भवत्वेवं शरणम्भव एव मे । सम्प्रधार्येति मनसि सतीदाक्षायणी ततः ॥
द्रुतमेव समुत्तस्थौ प्रणनाम च शङ्करम् । मौलावञ्जलिमाधाय देवी देवं व्यजिज्ञपत्

देव्युवाच

विजयस्वाऽन्धकध्वंसिस्त्र्यम्बक! त्रिपुरान्तक !।
चरणौ शरणं ते मे देह्यनुज्ञां सदाशिव !॥ ३२ ॥
मा निषेधीः प्रार्थयामि यास्यामि पितुरन्तिकम् ।

उक्त्वेति मौलिमदधादन्धकारिपदाम्बुजे ॥ ३३ ॥

अथोक्ताशम्भुनादेवीमृडान्युत्तिष्ठभामिनि !। किमपूर्णंतवास्त्यत्रवदसौभाग्यसुन्दरि

लक्ष्म्या अपि च सौभाग्यं ब्रह्माण्यैकान्तिरुत्तमा ।
शच्यै नित्यनवीनत्वं भवत्या दत्तमीश्वरि !॥ ३५ ॥
त्वया च शक्तिमानस्मिन्महदैश्वर्यरक्षणे ।
त्वाञ्च शक्तिं समासाद्य स्वलीलारूपधारिणीम् ॥ ३६ ॥
एतत्सृजामि पाम्यद्मि त्वल्लीलाप्रेरितोऽङ्गने !।
कुतो मां हातुमिच्छेस्त्वं मम वामार्धधारिणि !॥ ३७ ॥
शिवा शिवोदितञ्चेति श्रुत्वाप्याह महेश्वरम् ।
जीवितेश! विहाय त्वां न क्वाऽपि परियाम्यहम् ॥ ३८ ॥

मनोमेचरणद्वन्द्वेतवस्थास्यतिनिश्चलम् । क्रतुं द्रष्टुं पितुर्यामिनैक्षि यज्ञोमयाक्वचिम्

शम्भुः कात्यायनीवाक्यमिति श्रुत्वा तदाऽब्रवीत् ।
क्रतुस्त्वया नेक्षितश्चेदाहरामि ततः क्रतुम् ॥ ४० ॥
मच्छक्तिधारिणी त्वं वा स्रजैवान्यां क्रतुक्रियाम् ।
अन्यो यज्ञपुमानस्तु सन्त्वन्ये लोकपालकाः ॥ ४१ ॥

अन्यानाशुविधेहित्वमृषीनार्त्विज्यकर्मणि । पुनर्जगाददेवीतिश्रुत्वाशम्भोरुदीरितम्

पितुर्यज्ञोत्सवोनाथद्रष्टव्योऽत्रमयाध्रुवम् ।देह्यनुज्ञांगमिष्यामिमामेकार्वीवचोऽन्यथा

कः प्रतीपयितुं शक्तश्चेतो वा जलमेव वा। निम्नायाम्युद्यतं नाथ माद्यमाम्प्रतिषेधय

निशम्येति पुनः प्राहसर्वज्ञो भूतनायकः। मायाहिदेविमांहि त्वागताचर्नमिलिप्यसि

अद्य प्राचीं यियासुं त्वा वारयेत्पङ्गुवासरः । नक्षत्रञ्च तथाज्येष्ठातिथिश्चनवमीप्रिये

अद्य सप्तदशोयोगोवियोगोऽद्यतनोऽशुभः । धनिष्ठार्धसमुत्पन्ने! तव ताराऽद्य पञ्चमी

मागादेवि गताऽद्य त्वंनहि द्रक्ष्यसिमांपुनः । पुनर्देवी बभाषे सायदिनाज्ञाऽप्यहं सती

तदा तन्वन्तरेणापि करिष्येतव दासताम् । ततोभवः पुनः प्राह कोवा वारयितुंप्रभुः

परिशुद्धमनोवृत्तिं स्त्रियं वा पुरुषन्तु वा । पुनर्नदर्शनंदेवि! मया सत्यमब्रवीम्यहम्

परंनदेवि! गन्तव्यं महामानधनेच्छुभिः । अनाहूततया कान्ते! मातापितृगृहानपि ॥

यथा सिन्धुगता सिन्धुर्न पुनः परिवर्तते । तथाद्य गन्त्र्या नोजातु तवागमनमिष्यते

देव्युवाच

अवश्यं यद्यहं रक्ता तव पादाम्बुजद्वये । तथा त्वमेव मेनाथो भविष्यसि भवान्तरे

इत्युक्त्वा निर्ययौ देवी कोपान्धीकृतलोचना ।
यियासुभिश्च कार्यार्थं यत्कर्तव्यं न तत्कृतम् ॥ ५४ ॥

न ननाम महादेवं न च चक्रे प्रदक्षिणम् । अत एव हि सादेवी नगता पुनरागता ॥

अप्रणम्य महेशानमकृत्वापि प्रदक्षिणम् ।
अद्यापि ननिवर्तन्ते गताः प्राग्वासरा इव ॥ ५६ ॥

तयाचरणचारिण्या राज्ञ्या त्रिभुवनेशितुः । अपितत्पावनं वर्त्ममेनेऽतिकठिनम्बहु

देवोऽपि तां सतीं यान्तीं दृष्ट्वा चरणचारिणीम् ।
अतीव विव्यथे चित्ते गणांश्चाथ समाह्वयत् ॥ ५८ ॥

गणाविमानं नयत मनःपवनचक्रिणम् । पञ्चास्यायुतसंयुक्तं रत्नसानुध्वजोच्छ्रितम्

महावातपताकञ्च महाबुद्ध्यक्षलक्षितम् । नर्मदाऽलकनन्दा च यत्रेषा दण्डतां गते ॥

छत्रीभूतौच नत्रस्तः सूर्याचन्द्रमसावपि । यस्मिन्मकरतुण्डश्च वाराही शक्तिरुत्तमा

धूः स्वयञ्चापि गायत्रीरज्जवस्तक्षकादयः । सारथिः प्रणवो यत्रकेङ्कारःप्रणवध्वनिः

अङ्गानि रक्षका यत्र वरूथश्छन्दसांगणः । इत्याज्ञप्ता गणास्तूर्णं रथं निन्युर्हराज्ञया

देव्यासनाथं तं कृत्वा विमानम्पार्षदा दिवि ।
अनुजग्मुर्महादेवीं दिव्यां तेजोविजृम्भिणीम् ॥ ६४ ॥
सा शृणन्त्यक्षरमणी वीक्ष्य दक्षसभाङ्गणम् ।
नभोऽङ्गणाद्विमानस्था ततो वेगादवातरत् ॥ ६५ ॥

अविशद्यज्ञवाटञ्च चकितंरक्षिवीक्षिता। कृतमङ्गलनेपथ्यां प्रसूं दृष्ट्वा किरीटिनीम् ॥

सभर्तृकाश्च भगिनीर्न वाऽलङ्कृतिशालिनीः ।
साश्चर्याश्च सगर्वाश्च सानन्दाश्च ससाध्वसाः ॥ ६७ ॥

अचिन्तिता त्वनाहूता विमानाद्धरवल्लभा । कथमेषापरिप्राप्ता क्षणमित्थम्प्रपश्यतीः

असम्भाष्यापि ताः सर्वा गता दक्षान्तिकं सती ।

पित्रा पृष्टा तु मात्रापि भद्रञ्ञातन्त्वदागमे ॥ ६६ ॥

सत्युवाच

यदि भद्रंजनेतर्मे समागमनतो भवेत् । कथं नाहं समाहूता यथैता मे सहोदराः ॥

दक्ष उवाच

अयि कन्ये! महाधन्ये! ह्यनन्ये सर्वमङ्गले !। अयं ते नमनाक् दोषो दोषएष ममैवहि

तादृग्विधाय यत्पत्येमयादत्ताज्ञबुद्धिना । यदहं तं समाज्ञास्यमीश्वरोसौनिरीश्वरः

कदा कथमदास्यन्त्वां तस्मै मायास्वरूपिणे ।

अहं शिवाख्यया तुष्टो न जाने शिवरूपिणम् ॥ ७३ ॥

पितामहेन बहुधा वर्णितोऽसौममाग्रतः । शङ्करो यमयं शम्भुरसौ पशुपतिः शिवः

श्रीकण्ठोऽसौ महेशोऽसौ सर्वज्ञोऽसौ वृषध्वजः ।

अस्मै कन्याम्प्रयच्छ त्वं महादेवाय धन्विने ॥ ७५ ॥

वाक्याच्छतधृतेस्तस्मात्तस्मैदत्तामयाऽनघे । नजानेतंविरूपाक्षमुक्षगंविषभक्षणम्

पितृकाननसंवासं शूलिनञ्च कपालिनम् । द्विजिह्वसङ्गसुभगं जलाधारंकपर्दिनम् ॥

कलङ्किकृतमौलिञ्च धूलिधूसरचर्चितम् । कचित्कौपीनवसनं नग्नं वातूलवत्कचित्

कचिच्चचर्मवसनं कचिद्भिक्षाटनप्रियम् । विटङ्कभूतानुचरं स्थाणुमुग्रंतमोगुणम् ॥

रुद्रं रौद्रपरीवारं महाकालवपुर्धरम् । नृकरोटीपरिकरं जातिगोत्रविवर्जितम् ॥ ८०

नसम्यग्वेत्तितंकश्चिज्ज्ञानानोऽपिप्रतारितः । किम्बहूक्तेन तनये! समस्तनयशालिनि

क पांसुलपटच्छन्नो महाशङ्खविभूषणः । प्रवद्धसर्पकेयूरः प्रलम्बितजटासटः ॥ ८२ ॥

डमड्डुमरुकव्यग्रहस्ताग्रः खण्डचन्द्रभृत् । ताण्डवाडम्बररुचिः सर्वामङ्गलचेष्टितः

मृडानिसहरः काऽयमध्वरो मङ्गलालयः । अत एव समाहूता नेह त्वं सर्वमङ्गले ॥

दुकूलान्यनुकूलानिरत्नालङ्कृतयः शुभाः । प्रागेव धारितास्तेऽत्रपश्यागत्यगृहाण च

इह मङ्गलवेशेषु देवेन्द्रेषु सशूलधृक् । कथमर्हो भवेच्चेतिमङ्गले विषमेक्षणः ॥ ८६ ॥

इत्याकर्ण्य सती साध्वी जनेतुरुदितं तदा । अत्यन्तदूनहृदया वक्तुं समुपचक्रमे ॥

सत्युवाच

नाकर्णितं मया किञ्चित्त्वयिप्रब्रुवति प्रभो !। पदद्वयीं समाकर्ण्य तांचतेकथयाम्यहम्

न सम्यग्वेत्ति तं कश्चिज्ज्ञानानोऽपि प्रतारितः ।

एतत्सम्यक् त्वयाऽऽख्यायि कस्तं वेत्ति सदाशिवम् ॥ ८९ ॥

त्वं तु प्रतारितः पूर्वमधुनापिप्रतारितः । कृत्वा तेन च सम्बन्धमसम्बद्धप्रलापभाक

यादृशं वक्षितं शम्भु तादृशं यद्यमन्यथाः । कुतो मामददास्तस्मै यश्च कश्चन वेदन

अथवातेन सम्बन्धेन हेतुर्भवतो मतिः । तत्र हेतुरभूत्तात मम पुण्यैकगौरवम् ॥ ९२

अथोक्तवैवं बहुतरंत्वंजनेताऽस्य वर्ष्मणः । श्रुतानेन चदेहेन पत्युः परिविगर्हणा ॥

पुरश्चरणमेवैतद्यदस्यैव विसर्जनम् । सुश्लाघ्यजन्मया तावत्प्राणितव्यं सुयोषिता

यावज्जीवितनाथस्याऽश्रवणीया विगर्हणा ॥ ९४ ॥

इत्युक्त्वा क्रोधदीप्ताग्नौ महादेवस्वरुपिणि । जुहाव देहसमिधम्प्राणरोधविधानतः

ततो विवर्णतां प्राप्ताः सर्वे देवाः सवासवाः ।

नाग्निर्जज्वाल च तथा यथाऽऽज्याहुतिभिः पुरा ॥ ९६ ॥

मन्त्राः कुण्ठितसामर्थ्यास्तत्क्षणादेव चाऽभवन् ।

अहो महानिष्टतरं किमेतत्समुपस्थितम् ॥ ९७ ॥

केचिदूचुर्द्विजवरा मिथः परियियासवः । महाझञ्झानिलः प्राप्तः पर्वतान्दोलनक्षमः

मखमण्डपभूस्तेनक्षणतःस्थपुटीकृता । अकाण्डं तडिदापातोजातोऽभूद्‌ भूप्रकम्पनः

दिवश्चोल्काःप्रपतिताः पिशाचानृत्यमादधुः । आतापिगृध्रैरुपरिगगनेमण्डलायितम्

रवेरधस्तादशिवं शिवास्तत्राप्यरारिषुः । मेधारुधिरविप्रुड्भिस्तत्रवृष्टिंव्यधुः पराम्

निर्घातनिःस्वनो भूमेरुत्थितो हृत्प्रकम्पनः ।

दिव्यायुधानि च मिथोयुध्यन्ति स्मातिभीषणम् ॥ १०२ ॥

हवनीयं महाद्रव्यं दूषितं क्रोष्टुभिः श्वभिः । चकोराः करटास्तत्र विचेरुर्यज्ञमण्डपे

श्मशानवाटवज्जातो यज्ञवाटःसवैक्षणात् । यद्यत्रावस्थितं सर्वं तत्रैव परितिष्ठितम्

चित्रन्यस्तमिवासीच्च वस्तुजातमशोभिच । स्थगिता इवसंवृत्तास्तत्रचक्रधरादयः
दक्षोपि वदनम्लानिमवाप्यसपरिच्छदः । पुनर्यथाकथञ्चिच्च यज्ञं प्रावर्तयन्द्विजाः ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यांसंहितायां चतुर्थे काशीखण्ड
उत्तरार्धे सतीदेहविसर्जनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥

एकोननवतितमोऽध्यायः

दक्षेश्वरप्रादुर्भाववर्णनम्

स्कन्द उवाच

पुनः सनारदोऽगस्त्यदेव्याःप्राक्समुपागतः । तद्वृत्तान्तमशेषञ्च हरायावेदितुंययौ
दृष्ट्वा सनारदःशम्भुं नन्दिना सहसङ्कथाम् । काश्चित्तर्जनिविन्यासपूर्वं कुर्वन्तमानमत्
उपाविशच्च शैलादिविसृष्टासनमुत्तमम् ।
वैलक्ष्यं नाटयन्किञ्चित्क्षणं जोषन्समास्थितः ॥ ३ ॥
आकारेणैव सर्वज्ञस्तद्वृत्तान्तं विवेदह । अत्रादीच्च मुनिशम्भुःकुतो मौनावलम्बनम्
शरीरिणां स्थितिरियमुत्पत्तिप्रलयात्मिका ।
दिव्यान्यपि शरीराणि कालाद्यान्त्येवमेव हि ॥ ५ ॥
दृश्यं विनश्वरं सर्वं विशेषाद्यदनीश्वरम् । ततोऽत्र चित्रंकिं ब्रह्मन्कंकालःकालयेन्नवै
अभाविनो हि भावस्य भावः क्वापि न संभवेत् ।
भाविनोपि हि नाभावस्ततो मुह्यन्ति नोबुधाः ॥ ७ ॥
शम्भूदीरितसमाकर्ण्यसइत्थं मुनिपुङ्गवः । प्रोक्तवान्सत्यमेवैतद्यद्देवेन प्रभाषितम्
अवश्यमेव यद्भाव्यं तद्भूतंनात्रसंशयः । परं माम्बाधतेऽत्यन्तश्चिन्तैकाचित्तमाथिनी
नापचीयेततेकिञ्चिन्नोपचीयेततत्त्वतः । अव्ययत्वाच्चपूर्णत्वाद्धानिवृद्धीकुतस्त्वयि
अहोवराकः संसारः क्व भविष्यत्यनीश्वरः ।

आरभ्याद्य दिनं न त्वामर्चयिष्यन्ति केऽपि यत् ॥ ११ ॥
यतः प्रजापतिर्दक्षो न त्वामाहूतवान् क्रतौ । तेनाद्य रीढितं दृष्ट्वा देवर्षिमनुजा अपि
तवरीढांकरिष्यन्ति किमैश्वर्येण रीढिनाम् । प्राप्तावहेडनालोकेजितकालभयाअपि
अथैश्वर्येण सम्पन्नाः प्रतिष्ठाभाजनं किमु ॥ १३ ॥
महीयसायुषातेषां वसुभिर्भूरिभिश्चकिम् । येऽभिमानधनानेह लब्धरीढाः पदे पदे
अचेतनाश्च सावज्ञा जीवन्तोपिनकीर्तये । अभिमानधनाधन्या वरं योषित्सुसासती
यात्वद्विनिन्दाश्रवणात्तृणीचक्रे स्वजीवितम् ।
इत्याकर्ण्य महाकालः सम्यग्ज्ञात्वा सतीव्ययम् ॥ १६ ॥
सत्यं मुने! सतीदेवी तृणीचक्रे स्वजीवितम् ।
जोषं स्थितेमुनौ तत्र तन्महाकालसाध्वसात् ॥ १७ ॥
रुद्रश्चातीवरुद्रोऽभूद्बहुकोपाग्निदीपितः । ततस्तत्कोपजाद्वह्नेराविरासीन्महाद्युतिः
प्रत्यक्षः प्रतिमाकारःकालमृत्युप्रकम्पनः । उवाच चप्र णम्येशंभुशुण्डीम्महतीं दधत्
आज्ञां देहि पितः !किन्ते करवै दास्यमुत्तमम् ।
ब्रह्माण्डमेककवलं करवाणि त्वदाज्ञया ॥ २० ॥
पिबामि चार्णवान्सप्ताप्येकेन चुलुकेन वै ।
रसातलं वा पातालं पातालं वा रसातलम् ॥ २१ ॥
त्वदाज्ञया नयामीश विनिमघ्यस्वहेलया । सलोकपालमिन्द्रं वा धृत्वाकेशैरिहानये
अपिवैकुण्ठनाथश्चेत्तत्साहाय्यंकरिष्यति । तदातंकुण्ठितास्त्रञ्चकरिष्यामित्वदाज्ञया
दनुजा दितिजाः केवैवराकारणदुर्बलाः । तेषुचोत्कटतांकोपिधत्तेतम्प्रणिहन्म्यहम्
कालम्बध्नामि वा सङ्ख्ये मृत्योर्वामृत्युमर्थये ।
स्थावरेषु चरेष्वत्र मयि क्रुद्धे रणाङ्गणे ॥ २५ ॥
त्वद्बलेन महेशान! नकोपि स्थैर्यमेष्यति । ममपादतलाघातादेतद्वै क्षोणिमण्डलम्
कदलीदलवद्घाताद्वेपते सरसातलम् । चूर्णीकरोमिदोर्दण्डघाताच्चैतान्कुलाचलान्
किम्बहूक्तेनदेह्याज्ञांममासाध्यंनकिञ्चन । त्वत्पादबलमासाद्यकृतंविद्ध्याद्यचिन्तितम्

इति प्रतिज्ञां तस्येशः श्रुत्वा कृतममन्यत । कृतकृत्यमिवात्यन्तंतंमुदाप्रत्युवाचच
महावीरोसिरेभद्रममसर्वगणेष्विह । वीरभद्राख्ययात्वं हिप्रथितिम्परमां व्रज ॥
कुरु मे सत्वरंकार्यं दक्षयज्ञं क्षयं नय । ये त्वां तत्रावमन्यन्ते तत्साहाय्यविधायिनः
ते त्वयाप्यवमन्तव्या व्रज पुत्रशुभोदय । इत्याज्ञां मूर्ध्नि चाधायसततःपारमेश्वराम्

हरम्प्रदक्षिणीकृत्य जग्मिवानतिरंहसा ।
ततस्तदनुगाञ्छम्भुः स्वनिःश्वाससमुद्गतान् ॥ ३३ ॥
शतकोटिमितानुग्रान्गणानन्यानवासृजत् ।
ते गणा वीरभद्रं तं यान्तं केचित्पुरोगताः ॥ ३४ ॥
केचित्तदनुगा जाताः केचित्तत्पार्श्वगा ययुः ।
अम्बरं तैः समाक्रान्तं तेजोविजितभास्करैः ॥ ३५ ॥
शृङ्गाग्राणि गिरीणाञ्च कैश्चिदुत्पाटितानि वै ।
आचूडमूलाः कैश्चिच्च विधूता वै शिलोच्चयाः ॥ ३६ ॥
उत्पाट्य महतो वृक्षान्केचित्प्राप्ता मखाङ्गणम् ।
कैश्चिदुत्पाटिता यूपाः केचित्कुण्डान्यपूपुरन् ॥ ३७ ॥

मण्डपंध्वंसयामासुःकेचित्क्रोधोद्धुरागणाः । अचीखनन्वैवेदीश्चकेचिद्वैशूलपाणयः

अभक्षयन्हवींष्यन्ये पृषदाज्यं पपुः परे ॥ ३८ ॥

दध्वंसुरन्नराशींश्च केचित्पर्वतसन्निभान् । केचिद्वैपायसाहाराः केचिद्वैक्षीरपायिनः
केचित्पक्वान्नपुष्टाङ्गायज्ञपात्राण्यचूर्णयन् ।अमोटयन्स्रुचान्दण्डान्केचिद्दोर्दण्डशालिनः

व्यभञ्जञ्छकटान्केचित्पशून्केचिदजीगिलन् ।
अग्निं निर्वापयामासुः केचिदत्यग्नितेजसः ॥ ४१ ॥

स्वयम्परिदधुश्चान्ये दुकूलानि मुदायुताः । जगृहुःकेचन पुरारत्नानां पर्वतं कृतम् ॥
एकेन च भगोदेवः पश्यंश्चक्रेविलोचनः । पूष्णोदन्तावलीमन्यःपातयामासकोपितः
यज्ञः पलायितो दृष्टः केनचिन्मृगरूपधृक् । शिरोविरहितश्चक्रेतेन चक्रेण दूरतः ॥

एकः सरस्वतीं यान्तीं दृष्ट्वा निर्नासिकां व्यधात् ।

अदिते रोष्ठपुटकौ छिन्नावन्येन कोपिना ॥ ४५ ॥

अर्यम्णो बाहुयुगलं तथोत्पाटितवान्परः । अग्नेरुत्पाटयामासकश्चिज्जिह्वाम्प्रसह्यच

चिच्छेदवायोर्वृषणम्पार्षदोऽन्यः प्रतापवान् ।
पाशयित्वा यमं कश्चित्को धर्म इति पृष्टवान् ॥ ४७ ॥

यत्र धर्ममहेशोनप्रथमम्परिपूज्यते । नैर्ऋतंसंगृहीत्वान्यः केशेष्वातोलयच्चासकृत् ॥
अनाश्वरंहविर्भुक्तंत्वयेत्याताडयत्पदा । कुबेरमपरो धृत्वा पादयोरधुनोद्बलात् ॥
वामयामास बहुशोभक्षिता ह्यध्वराहुतीः । एकादशाऽपिये रुद्रालोकपालैकपङ्क्तयः

रुद्राख्या धारणवशात्प्रमथैस्तेऽवहेलिताः ।
वरुणोदरमापीड्य प्रमथोन्यो बलेनहि ॥ ५१ ॥

बहिरुद्गिरयामास यद्वत्तश्चेशवर्जितम् । मायूरीं तनुमासाद्य सहस्राक्षो महामतिः ॥
उड्डीयगिरिमाश्रित्य छन्नः कौतुकमैक्षत । ब्राह्मणान्प्रमथा नत्वायातयातेतिचाब्रुवन्
प्रमथाः कालयामासुरन्यानपि चयाचकान् । इत्थम्प्रमथिते यागेप्रमथैःप्रथमागतैः ॥

वीरभद्रः स्वतः प्राप्तः प्रमथानीकिनीवृतः ॥ ५४ ॥

यज्ञवाटं श्मशानाभंदृष्ट्वातैः प्रमथैः पुरा । अतिशोच्यां दशांनीतं वीरभद्रस्ततोजगौ

गणाः पश्यत दुर्वृत्तैः प्रारब्धानाञ्च कर्मणाम् ।
अनीश्वरैरवस्थेयं कुतो द्वेषो महेश्वरे ॥ ५६ ॥
ये द्विषन्तिमहादेवं सर्वकर्मैकसाक्षिणम् ।
धर्मकार्ये प्रवृत्तास्तु ते प्राप्स्यन्तीदृशीं दशाम् ॥ ५७ ॥

क्व सदक्षो दुराचारः क्व च यज्ञभुजः सुराः । धृत्वासर्वानानयतयात द्रुततरंगणाः ॥
इत्याज्ञां वीरभद्रस्य प्राप्यते प्रमथाद्रुतम् । यावद्यान्त्यग्रतस्तावद्दृष्टःक्रुद्धोगदाधरः
तेनतेप्रमथाः सर्वेमहाबलपराक्रमाः । शुष्कपर्णतृणावस्थां प्रापितावात्ययेवहि ॥
अथनष्टेषु सर्वेषु प्रमथेषुहरेर्भयात् । चुकोप वीरभद्रः स प्रलयानलसन्निभः ॥ ६१ ॥
ददर्श शार्ङ्गिणंचाग्रे स्वगणैश्च परिष्टुतम् । चतुर्भुजैरसङ्ख्यातैर्जितदैत्यमहाबलैः

चक्रिभिर्गदिभिर्जुष्टं खड्गिभिश्चापि शार्ङ्गिभिः ।

वीरभद्रस्ततः प्राह दृष्ट्वा तं दैत्यसूदनम् ॥ ६३ ॥
त्वं तु यज्ञपुमानत्रमहायज्ञप्रवर्तकः । रक्षिता निजवीर्येणदक्षस्यत्र्यक्षवैरिणः ॥ ६४॥
किंवादक्षं समानीयदेहियुध्यस्ववामया । नदास्यसि च चेद्दक्षं ततस्तंरक्षयत्नतः ॥
प्रायशः शम्भुभक्तेषु यतस्त्वम्प्रोच्यसेऽग्रणीः ।
एकोनेऽब्जसहस्रे प्राग्ददौ नेत्राम्बुजम्भवान् ॥ ६६ ॥
तुष्टेनशम्भुनादत्तं तुभ्यंचक्रंसुदर्शनम् । यत्साहाय्यमवाप्याजौत्वंजयेर्दनुजाधिपान् ॥
इत्याकर्ण्यवचस्तस्यवीरभद्रस्यचोर्जितम् । जिज्ञासुस्तद्बलंविष्णुर्वीरभद्रमुवाचह
त्वंशम्भोःसुतदेशीयोगणानाम्प्रवरोऽस्यहो । राजादेशमनुप्राप्यततोप्यतिबलोमहान्
योसिसोस्यहमप्यत्र दक्षरक्षणदक्षधीः । पश्यामितवसामर्थ्यंकथं दक्षंहरिष्यसि
इत्युक्तोवीरभद्रः सतेन वै शार्ङ्गधन्वना । प्रमथान्दृष्टिभङ्ग्यैवप्रेरयामास सङ्गरे ॥
अथतैःप्रमथैर्विष्णोरनुगागदितारणे । आददानास्तृणंवक्त्रेणापिताःपाशवीं दशाम्
ततस्तार्क्ष्यरथः क्रुद्धस्त्वेकैकं रणमूर्धनि । सहस्रेणसहस्रेण बाणानां ह्यताडयत्
तेभिन्नवक्षसः सर्वेगणारुधिरवर्षिणः । वासन्तींकैंशुकीं शोभांपरिप्रापू रणाजिरे ॥
क्षरन्त इव मातङ्गाः स्रवन्त इव पर्वताः । मदेनधातुरागेण मिश्रैः शुशुभिरे गणाः ॥
ततः प्रहस्यगणपोऽब्रवीद्वैकुण्ठनायकम् । हेशार्ङ्गधन्वञ्जाने त्वां त्वंरणाङ्गणपण्डितः
परंयुध्यसिदैत्येन्द्रैर्दानवेन्द्रैर्नपार्षदैः । इत्युक्त्वा वीरभद्रेण भुशुण्डीकलिताकरे ॥
गदिनाऽथ गदातूर्णं दैत्येन्द्रगिरिरेणुकृत् । ततः प्रहतवान्वीरोभुशुण्ड्यातंगदाधरम्
तदङ्गसङ्गमासाद्य विदद्रेशतधातया । कौमोदकीप्रहारेण वीरभद्रम्प्रतापिनम् ॥
जघान वासुदेवोपि तरसाऽज्ञातवेदनम् । ततः खट्वाङ्गमादाय गदाहस्तं गदाधरम्
आताड्य सव्ययोर्दण्डेगदाम्भूमावपातयत् । कुपितोयंमधुद्वेषी चक्रेणाताडयच्च तम्
स च चक्रं समागच्छद्द् दृष्ट्वासस्मार शङ्करम् । शङ्करस्मरणाच्चक्रं मनाग्वक्रत्वमाप्यच
कण्ठमासाद्य वीरस्य सम्यग्जातं सुदर्शनम् ॥ ८२ ॥
तेन चक्रेण शुशुभे नितरां स गणेश्वरः । वीरलक्ष्म्यावृत इव समरे विजयस्रजा ॥
ततः सुदर्शनं दृष्ट्वा तत्कण्ठाभरणं हरिः । मनाक्स चकितंस्मित्वाततोजग्राहनन्दकम्

सनन्दकंकरंतस्यप्रोद्यतम्मधुविद्विषः । पश्यतां दिविसिद्धानां स्तम्भयामासहुंकृता
अभ्यधावच्च वेगेन गृहीत्वा शूलमुज्ज्वलम् । यावज्जिघांसतिहरिंतावदाकाशवाचया
वारितो गणराजः समाकार्षीः साहसंत्विति । ततस्तमपहायाशुवीरभद्रो गणोत्तमः
प्राप्य दक्षं विनद्योच्चैर्धिक्त्वामीश्वरनिन्दकम् ।
यस्येदृगस्ति सम्पत्तिर्यत्र देवाः सहायिनः ।
स कथं सेश्वरं कर्म न कुर्याद्दक्षतां दधत् ॥ ८८ ॥
येनास्येनाऽपवित्रेणभवतानिन्दितःशिवः । चूर्णयामितदास्यन्तेचपेटाभिःसमन्ततः
इत्युक्त्वातस्यदक्षस्य हरपारुष्यभाषिणः । चिच्छेद वदनं वीरश्चपेटशतघातनैः ॥
ततस्त्वदिति मुख्यानां मिलितानां महोत्सवे ।
त्रोटयामासकर्णादीन्यङ्गप्रत्यङ्गकानि च ॥ ९१ ॥
वेणीदण्डाश्च कासाञ्चित्तेन छिन्ना महारुषा ।
कासाञ्चिच्च कराश्छिन्नाः कासाञ्चित्कर्तिताः स्तनाः ॥ ९२ ॥
नासापुटांस्तथाऽन्यासां पाटयामास पार्षदः ।
चिच्छेद चाङ्गुलीश्चापि तथाऽन्यासां शिवप्रियः ॥ ९३ ॥
येयेनिनिन्दुर्देवेशंयेयेचशुश्रुवुस्तदा । तेषांजिह्वाः श्रुतीःकोपादच्छिनच्चाकरोद्द्विधा
केचिदुल्लम्बितायूपे पाशयित्वा दृढंगले । अधोमुखायैर्देवेशं विहायात्तम्महाहविः
द्विजराजश्च धर्मश्च भृगुमारीचमुख्यकाः । अत्यन्तमपमानस्य भाजनं तेन कारिताः
एतेजामातरस्तस्ययतोदक्षस्यदुर्धियः । हित्वामहेश्वरमम्रून्सोपश्यदधिकाञ्छिवात्
तानि कुण्डानि ते यूपास्ते स्तम्भास्स च मण्डपः ।
ता वेद्यस्तानि पात्राणि तानि हव्यान्यनेकधा ॥ ९८ ॥
ते च वैयज्ञसम्भारास्ते ते यज्ञप्रवर्तकाः । ते रक्षपालास्तेमन्त्राविनेशुर्हेलयाऽखिलाः
स्तोकेनैव हि कालेन यथर्धिः परवञ्चनात् । अर्जितानश्यतिक्षिप्रंदक्षसम्पद्गताऽशिवा
नीतेमहाक्रतौ तेन सगणेनेदृशीं दशाम् । विधिर्विधिविलोपाच्चहरंविज्ञाप्य चानयत्
तत्र यत्र मखः सोऽभूद्दृक्षःशिववर्जितः । आयातेऽथमहादेवेवीरभद्रोऽतिलज्जितः

नत्वा नकिञ्चिदवदद्देवः सर्वमवैत्स्वयम् । प्रसाद्य देवदेवेशं सुरज्येष्ठोऽब्रवीत्पुनः अपराध्यप्ययं दक्षः सम्प्रसाद्यः कृपानिधे । यथापूर्वं पुनरमून्सर्वान्कारयशङ्कर

यथाविधिः प्रवर्तेत वैदिकः पुनरेवहि ।

तथाऽऽज्ञा दीयतां शम्भो कर्म सिद्ध्यति सेश्वरम् ॥ १०५ ॥

अनीश्वरासु सर्वासु क्रियासु परमेश्वर । एवमेव भवन्त्येव विघ्नजाताः सहस्रशः ॥ विचारतो वराकोयं दक्षो भकतरस्तव । कुर्वन्योऽनीश्वरंकर्म परद्रष्टान्ततां गतः अन्योपि योमहेशानंहित्वाकर्मकरिष्यति । तस्यतत्कर्मसंसिद्धिर्दक्षस्येवभविष्यति

अतो न कश्चित्किञ्चिच्च क्वचित्कर्मविना शिवम् ।

विधास्यति निशम्यास्य दक्षस्येद्दृक्षचेष्टितम् ॥ १०६ ॥

विधीरितमितिश्रुत्वा स्मित्वादेवो महेश्वरः । वीरमाज्ञापयामास यथापूर्वम्प्रकल्पय वीरभद्रोपितत्सर्वं सर्वाज्ञां प्रतिपद्य च । विनादक्षस्य वदनं यथा पूर्वमकल्पयत् ॥ ईश्वरं येविनिन्दन्ति ते मूकाः पशवोध्रुवम् । ततोमेषमुखंदक्षं वीरभद्रोगणोव्यधात् देवोब्रह्माणमापृच्छय धर्माद्गार्हस्थ्यतश्च्युतः । सपार्षदो हिमप्रस्थंजगामतपसेततः अनाश्रमवता पुंसा यतः कालोमनागपि । मुधाकलयितव्योनतस्माच्छ्रेयःसदाश्रमः अतः स सर्वतपसां फलदाता महेश्वरः । तपश्चचार सगणो ब्रह्मादक्षन्त्वशिक्षयत् हरनिन्दासमुद्भूतपापपङ्कं सुदुस्त्यजम् । यदिक्षालयितुंकाङ्क्षा तदा वाराणसीं व्रज

प्राप्य वाराणसीं पुण्यां महापापौघहारिणीम् ।

कुरु लिङ्गप्रतिष्ठां त्वं तेन शम्भुः स तुष्यति ॥ ११७ ॥

तुष्टे महेश्वरे तुष्टं जगदेतच्चराचरम् । नान्यत्र पापं तेगन्तृ विना वाराणसीं पुरीम् ब्रह्महत्यादिपापानाम्प्रायश्चित्तं मनीषिभिः । प्रोक्तंन हरनिन्दायास्तत्रकाश्येवकेवलम्

काश्यां लिङ्गप्रतिष्ठा यैः कृताऽत्र सुकृतात्मभिः ।

सर्वे धर्माः कृतास्तैस्तु तएव पुरुषार्थिनः ॥ १२० ॥

इत्याकर्ण्य विधेर्वाक्यं दक्षः प्राप्याथसत्वरम् । अविमुक्तंमहाक्षेत्रं तताप परमं तपः संस्थाप्य लिङ्गंविधिवल्लिङ्गाराधनतत्परः । न वेत्तिलिङ्गादपरं स किञ्चिज्जगतीतले

दिवानिशं महेशानम्परिष्टौति समर्चति । नमति ध्यायती क्षेतदक्षो दक्षप्रजापतिः एकचित्तस्य दक्षस्य ध्यायतोलिङ्गमैश्वरम् । समासहस्रमगमन्मितंद्वादशसङ्ख्यया

मेनां यावत्सतीऽप्राप्य हिमाचलपतिव्रताम् ।

उमारूपाऽतितपसा पतिं प्राप पिनाकिनम् ॥ १२५ ॥

तावत्स दक्षस्तपसि निश्चलो लिङ्गमार्चयत् ।

ततः काशीं समासाद्य सह भर्त्रा गिरीन्द्रजा ॥ १२६ ॥

दृष्ट्वा तं निश्चलहृदं शिवलिङ्गार्चने रतम् । हरंव्यजिज्ञपद्देवी क्षीणोऽयं तपसा विभो प्रसादय कृपासिन्धो वरेणैनं प्रजापतिम् । इत्युक्तोऽपर्णयाशम्भुःप्राहतंदक्षमीशिता

वरं ब्रूहि महाभाग! दास्यामि मनसेप्सितम् ।

इतीशोदितमाकर्ण्य प्रणम्य बहुशो हरम् ॥ १२६ ॥

स्तुत्वा नानाविधैः स्तोत्रैः प्रसन्नं वीक्ष्य शङ्करम् ।

प्रोवाच देवदेवेशं यदि देयो वरो मम ॥ १३० ॥

तत्त्वदीयपदद्वन्द्वे निर्द्वन्द्वाभक्तिरस्तु मे । इदं च ते महालिङ्गं यन्मयाऽत्र प्रतिष्ठितम्

अस्मिँल्लिङ्गे त्वया नाथ! स्थातव्यं सर्वदैव हि ॥ १३१ ॥

मयापराद्धंयद्देव तत्क्षन्तव्यंकृपानिधे । एत एववराःसन्तु किमन्यैरुत्तमैर्वरैः ॥ १३२ इति श्रुत्वा महादेवः प्रसन्नोऽतितराम्भवः । प्रोवाचचयदुक्तंतेतत्तथास्तुनचान्यथा अन्यच्च ते वरं दद्यां तच्छृणुष्व प्रजापते !। यत्त्वयास्थापितंलिङ्गमेतद्दक्षेश्वराभिधम्

अस्य संसेवनात्पुंसामपराधसहस्रकम् ।

क्षमिष्येऽहं न सन्देहस्तस्मात्पूज्यमिदं जनैः ॥ ३५ ॥

त्वन्तु लिङ्गार्चनादस्मात्सर्वमान्यो भविष्यसि ।

परार्धद्वितयप्रान्ते ततो मोक्षमवाप्स्यसि ॥ १३६ ॥

इत्युक्त्वा देवदेवेशस्तस्मिँल्लिङ्गे लयं ययौ । दक्षोऽपि गतवान्गेहं परिप्राप्त मनोरथः

स्कन्द उवाच

इत्यगस्त्य! समाख्यातो दक्षेश्वरसमुद्भवः । यं श्रुत्वा मुच्यते जन्तुरपराधशतैरपि ॥

श्रुत्वाऽऽख्यानमिदम्पुण्यं दक्षेश्वरसमुद्भवम् । नरो न लिप्यतेपापैरपराधालयोपिहि

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड
दक्षेश्वरप्रादुर्भावो नामैकोननवतितमोऽध्यायः ॥ ८९ ॥

नवतितमोऽध्यायः

पार्वतीशवर्णनम्

अगस्त्य उवाच

पार्वतीहृदयानन्द! पार्वतीशसमुद्भवम् । कथयेह यदुद्दिष्टं भवता प्रागघापहम् ॥ १ ॥

स्कन्द उवाच

शृण्वगस्ते यदा मेनाहिमाचलपतिव्रता । गिरीन्द्रजां सुतामाहपुत्रितेऽस्यमहेशितुः
किंस्थानंवसतिर्वाकाकोबन्धुर्वेत्सिकिञ्चन । प्रायोगृहंनजामातुरस्यकोपिचकुत्रचित्
निशम्येतिवचोमातुरतिह्रीणागिरीन्द्रजा । आसाद्यावसरंशम्भुं नत्वागौरीव्यजिज्ञपत्
मयाश्वश्रूगृहं कान्तगम्यमद्यविनिश्चितम् । नाथात्रनैव वस्तव्यं नयमांस्वंनिकेतनम्
गिरीन्द्रजागिरं श्रुत्वा गिरीश इति तत्त्ववित् ।
हित्वा हिमगिरिम्प्राप्तो निजमानन्दकाननम् ॥ ६ ॥
प्राप्याऽऽनन्दवनंदेवीपरमानन्दकारणम् । विस्मृत्यपितृसम्वासंजाताचानन्दरूपिणी
अथ विज्ञापयाञ्चक्रे गौरी गिरिशमेकदा । अच्छिन्नानन्दसन्दोहः कुतःक्षेत्रेऽत्रतद्वद
इतिगौरीरितंश्रुत्वाप्रत्युवाचपिनाकधृक् । पञ्चक्रोशपरीमाणेक्षेत्रेस्मिन्मुक्तिसद्मनि
तिलान्तरं न देव्यस्ति विना लिङ्गं हि कुत्रचित् ।
एकैकम्परितो लिङ्गं क्रोशं क्रोशञ्च याऽवनिः ॥ १० ॥
अन्यत्रापि हि सादेवि भवेदानन्दकारणम् । अत्रानन्दवने देवि परमानन्दजन्मनि ॥
परमानन्दरूपाणि सन्ति लिङ्गान्यनेकशः । चतुर्दशसु लोकेषु कृतिनो येवसन्ति हि

तैःस्वनाम्नेहलिङ्गानिकृत्वाऽपिकृतकृत्यता !। अत्र येनमहादेवि लिङ्गंसंस्थापितम्मम
वेत्ति तल्लक्ष्यसः संख्यां शेषोऽपि न विशेषवित् ॥ १४ ॥
परिच्छेदव्यतीतस्यानन्दस्यपरकारणम् । अतस्त्विदम्परं क्षेत्रं लिङ्गैर्भूयोभिरद्रिजे
निशम्येति महादेवि! पुनः पादौ प्रणम्यच । देह्यनुज्ञांमहादेव! लिङ्गसंस्थापनाय मे
पत्युराज्ञां समासाद्ययच्छेच्छ्रेयः पतिव्रता । नतस्याःश्रेयसोहानिःसंवर्तेऽपिकदाचन
इति प्रसाद्य देवेशमाज्ञाम्प्राप्य महेशितुः । लिङ्गं संस्थापितंगौर्या महादेवसमीपतः
तल्लिङ्गदर्शनात्पुंसां ब्रह्महत्यादिपातकम् । विलीयेत नसन्देहो देहबन्धोपि नो पुनः
तत्र लिङ्गे वरो दत्तो देवदेवेन यः पुनः । निशामयमुने तं तु भक्तानां हितकाम्यया
लिङ्गं यः पार्वतीशाख्यं काश्यां सम्पूजयिष्यति ।
तद्देहावसितिम्प्राप्य काशीलिङ्गं भविष्यति ॥ २१ ॥
काशिलिङ्गत्वमासाद्य मामेवानुप्रवेक्ष्यति । चैत्रशुक्लतृतीयायां पार्वतीशसमर्चनात्
इह सौभाग्यमाप्नोतिपरत्रचशुभांगतिम् । पार्वतीश्वरमाराध्य योषिद्वापुरुषोऽपिवा
न गर्भमाविशेद्भूयो भवेत्सौभाग्यभाजनम् ।
पार्वतीशस्य लिङ्गस्य नामाऽपि परिगृह्णतः ॥ २४ ॥
अपि जन्मसहस्रस्य पापं क्षयति तत्क्षणात् ।
पार्वतीशस्य माहात्म्यं यः श्रोष्यति नरोत्तमः ॥
ऐहिकामुष्मिकान्कामान्सप्राप्स्यति महामतिः ॥ २५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड
उत्तरार्धे पार्वतीशवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥

एकनवतितमोऽध्यायः

गङ्गेश्वरमहिमवर्णनम्

स्कन्द उवाच

पार्वतीशस्य महिमा कथितस्ते मयाऽनघ । मुने निशामयेदानींगङ्गेश्वरसमुद्भवम् ॥
यंश्रुत्वा यत्रकुत्रापि गङ्गास्नानफलंलभेत् । चक्रपुष्करिणीतीर्थंयदागङ्गासमागता
तेनदैलीपिना सार्धमस्मिन्नानन्दकानने । क्षेत्रप्रभावमतुलं ज्ञात्वा शम्भुपरिग्रहात्
स्मृत्वा लिङ्गप्रतिष्ठायाः काश्यां लोकोत्तरं फलम् ।
गङ्गया स्थापितं लिङ्गं विश्वेशात्पूर्वतः शुभम् ॥ ४ ॥
गङ्गेश्वरस्यलिङ्गस्यकाश्यां दृष्टिःसुदुर्लभा । तिथौदशहरायाञ्च योगङ्गेशंसमर्चयेत्
तस्य जन्मसहस्रस्यपापंसंक्षीयते क्षणात् । कलौगङ्गेश्वरं लिङ्गं गुप्तप्रायं भविष्यति
तस्य संदर्शनं पुंसां जायते पुण्यहेतवे । दृष्टं गङ्गेश्वरं लिङ्गं येन काश्यां सुदुर्लभम्
प्रत्यक्षरूपिणी गङ्गा तेन दृष्टा न संशयः । कलौ सुदुर्लभागङ्गा सर्वकल्मषहारिणी
भविष्यतिन सन्देहो मित्रावरुणनन्दन !। ततोपितिष्ये संप्राप्तेकाश्यत्यन्तंसुदुर्लभा
ततोऽपि दुर्लभंकाश्यांलिङ्गं गङ्गेश्वराभिधम् । यस्यसंदर्शनंपुंसां भवेत्पापक्षयायवै
श्रुत्वा गङ्गेशमाहात्म्यं न नरो निरयी भवेत् ।
लभेच्च पुण्यसंभारं चिन्तितं चाधिगच्छति ॥ ११ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखण्ड उत्तरार्धे गङ्गेश्वरमहिमाख्यानं नामैकनवतितमोऽध्यायः ॥ ९१ ॥

द्विनवतितमोऽध्यायः

नर्मदेश्वराख्यानवर्णनम्

स्कन्द उवाच

नर्मदेशस्य माहात्म्यं कथयामि मुने! तव । यस्य स्मरणमात्रेण महापातकसंक्षयः
अस्य वाराहकल्पस्य प्रवेशेमुनिपुङ्गवैः । आपृच्छिकासरिच्छ्रेष्ठा वदतांत्वंमृकण्डज

मार्कण्डेय उवाच

शृणुध्वं मुनयः सर्वे सन्ति नद्यःपरंशतम् । सर्वा अप्यघहारिण्यः सर्वा अपितृषप्रदाः
सर्वाभ्योपि नदीभ्यश्च श्रेष्ठाः सर्वाः समुद्रगाः ।
ततोऽपि हि महाश्रेष्ठाः सरित्सुसरिदुत्तमाः ॥ ४ ॥
गङ्गा च यमुना चाथ नर्मदा च सरस्वती । चतुष्टयमिदं पुण्यंधुनीषु मुनिपुङ्गवाः ॥
ऋग्वेदमूर्तिर्गङ्गा स्याद्यमुना च यजुर्ध्रुवम् । नर्मदा साममूर्तिस्तुस्यादथर्वासरस्वती
गङ्गा सर्वसरिद्योनिः समुद्रस्यापिपूरणी । गङ्गया नलभेत्साम्यं काचिदत्र सरिद्वरा
किन्तु पूर्वंतपस्तप्त्वा रेवया बहुनेहसम् । वरदानोन्मुखो धाताप्रार्थितश्चेति सत्तम
गङ्गासाम्यं विधे देहि प्रसन्नोसि यदिप्रभो । ब्रह्मणाथततःप्रोक्तानर्मदास्मितपूर्वकम्
यदित्र्यक्षसमत्वं तुलभ्यतेऽन्येनकेनचित् । तदागङ्गासमत्वं चलभ्यतेसरिताऽन्यया
पुरुषोत्तमतुल्यः स्यात्पुरुषोऽन्यो यदि क्वचित् ।
स्रोतस्विनी तदा साम्यं लभते गङ्गयाऽपरा ॥ ११ ॥
यदि गौरीसमा नारी क्वचिदन्या भवेदिह ।
अन्या धुनीह स्वर्धुन्यास्तदा साम्यमुपैष्यति ॥ १२ ॥
यदिकशीपुरीतुल्याभवेदन्याक्वचित्पुरी । तदा स्वर्गतरङ्गिण्याःसाम्यमन्यानदीलभेत्
निशम्येति विधेर्वाक्यं नर्मदासरिदुत्तमा । धातुर्वरं परित्यज्य प्राप्तावाराणसींपुरीम्
सर्वेभ्योऽपि हि पुण्येभ्यः काश्यां लिङ्गप्रतिष्ठितेः ।

अपरा न समुद्दिष्टा कैश्चिच्छ्रेयस्करी क्रिया ॥ १५ ॥
अथ सा नर्मदा पुण्या विधिपूर्वां प्रतिष्ठितिम् ।
व्याधात्पिलिपिलातीर्थे त्रिविष्टपसमीपतः ॥ १६ ॥

ततः शम्भुः प्रसन्नोऽभूत्तस्यैनद्यै शुभात्मने। वरंवृणीष्व सुभगेयत्तुभ्यं रोचतेऽनघे
सरिद्वरानिशम्येतिरेवाप्राहमहेश्वरम् । किं वरेणेह देवेश! भृशं तुच्छेन धूर्जटे !॥१८
निर्द्वन्द्वात्वत्पदद्वन्द्वेभक्तिरस्तुमहेश्वर ! । श्रुत्वेतिनितरांतुष्टोरेवागिरमनुत्तमाम् ॥

प्रोवाच च सरिच्छ्रेष्ठे ! त्वयोक्तं यत्तथाऽस्तु तत् ।
गृहाण पुण्यनिलये वितरामि वरान्तरम् ॥ २० ॥

यावन्त्योदृषदःसन्तितवरोधसिनर्मदे । तावन्त्योलिङ्गरूपिण्योभविष्यन्तिवरान्मम
अन्यं चतेवरंदद्यां तमप्याकर्णयोत्तमम् । दुष्प्रापंयच्च तपसां राशिभिःपरमार्थतः ॥
सद्यः पापहरा गङ्गा सप्ताहेनकलिन्दजा । त्र्यहात्सरस्वतीरेवे त्वं तुदर्शनमात्रतः ॥
अपरं च वरं दद्यां नर्मदे!दर्शनावहे !। भवत्या स्थापितं लिङ्गं नर्मदेश्वरसञ्ज्ञकम् ॥

यत्तल्लिङ्गंमहापुण्यं मुक्तिं दास्यति शाश्वतीम् ।
अस्य लिङ्गस्य ये भक्तास्तान्दृष्ट्वा सूर्यनन्दनः ॥ २५ ॥

प्रणमिष्यति यत्नेन मच्छ्रेयोऽभिवृद्धये । सन्तिलिङ्गान्यनेकानि काश्यांदेविपदेपदे
परंहिनर्मदेशस्य महिमाकोपि चाद्भुतः । इत्युक्त्वादेवदेवेशस्तस्मिँल्लिङ्गेलयंययौ

नर्मदाऽपि प्रहृष्टाऽऽसीत्पावित्र्यं प्राप्य चाद्भुतम्।
स्वदेशं च परिप्राप्ता दृष्टमात्राऽघहारिणी ॥ २८ ।

वाक्यंमृकण्डजमुनेस्तेपिश्रुत्वामुनीश्वराः ।प्रहृष्टचेतसोजाताश्चक्रुःस्वंस्वंततोहितम्

स्कन्द उवाच

नर्मदेशस्यमाहात्म्यंश्रुत्वाभक्तियुतोनरः । पापकञ्चुकमुत्सृज्यप्राप्स्यतिज्ञानमुत्तमम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्ड
उत्तरार्धे नर्मदेश्वराख्यानंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥

त्रिनवतितमोऽध्यायः

सतीश्वरप्रादुर्भाववर्णनम्

अगस्त्य उवाच

नर्मदेशस्य माहात्म्यं श्रुतंकलमषनाशनम् । इदानीं कथयस्कन्दसतीश्वरसमुद्भवम् ॥

स्कन्द उवाच

मित्रावरुणसम्भूत कथयामि कथां शृणु । यथासतीश्वरं लिङ्गंकाश्यामाविर्बभूवह
पुरा ततापं सुमहत्तपः शतधृतिर्मुने ! । तपसा तेन देवेशः सन्तुष्टो वरदोऽभवत् ॥
उवाच चाऽपि ब्रह्माणं नितरां ब्राह्मणप्रियः । सर्वज्ञनाथोलोकात्मावरंवरयलोककृत्

ब्रह्मोवाच

यदिप्रसन्नोदेवेशवरंदास्यसिवाञ्छितम् । तदात्वं मे भव सुतो देवीदक्षसुताऽस्तुच
इति श्रुत्वा महादेवः सर्वदोब्रह्मणोवरम्। स्मित्वादेवीमुखंवीक्ष्यप्रोवाचचतुराननम्

ब्रह्मंस्त्वद्वाञ्छितं भूयात्किमदेयं पितामह !।
इत्युक्त्वा ब्रह्मणो भालादाविरासीच्छशाङ्कभृत् ॥ ७ ॥

रुदन्सउत्तानशयो ब्रह्मणो मुखमैक्षत । ततोब्रह्माऽपि तं बालं रुदन्तंप्रविलोक्य च ॥
किंमां जनकमाप्यापि त्वं रोदिषि मुहुर्मुहुः । श्रुत्वेतिपृथुकःप्राहयथोक्तंपरमेष्ठिना ॥
नाम्नेरोदिमिमेत्रद्धनामदेहि पितामह !। रोदनाद्रुद्र इत्याख्यांसमायाडिम्भकोऽलभत्

अगस्त्य उवाच

अर्भकत्वं गतोऽपीशः किं रुरोद षडानन !। यदिवेत्सितदाचक्ष्वमहत्कौतूहलं हिमे॥

स्कन्द उवाच

सर्वज्ञस्यकुमारत्वात्किञ्चित्किञ्चिदवैम्यहम्। रोदनेकारणंवच्मि शृणुकुम्भसमुद्भव!
मनसीतिविचारोऽभूद्देवस्य परमात्मनः । बुद्धिवैभवमस्याऽहो वीक्षितुं परमेष्ठिनः
सत्यलोकाधिनाथस्यचतुरास्यस्यवेधसः ।इत्यानन्दात्समुद्भूतोबाष्पपूरोमहेशितुः

अगस्त्य उवाच

किं बुद्धिवैभवंधातुःशम्भुनामनसीक्षितम् । येनानन्दाश्रुसम्भारोबाल्येप्यभवदीशितुः
एतत्कथयमेप्राज्ञ सर्वज्ञानन्दवर्धन !। श्रुत्वागस्त्युदितं वाक्यं तारकारिरुवाचह ॥
देवेन मनसिध्यातमिति कुम्भजनेमुने !। विनाऽपत्यं जनेतारं क उद्धर्तुमिहप्रभुः ॥

एको मनोरथश्चाऽयं द्वितीयोऽयं सुनिश्चितम् ।
अपत्यत्वं गते चास्मिन्स्मर्तुरुत्पत्तिहारिणि ॥ १८ ॥

क्षणंक्षणं समालोक्यमङ्गस्पर्शेक्षणंक्षणम् । एकशय्यासनाहारं लप्स्येऽनेनक्षणेक्षणे

योऽयं न गोचरः क्वापि वाणीमनसयोरपि ।
स मेऽपत्यत्वमासाद्य किं न दास्यति चिन्तितम् ॥ २० ॥

योऽमुं सकृत् पृशेज्जन्तुर्योऽमुं पश्येत्सकृन्मुदा । न सभूयोभिजायेतभवेच्चानन्दमेदुरः

गृहक्रीडनकं मेऽसौ यदि भूयात्कथञ्चन ।
तदा परस्यसौख्यस्य निधानं स्यामसंशयम् ॥ २२ ॥

विधेः समीहितंचेतिनूनं ज्ञात्वा ससर्ववित् । आनन्दबाष्पकलितंचक्षुस्त्रयमदीधरत्
श्रुत्वेत्यगस्तिः स्कन्दस्यभाषितं पर्यमूमुदत् । ननामचाङ्घ्रीप्रोवाचजयसर्वज्ञनन्दन!
विधेरपिमनोज्ञातंशम्भोरपिमनोगतम् । सम्यक्चित्तंत्वयाज्ञातंनमस्तुभ्यंचिदात्मने

स्कन्दोऽपि नितरां तुष्टः श्रोतुरानन्ददर्शनात् ।
धन्योऽस्यगस्त्य! धन्योऽसि श्रोतुं जानासि तत्त्वतः ॥ २६ ॥

नमेश्रमोवृथा जातो ब्रुवतस्तेपुरः कथाम् । इत्यगस्ति समाभाष्य पुनः प्राहषडाननः
देवेरुद्रत्वमापन्ने देवीदक्षसुताभवत् । सापि तप्त्वा तपस्तीव्रं सतीकाश्यांवरार्थिनी
ददर्श लिङ्गरूपेण प्रादुर्भूतं हरं पुरः । अलं तप्त्वा महादेवि! प्रोक्तवन्तमितिस्फुटम्
इदं सतीश्वरं लिङ्गंतव नाम्ना भविष्यति । यथा मनोरथस्तेऽत्र फलितोदक्षकन्यके

तथैतल्लिङ्गमाराध्याऽन्यस्याऽपि हि फलिष्यति ।
कुमारी प्राप्स्यति पतिम्मनसोपि समुच्छ्रितम् ॥ ३१ ॥
एतल्लिङ्गं समाराध्य कुमारोऽपि वराङ्गनाम् ।

यस्य यस्य हि यः कामस्तस्य तस्य हि स ध्रुवम् ॥ ३२ ॥

भविष्यति न संदेहः सतीश्वरसमर्चनात् । सतीश्वरं समभ्यर्च्ययोयो यं यंसमीहते
तस्यतस्य स सक्षिप्रं भविष्यति मनोरथः । इतोऽष्टमेचदिवसे त्वज्जनेताप्रजापतिः

मह्यं दास्यति कन्यां त्वां सफलस्ते मनोरथः ।
इत्युक्त्वा देवदेवेशस्तत्रैवाऽन्तर्हितोऽभवत् ॥ ३५ ॥

सापि स्वभवनंयातासतीदाक्षायणीमुदा । पिताऽपितस्मैप्रादात्तांरुद्रायदिवसेऽष्टमे

स्कन्द उवाच

इत्थं सतीश्वरं लिङ्गंकाश्यांप्रादुरभून्मुने !। स्मरणादपिलिङ्गञ्चदद्यात्सत्त्वगुणं परम्
रत्नेशात्पूर्वतोभागे दृष्ट्वालिङ्गंसतीश्वरम् । मुच्यतेपातकैः सद्यःक्रमाज्ज्ञानञ्चविन्दति

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड
उत्तरार्धेसतीश्वरप्रादुर्भावो नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥

चतुर्नवतितमोऽध्यायः

अमृतेशादिलिङ्गप्रादुर्भाववर्णनम्

स्कन्द उवाच

अन्यान्यपि च लिङ्गानिकथयामि महामुने !। अमृतेशमुखादीनि यन्नामाप्यमृतप्रदम्
पुरासनारुनामासीन्मुनिरत्र गृहाश्रमी । ब्रह्मयज्ञरतो नित्यं नित्यञ्चातिथिदैवतः ॥
लिङ्गपूजारतो नित्यं नित्यं तीर्थाप्रतिग्रही । तस्यर्षेरभवत्पुत्रः सनारोरुपजङ्घनिः ॥
सकदाचिद्गतोऽरण्यं तत्रदष्टःपृदाकुना । अथतत्सवयोभिश्चसआनीतः स्वमाश्रमम्
सनारुणासमुच्छूवस्य नीतः स उपजङ्घनिः । महाश्मशानभूभागं स्वर्गद्वारसमीपतः
तत्रासीच्छ्रीफलाकारंलिङ्गमेकं सुगुप्तवत् । निधायतत्रतंयावच्छवंसञ्चिन्तयेत्सुधीः
सर्पदष्टस्यसंस्कारः कथं भवति चेति वै । तावत्सजीवन्नुत्तस्थौ सुतवच्चोपजङ्घनिः

अथ तंवीक्ष्यस मुनिः स नारुरुपजङ्घनिम् । पुनः प्राणितसंपन्नंविस्मयं प्राप्तवान्परम्
प्राणितव्येऽत्र कोहेतुर्मच्छिशोरुपजङ्घनेः । क्षेत्राद्बहिरहिर्यंहि दष्टानैषीत्परासुताम्
इति यावत्स सन्धत्ते धियं तज्जीवितैकिकाम् ।
तावत्पिपीलिका त्वेका मृतं काऽपि पिपीलिकम् ॥ १० ॥
आनिनायचतत्रैवसोऽप्यनन्निर्गतस्ततः । अथ विज्ञायसमुनिस्तत्त्वंजीवितसूचितम्
मृदुहस्ततलेनैव तावत्खनति वै मुनिः । तावच्छ्रीफलमात्रं हिलिङ्गं तेन समीक्षितम्
सनारुणाथ तल्लिङ्गं तेन तत्रसमर्चितम् । चिरकालीनलिङ्गस्यकृतं नामापिसान्वयम्
अमृतेश्वरनामेदं लिङ्गमानन्दकानने । एतल्लिङ्गस्यसंस्पर्शादमृतत्वं लभेद्ध्रुवम् ॥
अमृतेशं समभ्यर्च्य जीवत्पुत्रः सवै मुनिः । स्वास्पदं समनुप्राप्तो दृष्ट्वाश्चर्यवज्जनैः
तदा प्रभृतितल्लिङ्गममृतेशं मुनीश्वरः । काश्यां सिद्धिप्रदं नृणांकलौ गुप्तं भवेत्पुनः
अमृतेश्वरसंस्पर्शान्मृता जीवन्ति तत्क्षणात् ।
अमृतत्वम्भजन्तेऽत्र जीवन्तः स्पर्शमात्रतः ॥ १७ ॥
अमृतेशसमं लिङ्गं नास्ति क्वापिमहीतले । तल्लिङ्गं शम्भुना तिष्ये कृतं गुप्तं प्रयत्नतः
अमृतेश्वरनामापि ये काश्यां परिगृह्णते । न तेषामुपसर्गोत्थम्भयं क्वापि भविष्यति
मुनेऽन्यच्चमहालिङ्गं करुणेश्वरसंज्ञितम् । मोक्षद्वारसमीपे तु मोक्षद्वारेश्वराग्रतः ॥
दर्शनात्तस्य लिङ्गस्य महाकारुणिकस्य वै ।
न क्षेत्रान्निर्गमो जातु बहिर्भवति कस्यचित ॥ २१ ॥
स्नातव्यं मणिकर्ण्याश्चद्रष्टव्यः करुणेश्वरः । क्षेत्रोपसर्गजाभीतिर्हातव्यापरया मुदा
सोमवासरमासाद्य एकभक्तव्रतश्चरेत् । यष्टव्यः करुणापुष्पैर्व्रतिना करुणेश्वरः ॥
तेन व्रतेन संतुष्टः करुणेशः कदाचन । नतं क्षेत्राद् बहिष्कुर्यात्तस्मात्कार्यंव्रतंत्विदम्
तत्पत्रैस्तत्फलैर्वापिसम्पूज्यःकरुणेश्वरः । योनजानाति तल्लिङ्गंसम्यग्ज्ञानविवर्जितः
तेनार्च्यः करुणावृक्षो देवेशः प्रीयतामिति । योवर्षं सोमवारस्यव्रतंकुर्यादितिद्विजः
प्रसन्नः करुणेशोऽत्र तस्य दास्यति वाञ्छितम् ।
द्रष्टव्यः करुणेशोऽत्र काश्यां यत्नेन मानवैः ॥ २७ ॥

इतितेकरुणेशस्यमहिमोक्तो महत्तरः । यं श्रुत्वानोपसर्गोत्थम्भयंकाश्याम्भविष्यति
मोक्षद्वारेश्वरश्चैव स्वर्गद्वारेश्वरं तथा । उभौ काश्यांनरोदृष्ट्वा स्वर्गम्मोक्षश्चविन्दति
ज्योतीरूपेश्वरंलिङ्गं काश्यामन्यत्प्रकाशते । तस्यसंपूजनाद्भक्ताज्योतीरूपाभवन्तिहि
चक्रपुष्करिणीतीरे ज्योतीरूपेश्वरम्परम् ।
समभ्यच्चर्याप्नुयान्मर्त्यो ज्योतीरूपं न संशयः ॥ ३१ ॥
यदाभागीरथी गङ्गातत्र प्राप्ता सरिद्वरा । तदारभ्यार्चयेन्नित्यं तल्लिङ्गं स्वधुनीमुदा
पुराविष्णौ तपत्यत्र तल्लिङ्गं स्वयमेव हि । तत्राविरासीत्तेजस्वितेनक्षेत्रमिदं शुभम्
चक्रपुष्करिणीतीरे ज्योतीरूपेश्वरं तदा । दूरस्थोऽपीहयोध्यायेत्तस्यसिद्धिरदूरतः
एतेष्वपि च लिङ्गेषु चतुर्दशसु सत्तम । लिङ्गाष्टकं महावीर्यं कर्मबीजदवानलम् ॥
ॐकारादीनिलिङ्गानियान्युक्तानिचतुर्दश । तथादक्षेश्वरादीनिलिङ्गान्यष्टौमहान्तिच
शैलेशादीनि लिङ्गानि तथा यानि चतुर्दश । पुनः षट्त्रिंशदेतानि क्षेत्रसंसिद्धिहेतवे
षट्त्रिंशत्तत्त्वरूपोऽसौ लिङ्गेष्वेषु सदाशिवः ।
अस्मिन्क्षेत्रे वसन्नित्यं तारकं ज्ञानमादिशेत् ॥ ३८ ॥
क्षेत्रस्यतत्त्वमेतद्धि षट्त्रिंशल्लिङ्गरूप्यहो । एतेषाम्भजनात्पुंसांनभवेद्दुर्गतिःक्वचित्
मुनेरहस्यभूतानिलिङ्गान्येतानिनिश्चितम् । एतल्लिङ्गप्रभावाच्च मुक्तिरत्रसुनिश्चिता
मोक्षक्षेत्रमिदंकाशीलिङ्गैरेतैर्महामते ।। एतान्यन्यानि सिद्धानिसम्भवन्ति युगे युगे
आनन्दकाननं शम्भोः क्षेत्रमेतदनादिमत् । अत्र संस्थितिमापन्नामुक्ताएव न संशयः
योगसिद्धिरिहाऽस्त्यैव तपः सिद्धिरिहैव हि ।
व्रतसिद्धिर्मन्त्रसिद्धिस्तीर्थसिद्धिः सुनिश्चितम् ॥४३ ॥
सिद्ध्यष्टकं तु यत्प्रोक्तमणिमादिमहत्तरम् । तज्जन्मभूमिरेवैवशम्भोरानन्दवाटिका
निर्वाणलक्ष्म्याः सदनमेतदानन्दकाननम् । एतत्प्राप्यनमोक्तव्यंपुण्यैः संसारभीरुणा
अयमेव महालाभ इदमेव परन्तपः । एतदेव महत्पुण्यं लब्धा वाराणसीहयत् ॥
अवश्यं जन्मिनो मृत्युर्यत्र कुत्र भविष्यति ।
कर्मानुसारिणी लभ्या गतिः पश्चाच्छुभाशुभा ॥ ४७ ॥

मृत्युं विज्ञाय नियतं गतिं कर्मानुसारिणीम् ।
अवश्यं काशिका सेव्या सर्वकर्मनिवारिणी ॥ ४८ ॥

मानुष्यम्प्राप्य ये मूढानिमेषमितजीवितम् । नसेवन्तेपुरींकाशीं ते मुष्टामन्दबुद्धयः
दुर्लभंजन्म मानुष्यं दुर्लभाकाशिका पुरी । उभयोः सङ्गमासाद्य मुक्ताएवनसंशयः ॥

क च तादृक् तपांसीह क तादृग्योग उत्तमः ।
यादृग्भिः प्राप्यते मुक्तिः काश्यां मोक्षोत्तमोत्तमः ॥ ५१ ॥

सत्यं सत्यं पुनःसत्यंसत्यपूर्वम्पुनः पुनः । नकाशीसदृशी मुक्त्यैभूमिरन्यामहीतले
विश्वेशो मुक्तिदो नित्यं मुक्त्यै चोत्तरवाहिनी ।
आनन्दकानने मुक्तिर्मुक्तिर्नाऽन्यत्र कुत्रचित ॥ ५३ ॥

एक एवहि विश्वेशो मुक्तिदो नान्यएव हि । सएवकाशीम्प्रापयमुक्तिंयच्छतिनान्यतः
सायुज्यमुक्तिरत्रैव सान्निध्यादिरथान्यतः ।
सुलभा साऽपि नो नूनं काश्यां मोक्षोऽस्ति हेलया ॥ ५५ ॥

स्कन्द उवाच

श्रृण्वगस्त्यमहाभागभविष्यंकथयाम्यहम् । कृष्णद्वैपायनोव्यासोऽकथयद्यन्महद्वचः
निश्चिकेतुमनाः पश्चाद्यत्करिष्यति तच्छृणु ॥ ५६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड उत्तरार्धेऽमृतेशादिलिङ्गप्रादुर्भावो नामचतुर्नवतितमोऽध्यायः ॥ ९४ ॥

पञ्चनवतितमोऽध्यायः

व्यासभुजस्तम्भवर्णनम्

व्यास उवाच

श्रृणु सूत! महाबुद्धे! यथा स्कन्देन भाषितम् ।
भविष्यं मम तस्याग्रे कुम्भयोनेर्महामतेः ॥ १ ॥

स्कन्द उवाच

निशामय महाभाग! त्वं मैत्रावरुणे! मुने !। पाराशर्यो मुनिवरो यथा मोहमुपैष्यति
व्यस्य वेदान्महाबुद्धिर्नानाशाखाप्रभेदतः । अष्टादशपुराणानि सूतादीन्परिपाठ्य च
श्रुतिस्मृतिपुराणानां रहस्यंयस्त्वचीकरत् । महाभारतसञ्ज्ञञ्च सर्वलोकमनोहरम्
सर्वपापप्रशमनं सर्वशान्तिकरम्परम् । यस्य श्रवणमात्रेण ब्रह्महत्याविनश्यति ॥
एकदा समुनिःश्रीमान्पर्यटन्पृथिवीतले । सम्प्राप्तो नैमिषारण्यंयत्रसन्तिमुनीश्वराः
अष्टाशीतिसहस्राणिशौनकाद्यास्तपोधनाः । त्रिपुण्ड्रितमहाभालालसद्रुद्राक्षमालिनः
विभूतिधारिणोभक्त्यारुद्रसूक्तजपप्रियान् । लिङ्गाराधनसंसक्ताञ्शिवनामकृतादरान्
एकएवहिविश्वेशो मुक्तिदो नान्य एवहि । इतिब्रुवाणान्सततंपरिनिश्चितमानसान्

विलोक्य सनमुनिर्व्यासस्तान्सर्वान् गिरिशात्मनः ।
उत्क्षिप्य तर्जनीमुच्चैः प्रोवाचेदं वचः पुनः ॥ १० ॥

परिनिर्मथ्य वाग्जालंसुनिश्चित्यासकृद्बहु । इदमेकंपरिज्ञातंसेव्यः सर्वेश्वरोहरिः
वेदेरामायणे चैव पुराणेषु च भारते । आदिमध्यावसानेषु हरिरेकोऽत्र नापरः ॥
सत्यं सत्यं पुनः सत्यंत्रिसत्यं न मृषापुनः । नवेदादपरंशास्त्रंनदेवोऽच्युततः परः
लक्ष्मीशःसर्वदोनान्योलक्ष्मीशोऽप्यपवर्गदः । एकएवहिलक्ष्मीशस्ततोध्येयोनचापरः
भुक्तेर्मुक्तेरिहान्यत्रनान्योदाताजनार्दनात् ।तस्माच्चतुर्भुजेनित्यंसेवनायःसुखेप्सुभिः
विहाय केशवादन्यंये सेवन्तेऽल्पमेधसः । संसारचक्रेगहने तेविशन्ति पुनः पुनः ॥

एक एवहि सर्वेशो हृषीकेशः परात्परः । तं सेवमानः सततं सेव्यस्त्रिजगतां भवेत्
एको धर्मप्रदोविष्णुस्त्वेकोबह्वर्थदोहरिः । एकःकामप्रदश्चक्रीत्वेकोमोक्षप्रदोऽच्युतः
शार्ङ्गिणंये परित्यज्य देवमन्यमुपासते । तेसद्भिश्चबहिष्कार्या वेदहीना यथा द्विजाः
श्रुत्वेतिवाक्यं व्यासस्य नैमिषारण्यवासिनः । प्रवेपमानहृदयाः परिप्रोचुरिदं वचः

ऋषय ऊचुः

पाराशर्यमुने! मान्यस्त्वमस्माकं महामते !।
यतो वेदास्त्वया व्यस्ताः पुराणान्यपि वेत्सि यत् ॥ २१ ॥

यतश्च कर्ता त्वमसि महतोभारतस्य वै । धर्मार्थकाममोक्षाणांविनिश्चयकृतोध्रुवम्
तत्त्वज्ञःकोपरश्चात्रत्वत्तःसत्यवतीसुत ।भवतायत्प्रतिज्ञातंनिश्चित्योत्क्षिप्यतर्जनीम्
अस्मिन्माणवकास्तत्र परिश्रद्दधते नहि । प्रतिज्ञातस्यवचसस्तवश्रद्धाभवेत्तदा ॥

यदाऽऽनन्दवने शम्भोः प्रतिजानासि वै वचः ॥ २५ ॥
गच्छ वाराणसीं व्यास! यत्र विश्वेश्वरः स्वयम् ।
न तत्र युगधर्मोऽस्ति न च लग्ना वसुन्धरा ॥ २६ ॥
इति श्रुत्वा मुनिर्व्यासः किञ्चित्कुपितवद्धृदि ।
जगाम तूर्णं स हितः स्वशिष्यैरयुतोन्मितैः ॥ २७ ॥

प्राप्य वाराणसींव्यासःस्नात्वापञ्चनदेहृदे । श्रीमन्माधवमभ्यर्च्ययमौपादोदकं ततः
यत्र स्नानादिकं कृत्वादृष्ट्वा चैवादिकेशवम् । पञ्चरात्रंततः कृत्वावैष्णवैरभिनन्दितः
अग्रतः पृष्ठतः शङ्खैर्वाद्यमानैः प्रमोदितः । जयविष्णो हृषीकेश गोविन्दमधुसूदन!॥
अच्युतानन्तवैकुण्ठमाधवोपेन्द्र! केशव !। त्रिविक्रम गदापाणे शार्ङ्गपाणे जनार्दन ॥
श्रीवत्सवक्षः श्रीकान्तपीताम्बरमुरान्तक । कैटभारेबलिध्वंसिन्कंसारेकेशिसूदन ॥
नारायणाऽसुररिपो कृष्ण शौरे ! चतुर्भुज ! । देवकीहृदयानन्द! यशोदानन्दवर्धन
पुण्डरीकाक्ष! दैत्यारे !दामोदरबलप्रिय । बलारातिस्तुत हरे! वासुदेव! वसुप्रद !॥
विष्वक्वमूस्ताक्ष्यरथ वनमालिन्नरोत्तम । अधोक्षज क्षमाधार पद्मनाभजलेशय ॥
नृसिंह यज्ञवाराह! गोपगोपालवल्लभ !। गोपीपते गुणातीत गरुडध्वज गोत्रभृत् ॥

जय चाणूरमथन! जयत्रैलोक्यरक्षण !। जयानाद्य जयानन्द जयनीलोत्पलद्युते ॥
कौस्तुभोद्भूषितोरस्कपूतनाधातुशोषण । रक्ष रक्षजगद्रक्षामणे!नरकहारक ॥ ३८॥
सहस्रशीर्षपुरुष पुरुहूतसुखप्रद । यद्भूतं यच्च भाव्यं वैतत्रैकःपुरुषो भवान् ॥ ३६ ॥
इत्यादिनाममालाभिःसंस्तुवन्वनमालिनम् ।स्वच्छन्दलीलयागायन्नृत्यंश्चपरयामुदा
व्यासो विश्वेशभवनं समायातः सहृष्टवत् । ज्ञानवापीपुरोभागे महाभागवतैः सह
विराजमानसत्कण्ठस्तुलसीवरदामभिः । स्वयं तालधरो जातःस्वयं जातःसुनर्तकः
वेणुवादनतत्त्वज्ञः स्वयं श्रुतिधरोऽभवत् । नृत्यंपरिसमाप्यैत्थंव्यासःसत्यवतीसुतः
पुनरूर्ध्वंभुजंकृत्वा दक्षिणंशिष्यमध्यगः । पुनः पपाठ तानेवश्लोकान्गायन्निवोच्चकैः
परिनिर्मथ्य वाग्जालं सुनिश्चित्याऽसकृद्बहु । इदमेकंपरिज्ञातं सेव्यः सर्वेश्वरो हरिः

इत्यादिऽश्लोकसङ्घातं स्वप्रतिज्ञाप्रबोधकम् ।
यावत्पठति स व्यासः सव्यमुत्क्षिप्य वै भुजम् ॥ ४६ ॥
तस्तम्भ तावत्तद्बाहुं सशैलादिः स्वलीलया ।
वाक्स्तम्भश्चाऽपि यस्यासीन्मुनेर्व्यासस्य सन्मुने !॥ ४७ ॥

यतोगुप्तं समागम्यविष्णुर्व्यासमभाषत । अपराद्धं महच्चाऽत्रभवता व्यासनिश्चितम्
तवैतदपराधेन भीतिर्मेऽपि महत्तरा । एक एव हि विश्वेशो द्वितीयो नास्ति कश्चन
तत्प्रसादादहञ्चक्री लक्ष्मीशस्तत्प्रभावतः । त्रैलोक्यरक्षासामर्थ्यं दत्तंतेनैव शम्भुना
तद्भक्त्यापरमैश्वर्यं मया लब्धं वरात्ततः । इदानींस्तुहि तंशम्भुं यदिमेशुभमिच्छसि
अन्यदापि नवै कार्याभवताशेमुषीदृशी । पाराशर्य इति श्रुत्वा सञ्ज्ञयाव्याजहारह ॥

भुजस्तम्भः कृतस्तेन नन्दिना दृष्टिमात्रतः ।
वाक्स्तम्भस्तद्भयाज्जातः स्पृश मे कण्ठकन्दलीम् ॥ ५३ ॥

यथास्तोतुम्भवानीशं प्रभवामिभवान्तकम् । संस्पृश्यविष्णुस्तत्कण्ठंगुप्तमेवजगामह
ततः सत्यवतीसूनुस्तथा स्तम्भितदोर्लतः । प्रारब्धवान्महेशानं परिष्टोतु मुदारधीः

व्यास उवाच

एको रुद्रो न द्वितीयो यतस्तद्ब्रह्मैवैकं नेह नानास्ति किञ्चित् ।

यद्यप्यन्यः कोऽपि वा कुत्रचिद्वा व्याचष्टान्तद्यस्य शक्तिर्मदग्रे ॥ ५६ ॥
यः क्षीराब्धेर्मन्दराघातजातो ज्वालामाली कालकूटोऽतिभीमः ।
तं सोढुं वा कोऽपरोऽभून्महेशाद्यत्कीलाभिः कृष्णतामाप विष्णुः ॥ ५७ ॥
यद्बाणोऽभूच्छ्रीपतिर्यस्य यन्ता लोकेशो यत्स्यन्दनम्भूःसमस्ता ।
वाहा वेदा यस्य येनेषुपाताद्दग्धा ग्रामास्त्रैपुरास्तत्समः कः ॥ ५८ ॥
यं कन्दर्पो वीक्षमाणः समानं देवैरन्यैर्भस्मजातः स्वयं हि ।
पौष्पैर्बाणैः सर्वविश्वैकजेता को वा स्तुत्यः कामजेतुस्ततोऽन्यः ॥ ५९ ॥
यं वै वेदो वेद नो नैव विष्णुर्नोवा वेधा नो मनो नैव वाणी ।
तं देवेशं मादृशः कोऽल्पमेधा याथात्म्याद्वै वेत्त्यहो विश्वनाथम् ॥ ६० ॥
यस्मिन्सर्वं यस्तु सर्वत्र सर्वो यो वै कर्ता योऽविता योऽपहर्ता ।
नोयस्यादिर्यः समस्तादिरेको नोयस्याऽन्तो योऽन्तकृत्तं नतोऽस्मि ॥ ६१ ॥
यस्यैकाख्या वाजिमेधेन तुल्या यस्या नत्या चैकयाल्पेन्द्रलक्ष्मीः ।
यस्य स्तुत्या लभ्यते सत्यलोकायस्यार्चातो मोक्षलक्ष्मीरदूरा ॥ ६२ ॥
नान्यं देवं वेद्म्यहं श्रीमहेशान्नान्यं देवं स्तौमि शम्भोर्ऋतेऽहम् ।
नान्यं देवं वा नमामि त्रिनेत्रात्सत्यं सत्यं सत्यमेतन्मृषा न ॥ ६३ ॥
इत्थं यावत्स्तौति शम्भुं महर्षिस्तावन्नन्दी शाम्भवाद्दृक्प्रसादात् ।
तद्दोःस्तम्भं त्यक्तवांश्चाऽऽबभाषे स्मायं स्मायंब्राह्मणेभ्यो नमो वः ॥ ६४ ॥

नन्दिकेश्वर उवाच

इदं स्तवम्महापुण्यंव्यासते परिकीर्तितम् । यःपठिष्यतिमेधावी तस्यतुष्यतिशङ्करः
व्यासाष्टकमिदम्प्रातः पठितव्यंप्रयत्नतः । दुःस्वप्नपापशमनं शिवसान्निध्यकारकम्
मातृहा पितृहा वाऽपि गोघ्नो बालघ्न एव वा ।
सुरापी स्वर्णहृद् वाऽपि निष्पापोऽस्याःस्तुतेर्जपात् ॥ ६७ ॥

स्कन्द उवाच

पाराशर्यस्तदारभ्य शम्भुभक्तिपरोऽभवत् । लिङ्गंव्यासेश्वरंस्थाप्यघण्टाकर्णह्रदाग्रतः

विभूतिभूषणो नित्यंनित्यं रुद्राक्षभूषणः । रुद्रसूक्तपरोनित्यंनित्यंलिङ्गार्चकोऽभवत्
सकृत्वाक्षेत्रसंन्यासंत्यजेन्नाद्यापिकाशिकाम् । तत्त्वंक्षेत्रस्यविज्ञायनिर्वाणपददायिनः
घण्टाकर्णह्रदे स्नात्वादृष्ट्वाव्यासेश्वरं नरः । यत्रकुत्रमृतोवापिवाराणस्यांमृतोऽभवत्
काश्यांव्यासेश्वरंलिङ्गंपूजयित्वानरोत्तमः । नज्ञानाद्भ्रश्यते क्वापिपातकैर्नाभिभूयते
व्यासेश्वरस्यये भक्तानतेषांकलिकालतः । न पापतो भयं क्वापि न चक्षेत्रोपसर्गतः
व्यासेश्वरःप्रयत्नेन द्रष्टव्यःकाशिवासिभिः । घण्टाकर्णकृतस्नानैःक्षेत्रपातकभीरुभिः

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड
उत्तरार्धेव्यासभुजस्तम्भो नामपञ्चनवतितमोऽध्यायः ॥ ९५ ॥

षण्णवतितमोऽध्यायः

व्यासशापविमोक्षणम्

अगस्त्य उवाच

कृष्णद्वैपायनः स्कन्द! शम्भुभक्तिपरो यदि । यदि क्षेत्ररहस्यज्ञः क्षेत्रसंन्यासकृद्यदि
तथादृष्टप्रभावश्चेत्तथा चेज्ज्ञानिनांवरः । पुरीं वाराणसीं श्रेष्ठां कथं किल शपिष्यति

स्कन्द उवाच

सत्यमेतत्त्वयाऽऽपृच्छि कथयामि मुने! शृणु ।
तस्य व्यासस्य चरितं भविष्यं त्वयि पृच्छति ॥ ३ ॥
यदारभ्यमुनेस्तस्य नन्दीस्तम्भितवान्भुजम् । तदारभ्यमहेशानंसंस्तौतिपरमाद्भुतः
काश्यान्तीर्थान्यनेकानि काश्यां लिङ्गान्यनेकशः ।
तथापि सेव्यो विश्वेशः स्नातव्या मणिकर्णिका ॥ ५ ॥
लिङ्गेष्वेको हि विश्वेशस्तीर्थेषु मणिकर्णिका ।
इति संव्याहरन्व्यासस्तद्द्वयम्बहु मन्यते ॥ ६ ॥

त्यक्त्वा सबहुवाग्जालंप्रातः स्नात्वादिनेदिने । निर्वाणमण्डपेवक्तिमहिमानंमहेशितुः
शिष्याणाम्पुरतोनित्यं क्षेत्रस्यमहिमामहान् । व्याख्यायतेमुदातेनव्यासेनपरमर्षिणा
अत्रयत्क्रियतेक्षेत्रेशुभं वाऽशुभमेव वा । संवर्तेऽपिनतस्यान्तस्तस्माच्छ्रेयःसमाचरेत्

क्षेत्रसिद्धिं समीहन्ते ये चाऽत्र कृतिनो जनाः ।
यावज्जीवं न तैस्त्याज्या सुधीभिर्मणिकर्णिका ॥ १० ॥
चक्रपुष्करिणीतीर्थे स्नातव्यं प्रतिवासरम् ।
पुष्पैः पत्रैः फलैस्तोयैरर्च्यो विश्वेश्वरः सदा ॥ ११ ॥

स्ववर्णाश्रमधर्मश्च त्यक्तव्योनमनागपि । प्रत्यहं क्षेत्रमहिमाश्रोतव्यः श्रद्धयाऽसकृत्
यथाशक्तिचदेयानिदानान्यत्र सुगुप्तवत् । अन्नान्यपि चदेयानिविघ्नान्परिजिहीर्षुणा
परोपकारणश्चात्र कर्तव्यंसुधिया सदा । पर्वस्वपिविशेषेणस्नानदानादिकाःक्रियाः
विशेषपूजाकर्तव्याःसुमहोत्सवपूर्वकम् । कार्यास्तथाधिकायात्राःसमर्च्याःक्षेत्रदेवताः
अत्र मर्म न वक्तव्यं सुधिया कस्यचित्क्वचित् । परदारपरद्रव्यपरापकरणन्त्यजेत्
परापवादोनोवाच्यः परेर्ष्यांन च कारयेत् । असत्यं नैव वक्तव्यम्प्राणैः कण्ठगतैरपि
अत्र त्यजन्तु रक्षार्थमसत्यमपि भाषयेत् । येन केन प्रकारेण शुभेनाप्यशुभेन वा ॥
अत्रत्यःप्राणिमात्रोऽपिरक्षणीयःप्रयत्नतः । एकस्मिन्रक्षिते जन्तावत्रकाश्यांप्रयत्नतः

त्रैलोक्यरक्षणात्पुण्यं यत्स्यात्तत्स्यान्न संशयः ।
ये वसन्ति सदा काश्यां क्षेत्रसंन्यासकारिणः ॥ २० ॥
त एव रुद्रा मन्तव्या जीवन्मुक्ता न संशयः ।
ते पूज्यास्ते नमस्कार्यास्ते सन्तोष्याः प्रयत्नतः ।
तेषु वै परितुष्टेषु तुष्येद्विश्वेश्वरः स्वयम् ॥ २१ ॥

काश्यांवसन्तियेमर्त्यादूरस्थैरपिसन्नरैः । योगक्षेमोविधातव्यस्तेषांविश्वेशितुर्मुदे

प्रसरस्त्विन्द्रियाणां च निवार्योऽत्र निवासिभिः ।
मनसोऽपि हि चाञ्चल्यमिह वार्यम्प्रयत्नतः ॥ २३ ॥
मरणं नाभिकाङ्क्षेद्धि काङ्क्ष्यो मोक्षोऽपि नो पुनः ।

शरीरशोषणोपायः कर्तव्यः सुधिया न हि ॥ २४ ॥

शरीरसौष्ठवं काङ्क्ष्यं व्रतस्नानादिसिद्धये । आयुर्बह्वत्रवैचिन्त्यंमहाफलसमृद्धये ॥
आत्मरक्षाऽत्रकर्तव्या महाश्रेयोभिवृद्धये । अत्रात्मत्यजनोपायंमनसापिनचिन्तयेत्

एकस्मिन्नपि यच्चाह्नि काश्यां श्रेयोऽभिलभ्यते ।
न तु वर्षशतेनापि तदन्यत्राऽऽप्यते क्वचित् ॥ २७ ॥

अन्यत्र योगाभ्यसनाद्यावज्जन्मयदर्ज्यते । वाराणस्यां तदेकेन प्राणायामेन लभ्यते
सर्वतीर्थावगाहाच्च यावज्जन्मयदर्ज्यते । तदानन्दवने प्राप्यं मणिकर्ण्येकमज्जनात्
सर्वलिङ्गार्चनात्पुण्यं यावज्जन्म यदर्ज्यते । सकृद्विश्वेशमभ्यर्च्यश्रद्धयातदवाप्यते
यजन्मनां सहस्रेण निर्मलम्पुण्यमर्जितम् । तत्पुण्यपरिवर्तेन भवेद्विश्वेशदर्शनम् ॥
गवांकोटिप्रदानेन सम्यग्दत्तेनयत्फलम् । तत्फलंसम्यगाप्येतविश्वेश्वरविलोकनात्
यत्षोडशमहादानैः पुण्यम्प्रोक्तम्महर्षिभिः । तत्पुण्यंजायतेपुंसांविश्वेशेपुष्पदानतः
अश्वमेधादिभिर्यज्ञैर्यत्फलम्प्राप्यतेऽखिलैः । पञ्चामृतानांस्नपनाद्विश्वेशे तदवाप्यते
वाजपेयसहस्रेण सम्यगिष्टेन यत्फलम् । सकृन्महार्हैर्नैवेद्यैर्विश्वेशे तच्छताधिकम्
ध्वजातपत्रं च मरं विश्वेशे यः समर्पयेत् । एकच्छत्रं सवै राज्यंप्राप्नुयाद्वसुधातले॥
महापूजोपकरणं योऽर्पयेद्विश्वभर्तरि । न तं सम्पत्तिसम्भाराविमुञ्चन्तीह कुत्रचित्

सर्वर्तुकुसुमाढ्याश्च यः कुर्यात्पुष्पवाटिकाम् ।
तदङ्गणे कल्पवृक्षाश्छायां कुर्वन्ति शीतलाम् ॥ ३८ ॥

यः क्षीरस्नपनार्थं वै विश्वेशे धेनुमर्पयेत् । क्षीरार्णवतटे तस्यनिवसेयुः पितामहः
विश्वेशराजसदनेयःसुधांचित्रमेव वा । कारयेत्तस्य भवनं कैलासे चित्रितम्भवेत्
ब्राह्मणान्यतिनो वापितथैवशिवयोगिनः । भोजयेद्योत्रवैकाश्यामेकैकगणनाक्रमात्
कोटिभोज्यफलन्तस्य श्रद्धयानात्र संशयः । तपस्त्वत्र प्रकर्तव्यंदानमत्र प्रदापयेत्
विश्वेशस्तोषणीयोत्रस्नानहोमजपादिभिः ।अन्यत्रकोटिजप्येनयत्फलम्प्राप्यतेनरैः

अष्टोत्तरशतंतप्त्वा तदत्र समवाप्यते ॥ ४३ ॥

कोटिहोमेन यत्प्रोक्तं फलमन्यत्र सूरिभिः । अष्टोत्तराहुतिशतात्तदत्रानन्दकानने ॥

यो जपेद्रुद्रसूक्तानि काश्यां विश्वेशसन्निधौ ।
पारायणेन वेदानां सर्वेषां फलमाप्यते ॥ ४५ ॥

तस्य पुण्यंन जानामिचिन्तितेचाक्षरेपरे । काश्यांनित्यंप्रवस्तव्यंसेव्योत्तरवहासदा

आपद्यपि हि घोरायां काशी त्याज्या न कुत्रचित् ।
यतः सर्वापदां हर्ता त्राता विश्वपतिः प्रभुः ॥ ४७ ॥

अवन्ध्यं दिवसं कुर्यात्स्नानदानजपादिभिः ।
यतः काश्यां कृतं कर्म महत्त्वाय प्रकल्पते ॥ ४८ ॥

कृच्छ्रचान्द्रायणादीनिकर्तव्यानिप्रयत्नतः । तथेन्द्रियविकाराश्चनबाधन्तेऽत्रकर्हिचित्

यदीन्द्रियाणि कुर्वन्ति विक्रियामिह देहिनाम् ।
तदाऽत्र वाससंसिद्धिर्विघ्नेभ्यो नैव लभ्यते ॥ ५० ॥

अगस्त्य उवाच

कृच्छ्रचान्द्रायणादीनि व्यासो वक्ष्यति यानि वै ।
तेषां स्वरूपमाख्याहि स्कन्देन्द्रियविशुद्धये ॥ ५१ ॥

स्कन्द उवाच

कथयामि महाबुद्धे! कृच्छ्रादीनि तवाग्रतः । यानिकृत्वात्रमनुजोदेहशुद्धिंलभेत्पराम्

एकभक्तेन नक्तेनतथैवायाचितेन च । उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः ॥

वटोदुम्बरराजीवबिल्वपत्रकुशोदकम् । प्रत्येकं प्रत्यहम्पीतं पर्णकृच्छ्रः प्रकीर्तितः

पिण्याकघृततक्राम्बुसक्तूनाम्प्रतिवासरम् । एकैकमुपवासश्चकृच्छ्रःसौम्यःप्रकीर्तितः

हविषाप्रातरश्नीतहविषासायमेव च । हविषा याचितंत्रींस्तु सोपवासस्त्र्यहंवसेत्

एकैकं ग्रासमश्नीयाद्दहानि त्रीणि पूर्ववत् ।
त्र्यहञ्चोपवसेदन्त्यमतिकृच्छ्रश्चरन्द्विजः ॥ ५७ ॥

कृच्छ्रातिकृच्छ्रम्पयसा दिवसानेकविंशतिः । द्वादशाहोपवासेनपराकःपरिकीर्त्तितः

त्र्यहम्प्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम् । त्र्यहञ्चोपवसेदन्त्यंप्राजापत्यश्चरन्द्विजः

गोमूत्रं गोमयंक्षीरंदधिसर्पिः कुशोदकम् । एकरात्रोपवासश्चकृच्छ्रःसान्तपनःस्मृतः

पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः । सप्ताहेनतुकृच्छ्रोऽयं महासान्तपनःस्मृतः

तप्तकृच्छ्रञ्चरन्विप्रो जलक्षीरघृतानिलान् ।
एतांस्त्र्यहम्पिबेदुष्णान्सकृत्स्नायी समाहितः ॥ ६२ ॥

त्र्यहमुष्णाः पिबेदापस्त्र्यहमुष्णम्पयः पिबेत् ।
त्र्यहमुष्णं घृतम्प्राश्य वायुभक्षो दिनत्रयम् ॥ ६३ ॥

पलमेकम्पयः पीत्वा सर्पिषश्च पलद्वयम् । पलमेकं तु तोयस्य तप्तकृच्छ्र उदाहृतः ॥

गोमूत्रेण समायुक्तं यावकंयःप्रयोजयेत् । कृच्छ्रमेकाह्निकम्प्रोक्तंशरीरस्य विशोधनम्

हस्तावुत्तानतः कृत्वा दिवसम्मारुताशनः ।
रात्रौ जले स्थितोऽव्युष्टः प्राजापत्येन तत्समम् ॥ ६६ ॥

एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्लेचवर्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणंस्मृतम्

एकैकंवर्धयेद् ग्रासंशुक्लेकृष्णेचह्रासयेत् । भुञ्जीतदर्शेनोकिञ्चिदेषचान्द्रायणोविधिः

चतुरःप्रातरश्नीयात्पिण्डान्विप्रःसमाहितः ।चतुरोस्तमितेसूर्येशिशुचान्द्रायणंस्मृतम्

अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते ।
नियतात्मा हविष्यस्य यतिचान्द्रायणं स्मृतम् ॥ ७० ॥

यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः ।
मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम् ॥ ७१ ॥

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुद्ध्यति ।
विद्यातपोभ्यांभूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥ ७२ ॥

सज्ज्ञानम्भवेत्पुंसांसम्यक्काशीनिषेवणात् ।काशींनिषेवणेनस्याद्विश्वेशकरुणोदयः

ततोमहोदयावाप्तिः कर्मनिर्मूलनक्षमा । अतः काश्यांप्रयत्नेन स्नानं दानं तपो जपः

व्रतं पुराणश्रवणं स्मृत्युक्ताध्वनिषेवणम् ।
प्रतिक्षणं प्रतिदिनं विश्वेशपदचिन्तनम् ॥ ७५ ॥

लिङ्गार्चनं त्रिकालं च लिङ्गस्यापि प्रतिष्ठितिः ।
साधुभिः सहसँल्लापो जल्पः शिवशिवेति च ॥ ७६ ॥

अतिथेश्चापि सत्कारो मैत्रीतीर्थनिवासिभिः ।
आस्तिक्यबुद्धिर्विनयो मानामानसमानधीः ॥ ७७ ॥
अकामितात्वनौद्धत्यमरागित्वमहिंसनम् । अप्रतिग्रहवृत्तिश्च मतिश्चानुग्रहात्मिका
अदम्भिता त्वमात्सर्यमप्रार्थितधनागमः । अलोभित्वमनालस्यमपारुष्यमदीनता ॥
इत्यादि सत्प्रवृत्तिश्च कर्तव्याक्षेत्रवासिना । प्रत्यहं चेतिशिष्येभ्यःसधर्ममुपदेक्ष्यति
नित्यं त्रिषवणस्नायी नित्यं भिक्षाकृताशनः ।
लिङ्गपूजार्चको नित्यमित्थं व्यासोऽवसत्पुरा ॥ ८१ ॥
एकदातस्य जिज्ञासां कर्तुं देवीं हरोऽवदत् । अद्यभिक्षाटनं प्राप्ते व्यासे परमधार्मिके
अपिसर्वगतेकापिभिक्षां मायच्छसुन्दरि !। तथेत्युक्त्वाभवानीसा भवंभवनिवारणम्
नमस्कृत्यप्रतिगृहंतस्यभिक्षांन्यषेधयत् । समुनिःसहितः शिष्यैर्भिक्षामप्राप्यदूनवत्
वेलातिक्रममालोक्य पुनर्बभ्रामतांपुरीम् । गृहेगृहे परिप्राप्ता भिक्षान्यैः सर्वभिक्षुकैः
तदह्निनालभद्भिक्षांसशिष्यःसमुनिःक्वचित् । अथसायंतनंकर्म कृत्वाछात्रैःसमन्वितः
उपोषणपरो भूत्वा तथैवासीदहर्निशम् ।
तथान्येद्युर्मुनिर्व्यासः कृत्वा माध्याह्निकं विधिम् ॥ ८७ ॥
ययौ भिक्षाटनं कर्तुं सशिष्यःपरितःपुरीम् । सर्वत्र सपरिश्रान्तः प्रतिसौधंमुहुर्मुहुः
न क्वापि लब्धवान्भिक्षाम्भाग्यहीनो धनं यथा ।
अथ चिन्तितवान्व्यासः परिश्रान्तः परिभ्रमन् ॥ ८६ ॥
कोहेतुर्यन्नलभ्येतभिक्षायत्नेनरक्षिता । अन्तेवासिन आहूयव्यासःपप्रच्छचाखिलान्
भवद्भिरपि नोभिक्षा परिप्राप्तेति गम्यते । किमत्र पुरि सम्वृत्तं द्वित्रायातममाज्ञया
द्वितीयेऽह्न्यपियद्भिक्षानलभ्येतातियत्नतः । अनिष्टं किञ्चिदत्रासीन्महागुरुनिपातजम्
अन्नक्षयोवासर्वस्यांनगर्यामभवत्क्षणात् । राजदण्डोऽथयुगपज्जातःसर्वपुरौकसाम्
अथवावारिताभिक्षाकेनाप्यस्मासुचेर्ष्यया । पुरौऽसोभवन्दुस्थास्तूपसर्गेणकेनचित्
किमेतदखिलं ज्ञात्वासमागच्छतसत्वरम् । द्वित्राः पवित्रवरणात्प्राप्यानुज्ञां गुरोरथ
समाचख्युः समागम्य दृष्टवृधि तत्पुरौकसाम् ।

शिष्या ऊचुः

शृण्वन्त्वाराध्यचरणानोपसर्गोऽत्रकश्चन । नान्नक्षयोवासर्वस्यांनगर्यामिहकुत्रचित्
यत्र विश्वेश्वरः साक्षाद्यत्राऽमरधुनीस्वयम् । त्वादृशायत्रमुनयःकभीस्तत्रोपसर्गजा
समृद्धिर्या गृहस्थानामिह विश्वेशितुः पुरि ।
न सर्धिरस्ति वैकुण्ठे त्वल्पास्ता अलकादयः ॥ ६८ ॥
रत्नाकरेषु रत्नानि नतावन्ति महामुने !। यावन्ति सन्तिविश्वेशनिर्माल्योपभुजांगृहे
गृहेगृहेऽत्र धान्यानां राशयोयादृशःपुनः । नतादृशः कल्पवृक्ष दत्ता ऐन्द्रे पुरेक्वचित्
यत्रसाक्षाद्विशालाक्षी सुविस्तारफलप्रदा । नतत्रपुरिसर्वस्यां नरो वैनिर्धनः क्वचित्
निर्वाणलक्ष्म्याः सदनेत्वस्मिन्नानन्दकानने । मोक्षोपियत्रसुलभःकिमन्यत्तत्रदुर्लभम्
सीमन्तिन्यः स्त्रियः सर्वाः पतिव्रतपरायणाः ।
सर्वा भवानीरूपिण्यो विश्वेशार्पितसत्क्रियाः ॥ १०३ ॥
यावन्तः पुरुषाः काश्यांसर्वएव गणाधिपाः । सर्वएव कुमारा वै सर्वे तारकदृष्टयः ॥
त्रिपुण्ड्राङ्कितभाला येते सर्वेचन्द्रमौलयः । उपसर्गसहस्रैश्च पीड्यमाना अपीह ये
नत्यजन्ति सदाकाशीं सर्वज्ञा एव ते खिलाः । गृहे गृहेऽपिवटवोब्रह्मवादविवादिनः
स्वर्धुनीधूतकलुषाः सन्तीहचतुराननः । निर्वाणलक्ष्मीपतयः क्षेत्रसंन्यासकारिणः
सर्वएव हृषीकेशाः सर्वेवै पुरुषोत्तमाः । अच्युता एव विज्ञेया एतत्क्षेत्रपरिग्रहाः ॥
स्त्रियो वा पुरुषा वापि सर्व एव न संशयः । सर्व एव त्रिनयनाः सर्व एव चतुर्भुजा
श्रीकण्ठाःसर्वएवात्र सर्वेमृत्युञ्जयाध्रुवम् । मोक्षश्रीश्रितवर्ष्माणस्त्वर्धनारीश्वरायतः
धर्मराशिःपरश्चात्र महान्तोऽत्रार्थराशयः । सर्वेकामाः फलन्त्यत्रकैवल्यञ्चात्रनिर्मलम्
नगर्भवाससंसर्गः काशीसंस्थितिकारिणाम् । नकलिश्चात्रबाधेतकालो नैव प्रबाधते
एनांसि नाऽत्र बाधन्ते विश्वेशशरणार्थिनः ।
यत्र विश्वेश्वरः साक्षान्नादबिन्दुकलात्मकः ॥ ११३ ॥
ध्वनिरूपी हि तत्रास्ति प्रणवो मन्त्रविग्रहः ।
अतो विग्रहवन्तोऽत्र सन्ति वेदा विनिश्चितम् ॥ ११४ ॥

सरस्वती सरिद्रूपा ह्यतः शास्त्रनिकेतनम् । आनन्दकाननं सर्वं धर्मशास्त्रकृतालयम्
यावन्तोदिविवैवास्तावन्तोऽत्रमृषानहि । नीराजयन्तिविश्वेशंरात्रौरात्रौसदाऽहयः
स्वफणामणिदीपैश्च प्राप्यकाशींरसातलात् । समुद्राःसर्वएवात्र कामधेनुव्रजान्विताः
पञ्चपीयूषधाराभिर्विश्वेशं स्नपयन्तिहि । मन्दारःपारिजातश्च सन्तानो हरिचन्दनः

कल्पद्रुमश्च पञ्चैते तरुभिः सह सर्वदा ॥ ११६ ॥

सर्वैसुरनिकायाश्च सर्व एव महर्षयः । योगिनः सर्वएवात्र काशीनाथमुपासते ॥

विद्यानां सदनं काशी काशी लक्ष्म्याः परालयः ।
मुक्तिक्षेत्रमिदं काशी काशी सर्वा त्रयीमयी ॥ १२१ ॥
इति श्रुत्वा मुनिवरः पाराशर्यो महातपाः ।
एवम्बभाषे ताञ्छिष्यान्पुनः श्लोकम्पठन्त्वमुम् ॥ १२२ ॥

शिष्या ऊचुः

विद्यानां चाश्रयः काशी काशीलक्ष्म्याः परालयः ।
मुक्तिक्षेत्रमिदं काशी काशी सर्वा त्रयीमयी ॥ १२३ ॥

स्कन्द उवाच

निशम्येति तदा व्यासः क्रोधान्धीकृतलोचनः ।
क्षुत्कृशानुज्वलन्मूर्तिः काशीं शप्स्यति कुम्भजः ॥ १२४ ॥

व्यास उवाच

माभूत्त्रैपूरुषीविद्यामाभूत्त्रैपूरुषंधनम् । माभूत्त्रैपूरुषीमुक्तिःकाशींव्यासःशपन्निति
गर्वः परोऽत्रविद्यानांधनगर्वोऽत्रवैमहान् । मुक्तिगर्वेणनोभिक्षांप्रयच्छन्त्यत्रवासिनः

इति कृत्वा मतिं व्यासः काश्यां शापमदात्तदा ।
दत्वाऽपि शापं स मुनिर्भिक्षितुं क्रोधवान्ययौ ॥ १२७ ॥

प्रतिगेहं त्वरायुक्तः प्रविशन्व्योमदत्तदृक् । बभ्राम नगरींसर्वांकापिभैक्षं न लब्धवान्

अंशुमालिनमावीक्ष्य मनाग्लोहितमण्डलम् ।
भिक्षापात्रम्परिक्षिप्य निर्ययावाश्रमम्प्रति ॥ १२६ ॥

अथ गच्छन्महादेव्या गृहद्वारि निषण्णया ।
प्राकृतस्त्रीस्वरूपिण्या भिक्षायै प्रार्थितोऽतिथिः ॥ १३० ॥

गृहिण्युवाच

भगवन्भिक्षुकास्तावदद्य दृष्टा न कुत्रचित् ।
असत्कृत्यातिथिं नाथो न मे भोक्ष्यति कर्हिचित् ॥ १३१ ॥

वैश्वदेवादिकं कर्म कृत्वा गृहपतिर्मम । प्रतीक्षेताऽतिथिपथं तस्मात्त्वमतिथिर्भव
विनाऽतिथिं गृहस्थोयस्त्वन्नमेकोनिषेवते । निषेवतेऽघंसपरंसहितः स्वपितामहैः

तस्मात्त्वरितमायाहि कुरु मे पत्युरीहितम् ।
गार्हस्थ्यं सफलं कर्तुमिच्छतोऽतिथिपूजनात् ॥ १३४ ॥
इतिश्रुत्वा गतामर्षो व्यासस्तामाह विस्मितः ।

व्यास उवाच

भद्रे! का त्वं कुतः प्राप्ता पूर्वं दृष्टा न कुत्रचित् ॥ १३५ ॥

मन्ये धर्ममयीमूर्तिः कापित्वंशुचिमानसा । त्वद्दर्शनात्परांप्रीतिंसंप्राप्तानीन्द्रियाणिमे
त्वं सुधैव भवेत्प्रायःसर्वावयवसुन्दरि !। मन्दराघातसंत्रासात्त्यक्तक्षीरार्णवस्थितिः
कलासुधाकरस्याथ कुहूराहुभयार्दिता । सीमन्तिनीस्वरूपेण तिष्ठेःकाश्यामनिर्भया

अथवा कमलाऽसि त्वं विहाय कमलालयम् ।
निशि संकोचिनं काश्यां विकाशिन्यां वसेः सदा ॥ १३६ ॥
किं वा नु करुणामूर्तिरिह काशिनिवासिनाम् ।
सर्वदुःखौघहरिणी परानन्दप्रदायिनी ॥ १४० ॥
वाराणस्याः किमथवाऽधिष्ठात्री देवतात्वमु ।
किं वा निर्वाणलक्ष्मीस्त्वं या काश्यां परिगीयते ॥ १४१ ॥

श्वपाकं यायजूकं वाप्रान्तेऽलंकुर्वतीसमम् । मद्भाग्यं वापरिणतमेतद्योषित्स्वरूपतः
अथवा साभवेन्नूनं याक्षेत्रे परिगीयते । भक्तपोतप्रदा भक्त्याभवानी भवनाशिनी॥
सर्वथैव न नारीत्वं नासुरी नैवकिन्नरी । विद्याधरीननो नागी नोगन्धर्वीनयक्षिणी

त्वमिष्टदेवतैवासिकाचिन्मेमोहहारिणी । केयंचिन्ताथवामेऽत्र काचित्त्वंभवसुन्दरि
परवानस्म्यहं जातस्तव दर्शनतो धुना । अवश्यमेव कर्ताऽस्मितवादेश्यं तदादिश
एकं तपोव्ययं हित्वा कारयिष्यसि यत्पुनः ।
तदेवाऽहं करिष्यामि विधेयः शुभलोचने !॥ १४७ ॥
नवचस्त्वादृशीनां हिमहत्त्वं हापयेत्सताम् । परंत्वं कासिसुभगेसत्यंब्रूहिममाग्रतः
अथवा तव देहेस्मिन्कासत्यं निर्मलेक्षणे। इति पृष्टाहमुनिना साविश्वायुर्वटोद्भव !॥
अत्रत्यस्यैवहिमुनेर्गृहिणीगृहमेधिनः । नित्यंवीक्ष्येचरन्तंत्वांभिक्षांशिष्यगणैर्वृतम्
त्वमेव मां नो जानीषे जानेत्वामहमेवहि । तपस्विन्किंबहूक्तेनयावन्नास्तंव्रजेद्रविः
प्राणनाथस्यमे तावदातिथ्यं सफलीकुरु । तच्छ्रुत्वा समुनिःप्राहविनयानतकन्धरः
व्यास उवाच
अस्ति मे नियमः कश्चित्ससिद्धिं चेद्व्रजेच्छुभे ।
एकभिक्षां तदाऽहं तु करिष्ये नान्यथा पुनः ॥ १५३ ॥
तपस्व्युदीरितंश्रुत्वासाप्रोवाचवचस्ततः । अविशङ्कंवदमुनेकस्तेऽस्तिनियमःसुधीः
ममभर्तुः प्रसादेन किञ्चिन्न्यूनं यतोऽत्र न । इतिश्रुत्वाप्रहृष्टात्मासतामाह तपोधनः
अयुतं ममशिष्यायेतैः सपङ्क्तिमहंवृणे । अस्तंयावन्नयात्यर्कस्तावद्भोक्ष्येऽन्यथा नहि
निशम्येति प्रहृष्टास्या सा प्रोवाच मुनिं ततः ।
किंविलम्बेन तद्याहि सर्वाञ्छिष्यान्समाह्वय ॥ १५७ ॥
पुनः प्राह सतीं साध्वि! त्वेतावत्सिद्धिरस्ति ते ।
येन तृप्तिं गमिष्यन्ति मच्छिष्याः सर्व एव ते ॥ १५८ ॥
स्मित्वाऽथ साऽब्रवीत्तन्तु मुनेर्भर्तुरनुग्रहात् । सिद्धमेवसदैवास्तेसर्वं तावन्ममालये
यावतार्थिजनस्तृप्तिमेतिसर्वोऽपिसर्वशः । वयं न तादृङ्महिलाभर्तृसन्देहकारिकाः॥
आयातोऽर्थी यदागेहे सिद्धंकार्यंतदैव हि । परिपूर्णादिशः सर्वाः परिपूर्णमनोरथाः
परिपूर्णं गृहं सर्वं पत्युः पादप्रसादतः । याहितूर्णं समायाहियावदन्नार्थिभिःसह ॥
पतिर्मेबहुकालीनः कालंन सहते चिरम् । प्रियातिथिः प्रियतमस्तदातिथ्यसमृद्धये

आशु गत्वा समागच्छ यावन्नास्तमितो रविः ।
इति प्रहृष्टस्त्वरितः शिष्यानाहूय सर्वतः ॥ १६४ ॥
आगत्य तांपुनःप्राह दृष्ट्वा तन्मार्गलोचनाम् ।
मातः ! सर्वेसमायातास्त्वरितं देहि भोजनम् ॥ १६५ ॥
अस्ताचलं हि समया समियादेष भास्करः ।
इत्युक्त्वा मन्दिरस्याऽन्तर्विविशुस्ते तपोधनाः ॥ १६६ ॥
तन्मण्डपमणिज्योतिस्तत्याहितदिनश्रियः ।
यावद्गच्छन्ति तत्सौधमध्यमाशु तपस्विनः ॥ १६७ ॥
पादौ प्रक्षाल्य तावत्ते कैश्चित्कैश्चित्समर्च्य च ।
कतिचित्परिविष्टान्ना भोक्तुमेवोपवेशिताः ॥ १६८ ॥
तद्दिव्यपाकसम्भारान् दृष्ट्वा तद्गद्दृष्टयः क्षणात् ।
परां तृप्तिमुपागच्छन्घ्राणन्यामोदराजिभिः ॥ १६९ ॥
अतितृप्तिं समापन्नास्ते तदन्ननिषेवणात् ।
आचान्ताश्चन्दनैः स्रग्भिरम्बरैः परिभूषिताः ॥ १७० ॥
अथ सान्ध्यंविधिंकृत्वाप्रोपविश्यतदग्रतः । अभिनन्द्यमहाशीर्भिर्यावद्गन्तुं प्रचक्रमुः
तावद्वृद्धगृहस्थेन गृहिणालाकटाक्षिता । पप्रच्छतीर्थेवसतांकोधर्मोमुख्यएवहि
तथा तदनुसारेण तीर्थेवर्तामहे वयम् । सर्वधर्मविदां श्रेष्ठः श्रुत्वा तद्गृहिणीवचः
तदादरसुधाक्लिन्नमहान्नस्वादतर्पितः ।
प्रत्युवाच मुनिर्व्यासः स्मित्वा तां सर्ववित्तमाम् ॥ १७४ ॥
व्यास उवाच
स्वच्छान्तःकरणे मातर्महामिष्टान्नमानदे !। सएषधर्मोनान्योऽस्तियस्त्वयापरिचर्यते
त्वमेवधर्मज्ञानासिपतिशुश्रूषणे रता । यदिपृच्छसिमां सत्यं तदाकिञ्चनवच्मिते
वक्तव्यमेव पृष्टेन मनागपि विजानता । स एवधर्मःसुभगे!नाऽन्योधर्मोऽस्तिकश्चन
येनैष तोषमायाति तव भर्ता चिरन्तनः ।

गृहिण्युवाच

अयं धर्मो भवेन्नूनं क्रियते च स्वशक्तितः ॥ १७८ ॥
साधारणानि धर्माणि सम्पृच्छे तानि मे वद ।

व्यास उवाच

अनुद्वेगकरं वाक्यं परोत्कर्षसहिष्णुता ॥ १७९ ॥
विचार्य कारिता नित्यं स्वधिष्ण्योदयचिन्तनम् ।

गृहस्थ उवाच

एषु धर्मेषु भो विद्वंस्त्वयि कोऽस्तीह तद्वद ॥ १८० ॥
ततः स्थगितवद्व्यासस्तस्थौ किञ्चिन्न चोक्तवान् ।
ततः पुनर्गृहस्थेन स हि प्रोक्तस्तपोधनः ॥ १८१ ॥

यद्येत एववैधर्मास्त्वया ये प्रतिपादिताः । तद्वान्तता तवैवेक्षि दानं शापस्यचोत्तमम्
त्वय्येव हि दया सम्यग्धैर्यं त्वय्येव चोत्तमम् ।
त्वयि सम्भावनाऽस्त्येव कामक्रोधविनिग्रहे ॥ १८३ ॥

त्वमेव सम्यग्जानीषे वक्तुञ्चोद्वेगवर्जितम् । त्वय्येवसम्यग्दृश्येतपरोत्कर्षसहिष्णुता
विचार्य कारितायाश्च त्वमेव निलयो महान् ।
स्वस्य धिष्ण्यस्य च भवांश्चिन्तयेदुदयं ध्रुवम् ॥ १८५ ।

ममैकम्ब्रूहिभोविद्रञ्छापंदद्याच्चयःक्रुधा। अलभन्स्वार्थसंसिद्धिमभाग्यात्तस्यकस्यसः

व्यास उवाच

यःस्वार्थसिद्धिमलभन्नभाग्याच्छपति क्रुधा । सशापःप्रत्युत भवेच्छप्तुरेवाविवेकिनः

गृहस्थ उवाच

भवताभ्रमता विप्र!नाप्ताभिक्षा यदाप्यहो । तदापराद्धंकिमिह वराकैः क्षेत्रवासिभिः
तपस्विञ्छृणुमे वाक्यं राजधान्यांममेहयः । ऋद्धिं द्रष्टुं नशक्नोति परिशप्तःसएवहि
अद्य प्रभृति न क्षेत्रे मदीये शापवर्जिते । आवसक्रोधनमुने न वासे योग्यताऽत्रते
इदानीमेव निर्गच्छबहिः क्षेत्रादितोभव । त्वद्विधानांनयोग्यं मेक्षेत्रं मोक्षैकसाधनम्

अत्राल्पमपियद्दौष्ट्यं कृतंमत्क्षेत्रवासिनाम् । तद्दौष्ट्यस्यपरीपाकोरुद्रपैशाच्यमेवहि
तच्छ्रुत्वावेपमानः सपरिशुष्कौष्ठतालुकः । जगाम शरणंगौरीं लुठंस्तच्चरणाग्रतः ॥
उवाचचवचोमातस्त्राहि त्राहिभृशंरुदन् । अनाथस्त्वत्सनाथोऽहंबालिशस्तवबालकः
शरणागतञ्च सन्त्राहिरक्षमां शरणागतम् । बहूनामागसांगेहमस्माकं दुष्टमानसम्
शम्भुशापोऽन्यथाकर्तुं भवत्यापिनशक्यते । अहञ्चशरणायातस्तदेकं क्रियतां शिवे
प्रत्यष्टमि सदा क्षेत्रे प्रतिभूतञ्च पार्वति । दिशप्रवेशनादेशं नेशस्त्वद्वाक्यलङ्घकः ॥
इत्युक्तातेन मुनिनाभवानी करुणाजनिः । मुखम्महेशितुर्वीक्ष्य तथेत्याहतदाज्ञया
अथान्तर्हितवन्तौतौशिवौक्षेत्रशिवङ्करौ । व्यासोपिनिर्ययौक्षेत्रात्स्वापराधवशंवदन्
अहोरात्रं सपश्यन्वैक्षेत्रं दृष्टेरदूरगम । प्राप्याष्टमीञ्च भूताञ्च मध्ये क्षेत्रं सदाविशेत्
लोलार्कादग्निदिग्भागे स्वर्धुनीपूर्वरोधसि ।
स्थितो ह्यद्याऽपि पश्येत्स काशीप्रासादराजिकाम् ॥ २०१ ॥

स्कन्द उवाच

इत्थंकुम्भजसव्यासः क्षेत्रेशापंप्रदास्यति । क्षेत्रशापप्रदानाच्च बहिर्यास्यतितत्क्षणात्
अतएवाविमुक्तस्य क्षेत्रस्य शुभशंसिनः । भविष्यति शुभं नित्यमन्यथात्वन्यथैवहि
श्रुत्वाऽध्यायमिमं पुण्यं व्यासशापविमोक्षणम् ।
महादुर्गोपसर्गेभ्यो भयं तस्य न कुत्रचित् ॥ २०४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्ड-
उत्तरार्धे व्यासशापविमोक्षणं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

सप्तनवतितमोऽध्यायः

क्षेत्रतीर्थवर्णनम्

अगस्त्य उवाच

एतद्भविष्यं श्रुत्वाहंव्यासस्यशिवनन्दन । आश्चर्यभाजनंजातस्तीर्थानि कथयाधुना
आनन्दकानने यानियत्रसन्ति षडानन !। तानि लिङ्गस्वरूपाणिसमाचक्ष्व ममाग्रतः

स्कन्द उवाच

अयमेवहिवै प्रश्नो देव्यै देवेन भोस्तदा । यादृशः कथितोवच्मितादृशं शृणु कुम्भज

देव्युवाच

यानियानीह तीर्थानि यत्रयत्रमहेश्वर !। तानि तानीह मे काश्यां तत्र तत्र वद प्रभो

देवदेव उवाच

शृणु देवि! विशालाक्षि! तीर्थं लिङ्गमुदाहृतम् ।
जलाशयेऽपि तीर्थाख्या जातामूर्तिपरिग्रहात् ॥ ५ ॥

मूर्तयो ब्रह्मविष्ण्वर्कशिवविघ्नेश्वरादिकाः । लिङ्गं शैवमितिख्यातंयत्रैतत्तीर्थमेवतत्
वाराणस्यां महादेवः प्रथमं तीर्थमुच्यते । तदुत्तरे महाकूपः सारस्वतपदप्रदः ॥ ७
क्षेत्रपूर्वोत्तरेभागे तद्दृष्टं पशुपाशहृत् । तत्पश्चाद्विग्रहवती पूज्या वाराणसी नरैः
सापूजिता प्रयत्नेन सुखवस्तिप्रदा सदा । महादेवस्य पूर्वेण गोप्रेक्षं लिङ्गमुत्तमम्

तद्दर्शनाद्भवेत्सम्यग्गोदानजनितं फलम् ।
गोलोकात्प्रेषिता गावः पूर्वं यच्छम्भुना स्वयम् ॥ १० ॥

वाराणसींसमायातागोप्रेक्षंतत्ततःस्मृतम् । गोप्रेक्षाद्दक्षिणेभागेदधीचीश्वरसञ्ज्ञितम्
तद्दर्शनाद्भवेत्पुंसां फलं यज्ञसमुद्भवम् । अत्रीश्वरं तु तत्प्राच्यां मधुकैटभपूजितम् ॥
लिङ्गं दृष्ट्वा प्रयत्नेन वैष्णवंपदमृच्छति । गोप्रेक्षात्पूर्वदिग्भागे लिङ्गं वैावज्वरंस्मृतम्
तस्यसम्पूजनान्मर्त्यो विज्वरोजायतेक्षणात् । प्राच्यांवेदेश्वरस्तस्य चतुर्वेदफलप्रदः

वेदेश्वरादुदीच्यान्तु क्षेत्रज्ञश्चादिकेशवः । दृष्टंत्रिभुवनं सर्वं तस्य सन्दर्शनाद्ध्रुवम्
सङ्गमेश्वरमालोक्य तत्प्राच्याञ्जायतेऽनघः । चतुर्मुखेन विधिना तत्पूर्वेण चतुर्मुखम्
प्रयागसञ्ज्ञकंलिङ्गमर्जितम्ब्रह्मलोकदम् । तत्र शान्तिकरीगौरीपूजिताशान्तिकृद्भवेत्
वरणायास्तटेपूर्वे पूज्यंकुन्तीश्वरंनृभिः । तत्पूजनात्प्रजायन्तेपुत्रानिजकुलोज्ज्वलाः
कुन्तीश्वरादुत्तरतस्तीर्थं वै कापिलोह्रदः । तत्रवैस्नानमात्रेण वृषभध्वजपूजनात् ॥

राजसूयस्य यज्ञस्य फलं तत्वविकलम्भवेत् ।
रौरवादिषु ये केचित्पितरः कोटिसम्मिताः ॥ २० ॥

तत्र श्राद्धे कृते पुत्रैः पितृलोकं प्रयान्ति ते । आनुसूयेश्वरं लिङ्गंगोप्रेक्षादुत्तरेमुने !॥

तद्दर्शनाद्भवेत्स्त्रीणाम्पातिव्रत्यफलं स्फुटम् ।
तल्लिङ्गपूर्वदिग्भागे पूज्यः सिद्धिविनायकः ॥ २२ ॥

यांसिद्धिंयः समीहेतस्तामाप्नोति तन्नतेः । हिरण्यकशिपोर्लिंगंगणेशात्पश्चिमेततः

हिरण्यकूपस्तत्रास्ति हिरण्याश्वसमृद्धिकृत् ॥ २४ ॥
मुण्डासुरेश्वरं लिङ्गन्तत्प्रतीच्याञ्च सिद्धिदम् ।
अभीष्टदन्तु नैर्ऋत्यांगोप्रेक्षाद् वृषभेश्वरम् ॥ २५ ॥

मुनेस्कन्देश्वरं लिङ्गंमहादेवस्य पश्चिमे । तल्लिङ्गपूजनान्नृणाम्भवेन्ममसलोकता ॥
तत्पार्श्वतोहि शाखेशो विशाखेशश्च तत्र वै । नैगमेयेश्वरस्तत्र येन्येनन्द्यादयो गणाः
तेषामपि हिलिङ्गानितत्र सन्तिसहस्रशः । तद्दर्शनाद्भवेत्पुंसां तत्तद्गणसलोकता ॥
नन्दीश्वरात्प्रतीच्याञ्च शिलादेशःकुधीहरः । महाबलप्रदस्तत्र हिरण्याक्षेश्वरः शुभः
तद्दक्षिणेऽट्टहासाख्यं लिङ्गं सर्वसुखप्रदम् । प्रसन्नवदनेशाख्यं लिङ्गन्तस्योत्तरे शुभम्
प्रसन्नवदनस्तिष्ठेद्भक्तस्तद्दर्शनाच्छुभात् । तदुत्तरेप्रसन्नोदं कुण्डंनैर्मल्यदं नृणाम् ॥
प्रतीच्यामट्टहासस्य मित्रावरुणनामनी । लिङ्गे तल्लोकदे पूज्ये महापातकहारिणी
नैर्ऋत्याञ्चाट्टहासस्यवृद्धवासिष्ठसञ्ज्ञकम् । लिङ्गं तत्पूजनात्पुंसांज्ञानमुत्पद्यतेमहत्

वसिष्ठेशसमीपस्थः कृष्णेशो विष्णुलोकदः ।
तद्याम्यां याज्ञवल्क्येशो ब्रह्मतेजोविवर्धनः ॥ ३४ ॥

प्रह्लादेश्वरमभ्यर्च्य तत्पश्चाद्भक्तिवर्धनम् । स्वयंलीनः शिवो यत्र भक्तानुग्रहकाम्यया॥
अतःस्वलीनं तत्पूर्वे लिङ्गं पूज्यम्प्रयत्नतः । सदैवज्ञाननिष्ठानाम्परमानन्दमिच्छताम्

या गतिर्विहिता तेषां स्वलीने सा तनुत्यजाम् ॥ ३६ ॥

वैरोचनेश्वरंलिङ्गं स्वलीनात्पुरतःस्थितम् । तदुत्तरे बलीशश्च महाबलविवर्धनम् ॥
तत्रैवलिङ्गं बाणेशम्पूजितं सर्वकामदम् । चन्द्रेश्वरस्य पूर्वेणलिङ्गं विद्येश्वराभिधम्

सर्वाविद्याः प्रसन्नाः स्युस्तस्य लिङ्गस्य सेवनात् ।
तद्दक्षिणे तु वीरेशो महासिद्धिविधायकः ॥ ३६ ॥

तत्रैव विकटा देवी सर्वदुःखौघमोचनी । पञ्चमुद्रम्महापीठं तज्ज्ञेयं सर्वसिद्धिदम्

तत्र जप्ता महामन्त्राः क्षिप्रं सिद्ध्यन्ति नान्यथा ।
तत्पीठे वायुकोणे तु सम्पूज्यः सगरेश्वरः ॥ ४१ ॥

तदर्चनादश्वमेधफलंत्वविकलं भवेत् । तदीशाने च बालीशस्तिर्यग्योनिनिवारकः
महापापौघविध्वंसी सुग्रीवेशस्तदुत्तरे । हनूमदीश्वरस्तत्र ब्रह्मचर्यफलप्रदः ॥
महाबुद्धिप्रदस्तत्र पूज्योजाम्बवतीश्वरः । आश्विनेयेश्वरौपूज्यौ गङ्गायाःपश्चिमे तटे
तदुत्तरे भद्रह्रदो गवांक्षीरेण पूरितः । कपिलानां सहस्रेण सम्यग् दत्तेन यत्फलम्
तत्फलं लभते मर्त्यः स्नातोभद्रह्रदे ध्रुवम् । पूर्वाभाद्रपदायुक्ता पौर्णमासीयदाभवेत्
तदापुण्यतमः कालो वाजिमेधफलप्रदः । ह्रदपश्चिमतीरे तु भद्रेश्वरविलोकनात्

गोलोकं प्राप्नुयात्तस्मात्पुण्यान्नैवात्रसंशयः ।
भद्रेश्वराद्यातुधान्यामुपशान्तशिवो मुने !॥ ४८ ॥
तस्यलिङ्गस्यसंस्पर्शात्परां शान्तिं स मृच्छति ।
उपशान्तशिवंलिङ्गं दृष्ट्वा जन्मशतार्जितम् ॥ ४६ ॥

त्यजेदश्रेयसोराशिं श्रेयोराशिं च विन्दति । तदुत्तरे च चक्रेशो योनिचक्रनिवारकः
तदुत्तरे चक्रह्रदो महापुण्यविवर्धनः । स्नात्वा चक्रह्रदे मर्त्यश्चक्रेशम्परिपूज्य च ॥
शिवलोकमवाप्नोति भावितेनान्तरात्मना । तं नैर्ऋतेच शूलेशो द्रष्टव्यश्च प्रयत्नतः
शूलं तत्र पुरान्यस्तं स्नानार्थं वरवर्णिनि । ह्रदस्तत्र समुत्पन्नः शूलेशस्याग्रतोमहान्

स्नानं कृत्वा ह्रदेतत्र दृष्ट्वाशूलेश्वरं विभुम् । रुद्रलोकंनरायान्तित्यक्त्वासंसारगह्वरम्
तत्पूर्वतो नारदेन तपस्तप्तं महत्तरम् । लिङ्गञ्च स्थापितं श्रेष्ठं कुण्डञ्चापिशुभंकृतम्
तत्रकुण्डे नरःस्नात्वा दृष्ट्वा वै नारदेश्वरम् । संसाराब्धिम्महाघोरं सन्तरेन्नात्रसंशयः
नारदेश्वरपूर्वेण दृष्ट्वावभ्रातकेश्वरम् । निर्मलांगतिमाप्नोति पापौघं च विमुञ्चति ॥
तदग्रे ताम्रकुण्डंचतत्रस्नातो न गर्भभाक् । विघ्नहर्तागणाध्यक्षस्तद्वायव्येसुविघ्नहृत्
तत्र विघ्नहरंकुण्डं तत्रस्नातोन विघ्नभाक् । अनारकेश्वरंलिङ्गं तदुदग्दिशिचोत्तमम्
कुण्डंचानारकाख्यं वै तत्रस्नातोननारकी । वरणायास्तटे रम्ये वरणेशस्तदुत्तरे
तत्रपाशुपतः सिद्धस्त्वक्षपादो महामुने !। अनेनैव शरीरेण शाश्वतीं सिद्धिमागतः
तत्पश्चिमेच शैलेशःपरनिर्वाणकामदः । कोटीश्वरंतुतद्याम्यांलिङ्गंशाश्वतसिद्धिदम्

कोटितीर्थे ह्रदे स्नात्वा कोटीशम्परिपूज्य च ।
गवां कोटिप्रदानस्य फलमाप्नोति मानवः ॥ ६३ ॥
महाश्मशानस्तम्भोऽस्ति कोटीशाद्बहिर्दिक्स्थितः ।
तस्मिन्स्तम्भे महारुद्रस्तिष्ठते चोमया सह ॥ ६४ ॥

तं स्तम्भं समलङ्कृत्य नरस्तत्पदमाप्नुयात् । तत्रैव तीर्थं परमं कपालेशसमीपतः
कपालमोचनं नाम तत्रस्नातोऽश्वमेधभाक् । ऋणमोचनतीर्थंतु तदुदग्दिशिशोभनम्
तत्र तीर्थे नरः स्नात्वामुक्तोभवति चर्णतः । तत्रैवाङ्गारकंतीर्थंकुण्डञ्चाङ्गारनिर्मलम्
स्नात्वाङ्गारकतीर्थेतु भवेद्भूयोनगर्भभाक् । अङ्गारवारयुक्तायांचतुर्थ्यांस्नातियोनरः

व्याधिभिर्नाभिभूयेत न च दुःखी कदाचन ॥ ६८ ॥

विश्वकर्मेश्वरं लिङ्गं ज्ञानदं च तदुत्तरे । महामुण्डेश्वरं लिङ्गंतस्य दक्षिणतः शुभम्

कूपः शुभोदनामाऽपि स्नातव्यं तत्र निश्चितम् ।
तत्र मुण्डमयी माला मया क्षिप्ताऽतिशोभना ॥ ७० ॥
महामुण्डाततो देवी समुत्पन्नाघहारिणी ।
खट्वाङ्गञ्च धृतं तत्र खट्वाङ्गेशस्ततोऽभवत् ॥ ७१ ॥
निष्पापो जायते मर्त्यः खट्वाङ्गेशविलोकनात् ।

भुवनेशस्ततो याम्यां कुण्डश्च भुवनेश्वरम् ॥ ७२ ॥
तत्र कुण्डे नरः स्नातो भुवनेशोभवेन्नरः । तद्याम्यां विमलेशश्च कुण्डंचविमलोदकम्
तत्र स्नात्वा विलोक्येशं विमलोजायतेनरः । तत्रपाशुपतःसिद्धस्त्र्यम्बकोनामनामतः
अनेनैव शरीरेण रुद्रलोकमवाप्तवान् । भृगोरायतनं तस्य पश्चिमेऽतीवपुण्यदम् ॥
विधिपूर्वं तदभ्यर्च्य प्राप्नुयाच्छिवमन्दिरम् । शुभेश्वरश्च तद्याम्यांमहाशुभफलप्रदः
तत्रसिद्धिः पाशुपतः कपिलर्षिर्महातपाः । तत्रास्तिहि गुहारम्याकपिलेश्वरसन्निधौ
तां गुहाम्प्रविशेद्यो वै न स गर्भे विशेत्क्वचित् ।
तत्र यज्ञोदकूपोऽस्ति वाजिमेधफलप्रदः ॥ ७८ ॥
ॐकार एषएवासावादिवर्णमयात्मकः । मत्स्योदर्युत्तरे कूले नादेशस्त्वहमेव च
नादेशः परमम्ब्रह्म नादेशः परमागतिः । नादेशः परमंस्थानं दुःखसंसारमोचनम् ॥
कदाचित्तस्य देवस्यदर्शनेयातिजाह्नवी । मत्स्योदरीसाकथितास्नानम्पुण्यैरवाप्यते
मत्स्योदरी यदा गङ्गा पश्चिमे कपिलेश्वरम् ।
समायाति महादेवि! तदा योगः सुदुर्लभः ॥ ८२ ॥
उद्दालकेश्वरं लिङ्गमुदीच्यां कपिलेश्वरात् । तद्दर्शनेन संसिद्धिः परा सर्वैरवाप्यते ॥
तदुत्तरे बाष्कुलीशं लिङ्गं सर्वार्थसिद्धिदम् ।
बाष्कुलीशाद्दक्षिणतो लिङ्गं वै कौस्तुभेश्वरम् ॥ ८४ ॥
तस्याऽर्चनेन रत्नौघैर्न वियुज्येत कर्हिचित् । शङ्कुकर्णेश्वरंलिङ्गं कौस्तुभेश्वरदक्षिणे
संसेव्य परमं ज्ञानं लभेद्यापि साधकः । अघोरेशोगुहाद्वारि कूपस्तस्योत्तरे शुभः
अघोरोद इतिख्यातो वाजिमेधफलप्रदः । गर्गेशो दमनेशश्च तत्र लिङ्गद्वयं शुभम्
अनेनैवेहदेहेन यत्र तौ सिद्धिमापतुः । तल्लिङ्गयोः समर्चातः सिद्धिर्भवतिवाञ्छिता
तद्दक्षिणे महाकुण्डं रुद्रावास इति स्मृतम् ।
तत्र रुद्रेशमभ्यर्च्य कोटिरुद्रफलंलभेत् ॥ ८९ ॥
चतुर्दशी यदापर्णे रुद्रनक्षत्रसंयुता । तदा पुण्यतमः कालस्तस्मिन्कुण्डे महाफलः
रुद्रकुण्डे नरःस्नात्वा दृष्ट्वा रुद्रेश्वरं विभुम् । यत्रतत्रमृतोवाऽपिरुद्रलोकमवाप्नुयात्

रुद्रस्य नैर्ऋते भागेलिङ्गं तत्रमहालयम् । तदग्रे पितृकूपोऽस्तिपितृणामालयःपरः
तत्रश्राद्धं नरः कृत्वापिण्डान्कूपे परिक्षिपेत् । एकविंशकुलोपेतःश्राद्धकृद्रुद्रलोकभाक्
तत्र वैतरणी नामदीर्घिका पश्चिमानना । तस्यांस्नातोनरोदेवि नरकं नैव गच्छति
बृहस्पतीश्वरं लिङ्गं रुद्रकुण्डाच्च पश्चिमे । गुरुपुष्यसमायोगे दृष्ट्वा दिव्यांलभेद्गिरम्
रुद्रावासाद्दक्षिणतः कामेशं लिङ्गमुत्तमम् ।
तद्दक्षिणे महाकुण्डं स्नानाच्चिन्तितकामदम् ॥ ९६ ॥
चैत्रशुक्लत्रयोदश्यां तत्र यात्रा च कामदा । नलकूबरलिङ्गंच प्राच्यांकामेश्वराच्छुभम्
तदग्रे पावनः कूपो धनधान्यसमृद्धिदः । नलकूबरपूर्वेण सूर्याचन्द्रमसेश्वरौ ॥
अज्ञानध्वान्तपटलीं हरतस्तौ समर्चितौ । तद्दक्षिणेध्वकेशश्च दृष्टो मोहविनाशनः
तत्रसिद्धीश्वरं लिङ्गं महासिद्धिसमर्पकम् । तत्रैव मण्डलेशश्च मण्डलेशपदप्रदः ॥
कामकुण्डस्य पूर्वेण च्यवनेशः समृद्धिदः । तत्रैव सनकेशश्च राजसूयफलप्रदः ॥
सनत्कुमारलिङ्गञ्च तत्पश्चाद्योगसिद्धिकृत् । तदुत्तरे सनन्देशो महाज्ञानसमर्थकः
तद्याम्यामाहुतीशश्च दृष्टोहोमफलप्रदः । तद्याम्याम्पुण्यजनकं लिङ्गं पञ्चशिखेश्वरम्
मार्कण्डेयह्रदस्तस्य पश्चिमे पुण्यवर्धनः । तस्मिन्ह्रदेनरःस्नात्वाकिम्भूयःपरिशोचति
तत्र स्नानञ्च दानञ्च भवेदक्षयपुण्यदम् । तदुत्तरे च कुण्डेशः सर्वसिद्धैर्नमस्कृतः
दीक्षाम्पाशुपतीं लब्ध्वा द्वादशाब्देन यत्फलम् ।
तत्फलं लभते विप्र! मर्त्यः कुण्डेशदर्शनात् ॥ १०६ ॥
मार्क्कण्डेयह्रदात्पूर्वं शाण्डिल्येशः सुपुण्यदः ।
तत्पश्चिमे च चण्डेशश्चण्डांशुग्रहणाघहृत् ॥ १०७ ॥
दक्षिणे च कपालेशात्कुण्डं श्रीकण्ठसञ्ज्ञितम् ।
तत्रकुण्डेनरःस्नात्वा दाता स्याच्छ्रीप्रभावतः ॥ १०८ ॥
महालक्ष्मीश्वरं लिङ्गं तस्य कुण्डस्य सन्निधौ ।
महालक्ष्मीं समभ्यर्च्य स्नातस्तत्कुण्डवारिषु ॥ १०९ ॥
चामरासक्तहस्ताभिर्दिव्यस्त्रीभिश्च वीज्यते ।

यदा मत्स्योदरीं यान्ति स्वर्गलोकाद् दिवौकसः ।
तदा ते नैव मार्गेण यान्तिस्त्रीभिर्वृताः सुखम् ॥ ११० ॥

स्वर्गद्वारमतःख्यातं तत्स्थानंमुनिसत्तम !। तत्कुण्डदक्षिणे भागे लिङ्गं ब्रह्मपदप्रदम्
गायत्रीस्वरसावित्रीश्वरौपूज्यौप्रयत्नतः । मत्स्योदर्यास्तटेरम्येलिङ्गंसत्यवतीश्वरम्
तयोःपूर्वेणसम्पूज्यंतपःश्रीपरिवर्धनम् । उग्रेश्वरंमहालिङ्गंलक्ष्मीशात्पूर्वदिक्स्थितम्

जातिस्मरो भवेन्मर्त्यस्तल्लिङ्गस्य समर्चनात् ।
तद्दक्षिणे चोग्रकुण्डं स्नानात्कनखलाधिकम् ॥ ११४ ॥

करवीरेश्वरं लिङ्गं तस्यकुण्डस्य पश्चिमे । तस्यदर्शनतःपुंसांजायते रोगसङ्क्षयः
तद्वायव्यमरीचीशं कुण्डञ्चाघौघनाशनम् । तत्पश्चाच्चेन्द्रकुण्डंचलिङ्गंचेन्द्रेश्वरं मुने
इन्द्रेशाद्दक्षिणेभागे शुभाकर्कोटवापिका । तत्रवापीजलेस्नात्वा दृष्ट्वा कर्कोटकेश्वरम्
नागानामाधिपत्यं तु जायते नात्रसंशयः । तत्पश्चाद्द्रमिचण्डेशो ब्रह्महत्याहरो हरः
तद्दक्षिणे महाकुण्डं रुद्रलोकफलप्रदम् । तत्पश्चिमे महालिङ्गमग्नीश इति विश्रुतम्

आग्नेयं नाम कुण्डं च तत्पूर्वेऽग्निसलोकदम् ।
आग्नेयेश्वरतः प्राच्यां कुण्डं तद्दक्षिणे शुभम् ॥ १२० ॥
तत्र कुण्डे नरः स्नात्वा स्वर्गे वसति पूर्वजैः ।
तत्प्राच्याम्बालचन्द्रेशश्चन्द्रलोकगतिप्रदः ॥ १२१ ॥

परितोबालचन्द्रेशं गणलिङ्गान्यनेकशः । विलोक्यतानिलिङ्गानिगाणपत्यंपदंलभेत्
बालचन्द्रसमीपेतुकूपःपितृगणप्रियः । तत्रश्राद्धप्रदःस्नात्वात्वापितृन्सप्ताऽत्रतारयेत्
तदन्धोः पूर्वतोलिङ्गं पुण्यं विश्वेश्वराह्वयम् । विश्वेश्वरस्य पूर्वेणवृद्धकालेश्वरो हर

कालोदो नामकूपोऽस्ति तदग्रे सर्वरोगहृत् ।
यैस्तु तत्रोदकं पीतं स्त्रीभिः पुम्भिः स्वकर्मभिः ॥ १२५ ॥
न तेषां परिवर्तोऽत्र कल्पकोटिशतैरपि ।
तत्पीत्वा जन्मबन्धोत्थाद्भयान्मुच्येत मानवः ॥ १२६ ॥

तत्रकूपे तु यद्दत्तं दानंशिवरतात्मनाम् । सम्वर्तेऽपि नतस्यास्तिनाशःकलशसम्भव!

खण्डस्फुटितसंस्कारं तत्र कुर्वन्ति ये नराः । तेरुद्रलोकमासाद्यमोदन्तेसुखिनःसदा

कालेशाद्दक्षिणे भागे मृत्वीशस्त्वपमृत्युहृत् ।
लिङ्गं दक्षेश्वराह्वञ्च ततः कूपादुदिग्दिशि ॥ १२९ ॥
अपराधसहस्रं तु नश्येत्तस्य समर्चनात् ॥ १३० ॥

महाकालेशलिङ्गं च दक्षेशात्पूर्वतोमहत् । महाकुण्डेनरःस्नात्वामहाकालंतुयोऽर्चयेत्
अर्चितं तेन वै तत्र जगदेतच्चराचरम् । अन्तकेश्वरमालोक्यतद्याम्यां नान्तकस्य भीः
हस्तिपालेश्वरं लिङ्गं तस्यदक्षिणतोमुने । तस्यपूजनतोयातिपुण्यं वैहस्तिदानजम्
तत्रैरावतकुण्डञ्च लिङ्गमैरावतेश्वरम् । तल्लिङ्गमर्चयन्मर्त्यो धनधान्यसमृद्धिभाक् ॥
तद्दक्षिणे श्रेयसे च लिङ्गं स्यान्मालतीश्वरम् । हस्तीश्वरादुत्तरेतुजयन्तेशोजयप्रदः

वन्दीश्वरो महाकालकुण्डादुत्तरतःशुभः ।
वन्दिकुण्डं च विख्यातं वाराणस्यां महाघहृत् ॥ १३६ ॥

तत्रस्नानेनदानेन श्राद्धेनाक्षयमश्नुते । धन्वन्तरीश्वरं लिङ्गं कुण्डं तन्नाम चैव हि ॥
तस्यलिङ्गस्यनामान्यत्कुण्डनामान्यदेवहि । तुङ्गेश्वरंलिङ्गनामकुण्डंवैद्येश्वराभिधम्

सुधामय्यो महौषध्यः क्षिप्तास्तत्र महाधियः ।
तत्कुण्डस्नानतस्तस्मात्तल्लिङ्गपरिवीक्षणात् ।
नश्यन्ति व्याधयः सर्वे सह पापैः सुदारुणैः ॥ १३९ ॥

तदुत्तरेहलीशेशः सर्वव्याधिनिषूदनः । शिवेश्वरः शिवकरस्तुङ्गनाम्नश्च दक्षिणे ॥
जमदग्नीश्वरं लिङ्गं शिवेशाद्दक्षिणे शुभम् । तत्पश्चिमेभैरवेशः कूपस्तस्योत्तरे शुभः
तदुदस्पर्शमात्रेण सर्वयज्ञफलंलभेत् । तत्कूपपश्चिमे भागे सुकेशो योगसिद्धिदः ॥

तं नैर्ऋत्यां च व्यासेशः कूपश्च विमलोदकः ।
व्यासकूपे नरा स्नात्वा तर्पयित्वा सुरान्पितॄन् ॥ १४३ ॥
अक्षयं लभते लोकं यत्र कुत्राभिकाङ्क्षितम् ।
व्यासतीर्थात्पश्चिमतो घण्टाकर्णोह्रदो महान् ॥ १४४ ॥

घण्टाकर्णह्रदेस्नात्वा व्यासेशपरिदर्शनात् । यत्रतत्रमृतोपापिवाराणस्यांमृतोभवेत्

घण्टाकर्णसमीपे तु पञ्चचूडाप्सरःसरः । पञ्चचूडाजलेस्नात्वा दृष्ट्वा देवं तमीजरम्
स्वर्गलोकं नरो याति पञ्चचूडाप्रियोऽभवेत् ।
गौरीकूपस्ततो वाच्यां सर्वजाड्यविनाशनः ॥ १४७ ॥
पञ्चचूडोत्तरेभागे तीर्थं चाशोकसञ्ज्ञितम् । मन्दाकिनीमहातीर्थंतदुदीच्यांमहाह्रदत्
स्वर्गलोकेऽपिसापुण्याकिं पुनर्मानवेमुने! । तदुत्तरेमध्यमेशो मध्ये क्षेत्रं स्वपित्यहो
तत्र जागरणं कृत्वाऽशोकाष्टम्यां मर्त्यो नरः । नजातुशोकंलभतेसदानन्दमयोभवेत्
मुक्तिक्षेत्रप्रमाणञ्च क्रोशंक्रोशञ्च सर्वतः । आरभ्यलिङ्गादस्माच्चपुण्यदांमध्यमेश्वरात्
एतदेव सदा प्राहुःसर्वेवैप्रपितामहाः । कश्चिदस्मत्कुलेजातोमन्दाकिन्याजलाप्लुतः
भोजयेत् प्रयतो विप्रान्यतीन् पाशुपतानपि ।
मन्दाकिन्यां नरः स्नात्वा दृष्ट्वा वै मध्यमेश्वरम् ॥ १५३ ॥
एकविंशत्कुलोपेतो रुद्रलोके वसेच्चिरम् । मध्यमेशाद्वाच्याञ्च विश्वेदेवेश्वरः शुभः
तदर्चनादर्चिताः स्युर्विश्वेदेवाख्ययोदश । तत्पूर्वे वीरभद्रेशो महावीरपदप्रदः ॥
भद्रदाभद्रकाली च तस्यदक्षिणतः शुभा । भद्रकालह्रदोनाम तत्राऽतीवशुभप्रदः ॥
आपस्तम्बेश्वरं लिङ्गं तत्प्राच्यां ज्ञानदम्परम् ।
तदुत्तरे पुण्यकूपस्तत्पश्चाच्छौनको ह्रदः ॥ १५७ ॥
ह्रदपश्चिमतोलिङ्गं शौनकेशं सुधीप्रदम् । ह्रदेतत्रनरःस्नात्वा दृष्ट्वा वै शौनकेश्वरम्
ज्ञानं तत्सँल्लभेद्दिव्यं येनमृत्युं तरत्यसौ । तद्दक्षिणेजम्बुकेशस्तिर्यग्योनिनिवारकः
तदुत्तरे मतङ्गेशो गानविद्याप्रबोधकः । मतङ्गेशस्यवायव्ये नानालिङ्गानि सर्वतः ॥
मुनिभिः स्थापितानीह सर्वसिद्धिप्रदानि च । ब्रह्मरातेश्वरंलिङ्गं मतङ्गेशाच्च दक्षिणे
तल्लिङ्गदर्शनादायुर्नान्तराच्छिद्यतेक्वचित् । तत्राज्यपेश्वरंलिङ्गं पितृलिङ्गान्यनेकशः
तल्लिङ्गसेवया सर्वे तुष्यन्ति प्रपितामहाः ॥ १६२ ॥
तद्दक्षिणे सिद्धकूपः सिद्धाः सन्ति सहस्रशः ।
वायुरूपास्तु ये सिद्धा ये सिद्धा भानुरश्मिगाः ॥ १६३ ॥
तैः स्थापितं तु यल्लिङ्गं तत्सिद्धेश्वरमीरितम् ।

तस्य सन्दर्शनादेव सर्वाः स्युः सिद्धयोऽमलाः ॥ १६४ ॥
तत्पश्चिमे सिद्धवापी पीता स्नाता च सिद्धिदा ।
प्राच्यां च सिद्धकूपाद्वै लिङ्गं व्याघ्रेश्वराभिधम् ॥ १६५ ॥
तल्लिङ्गदर्शनान्नृणां नभयंव्याघ्रचोरजम् । ज्येष्ठेश्वरंचतद्याम्यांज्येष्ठस्थानेतिसिद्धिदम्
तद्दक्षिणे मुदांधामलिङ्गं प्रहसितेश्वरम् । तदुत्तरे निवासेशः काशीवासफलप्रदः ॥
चतुःसमुद्रकूपोऽस्तितत्राब्धिस्नानपुण्यदः । ज्येष्ठादेवीतुतत्रास्तिनताज्येष्ठपदप्रदा
अवाच्यां व्याघ्रलिङ्गाच्च लिङ्गं चण्डीश्वराभिधम् ।
तदुत्तरे दण्डखातं सरः पितृमुदावहम् ॥ १६६ ॥
ग्रहणानन्तरे स्नानं दण्डखातेतिपुण्यदम् । जैगीषव्यगुहातत्र तत्रलिङ्गंतदाह्वयम् ॥
त्रिरात्रोपोषितस्तत्र ज्ञानं लभ्येत निर्मलम् । महापुण्यप्रदं लिङ्गं तत्पश्चाद्देवलेश्वरम्
शतकालस्तत्समीपे शतं कालानुमापतिः ।
तल्लिङ्गाविर्भवे काश्यां कालयामास कुम्भज !॥ १७२ ॥
तल्लिङ्गदर्शनादायुः शतवर्षाण्यखण्डितम् । शातातपेशस्तद्याम्यां महाजपफलप्रदः ॥
तत्पश्चिमे हेतुकेशो हेतुभूतो महाफले । तद्दक्षिणे क्षपादेशो महाज्ञानप्रवर्तकः ॥१७४
तदग्रेच कणादेशस्तत्रपुण्योदकः प्रहिः । स्नात्वाकाणादकूपेयः कणादेशंसमर्चयेत्
नधनेननधान्येन त्यज्यतेसकदाचन । तस्य दक्षिणतो दृश्यो भूतीशो भूतिकृत्सताम्
तत्पश्चिमेऽघसंहर्तृ आषाढीश्वरसञ्ज्ञितम् । दुर्वासेशश्च तत्पूर्वे सर्वकामसमृद्धिकृत्
तद्याम्यां भारभूतेशः पापभारापहारकः । व्यासेश्वरस्य पूर्वेण द्वौ शङ्खलिखितेश्वरौ
तौ दृश्यौ यत्नतः काश्यां महाज्ञानप्रवर्तकौ ॥ १७८ ॥
यत्सम्प्राप्याऽऽप्यते पुण्यं निष्ठापाशुपतव्रतम् ।
तदाऽऽप्यतेऽत्र विश्वेशसकृदीक्षणतः क्षणात् ॥ १७९ ॥
तदीशानेच धूतेशो योगज्ञानप्रवर्तकः । तीर्थं चैवावधूतेशं सर्वकल्मषनाशकृत् ॥ १८०
अवधूतेश्वरात्पूर्वे लिङ्गंपशुपतीश्वरम् । तल्लिङ्गसेवयापुंसां पशुपाशविमोक्षणाम् ॥
तद्दक्षिणे गोभिलेशो महाभिलषितप्रदः । जीमूतवाहनेशश्च तत्पश्चाल्लिङ्गमुत्तमम्

विद्याधरपदप्राप्तिस्तल्लिङ्गपरिसेवनात् । मयूखार्कः पञ्चनदेगभस्तीशश्च तत्रवै ॥
दधिकल्पह्रदोनाम तदुदीच्यां महाप्रहिः । दुर्लभं तत्प्रहिस्नानंदुर्लभं च तदीक्षणम्
गभस्तीशोत्तरे भागेदधिकल्पेश्वरोहरः । नरस्तमाशु संवीक्ष्य कल्पं त्र्यक्षपुरेवसेत्

गभस्तीशाद्दक्षिणे तु मङ्गलां मङ्गलालयाम् ।
उद्दिश्य मङ्गलांगौरीं भोजयेद् द्विजदम्पती ॥ १८६ ॥

अलंकृत्ययथाशक्ति तत्पुण्यान्तोनकर्हिचित् । क्षितिप्रदक्षिणफलामङ्गलैकाप्रदक्षिणा
वदनप्रेक्षणादेवी मुखप्रेक्षेश्वरोत्तरे । मङ्गलायाः समीपे तु सर्वसिद्धिकरी शिवा ॥
लिङ्गं त्वर्ग्र्यशिवृत्तेशौ मुखप्रेक्षोत्तरेशुभे । सहेमभूमिदानस्य फलंदर्शनतस्तयोः ॥
तदुत्तरे चर्चिकायादेव्याः संदर्शनंशुभम् । रेवतेश्वरलिङ्गं च चर्चिकाग्रेण शान्तिकृत्
महाशुभाय तस्याग्रे लिङ्गं पञ्चनदेश्वरम् । मङ्गलोदो महाकूपो मङ्गलापश्चिमेशुभः ॥

उपमन्योर्महालिङ्गं मङ्गलापश्चिमे शुभम् ।
व्याघ्रपादेश्वरं लिङ्गं तत्पश्चाद् व्याघ्रभीतिहृत् ॥ १९२ ॥
नैर्ऋत्याश्च गभस्तीशाच्छशाङ्केशोऽघसङ्घहृत् ।
तत्पश्चिमे चैत्ररथं लिङ्गं दिव्यगतिप्रदम् ॥ १९३ ॥

रेवतेशात्पश्चिमतो जैमिनीशो महाघहृत् । तत्रलिङ्गान्यनेकानि ऋषीणामृषिसत्तम
जैमिनेशाच्च वायव्ये लिङ्गं वै रावणेश्वरम् । न तद्दर्शनतः पुंसां राक्षसानांमहाभयम्
तद्दक्षिणे वराहेशो माण्डव्येशस्ततोयमे । तद्दक्षिणे प्रचण्डेशो योगेशो दक्षिणेततः
तद्दक्षिणे चघातेशःसोमेशश्च तदग्रतः । तन्नैर्ऋत्यां कनकेशो महाकनकदः सताम् ॥
तदुत्तरेपाण्डवानां पञ्चलिङ्गानि सन्मुदे । संवर्तेशस्तदग्रेच श्वेतेशस्तस्य पश्चिमे ॥

तत्पश्चात्कलशेशश्च लिङ्गं कालाभयप्रदम् ।
कालेन पाशिते श्वेते मुने! कुम्भात्समुत्थितम् ॥ १९९ ॥

चित्रगुप्तेश्वरं लिङ्गं तदुदीच्यामघापहम् । चित्रगुप्तेश्वरात्पश्चाद्यो दृढेशो महाफलः
कलशेशादवाच्यां चग्रहेशो लिङ्गमुत्तमम् । ग्रहबाधां शमयति तल्लिङ्गपरिलोकनम्
चित्रगुप्तेश्वरात्पश्चाद्यद्दृच्छेशो महाफलः । उतथ्यवामदेवेशं लिङ्गंयाम्यां ग्रहेश्वरात्

कम्बलाश्वतरेशौ चतस्यदक्षिणतः शुभे । तत्रैव निर्मलं लिङ्गं नलकूबरपूजितम् ॥
तद्याम्यां मणिकर्णीशं तदुदक्पलितेश्वरम् । जराहरं च तत्रैव तत्पश्चात्पापनाशनम्
तत्पश्चिमेनिर्जरे शस्तन्नैर्ऋत्यांपितामहः । पितामहस्रोतिकाचतत्र श्राद्धंमहाफलम्

तद्याम्यां वरुणेशश्च बाणेशस्तस्य दक्षिणे ।
पितामहस्रोतिकायां कूष्माण्डेशस्तु सिद्धिकृत् ॥ २०६ ॥

तत्पूर्वतो राक्षसेशो गङ्गेशस्तस्यदक्षिणे । तदुत्तरेनिम्नगेशाः सन्तिलिङ्गान्यनेकशः
वैवस्वतेश्वरस्तत्र यमलोकनिवारकः । तत्पश्चाददितीशश्च चक्रेशस्तस्यचाग्रतः ॥
तदग्रे कालकेशाख्यो दृष्टप्रत्ययकृत्परः । छायासंदृश्यते तत्रनिष्पापस्तदवेक्षणात् ॥
तदग्रे तारकेशश्च तदग्रेस्वर्णभारदः । तदुत्तरे मरुत्तेशः शक्रेशश्च तदग्रतः ॥ २१० ॥
तद्दक्षिणे चरम्भेशस्तत्रैव च शशीश्वरः । तदुत्तरे लोकपेशास्तत्र लिङ्गान्यनेकशः ॥
नागगन्धर्वयक्षाणां किन्नराप्सरसामपि । देवर्षिगणवृन्दानां नानासिद्धिकराण्यपि
शक्रेशाद्दक्षिणे भागे फाल्गुनेशो महाघहृत् । महापाशुपतेशश्च तद्याम्यां शुभकृत्परः ॥
तत्पश्चिमे समुद्रेश ईशानेशस्तदुत्तरे । तत्पूर्वे लाङ्गलीशश्च सर्वसिद्धिसमर्पकः ॥
रागद्वेषविनिर्मुक्ताः सिद्धियान्तिचपूजकाः । तेषांमोक्षोमयाख्यातोनतुतेदेविमानवाः
मधुपिङ्गश्वेतकेतू लाङ्गलीशे तपस्विनौ । अनेनैव शरीरेण जग्मतुः सिद्धिमुत्तमाम्
तत्रैव नकुलीशश्च कपिलेशश्च तत्र वै । रहस्यम्परमञ्चोभौ मम व्रतनिषेविणौ ॥

तत्सन्निधौ प्रीतिकेशस्तत्र प्रीतिर्मम प्रिये !।
तत्रोपवासादेकस्मात्फलमब्दशताधिकम् ॥ २१८ ॥

एकं जागरणं कृत्वा प्रीतिकेशउपोषितः । गणत्वपदवी तस्य निश्चिता मम पर्वणि
देवस्य दक्षिणे भागे तत्र वापी शुभोदका । तदम्बुप्राशनं नृणामपुनर्भवहेतवे ॥ १२० ॥

तज्जलात्पश्चिमे भागे दण्डपाणिः सदावति ।
तत्प्राच्यवाच्युत्तरस्यां तारः कालः शिलादजः ॥ २२१ ॥

लिङ्गत्रयं हृदब्जे यच्छ्रद्धयापीतमर्पयत् । यैस्तत्र तज्जलं पीतं कृतार्थास्ते नरोत्तमाः
अविमुक्तसमीपेऽचर्योमोक्षेशोमोक्षबुद्धिदः । करुणेशोदयाधाम तदुदीच्यांसमर्चयेत्

स्वर्णाक्षेशस्तु तत्प्राच्यां ज्ञानदस्तस्य चोत्तरे ।
सौभाग्यगौरी सम्पूज्या बहुसौभाग्यसम्पदे ॥ २२४ ॥
विश्वेशाद्दक्षिणे भागे निकुम्भेशः प्रयत्नतः । क्षेत्रक्षेमकरः पूज्यस्तत्पश्चाद्विघ्ननायकः
सर्वविघ्नच्छिदभ्यर्च्यश्चतुर्थ्यां तु विशेषतः ।
विरूपाक्षो निकुम्भेशाद्वह्नौ पूज्यः सुसिद्धिदः ॥ २२६ ॥
तद्दक्षिणे च शुक्रेशः पुत्रपौत्रप्रवर्धनः । तदुदीच्यां महालिङ्गं देवयानीश्वराभिधम् ॥
शुक्रेशादग्रतः पूज्यः कचेश इतिसञ्ज्ञितः । शुक्रकूपमुपस्पृश्य हयमेधफलं लभेत् ॥
भवानीशौ नमस्यौच शुक्रेशात्पश्चिमेशुभौ । भक्तिपोतप्रदौतौ तुनिजभक्तस्य सर्वदा
अलर्केशः समभ्यर्च्यःशुक्रेशात्पूर्वदिक्स्थितः । मदालसेश्वरस्तत्र तत्पूर्वेसर्वविघ्नहृत्
गणेश्वरेश्वरं लिङ्गं सर्वसिद्धिकरं परम् । हत्वा लङ्केश्वरं विप्र रघुनाथप्रतिष्ठितम्
तल्लिङ्गस्पर्शनादाशु ब्रह्महापि विशुध्यति । महापुण्यप्रदं चान्यत्तत्रार्च्यंत्रिपुरान्तकम्
दत्तात्रेयेश्वरं लिङ्गं तस्य पश्चिमतःशुभम् । तद्याम्यांहरिकेशेशोगोकर्णेशस्तत परम्
सरस्तदग्रे पापघ्नं तत्पश्चाच्च ध्रुवेश्वरः । तदग्रे ध्रुवकुण्डश्च पितृप्रीतिकरं परम् ॥
तदुत्तरे पिशाचेशः पैशाच्यपदहारकः । पित्रीशस्तद्यमदिशि पितृकुण्डं तदग्रतः ॥
तत्र श्राद्धकृतां पुंसां तुष्येयुःप्रपितामहाः । अग्रेध्रुवेशात्तारेशो वैद्यनाथः स एव हि
तन्नैर्ऋत्यां मनोर्लिङ्गं वंशवृद्धिकरंपरम् । प्रियव्रतेश्वरं लिङ्गं वैद्यनाथपुरोगतम् ॥
तद्याम्यां मुचुकुन्देशस्तत्पार्श्वे गौतमेश्वरः ।
तत्पश्चिमेन भद्रेशस्तद्याम्यामृष्यशृङ्गिणः ॥ २३८ ॥
ब्रह्मेशस्तत्पुरस्ताच्च पर्जन्येशस्तदीशगः । तत्प्राच्यां नहुषेशश्च विशालाक्षीचतत्पुरः
विशालाक्षीश्वरंलिङ्गंतत्रैव क्षेत्रवस्तिदम् । जरासन्धेश्वरंलिङ्गं तद्याम्यांज्वरनाशनम्
तत्पुरस्ताद्धिरण्याक्षलिङ्गं पूज्यं हिरण्यदम् ।
तत्पश्चिमे गयाधीशस्तत्प्रतीच्यां भगीरथः ॥ २४१ ॥
तदग्रे च दिलीपेशो ब्रह्मेशात्पश्चिमे मुने !। तत्र लिङ्गंसकुण्डश्चस्नातुरिष्टफलप्रदम्
तत्र विश्वावसोर्लिङ्गंमुण्डेशस्तत्र पूर्वतः । तद्दक्षिणे विधीशश्च तद्याम्यांवाजिमेधकः

दशाश्वमेधिके स्नात्वा दृष्ट्वा तल्लिङ्गमुत्तमम् । दशानामश्वमेधानां फलंप्राप्नोतिमानवः
तदुत्तरे मातृतीर्थं स्नातुर्जन्मभयापहृत् । तत्र स्नानं तु यः कुर्यान्नारीवापुरुषोपिवा
ईप्सितं फलमाप्नोति मातृणाञ्चप्रसादतः । दक्षिणेतत्र कुण्डाच्च पुष्पदन्तेश्वरः परः
तदग्निदिशिदेवर्षिगणलिङ्गान्यनेकशः । पुष्पदन्ताद्दक्षिणतः सिद्धीशः परसिद्धिदः
पञ्चोपचारपूजातःस्वप्ने सिद्धिंपरांदिशेत् । राज्यप्राप्तिर्भवेत्पुंसांहरिश्चन्द्रेशसेवया
तत्पश्चिमे नैर्ऋतेशोऽङ्गिरसेशस्ततोयमे । तद्दक्षिणे च क्षेमेशश्चित्राङ्गेशस्ततो यमे
तद्दक्षिणेच केदारो रुद्रानुचरताप्रदः । चन्द्रसूर्यान्वयैर्भूपैः केदाराद्दक्षिणापथे ॥
प्रतिष्ठितानि लिङ्गानि शतशोऽथ सहस्रशः ।
लोलार्काद्दक्षिणाशायां सर्वाशापूरकोऽर्चितः ॥ २५१ ॥
करन्धमेश्वरं लिङ्गं तत्प्रतीच्यां महाफलम् । तत्पश्चिमे महादुर्गा महादुर्गप्रभञ्जनी ॥
शुष्केश्वरश्चतद्याम्यांशुष्कयासरितार्चितम् । जनकेशस्तत्प्रतीच्यां शङ्कुकर्णस्तदुत्तरे
महासिद्धीश्वरं लिङ्गं तत्प्राच्यां सर्वसिद्धिदम् ।
सिद्धकुण्डे नरः स्नात्वा दृष्ट्वा सिद्धेश्वरं महत् ॥ २५४ ॥
सर्वासामेवसिद्धीनां पारंगच्छतिमानवः । शंकुकर्णेशवायव्येलिङ्गं वाडव्यसञ्ज्ञितम्
तदग्रे च विभाण्डेशः कहोलेशस्तदुत्तरे । तत्र द्वारेश्वरं लिङ्गं देवीद्वारेश्वरी शुभा ॥
तत्पूजनाद्भवेत्सिद्धिरानन्दारण्यवस्तिदा । रक्षकाश्च गणास्तत्र नानारूपायुधा मुने
तत्रैव हरिदीशश्च लिङ्गंकात्यायनं ततः । तत्पार्श्वे जाङ्गलेशश्च तत्पश्चान्मुकुटेश्वरः
तत्रैव कुण्डं विमलं सर्वयात्राफलप्रदम् । स्नात्वामुकुटकुण्डे च दृष्ट्वा वै मुकुटेश्वरम्
यात्रया सर्वलिङ्गानांयत्फलं तदवाप्यते । तपसश्चापियोगस्यसिद्धिदासाऽवनीपरा
मुने!शतं सहस्राणि तत्रलिङ्गानि सिद्धये । एकादिगुत्तरादेवि वाराणस्यांप्रियाममम
तत्रापि पञ्चायतने रतिर्मेनितरांप्रिये । उत्पत्तिस्थितिकालेऽपि तत्राहंसर्वदास्थितः
एवं यस्तुविजानाति नसपापैःप्रलिप्यते । सत्यंसत्यं पुनः सत्यंत्रिसत्यंनान्यतःप्रिये
शीघ्रं तत्रैव गन्तव्यं यदिक्छेन्मामकंपदम् । उद्देशमात्रंलिङ्गानि कथितानि मयामुने
द्विस्त्रिःकृत्वः स्थापितानि भक्त्या लिङ्गानि कानिचित् ।

न तानि पुनरुक्तानि श्रद्धयाऽर्च्यानि सर्वतः ॥ २६५ ॥

एतानि यानि लिङ्गानि यानि कुण्डानि येऽन्धवः ।

या वाप्यस्तानि सर्वाणि श्रद्धेयानि मनीषिभिः ॥ २६६ ॥

एतेषां दर्शनात्स्नानात्फलमत्रोत्तरोत्तरम् । अत्रत्यानाञ्चलिङ्गानांकूपानांसरसामपि

वापीनाञ्चापि मूर्त्तीनां कः सङ्ख्यातुं प्रभुर्भवेत् ।

आनन्दकाननस्थानि तृणान्यपि परं वरम् ॥ २६८ ॥

दिवौकसोपि नान्यत्र यत्पुनर्जन्मभाजनम् । सर्वलिङ्गमयीकाशी सर्वतीर्थैकजन्मभूः स्वर्गापवर्गयोर्दात्री दृष्टा देहान्तसेविता । मम प्रियतमा देवि त्वमेव तपसोबलात् स्वभावतस्त्वियं काशी सुखविश्रामभूर्मम । येकाश्यांनामगृह्णन्तियेनुमोदन्तएवहि

ते मे शाखविशाखाभाः स्कन्दनन्दिगजास्यवत् ।

त एव भक्ता मे देवि! तएव मम सेवकाः ॥ २७२ ॥

मुमुक्षवस्त एवाऽत्रये चानन्दवनौकसः । तपस्तप्तं महत्तैस्तु कृतं तैस्तुमहाव्रतम् ॥ तैश्च दत्तं महादानंये चानन्दवनौकसः । तेस्नातसर्वतीर्थावै तेऽखिलाध्वरदीक्षिताः तेचीर्णसर्वधर्माहि ये चानन्दवनौकसः । सुरासुरोरगनरा भूमिभाराय तेऽखिलाः ॥ वयस्यपीह चरमे येनानन्दवनौकसः । अन्त्यजोऽपि वरः काश्यांनान्यत्रश्रुतिपारगः

संसारपारगः पूर्वस्त्वन्त्यश्चान्त्यजतोऽप्यधः ॥

स एवनूनंसर्वज्ञःस एवत्र्यधिकेक्षणः । यः पार्थिवीं तनुं हित्वाकाश्यांधत्तेसुधामयीम् श्रुत्वाऽध्यायमिदं पुण्यं सर्वतीर्थरहस्यवत् । काशीदर्शनजं पुण्यंप्राप्नोतिनियतंनरः यः पठेदिममध्यायं प्रातः प्रातर्दिनेदिने । दृष्टानितेनसर्वाणितीर्थान्येतानिनान्यथा सर्वलिङ्गमयाध्यायंयोऽमुंनित्यंजपेत्सुधीः । न तं यमोन तं दूतानैनमंहोऽपि बाधते ब्रह्मयज्ञफलं तस्य जायते सुकृतात्मनः । यो जपेदमुमध्यायं शुचिस्तद्गतमानसः ॥

स स्नातः सर्वकुण्डेषु सर्ववाप्यम्बुपः स च ।

सर्वलिङ्गार्चकः सोऽत्र योऽमुमध्यायमाजपेत् ॥

किमन्यैर्बहुभिःस्तोत्रैरतिस्तोकफलप्रदैः । मत्प्रेमवद्भिरध्यायोजप्तव्योऽयंमहाफलः

महादानेषु दत्तेषु यत्फलं प्राप्यतेऽत्रवै । सकृज्जपान्महाध्यायादमुष्मात्तत्समाप्यते

स्नात्वा सर्वाणि तीर्थानि दृष्ट्वा लिङ्गान्यनेकशः ।

यत्फलं लभ्यते मर्त्यैस्तदेतज्जपनाद्ध्रुवम् ॥ २८५ ॥

इदमेव तपोऽत्युग्रमयमेवजपो महान् । काशीलिङ्गावलीनामाध्यायो जप्येतयन्मुने ममद्रुहेनास्तिकायवेदनिन्दारताय च । नदातव्यो न दातव्यो नदातव्योजपस्त्वयम् अध्यायस्यास्यजपनात्पापंब्रह्मवधोद्भवम् । अगम्यागमनञ्चापितथाभक्ष्यस्यभक्षणम् गुरुदाराभिचारोत्थं हेमस्तेयसमुद्भवम् । मातापितृवधाज्जातं गोभ्रूणहननोद्भवम् ॥ महापापानि पापानि ज्ञाताज्ञातानि भूरिशः । उपपापानिपापानिमनोवाक्कायजान्यपि विलयंयान्त्यशेषाणिनिःसन्देहं ममाऽऽज्ञया । पुत्रान्पौत्रान्धनंधान्यंकलत्रंक्षेत्रमेवच

मनः समीहितं सर्वं स्वर्गं मोक्षं सुखान्यपि ।

जप्त्वाऽध्यायमिमं विद्वान्प्राप्स्यत्येव न संशयः ॥ २९२ ॥

इतियावत्समाख्यातिदेवोदेवीपुरःकथाम् । तावन्नन्दीसमागत्यप्रणम्येतिव्यजिज्ञपत् जाता परिसमाप्तिश्चमहाप्रासादनिर्मितेः । सज्जीकृतोरथश्चायंब्रह्माद्यामिलिताःसुराः तार्क्ष्यगःपुण्डरीकाक्षोद्वारितिष्ठतिसानुगः । प्रतीक्षमाणोऽवसरंपुरस्कृत्यमुनीश्वरान् चतुर्दशसुलोकेषु ये ये तिष्ठन्तिसुव्रताः । तेनिशम्याद्यमिलिताःप्रावेशिकमहोत्सवम्

स्कन्द उवाच

इति नन्दिवचः श्रुत्वा देवो देवीसमायुतः । दिव्यंरथंसमारुह्यानिर्जगामत्रिविष्टपात्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड-
उत्तरार्धेक्षेत्रतीर्थवर्णनंनाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥

———

अष्टनवतितमोऽध्यायः

मुक्तिमण्डपगमनवर्णनम्

व्यास उवाच

शृणु सूत महाभागयथास्कन्देनभाषितः। महामहोत्सवःशम्भोःपृच्छतेकुम्भसम्भवे

स्कन्द उवाच

निशामयमहाप्राज्ञशम्भुप्रावेशिकीं कथाम्। त्रैलोक्यानन्दजननीं महापातकतङ्किनीम्
मन्दरादागतः शम्भुश्चैत्रे दमनपर्वणि। प्राप्याप्यानन्दगहनमितश्चेतश्चचार ह॥ ३॥
मोक्षलक्ष्मीविलासेऽथ प्रासादेसिद्धिमागते। देवोविरजसः पीठादन्तर्गेहं विवेश ह
ऊर्जशुक्लप्रतिपदि बुधराधासमायुजि। चन्द्रे सप्तमराशिस्थे शेषेषूच्चग्रहेषु च॥ ५॥
वाद्यमानेषु वाद्येषु प्रसन्नासु हरित्सु च। ब्राह्मणानां श्रुतिरवन्यक्कृतान्यरवान्तरे॥
प्रतिशब्दितभूर्लोकभुवर्लोकान्तराध्वनि। सर्वंप्रमुदितंचासीच्छम्भोःप्रावेशिकोत्सवे
जगुर्गन्धर्वनिकरा ननृतुश्चाप्सरो गणाः। चारणास्तु स्तुतिं कुर्युर्जहृषुर्देवतागणाः
ववुर्गन्धवहा वाता ववृषुः कुसुमैर्घनाः। सर्वे मङ्गलनेपथ्याः सर्वे मङ्गलभाषिणः॥
स्थावराजङ्गमाः सर्वे जाता आनन्दमेदुराः। सुरासुरेषु सर्वेषु गन्धर्वेषूरगेषु च॥
विद्याधरेषु साध्येषु किन्नरेषु नरेषु च। स्त्रीपुन्नातेषु सर्वेषु रेजुश्चत्वार एव च॥
निष्प्रत्यूहं चनितरां पुरुषार्थाः पदे पदे। धूपधूमभरैर्व्योम यद्रक्तन्तु तदा मुने॥१२॥

नाद्यापि नीलिमानं तं परित्यजति कर्हिचित्।
नीराजनाय ये दीपास्तदा सर्वे प्रबोधिताः॥ १३॥
तेषां ज्योतींषि खेऽद्यापि राजन्ते तारकाच्छलात्।
प्रतिसौधं पताकाश्च नानाकाराविचित्रिताः॥ १४॥

रम्यध्वजप्रभाधौतारेजुःप्रतिशिवालयम्। क्वचिद्गायन्तिगीतज्ञाःक्वचिन्नृत्यन्तिनर्तकाः

चतुर्विधानि वाद्यानि वाद्यन्ते च क्वचित्क्वचित्।

प्रत्यध्वं चन्दनरसच्छटापिच्छिलभूमयः॥ १६॥

हरितश्वेतमाञ्जिष्ठनीलपीतबहुप्रभाः। प्रत्यङ्गणं शुभाकारा रङ्गमालाश्चकाशिरे॥
रत्नकुट्टिमभूभागा गोपुराग्रेषु रेजिरे। सुधोज्ज्वलाहर्म्यमालाः सौधनामप्रपेदिरे
अचेतनान्यपि तदा चेतनानीव सम्बभुः। यानिकानीहकीर्त्यन्ते मङ्गलानि घटोद्भव
तेषामेव हिसर्वेषान्तत्तु जन्मदिवाभवत्। आगत्य देवदेवोऽथमुक्तिमण्डपमाविशत्

अथाभिषिक्तश्चतुराननेन महर्षिवृन्दैःसह देवदेवः।
शुभासनस्थः सहितो भवान्या कुमारवृन्दैः परितो वृतश्च॥ २२॥
रत्नैरसङ्ख्यैर्बहुभिर्दुकूलैर्माल्यैर्विचित्रैर्लसदिष्टगन्धैः।
अपूपुजन्देवगणा महेशं तदा मुदा ते च महोरगेन्द्राः॥ २२॥
रत्नाकरैश्चापि गिरीन्द्रवर्यैर्यथा स्वमन्यैरपि पुण्यधीभिः।
सम्पूजितः कुम्भज! तत्र शम्भुर्नीराजितो मातृगणैरथेशः॥ २३॥
सन्तोष्य सर्वान्प्रथमं मुनीन्द्रान्स्वैः स्वैर्हृदिस्थैश्च चिराभिलाषैः।
ब्रह्माणमाभाष्य शिवोऽथ विष्णुं जगाद सर्वामरवृन्दवन्द्यः॥ २४॥
इतो निषीदेति समानपूर्वन्त्वं मे समस्तप्रभुतैकहेतुः।
दूरेऽपि तिष्ठन्निकटस्त्वमेव त्वत्तो न कश्चिन्मम कार्यकर्ता॥ २५॥
त्वया दिवोदासनरेन्द्रवर्यः सदूपदेशैश्च तथोपदिष्टः।
यथा स सिद्धिं परमामवाप समीहितं मेनिखिलञ्च सिद्धम्॥ २६॥
विष्णो! वरं ब्रूहि य ईप्सितस्तेनादेयमत्रास्ति किमप्यहो ते।
इदं मयाऽऽनन्दवनं यदाप्तं हेतुस्तु तत्र त्वमसौ गणेशः॥ २७॥
न मे प्रियं किञ्चन विष्टपत्रये तथा यथेयं परसौख्यभूमिः।
वाराणसीब्रह्मरसायनस्य खनिर्ज्जनिर्यत्रनदीर्घशायिनाम्॥ २८॥
श्रुत्वेति वाक्यं जगदीशितुश्च प्रोवाच विष्णुर्वरदं महेशम्।
यदि प्रसन्नोऽसि पिनाकपाणे! तदा पदाद्दूरमहं न ते स्याम्॥ २९॥
श्रुत्वेति वाक्यं मधुसूदनस्य जगाद तुष्टो नितरां पुरारिः।

सदा मुरारे! मम सन्निधौ त्वं तिष्ठस्व निर्वाणरमाश्रयेऽत्र ॥ ३० ॥
आदावनाराध्य भवन्तमत्र यो मां भजिष्यत्यपि भक्तियुक्तः ।
समीहितं तस्य न सेत्स्यति ध्रुवं परात्परान्मेऽम्बुजचक्रपाणे ! ॥ ३१ ॥
सर्वत्र सौख्यं मम मुक्तिमण्डपे सन्तिष्ठ मानस्यभवेदिहाच्युत ।
न तत्तु कैलासगिरौ सुनिर्मले न भक्तचेतस्यपि निश्चलश्रियि ॥ ३२ ॥
निमेषमात्रं स्थिरचित्तवृत्तयस्तिष्ठन्ति ये दक्षिणमण्डपेऽत्र मे ।
अनन्यभावा अपि गाढमानसा न ते पुनर्गर्भदशामुपासते ॥ ३३ ॥
संस्नाय ये चक्रसरस्यगाधे समस्ततीर्थैकशिरोविभूषणे ।
क्षणं विशन्तीह निरीहमानसानिरेनसस्ते मम पार्षदा हि ॥ ३४ ॥
स्मरन्ति ये मामपवर्गमण्डपे किञ्चिद्यथाशक्ति ददत्यपि स्वयम् ।
शृण्वन्ति पुण्याश्च कथाः क्षणं स्थिरास्ते कोटिगोदानफलं भजन्ति ॥ ३५ ॥
उपेन्द्रतप्तानि तपांसि तैश्चिरं स्नाता हि ते चाऽखिलतीर्थसार्थकैः ।
स्नात्वेह ये वै मणिकर्णिकाह्रदे समासते मुक्तिजनाश्रयेक्षणम् ॥ ३६ ॥
तीर्थानि सन्तीह पदे पदे हरे! तुला क्व तेषां मणिकर्णिकायाः ।
कतीह नो सन्ति शुभाश्च मण्डपाः परं परोमुक्तिरमाश्रयोऽयम् ॥ ३७ ॥
कैवल्यमण्डपस्याऽस्य भविष्ये द्वापरे हरे !।
लोके ख्यातिर्भवित्रीयमेष कुक्कुटमण्डपः ॥ ३८ ॥

हरिरुवाच

भालनेत्रसमाख्याहि कथं निर्वाणमण्डपः । तथाख्यातिमसौगन्तायथादेवेनभाषितम्

देवदेव उवाच

महानन्दो द्विजोनाम भविष्योऽत्रचतुर्भुज । अग्रवेदी समाचारस्त्यक्ततीर्थप्रतिग्रहः
अदाम्भिकोऽक्रूरमनाः सदैवातिथिवल्लभः । अथ यौवनमासाद्य पितर्युपरते स हि
विषमेषु शरैस्तीव्रैः कारितस्त्वपदेपदम् । जहारकस्यचिद्भार्यां मैत्रीं कृत्वातुतेन वै
तया च प्रेरितोऽपेयं पपौचापि विमोहितः । अभक्ष्यभक्षणरुचिरभून्मदनमोहितः

वैष्णवान् धनिनोद्दृष्ट्वाक्षणं वैष्णववेषभृत् । शैवान्निन्दतिमूढात्मानरकत्राणकारणम्
शिवभक्तान्समालोक्य किञ्चिच्च परिदुत्सकान् ।
गर्हयेद्वैष्णवान्सर्वाञ्छैवलिङ्गोपजीवकः ॥ ४५ ॥
इति पाखण्डधर्मज्ञः सन्ध्यास्नानपराङ्मुखः ।
विशालतिलकः स्रग्वी शुद्धधौताम्बरोज्ज्वलः ॥ ४६ ॥
शखीचोपग्रहकरः सर्वेभ्योऽसत्प्रतिग्रही । तस्यापत्यद्वयं जातमुन्मत्तपथवर्तिनः ॥
एवं तस्य प्रवृत्तस्य कश्चित्पर्वतदेशतः । समागमिष्यति धनी तीर्थयात्रार्थसिद्धये
स्नात्वा स चक्रसरसि कथयिष्यति चेति वै ।
अहमस्मि धनोदित्सुर्जात्या चाण्डालसत्तमः ॥ ४९ ॥
अस्तिकश्चित्प्रतिग्राही यस्मै दद्यामहं धनम् ।
इति तस्य वचः श्रुत्वा कैश्चिच्चाङ्गुलिसञ्ज्ञया ॥ ५० ॥
उद्दिष्ट उपविष्टोऽसौ यो जपेद्ध्यानमुद्रया । त्वत्प्रतिग्रहंत्वत्तो ग्रहीष्यति न चेतरः
इति तेषां वचः श्रुत्वा स गत्वा तत्समीपतः ।
दण्डवत्प्रणिपत्याह तम्बभाषे तदाऽन्त्यजः ॥ ५२ ॥
मामुद्धरमहाविप्र! तीर्थं मे सफलीकुरु । किञ्चिद्वस्त्वस्ति मे तत्त्वंगृहाणानुग्रहं कुरु
अथाक्षमालिकां कर्णेकृत्वाध्यानंविसृज्यच । कियद्धनंतवास्ताहपप्रच्छकरसञ्ज्ञया
तच्च सञ्ज्ञां स वै बुद्ध्वा प्रोवाचाऽतिप्रहृष्टवान् ।
संतृप्तिर्यावता ते स्यात्तावद्दास्यामि नान्यथा ॥ ५५ ॥
इतितद्वचनं श्रुत्वात्यक्त्वामौनमुवाचह । सानन्दःसमहानन्दोनिःस्पृहोऽस्मिप्रतिग्रहे
परं तेऽनुग्रहार्थं तु करिष्यामिप्रतिग्रहम् । किञ्चमे वचनं त्वञ्चेत्करिष्यस्युत्तमोत्तम
यावदस्त्यखिलं वित्तं तन्मध्येऽन्यस्य कस्यचित् ।
न स्तोकमपि दातव्यं तदाऽऽदास्यामि नाऽन्यथा ॥ ५८ ॥

चाण्डाल उवाच

यावदस्तिमयानीतं विश्वेशप्रीतयेवसु । तावत्तुभ्यं प्रदास्यामि विश्वेशत्वंयतो मम

ये वसन्तीह विश्वेशराजधान्यां द्विजोत्तम! ।
क्षुद्रा क्षुद्रा जन्तुमात्रा विश्वेशांशास्त एव हि ॥ ६०
परोद्धरणशीला ये ये परेच्छाप्रपूरकाः । परोपकृतिशीला ये विश्वेशांशास्त एव हि
इतितद्वचनं श्रुत्वा प्रहृष्टेन्द्रियमानसः । उवाच पार्वतीयन्तं सोऽग्रजन्मान्त्यजंतदा
आयाहि दर्भानादेहि कुरूत्सर्गंत्वरान्वितः । तथेतिस चकाराशु पार्वतीयो महामनाः
विश्वेशः प्रीयताञ्चेति प्रोच्य यातो यथागतः ।
स च द्विजोद्विजैरन्यैर्धिक्कृतोऽपि वसन्निह ॥ ६४ ॥
बहिर्निर्गतमात्रस्तु बहुभिः परिभूयते । चाण्डालब्राह्मणश्चैष चाण्डालात्तधनस्त्वसौ
असावेवहिचाण्डालःसर्वलोकबहिष्कृतः । इत्थंतमनुधावन्ति थूत्कुर्वन्तःपरितोहरे
सचतद्भयतो गेहात्काकभीतदिवान्धवत् । ननिःसरेत्क्वचिदपि लज्जाकृति नतास्यकः
स एकदा सम्प्रधार्य गृहिण्या लोकदूषितः ।
जगाम कीकटान्देशांस्त्यक्त्वा वाराणसीं पुरीम् ॥ ६८ ॥
मध्येमार्गं सगच्छन्वै लक्षितस्तु सकाञ्चनः ।
अपि कार्पटिकान्तस्थः सरुद्धो मार्गरोधिभिः ॥ ६९ ॥
नीत्वा ते तमरण्यानीं तस्कराः सपरिच्छदम् ।
उल्लुण्ठ्य धनमादाय समालोच्य परस्परम् ॥ ७० ॥
प्रोचुर्भूरिधनं चैतज्जीर्यत्यस्मिन्न जीवति । असौधनी प्रयत्नेन वध्यः सपरिचारकः
संप्रधार्येति ते प्राहुः स्मर्तव्यं स्मरपान्थिक !।
त्वां वयं घातयिष्यामो निश्चितं सपरिच्छदम् ॥ ७२ ॥
निशम्येति मनस्येव कथयामास सद्द्विजः । अहो प्रतिगृहीतं मे यदर्थं वसुभूरिशः ॥
कुटुम्बमपि तन्नष्टं नष्टश्चापि प्रतिग्रहः । जीवितञ्चापि मे नष्टंनष्टा काशीपुरीस्थितिः
युगपत्सर्वमेवाऽऽशु नष्टं दुर्बुद्धिचेष्टया । नकाश्याम्मरणम्प्राप्तं तस्माद्दुष्टप्रतिग्रहात्
प्रान्ते कुटुम्बस्मरणात्तथा काशीस्मृतेरपि ।
चौरैर्हतोऽपि स तदा कीकटे कुक्कुटोऽभवत् ॥ ७६ ॥

सा कुक्कुटीसुतौ तौ तु ताम्रचूडत्वमापतुः ।
प्रान्ते काशीस्मरणतो जाता जातिस्मृतिः परा ॥ ७७ ॥
इत्थम्बहुतिथे काले गते कार्पटिकोत्तमाः ।
तस्मिन्नेवाऽध्वनि प्राप्ताश्चत्वारोयऽत्र कुक्कुटाः ॥ ७८ ॥
वाराणस्याः कथाम्प्रोच्चैः कुर्वन्तोऽन्योन्यमेव हि ।
काशीकथां समाकर्ण्य तदा ते चरणायुधाः ॥ ७९ ॥
जातिस्मृतिप्रभावेण तत्सङ्गेनतुनिर्गताः । तैश्च कार्पटिकश्रेष्ठैः पथि दृष्ट्वा कृपालुभिः
तन्दुलादिपरिक्षेपैः प्रापिताः क्षेत्रमुत्तमम् । तेतु क्षेत्रं समासाद्य चत्वारश्चरणायुधाः
चरिष्यन्तोऽत्र परितो मुक्तिमण्डपमुत्तमम् ।
जिताहारान्सनियमान्कामक्रोधपराङ्मुखान् ॥ ८२ ॥
प्रहासान्मत्कथालापान्लोभमोहविवर्जितान् ।
स्वर्धुनीस्नानसंक्लिन्नसुनिर्मलशिरोरुहान् ॥ ८३ ॥
मन्नामोच्चारणपरान्मत्कथार्पितसुश्रुतीन् । मद्वृत्तचित्तसद्वृत्तीन् दृष्ट्वा क्षेत्रनिवासिनः
मानयामासुरथ तान्कुक्कुटान्साधुवर्त्मनः ।
प्राक्तनाद्वासमायोगात्सम्प्रधार्य परस्परम् ॥
क्रमेणाऽऽहारमाकुञ्च्य प्राणांस्त्यक्ष्यन्ति चाऽत्र वै ॥ ८५ ॥
पश्यतांसर्वलोकानांविष्णोतेमदनुग्रहात् । विमानमधिरुह्याशु कैलासम्प्राप्यमत्पदम्
निर्विश्य सुचिरं कालं दिव्यान्भोगाननुत्तमान् ।
ततोऽत्र ज्ञानिनो भूत्वा मुक्तिम्प्राप्स्यन्ति शाश्वतीम् ॥ ८७ ॥
ततो लोकास्तदारभ्य कथयिष्यन्ति सर्वतः । मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः
चरित्रमपिवैतेषांयेस्मरिष्यन्तिमानवाः ।मुक्तिमण्डपमासाद्यश्रेयःप्राप्स्यन्तितेऽपिहि
इति यावत्कथां शम्भुर्भविष्यामग्रतोहरेः । अकरोत्तुमुलोनादो घण्टानां तावदुद्गतः
अथ नन्दिनमाहूय देवदेव उमाधवः । प्रोवाच नन्दिन्विज्ञायागत्य ब्रूहि कुतोरवः ॥
अथ नन्दीसमागत्य प्रोवाचवृषभध्वजम् । नमस्कृत्य प्रहृष्टास्यः प्रबद्धकरसम्पुटः ॥

नन्द्युवाच

देवदेवत्रिनयन! किमपूर्वम्ब्रवीमि ते । मोक्षलक्ष्मीविलासोऽत्र कैश्चित्कैश्चित्समर्च्यते
अथ स्मित्वाब्रवीच्छम्भुः सिद्धं नस्तु समीहितम् । उत्थाय देवदेवेशः सहदेव्या सुमङ्गलः

ब्रह्मणा हरिणा सार्धं ततोऽगाद्रङ्गमण्डपम् ।

स्कन्द उवाच

श्रुत्वाऽध्यायमिमम्पुण्यं परमानन्दकारणम् ।
नरः परां मुदम्प्राप्य कैलासम्प्राप्स्यति ध्रुवम् ॥ ९५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड-
उत्तरार्धे मुक्तिमण्डपगमनं नामाऽष्टनवतितमोऽध्यायः ॥ ९८ ॥

नवनवतितमोऽध्यायः

विश्वेश्वरलिङ्गमहिमाख्यानवर्णनम्

व्यास उवाच

शृणु सूत! यथा प्रोक्तं कुम्भजे शरजन्मना । देवदेवस्य चरितं विश्वेशस्य परात्मनः

अगस्त्य उवाच

सेनानीः कथयत्वम्मे ततो निर्वाणमण्डपात् । निर्गत्य देवो देवेन्द्रैः सहितः किञ्चकार ह

स्कन्द उवाच

मुक्तिमण्डपतः शम्भुर्ब्रह्मविष्णुपुरोगमः । शृङ्गारमण्डपम्प्राप्य यच्चकार वदामि तत्

प्राङ्मुखस्तूपदिश्येशः सहाऽस्माभिः सहेशया ।
ब्रह्मणाधिष्ठितः सव्ये वामपार्श्वेऽथ शार्ङ्गिणा ॥ ४ ॥

वीज्यमानो महेन्द्रेण ऋषिभिः परितो वृतः । गणैः पृष्ठप्रदेशस्थैर्जोषं तिष्ठद्भिरादरात्
उदायुधैः सेव्यमानश्चावसन्मानभूरिभिः । ब्रह्मणे विष्णवे शम्भुः पाणिमुत्क्षिप्य दक्षिणम्

दर्शयामास देवेशो लिङ्गम्पश्यत पश्यत । इदमेव परञ्ज्योतिरिदमेव परात्परम् ॥
इदमेव हि मे रूपं स्थावरञ्चातिसिद्धिदम् । एते पाशुपताः सिद्धा आबालब्रह्मचारिणः

जितेन्द्रियास्तपोनिष्ठाः पञ्चार्थज्ञाननिर्मलाः ।
भस्मकूटशया दान्ताः सुशीला ऊर्ध्वरेतसः ॥ ९ ॥

लिङ्गार्चनरता नित्यमनन्येन्द्रियमानसाः । सदैव वारुणाग्नेयस्नानद्वयसुनिर्मलाः ॥
कन्दमूलफलाहाराः परतत्त्वार्पितेक्षणाः । सत्यवन्तो जितक्रोधा निर्मोहा निष्परिग्रहाः

निरीहा निष्प्रपञ्चाश्च निरातङ्का निरामयाः ।
निर्भगा निरुपायाश्च निःसङ्गा निर्मलाशयाः ॥ १२ ॥

निस्तीर्णोदग्रसंसारा निर्विकल्पा निरेनसः । निर्द्वन्द्वा निश्चितार्थाश्च निरहङ्कारवृत्तयः
सदैव मे महाप्रीता मत्पुत्रा मत्स्वरूपिणः । एते पूज्या नमस्याश्च मद्बुद्ध्या मत्परायणैः

अर्चितेष्वेष्वहम्प्रीतो भविष्यामि न संशयः ।
अस्मिन्वैश्वेश्वरे क्षेत्रे सम्भोज्याः शिवयोगिनः ॥ १५ ॥
कोटिभोज्यफलं सम्यगेकैकपरिसङ्ख्यया ।
अयं विश्वेश्वरः साक्षात्स्थावरात्मा जगत्प्रभुः ॥ १६ ॥

सर्वेषां सर्वसिद्धीनां कर्ता भक्तिजुषामिह । अहङ्कदाचिद्दृश्यः स्यामदृश्यः स्यां कदाचन
आनन्दकानने चात्र स्वैरन्तिष्ठामि देवताः । अनुग्रहाय सर्वेषां भक्तानामिह सर्वदा ॥

स्थास्यामि लिङ्गरूपेण चिन्तितार्थफलप्रदः ।
स्वयम्भून्यस्वयम्भूनि यानि लिङ्गानि सर्वतः ॥
तानि सर्वाणि चाऽऽयान्ति द्रष्टुं लिङ्गमिदं सदा ॥ १९ ॥

अहं सर्वेषु लिङ्गेषु तिष्ठाम्येव न संशयः । परं त्वियम्परा मूर्तिर्मम लिङ्गस्वरूपिणी ॥
येन लिङ्गमिदं दृष्टं श्रद्धया शुद्धचक्षुषा । साक्षात्कारेण तेनाऽहं दृष्ट एव दिवौकसः
श्रवणादस्य लिङ्गस्य पातकं जन्मसञ्चितम् । क्षणात्क्षयति शृण्वन्तु देवा ऋषिगणैः सह
स्मरणादस्य लिङ्गस्य पापं जन्मद्वयार्जितम् । अवश्यं नश्यति क्षिप्रं मम वाक्यान्न संशयः
एतल्लिङ्गं समुद्दिश्य गृहान्निष्क्रमणक्षणात् । विलीयते महापापमपि जन्मत्रयार्जितम्

दर्शनादस्य लिङ्गस्य हयमेधशतोद्भवम्। पुण्यं लभेत नियतं ममानुग्रहताऽमराः

स्वम्भुवोऽस्य लिङ्गस्य मम विश्वेशितुः सुराः।

राजसूयसहस्रस्य फलं स्यात्स्पर्शमात्रतः ॥ २६ ॥

पुष्पमात्रप्रदानाच्चचुलुकोदकपूर्वकम् । शतसौवर्णिकम्पुण्यं लभते भक्तियोगतः ॥

पूजामात्रं विधायाऽस्य लिङ्गराजस्य भक्तितः । सहस्रहेमकमलपूजाफलमवाप्यते

विधाय महतीम्पूजां पञ्चामृतपुरःसराम् । अस्य लिङ्गस्य लभते पुरुषार्थचतुष्टयम्

वस्त्रपूतजलैर्लिङ्गं स्नापयित्वाममामराः! । लक्षाश्वमेधजनितं पुण्यमाप्नोति सत्तमः॥

सुगन्धचन्दनरसैर्लिङ्गमालिप्य भक्तितः । आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्दमैः

सामोदधूपदानैश्च दिव्यगन्धाश्रयो भवेत् । घृतदीपप्रबोधैश्च ज्योतीरूपविमानगः ॥

कर्पूरवर्तिदीपेन सकृद्दत्तेन भक्तितः । कर्पूरदेहगौरश्रीर्भवेद्भालविलोचनः ॥ ३३ ॥

दत्त्वा नैवेद्यमात्रं तु सिक्थे सिक्थे युगं युगम् ।

कैलासाद्रौ वसेद्धीमान्महाभोगसमन्वितः ॥ ३४ ॥

विश्वेशे परमान्नंयो दद्यात्साज्यं सशर्करम् । त्रैलोक्यन्तर्पितन्तेन सदेवपितृमानवम्

मुखवासन्तुयो दद्याद्दर्पणञ्चारुचामरम् । उल्लोचं सुखपर्यङ्कन्तस्यपुण्यफलम्महत् ॥

संख्यासागररत्नानां कथंचित्कर्तुमिष्यते । मुखवासादिदानस्यकः संख्यामत्रकारयेत्

पूजोपकरणद्रव्यं योघण्टागडुकादिकम् । भक्त्या मे भवने दद्यात्सवसेदत्रमेऽन्तिके

यो गीतवाद्यनृत्यानामेकं मत्प्रीतये व्यधात् ।

तस्याग्रतो दिवारात्रम्भवेत्तौर्यत्रिकं महत् ॥ ३६ ॥

चित्रलेखनकर्मादि प्रासादे मेऽत्र कारयेत् ।

यः सचित्रान्महाभोगान्भुङ्क्ते मत्पुरतः स्थितः ॥ ४० ॥

सकृद्विश्वेश्वरं नत्वा मध्येजन्मसुधीर्नरः । त्रैलोक्यवन्दितपदो जायतेवसुधापतिः

यस्तु विश्वेश्वरं दृष्ट्वा ह्यन्यत्रापिविपद्यते । तस्य जन्मान्तरे मोक्षोभवत्येवनसंशयः

विश्वेशाख्या तु जिह्वाग्रे विश्वनाथकथा श्रुतौ ।

विश्वेशशीलनं चित्ते यस्य तस्य जनिः कुतः ॥ ४३ ॥

लिङ्गं मे विश्वनाथस्य दृष्ट्वा यश्चानुमोदते । स मे गणेषु गण्येत महापुण्यबलाश्रितः

नित्यं विश्वेशविश्वेशविश्वनाथेति यो जपेत् ।

त्रिसन्ध्यं तं सुकृतिनं जपाम्यहमपि ध्रुवम् ॥ ४५ ॥

ममापीदं महालिङ्गं सदा पूज्यतमं सुराः । तस्मात्सर्वप्रयत्नेन पूज्यं देवर्षिमानवैः ॥

यैर्न विश्वेश्वरो दृष्टोयैर्न विश्वेश्वरःस्मृतः । कृतान्तदूतैस्ते दृष्टास्तैःस्मृतागर्भवेदना

यैरिदम्प्रणतं लिङ्गं प्रणतास्ते सुरासुरैः । यस्यैकेन प्रणामेन दिक्पालपदमल्पकम्

दिक्पालपदतः पातः पातः शिवनतेर्नहि ॥ ४८ ॥

शृण्वन्तु देवर्षिगणाः समस्तास्तथ्यं ब्रुवे तच्च परोपकृत्यै ।

न भूर्भुवःस्वर्गमहर्जनान्तर्विश्वेशतुल्यं क्वचिदस्ति लिङ्गम् ॥ ४९ ॥

न सत्यलोकेन तपस्यहो सुरा ! वैकुण्ठकैलासरसातलेषु ।

तीर्थं क्वचिद्वै मणिकर्णिकासमं लिङ्गं च विश्वेश्वरतुल्यमन्यतः ॥ ५० ॥

न विश्वनाथस्य समं हि लिङ्गं न तीर्थमन्यन्मणिकर्णिकातः ।

तपोवनं कुत्रचिदस्ति नान्यच्छुभं ममाऽऽनन्दवनेनतुल्यम् ॥ ५१ ॥

वाराणसीतीर्थमयी समस्ता यस्यास्तु नामाऽपि हि तीर्थतीर्थम् ।

तत्रापि काचिन्मम सौख्यभूमिर्महापवित्रा मणिकर्णिकाऽसौ ॥ ५२ ॥

स्थानादमुष्मान्मम राजसौधात्प्राच्यां मनागीशसमाश्रितायाम् ।

सव्येपसव्ये च कराःक्रमेण शतत्रयी चाऽपि शतद्वयी च ॥ ५३ ॥

हस्ताः शतम्पञ्च सुरापगायामुदीच्यवाच्योर्मणिकर्णिकेयम् ।

सारस्त्रिलोक्याः परकोशभूमिर्यैः सेविता ते मम हृच्छया हि ॥ ५४ ॥

अस्मिन्ममाऽऽनन्दवने यदेतल्लिङ्गं सुधाधाम सुधामधाम ।

आसप्तपातालतलात्स्वयम्भुसमुत्थितम्भक्तकृपावशेन ॥ ५५ ॥

येऽस्मिञ्जनाः कृत्रिमभावबुद्ध्या लिङ्गं भजिष्यन्ति च हेतुवादैः ।

तेषां हि दण्डः पर एष एव न गर्भवासाद्विरमन्ति ते ध्रुवम् ॥ ५६ ॥

यद्यद्धितं स्वस्य सदैव तत्तल्लिङ्गेऽत्र देयं मम भक्तिमद्भिः ।

इहाऽप्यमुत्रापिन तस्य सङ्क्षयो यथेह पापस्य कृतस्य पापिभिः ॥ ५७ ॥
दूरस्थितैरप्यधिबुद्धिभिर्यैर्लिङ्गं समाराधि ममेदमत्र ।
मयैव दत्तैः शुभवस्तुजातैर्निःश्रेयसः श्रीर्वसयेत्सततस्तान् ॥ ५८ ॥
शृणुष्व विष्णो! शृणु सृष्टिकर्तः! शृण्वन्तु देवर्षिगणाः !समस्ताः ।
इदं हि लिङ्गं परसिद्धिदं सताम्भेदो मनागत्र न मत्सकाशतः ॥ ५६ ॥
अस्मिन्हि लिङ्गे ऽखिलसिद्धिसाधने समर्पितं यैः सुकृतार्जितं वसु ।
तेभ्योऽतिमात्राखिलसौख्यसाधनं ददामि निर्वाणपदं सुनिर्भयम् ॥ ६० ॥
उत्क्षिप्य बाहुं त्वसकृद् ब्रवीमि त्रयीमयेऽस्मिंस्त्रयमेव सारम् ।
विश्वेशलिङ्गं मणिकर्णिकाम्बुकाशीपुरी सत्यमिदन्त्रिसत्यम् ॥ ६१ ॥
उत्थाय देवोऽथ सशक्तिरीशस्तस्मिन्हि लिङ्गे कृतचारुपूजः ।
ययौ लयं ते च सुराजयेति जयेति चोक्त्वा नुनुवुस्तमीशम् ॥ ६२ ॥

स्कन्द उवाच

क्षेत्रस्य मैत्रावरुणे! विमुक्तस्य महामते !। प्रभावस्यैकदेशोऽयंकथितः कल्मषापहः
तवाग्रे तु यथाबुद्धि काशीविश्लेषतापिनः ।
अचिरेणैव कालेन काशीम्प्राप्स्यस्यनुत्तमा ॥ ६४ ॥
अस्ताचलस्य शिखरम्प्राप्तवानेषभानुमान् । तवापिहिममाप्येषमौनस्यसमयोऽभवत्

व्यास उवाच

श्रुत्वेति स मुनिः सूत ! सन्ध्योपास्त्यै विनिर्गतः ।
प्रणम्यौमेयमसकृल्लोपामुद्रासमन्वितः ॥ ६६ ॥
रहस्यम्परिविज्ञाय क्षेत्रस्य शशिमौलिनः ।
अगस्त्यो निश्चितमनाः शिवध्यानपरोऽभवत् ॥ ६७ ॥
आनन्दकाननस्येह महिमानम्महत्तरम् । कोऽत्र वर्णयितुं शक्तः सूत! वर्षशतैरपि ॥
यथा देव्यै समाख्यायि शिवेन परमात्मना ।
तथा स्कन्देन कथितं माहात्म्यं कुम्भसम्भवे ॥ ६९ ॥

तवाग्रे च समाख्यातंशुकादीनाञ्चसत्तम! । इदानीम्प्रष्टुकामोसिकिन्तत्पृच्छवदामिते
श्रुत्वाध्यायमिमम्पुण्यंसर्वकल्मषनाशनम् । समस्तचिन्तितफलप्रदम्मर्त्योभवेत्कृती

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखण्ड-उत्तरार्धेविश्वेश्वरलिङ्गमहिमाख्यानंनामनवनवतितमोऽध्यायः ॥ ६६ ॥

शततमोऽध्यायः

समनुक्रमणिकाध्यायवर्णनम्

सूत उवाच

इदं स्कान्दमहं श्रुत्वा काशीखण्डमनुत्तमम् ।
नितराम्परितृप्तोऽस्मि हृदि चाऽपि विधारितम् ॥ १ ॥
अनुक्रमणिकाध्यायं तथा माहात्म्यमुत्तमम् ।
पाराशर्य! समाचक्ष्व यथा पूर्वमिदम्भवेत् ॥ २ ॥

व्यास उवाच

सूतावधेहिधर्मात्मञ्जातूकर्ण्यनिशामय । शुकवैशम्पायनाद्याः शृण्वन्त्वपि चबालकाः
अनुक्रमणिकाध्यायं माहात्म्यञ्चाऽपि खण्डजम् ।
प्रवक्ष्याम्यघनाशाय महापुण्यप्रवर्धनम् ।
विन्ध्यनारदसम्वादः प्रथमे परिकीर्तितः ॥ ४ ॥
सत्यलोकप्रभावश्च द्वितीयः समुदाहृतः ॥ ५ ॥
अगस्तेराश्रमपदे देवानामागमस्ततः । पतिव्रताचरित्रञ्च प्रस्थानं कुम्भसम्भुवः ॥
तीर्थप्रशंसा चततःसप्तपुर्यस्ततःस्मृताः । संयमिन्याःस्वरूपञ्चब्रध्नलोकस्ततःपरम्
इन्द्राग्न्योर्लोकसम्प्राप्तिस्ततश्च शिवशर्मणः ।
अग्नेः समुद्भवस्तस्मात्क्रव्याद्वरुणसम्भवः ॥ ८ ॥

गन्धवत्यलकापुर्योरीशयोस्तु समुद्भवः। चन्द्रलोकपरिप्राप्तिः शिवशर्मद्विजन्मनः
उडुलोककथा तस्मात्ततः शुक्रसमुद्भवः। माहेयगुरुसौरीणांलोकानां वर्णनन्ततः॥
सप्तर्षीणां ततोलोका ध्रुवस्यचतपस्ततः। ततोध्रुवपदप्राप्तिर्ध्रुवलोकस्थितिस्ततः
दर्शनं सत्यलोकस्य तस्य वै शिवशर्मणः। चतुर्भुजाभिषेकश्चनिर्वाणं शिवशर्मणः

स्कन्दागस्त्योश्च सम्वादो मणिकर्ण्याः समुद्भवः।
ततस्तु गङ्गामाहात्म्यं ततो दशहरास्तवः॥ १३॥

प्रभावश्चापि गङ्गायागङ्गानामसहस्रकम्। वाराणस्याः प्रशंसाऽथ भैरवाविर्भवस्ततः

दण्डपाणेः समुद्भूतिर्ज्ञानवाप्युद्भवस्ततः।
आख्यानञ्च कलावत्याः सदाचारस्ततः परम्॥ १५॥

ब्रह्मचारिप्रकरणं ततः स्त्रीलक्षणानि च। कृत्याकृत्यप्रकरणमविमुक्तेशवर्णनम्॥
ततो गृहस्थधर्माश्च ततोयोगनिरूपणम्। कालज्ञानंततःप्रोक्तं दिवोदासस्यवर्णनम्
काश्याश्चवर्णनन्तस्माद्योगिनीवर्णनन्ततः। लोलार्कस्यसमाख्यानमुत्तरार्ककथाततः
साम्बादित्यस्य महिमाद्रुपदादित्यशंसनम्। ततस्तुगरुडाख्यानमरुणार्कोदयस्ततः
दशाश्वमेधिकं तीर्थं मन्दराच्च गणागमः। पिशाचमोचनाख्यानं गणेशप्रेषणन्ततः॥
मायागणपतेश्चाऽथढुण्ढिप्रादुर्भवस्ततः। विष्णुमायाप्रपञ्चोऽथदिवोदासविसर्जनम्
ततः पञ्चनदोत्पत्तिर्बिन्दुमाधवसम्भवः। ततोवैष्णवतीर्थानां माहात्म्यपरिवर्णनम्

प्रयाणम्मन्दरात्काशीं वृषभध्वजशूलिनः।
जैगीषव्येन सम्वादो ज्येष्ठस्थाने महेशितुः॥ २३॥

ततः क्षेत्ररहस्यस्य कथनम्पापनाशनम्। अथातः कन्दुकेशस्य व्याघ्रेशस्य समुद्भवः
ततः शैलेश्वरकथारत्नेशस्य च दर्शनम्। कृत्तिवासः समुत्पत्तिस्ततश्चायतनागमः॥
देवतानामधिष्ठानं दुर्गासुरपराक्रमः। दुर्गायाविजयश्चातथततओँङ्कारवर्णनम्॥२६॥
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः। त्रिलोचनप्रभावोऽथ केदाराख्यानमेव च॥
ततो धर्मेशमहिमा ततः पक्षिकथाशुभा। ततोविश्वभुजाख्यानं दुर्दमस्य कथा ततः
ततो वीरेश्वराख्यानं वीरेशमहिमा पुनः। गङ्गातीर्थैश्च संयुक्ता कामेशमहिमाततः।

विश्वकर्मेशमहिमा दक्षयज्ञसमुद्भवः।
सत्या देहविसर्गश्च ततो दक्षेश्वरोद्भवः॥ ३०॥

ततो वै पार्वतीशस्यमहिम्नः परिकीर्तनम्। गङ्गेशस्याथ महिमानर्मदेशसमुद्भवः॥

सतीश्वरसमुत्पत्तिरमृतेशादिवर्णनम्।
व्यासस्य हि भुजस्तम्भो व्यासशापविमोक्षणम्॥ ३२॥

क्षेत्रतीर्थकदम्बश्चमुक्तिमण्डपसङ्कथा। विश्वेशाविर्भवश्चाऽथ ततो यात्रापरिक्रमः
एतदाख्यानशतकं क्रमेणपरिकीर्तितम्। यस्य श्रवणमात्रेण सर्वखण्डश्रुतेः फलम्॥

अनुक्रमणिकाध्यायेऽप्यस्ति यात्रापरिक्रमः।

सूत उवाच

यात्रापरिक्रमम्ब्रूहिजनानांहितकाम्यया। यथावत्सिद्धिकामानांसत्यवत्याःसुतोत्तम

व्यास उवाच

निशामय महाप्राज्ञ लोमहर्षण वच्मि ते। यथा प्रथमतो यात्रा कर्तव्यायात्रिकैर्मुदा
सचैलमादौ संस्नायचक्रपुष्करिणीजले। सन्तर्प्यदेवान्सपितृन्ब्राह्मणांश्चतथार्थिनः

आदित्यं द्रौपदीं विष्णुं दण्डपाणिम्महेश्वरम्।
नमस्कृत्य ततो गच्छेद्द्रष्टुंढुण्ढिविनायकम्॥ ३८॥

ज्ञानवापीमुपस्पृश्यनन्दिकेशं ततोऽर्चयेत्। तारकेशंततोऽभ्यर्च्य महाकालेश्वरं ततः

ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका॥ ४०॥
दैनन्दिनी विधातव्या महाफलमभीप्सुभिः।
ततो वैश्वेश्वरी यात्रा कार्या सर्वार्थसिद्धिदा॥ ४१॥

द्विसप्तायतनानाञ्चकार्या यात्रा प्रयत्नतः। कृष्णाम्प्रतिपदम्प्राप्यभूतावधियथाविधि
अथवाप्रतिभूतश्च क्षेत्रसिद्धिमभीप्सुभिः। तत्ततीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्चनः

मौनेन यात्रां कुर्वाणः फलम्प्राप्नोति यात्रिकः।
ओँङ्कारम्प्रथमम्पश्येन्मत्स्योदर्यां कृतोदकः॥ ४४॥

त्रिविष्टपं महादेवंततो वै कृत्तिवाससम्। रत्नेशञ्चाऽथ चन्द्रेशंकेदारञ्चततो व्रजेत्

धर्मेश्वरश्च वीरेशं गच्छेत्कामेश्वरं ततः ।
विश्वकर्मेश्वरंचाऽथ मणिकर्णीश्वरं ततः ॥ ४६ ॥
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्चयेत् । एषा यात्रा प्रयत्नेन कर्तव्याक्षेत्रवासिना
यस्तु क्षेत्रमुषित्वा तु नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपतिष्ठन्ते क्षेत्रोच्चाटनसूचकाः ॥ ४८ ॥
अष्टायतनयात्रान्या कर्तव्या विघ्नशान्तये । दक्षेशः पार्वतीशश्चतथा पशुपतीश्वरः ॥
गङ्गेशो नर्मदेशश्च गभस्तीशः सतीश्वरः । अष्टमस्तारकेशश्च प्रत्यष्टमिविशेषतः ॥
दृश्यान्येतानि लिङ्गानि महापापोपशान्तये । अपरापि शुभायात्रा योगक्षेमकरीसदा
सर्वविघ्नोपहन्त्री चकर्तव्या क्षेत्रवासिभिः । शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्वकम्
स्नानंतुसङ्गमे कृत्वाद्रष्टव्यःसङ्गमेश्वरः । स्वलीनतीर्थेसुस्नातः पश्येत्स्वलीनमीश्वरम्
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्योमध्यमेश्वरः । पश्येद्धिरण्यगर्भेशंतत्र तीर्थेकृतोदकः
मणिकर्ण्यां ततः स्नात्वा पश्येदीशानमीश्वरम् ।
ततः कूपमुपस्पृश्य गोप्रेक्षमवलोकयेत् ॥ ५५ ॥
कापिलेयह्रदे स्नात्वा वीक्षेत वृषभध्वजम् । उपशान्तशिवं पश्येत्तत्कूपविहितोदकः
पञ्चचूडाह्रदे स्नात्वाज्येष्ठस्थानं ततोऽर्चयेत् । चतुःसमुद्रकूपेतु स्नात्वादेवंसमर्चयेत्
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते । शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ॥
दण्डखातेततःस्नात्वाव्याघ्रेशम्पूजयेत्ततः । शौनकेश्वरकुण्डेतुस्नानंकृत्वाततोऽर्चयेत्
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः । क्वचिन्न जायते भूयः संसारे दुःखसागरे
समारभ्य प्रतिपदंयावत्कृष्णा चतुर्दशी । एतत्क्रमेण कर्तव्यान्येतदायतनानि वै ॥
इमां यात्रांनरः कृत्वानभूयोऽप्यभिजायते । अन्या यात्रा प्रकर्तव्यैकादशायतनोद्भवा
आग्नीध्रकुण्डे सुस्नातः पश्येदाग्नीध्रमीश्वरम् ।
उर्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ॥ ६३ ॥
आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः । लाङ्गलीशमथालोक्य ततस्तुत्रिपुरान्तकम्
ततोमनः प्रकामेशं प्रीतिकेशमथो व्रजेत् । मदालसेश्वरं तस्मात्तिलपर्णेश्वरं ततः ॥

यात्रैकादशलिङ्गानामेषा कार्या प्रयत्नतः । इमां यात्रां प्रकुर्वाणो रुद्रत्वं प्राप्नुयान्नरः
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् । शुक्लपक्षेतृतीयायांयायात्राविष्वगृद्धिदा
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्मालिकां व्रजेत् ।
ज्येष्ठावाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्चयेत् ॥ ६८ ॥
सौभाग्यगौरी सम्पूज्याज्ञानवाप्यांकृतोदकैः । ततः शृङ्गारगौरीञ्चतत्रैवच कृतोदकः
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ।
सुस्नातो ललितातीर्थे ललितामर्चयेत्ततः ॥ ७० ॥
स्नात्वाभवानीतीर्थे भवानीं परिपूजयेत् । मङ्गला चततोभ्यर्च्याबिन्दुतीर्थकृतोदकैः
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ।
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन्मुक्तिजन्मनि ॥ ७२ ॥
नदुःखैरभिभूयेत इहामुत्रापि कुत्रचित् । कुर्यात्प्रतिचतुर्थीह यात्रां विघ्नेशितुःसदा
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे । भौमे भैरवयात्रा च कार्या पातकहारिणी
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि । तथैव रविसप्तम्यां सर्वविघ्नोपशान्तये ॥
नवम्यामथवाष्टम्यांचण्डीयात्राशुभामता । अन्तर्गृहस्यवै यात्राकर्तव्याप्रतिवासरम्
प्रातःस्नानं विधायाऽऽदौ नत्वा पञ्चविनायकान् ।
नमस्कृत्वाऽथ विश्वेशं स्थित्वा निर्वाणमण्डपे ॥ ७७ ॥
अन्तर्गृहस्य यात्रां वै करिष्येऽघौघशान्तये ।
गृहीत्वा नियमं चेति गत्वाऽथ मणिकर्णिकाम् ॥ ७८ ॥
स्नात्वामौनेन चागत्यमणिकर्णीशमर्चयेत् । कम्बलाश्वतरौनत्वा वासुकीशंप्रणम्यच
पर्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ । ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ॥
ततो वै सोमनाथञ्च वाराहञ्च ततो व्रजेत् । ब्रह्मेश्वरं ततोनत्वानत्वाऽगस्तीश्वरंततः
कश्यपेशं नमस्कृत्य हरिकेशवनं ततः । वैद्यनाथं ततो दृष्ट्वा ध्रुवेशमथ वीक्ष्य च ॥
गोकर्णेश्वरमभ्यर्च्य हाटकेशमथोव्रजेत् । अस्थिक्षेपतडागे च दृष्ट्वा वै कीकसेश्वरम्
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः । चित्रघण्टां प्रणम्याऽथ ततःपशुपतीश्वरम्

पितामहेश्वरं गत्वा ततस्तु कलशेश्वम् । चन्द्रेशस्त्वथ वीरेशोविद्येशोऽग्नीशएवच
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः । सेनाविनायकश्चाथ द्रष्टव्यःसर्वविघ्नहृत्
वसिष्ठवामदेवौ च मूर्तिरूपधरावुभौ । द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशिनौ

सीमाशिनायकश्चाऽथ करुणेशं ततो व्रजेत् ।
त्रिसन्ध्येशो विशालाक्षी धर्मेशो विश्वबाहुका ॥
आशाविनायकश्चाऽथ वृद्धादित्यस्ततः पुनः ॥ ८८ ॥

चतुर्वक्त्रेश्वरं लिङ्गं ब्राह्मीशस्तु ततः परः । ततो मनःप्रकामेशईशानेशस्ततःपरम्
चण्डीचण्डीश्वरौ दृश्यौ भवानीशङ्करौ ततः । दुण्ढिप्रणम्यचततोराजराजेशमर्चयेत्
लाङ्गलीशस्ततोभ्यर्च्यस्ततस्तु नकुलीश्वरः । परान्नेशमथो नत्वा परद्रव्येश्वरं ततः
प्रतिग्रहेश्वरं वापि निष्कलङ्केशमेव च । मार्कण्डेयेशमभ्यर्च्यतत अप्सरसेश्वरम् ॥

गङ्गेशोऽर्च्यस्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥ ९२ ॥

दण्डपाणिं महेशं च मोक्षेशं प्रणमेत्ततः । वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥
विनायकांस्ततःपञ्च विश्वनाथं ततो व्रजेत् । ततोमौनंविसृज्याथमन्त्रमेतमुदीरयेत्
अन्तर्गृहस्य यात्रेयं यथावद्यामया कृता । न्यूनातिरिक्तया शम्भुःप्रीयतामनयाविभुः
इति मन्त्रं समुच्चार्य क्षणं वै मुक्तिमण्डपे । विश्रम्य यायाद्भवनंनिष्पापःपुण्यवान्नरः
सम्प्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्वतः । कार्यायात्राप्रयत्नेनमहापुण्यसमृद्धये
नभस्यपञ्चदश्याञ्च कुलस्तम्भंसमर्चयेत् । दुःखंरुद्रपिशाचत्वं न भवेद्यस्यपूजनात्

श्रद्धापूर्वमिमा यात्राः कर्तव्याः क्षेत्रवासिभिः ।
पर्वस्वपि विशेषेण कार्या यात्राश्च सर्वतः ॥ १०० ॥
न बन्ध्यं दिवसं कुर्याद्विना यात्रां क्वचित्कृती ।
यात्रा द्वयं प्रयत्नेन कर्तव्यं प्रतिवासरम् ॥ १०१ ॥
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्ध्रुवम् ।
यस्य बन्ध्यंदिनं यातं काश्यां निवसतः सतः ॥ १०२ ॥

निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन् ।
सदष्टः कालसर्पेण स दृष्टो मृत्युना स्फुटम् ॥ १०३ ॥

समुष्टस्तत्र दिवसे विश्वेशो यत्रनेक्षितः । सर्वतीर्थेषुसस्नौससर्वयात्रांव्यधात्सच

मणिकर्ण्यां तु यः स्नातो यो विश्वेशं निरैक्षत ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
दृश्यो विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका ॥ १०५ ॥

व्यास उवाच

सूत! स्कान्दमिदं श्रुत्वा काशीमाहात्म्यमुत्तमम् ।
नरो न निरयं याति कृत्वाऽप्यघसहस्रकम् ॥ १०६ ॥
स्नात्वा सर्वाणि तीर्थानि यच्छ्रेयः समुपार्ज्यते ।
काशीखण्डस्य श्रवणात्तत्स्यात्सूत! न संशयः ॥ १०७ ॥
दत्त्वा दानानि सर्वाणि कृत्वा यज्ञाननेकशः ।
यत्पुण्यं लभ्यते मर्त्यैस्तदेतच्छ्रवणाद् ध्रुवम् ॥ १०८ ॥
तप्त्वा तपांसि चोग्राणि प्राप्यते यन्महत्फलम् ।
श्रवणादस्य खण्डस्य लभते तन्न संशयः ॥ १०९ ॥

अधीत्यचतुरोवेदान्साङ्गान्यत्फलमाप्यते । काशीखण्डंसमाकर्ण्यतत्फलंलभ्यतेनरैः
गयायांश्राद्धदानाच्चयथातृप्यन्तिपूर्वजाः । तथैतच्छ्रवणान्नृणां तृप्नुवन्तिपितामहाः
तैश्चसर्वपुराणानिश्रुतानिस्थिरबुद्धिभिः । काशीखण्डंश्रुतंयैश्चसर्वेषांश्रेयसांपदम्

श्रुताश्च सर्वधर्मास्तैर्महापुण्यैकराशिभिः ।
श्रुतं यैः स्थिरचेतोभिः काशीमाहात्म्यमुत्तमम् ॥ १३ ॥

इदमेव हि देवेज्या परमा परिकीर्तिता । जपेत्तत्खण्डमखिलं श्रोतव्यंश्रद्धया द्विजाः

शृणुयादेकमपि य आख्यानं काशिखण्डजम् ।
श्रुतानि तेन सर्वाणि धर्मशास्त्राण्यसंशयम् ॥ १५ ॥

महाधर्मैकजननंमहार्थप्रतिपादकम् । कारणं सर्वकामातेः काशीखण्डमिदं स्मृतम् ॥

एतच्छ्रवणतः पुंसां कैवल्यं नैव दूरतः । तुष्यन्ति सर्वे पितरः श्रुत्वैतत्खण्डमुत्तमम्
प्रीणन्त्यमर्त्याः सर्वेऽपि ब्रह्मविष्णुशिवादयः ।
मुनयः परिमोदन्ते माद्यन्ति सनकादयः ॥ ११८ ॥
हृष्टः सर्वो भवेदेव भूतग्रामश्चतुर्विधः । महिमश्रवणादस्माद्वाराणस्या न संशयः ॥
य इदं श्रावयेद्विद्वान्समस्तं त्वर्धमेव वा । पादमात्रंतदर्धं वात्वेकं व्याख्यानमुत्तमम्
स नमस्यः प्रयत्नेन सम्पूज्यस्त्विष्टदेववत् । तस्मैदेयंप्रयत्नेन विश्वेशप्रीतये सदा
तस्मिंस्तुष्टेहिसन्तुष्टोविश्वेशोनात्रसंशयः । यत्रैतत्पठ्यतेखण्डंपरानन्दसमाश्रयम्
न तत्र प्रभवेत्कश्चिदमङ्गलसमुद्भवः । य इदं शृणुयाद्विद्वान्यश्चेदं श्रावयेत्सुधीः ॥
यः पठेदपि पुण्यात्मा ते सर्वे रुद्रमूर्तयः । य एतत्पुस्तकं रम्यं लेखयित्वासमर्पयेत्
अखिलानि पुराणानि तेन दत्तानि नान्यथा ।
अत्राऽऽख्यानानि यावन्ति श्लोका यावन्त एव हि ॥ १२५ ॥
तथा पदानि यावन्ति वर्णा यावन्त एव हि ।
यावन्त्यपि च मात्राणि यावत्यः पदपङ्क्तयः ॥ १२६ ॥
गुणे सूत्राणि यावन्ति यावन्तः पटतन्तवः ।
चित्ररूपाणि यावन्ति रम्यपुस्तकसञ्चके ॥ १२७ ॥
तावद्युगसहस्राणि दाता स्वर्गेमहीयते । एतद्द्वादशकृत्वोयः शृणुयात्खण्डमुत्तमम्
ब्रह्महत्याऽपि तस्याऽऽशु नश्येच्छम्भोरनुग्रहात् ।
अपुत्रः शृणुयाद्यस्तु सुस्नातः श्रद्धयान्वितः ॥ १२९ ॥
तस्यपुत्रो भवत्येव शम्भोराज्ञाप्रभावतः । किम्बहूक्तेन सूतेह यस्य यस्य मनोरथः ॥
यो यस्तं तं स सदा श्रुत्वैतत्प्राप्नुयात्कृती ।
शृणुयाद् दूरदेशेऽपि यः काशीखण्डमुत्तमम् ॥ १३१ ॥
स काशीवासपुण्यस्य भाजनं स्याच्छिवाज्ञया ।
एतच्छ्रवणतः पुंसां सर्वत्र विजयो भवेत् ॥
सौभाग्यञ्चाऽपि सर्वत्र प्राप्नुयान्निर्मलाशयः ॥ १३२ ॥

यस्यविश्वेश्वरस्तुष्टस्तस्यैतच्छ्रवणे मतिः । जायते पुण्ययुक्तस्य महानिर्मलचेतसः
सर्वेषां मङ्गलानाञ्च महामङ्गलमुत्तमम् । गृहेऽपि लिखितम्पूज्यं सर्वमङ्गलसिद्धये ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखण्ड-
उत्तरार्धे प्रस्तुतग्रन्थानुक्रमणिकानाम शततमोऽध्यायः ॥ १०० ॥

ॐ समाप्तश्चेदंकाशीखण्डम्

सरस्वतीश्रुतमहतां महीयताम् ।

शम्भूयात्

——:※:——